[1] It is to be noted that it is because of its unique capacity to apprehend objects (including mental entities) in their particularities that perception is accorded a primacy as compared to other means of knowledge like inference etc. Knowledge of objects obtained through inference and testimony, however sure and dependable, remains after all mediate and general. Knowledge by perception on the other hand is direct, immediate and specific. It is well known, for example, that knowledge of (specific) colours (white, red, etc.) can *only* be had by perception, not by inference or verbal testimony. Indeed YD asserts that operation of the senses (ear, etc.) is of primary importance as contrasted e.g. with *antaḥkaraṇa*, which is secondary, precisely because of their capacity to know things directly (*tatra ca mukhyā śrotrādivṛttiḥ. kasmāt? sākṣādviṣayagrahaṇasāmarthyāt:* YD, *kā.* 5). Similarly, only inner perception can give an idea of the intensity of a particular feeling (say, sadness) at the time I have it.

[2] YD gives no gloss upon SK's definition of *anumāna* – *liṅgaliṅgipūrvakam anumānam* – perhaps because it thinks no explication is needed thereof. Its own conception of *anumāna* however leaves no one in doubt that it agrees with other commentators' views; for according to it too, it is after knowing, through perception, one of the two invariably associated objects, and making this knowledge the basis for the (subsequent) ascertainment of one of the associated, that inference results (YD, p. 31; also p. 69) The object of *anumāna* is of course not an individual or particular but a generic feature (*sāmānya*).

Sāmānyatodṛṣṭa inference (i.e., one based on observation of general correlation) is one in which, after observing the invariable association or concomitance of two objects, one comes to know (infer) the invariable association of the objects of the same group at some other place and time (YD, p. 89). Now this would appear to be a common characteristic of all kinds of inference, and is not exclusive to this kind. In fact, if the *Kārikā* is any guide, this type of inference is meant for inferring entities that are (in principle) imperceptible (SK 6). The distinguishing feature of this (type of) inference is, therefore, this that we infer the coexistence of certain things on the basis of general correlation, e.g. that a sound *(śabda)* is noneternal beause it is produced[2] (YD, p. 91).

It may here be mentioned that adopting a different classification, Vācaspati in his *Tattva-kaumudī* (*kā.* 5) treats of the above three kinds in terms of a two-fold distinction: (1) *vīta,* which includes *pūrvavat* and *sāmānyatodṛṣṭa,* as affirmative, and (2) *avīta,* which incldues *śeṣavat,* as negative. YD, on the other hand, as we noticed above, divides *sāmānyatodṛṣṭa* itself into *vīta* and *avīta* on grounds of difference of application (*tasya prayogamātrabhedād dvaividhyam:* YD, *kā.* 6, p. 94) and defines them accordingly (ibid.). However, from their application it appears that all the three – *pūrvavat, śeṣavat* and *sāmānyatodṛṣṭa* – are to be included under *vīta* and *avīta.*

---

[1] Larson and R.S. Bhattacharya, *Sāṃkhya: The Dualist Tradition in Indian Philosophy*, p. 243.

[2] Ibid. In a similar way, on the basis of common observation that composites such as bed, chair, etc. are meant for another (*saṃghātaparārthatvāt*: *kā.* 17), it is concluded that composites such as (human) body also must be meant for another, which latter cannot but be a non-composite entity such as consciousness or self.

As regards the question of the members or components of a syllogistic reasoning, though Īśvarakṛṣṇa himself is silent about it, different commentators give different views. *Māṭharavṛtti,* for example, refers to two traditions, one which believes in three-membered logical reasoning, and another which favours a five-membered one. Other commentators regard *anumāna* as having the well-known five members accepted in Nyāya. The three members mentioned by Māṭhara are: *pratijñā* (thesis), *hetu* (reason) and *udāharaṇa* (exemplification). (The three-membered syllogism is generally accepted by the Buddhist logicians.) Though whether the Sāṃkhya took the three-membered inferential format from the Buddhists remains undecided, some scholars[1] think that it was introduced by the Sāṃkhya and Pāśupatas before the Buddhist philosopher Vasubandhu. *Yuktidīpikā* however supports neither view and puts forth ten members, which are: *jijñāsā* (desire to know), *saṃśaya* (doubt), *prayojana* (purpose), *śakyaprāpti* (conjecturing various possible alternatives), *saṃśayavyudāsa* (removal of doubts), *pratijñā* (thesis), *hetu* (reason), *dṛṣṭānta* (example), *upasaṃhāra* (application), and *nigamana* (conclusion). The first five may well be considered conditions of an inference. All these members, however, are of *vīta* inference, not of *avīta,* for whose members there is no indication in the text. (For illustration of these members see YD, *kā.* 6, p. 95 ff., and for full information regarding the members see YD, *kā.* 6.) It is notable that among Sāṃkhya works, YD is the only available text which refers to the ten-membered format, though its author explicity says that even though Īśvarakṛṣṇa (the *sūtrakāra)* himself makes no mention of these components of inference, some of the commentators collected them in their works, and they constitute an authority (YD, *upodghāta,* p. 6). It would seem that even though some of the above-cited members may not seem to be logically necessary for proving a conclusion, they yet are serviceable so far as the discussion and explication of a philosophical problem is concerned. Indeed YD itself calls the first five *vyākhyāṅga* and the latter five *parapratipādanāṅga* (p. 94).[1]

---

[1] E.g. P. Chakravarti, *Origin and Development of the Sāṃkhya System of Thought,* p. 192.

(c) Verbal Testimony (Āpta-vacana or Śabda)

Verbal testimony (as reliable authority) embraces all knowledge derived from incontrovertible verbal statement; it is not confined to what is regarded as scriptures or *śruti*. YD defines *apta-vacana* as "ascertainment of the extremely imperceptible objects through someone whose words are valid (*āpta-vacanaṃ tu pramāṇabhūtadvārako 'tyantaparokṣe 'rthe niścayaḥ*: YD, *kā.* 4, p. 69). Under *kā.* 6, YD explicates that statements not made by human beings, i.e., the Vedas, as well as statements made by detached persons like Manu are to be included under reliable authority. YD there explains the word *āpta* thus: The verbal testimony is the statement of one who is free from (the defect like) attachment, etc., made in respect of object(s), whose cause is not known (*āptā nāma rāgādiviyuktasyāgṛhyamāṇakāraṇā parārthā vyāhṛtiḥ*: YD, *kā.* 6, p. 91).

Īśvarakṛṣṇa of course says (*kā.* 6) that reliable authority gives knowledge concerning obscure matters which go beyond the range of even inference by analogy. On the whole it seems that regardless of its including, in theory, verbal testimony under the title *pramāṇas*, and regardless of its commentators including Vedas too under reliable authority, the *Sāṃkhyakārikā's* concrete relation to *śruti* is not very clear, as compared, for example, to systems like Vedānta. Rarely does the *Kārikā* seem to make scriptures the reference point for any one of its main philosophical doctrines, explicitly or implicitly. Practically, it is the Sāṃkhya tradition which is invoked as reliable authority as and when the occasion demands.

It remains to mention that YD betrays no concern with the problem of the nature of truth in respect of any species of valid cognition. Nor do for that matter commentators like Gauḍapāda and Māṭhara. It would be a fair surmise to say that on this question SK and its commentaries, including YD, are in agreement with the other realistic schools of Indian philosophy.

---

[1] With regard to the latter five – *pratijña*, *hetu*, etc. – recall Nyāya's *parārthānumāna* and its five members.

Liberation (*Apavarga* or *Kaivalya*)

As the reader must have learnt by now, bondage, from which liberation is sought, essentially signifies such non-discriminative knowledge (*a-viveka*) as consists in *not* knowing that the *puruṣa* has nothing to do with the manifest and unmanifest,[1] and which therefore causes the unconscious *buddhi* (*prakṛti*) to act as if it is endowed with sentience and the indifferent self as if it is the real agent. It is the ignorance-spawned assumption of each other's (basic) roles that is at the root of (ceaseless) human suffering. And this fateful assumption cannot take place unless there is in the first place proximity (or association) between *puruṣa* and *prakṛti*.[2] What is more, however, is – and here we invoke a different Sāṃkhya source than SK – that the *puruṣa-prakṛti* association itself is considered a consequence of a more radical ignorance called *ajñāna* or *aviveka* or *viparyaya* (cf. SS 1.55). The question which is apt to arise in this connection – namely, which is prior, the (radical) *aviveka* or *puruṣa-prakṛti* association – is declared irrelevant on the ground that this *aviveka* is really *anādi* or beginningless (cf. SS 6.12).[3]

---

[1] It is important to remember that this *aviveka* or *ajñāna*, as it is called by YD (*kā.* 44, p. 274), is, unlike in Advaita Vedānta, real, and not illusory. Sāṃkhya, or for that matter even Yoga, does not therefore admit such a thing as 'illusion of illusion'. I think Sāṃkhya is basically right in this, for to say that it is an illusion that there is illusion would, besides being question-begging, be self-contradictory.

[2] Indeed at one place YD calls *prakṛti* itself misery, *puruṣa's* association with which is bondage (*duhkhaṃ ca pradhānaṃ .. tena yadā puruṣasya saṃyogas tadā'viśuddhitvam asya*: YD, *kā.* 2, pp. 43-44)

[3] I feel, however, that the question is not illegitimate: though it may not arise from the temporal point of view, *logically* the question does arise. It also arises because termination of this *aviveka* is envisioned, even considered possible. It cannot be called similar to the question how God or *prakṛti* or *puruṣa* came into existence, which similarity is what the traditional answers often have tended to assume while dismissing it and similar questions. It may here be noted that the Sāṃkhya resort to *anāditva* of certain entities – *avidyā, vāsanā, prakṛit-puruṣa* association – is not exclusive to it. The idea is a basic presupposition with Indian thought and culture, and many philosophic notions revolve round it. In Sāṃkhya's allied system Yoga it is said that the association of seer (*draṣṭṛ:puruṣa*) and the object of sight or awareness (*dṛṣya: buddhi*) which is the cause of the beginningless pain (*heyahetuḥ*) is from time without beginning (cf. YS 2.17 and *Bhāṣya on it*).In Vedānta, it has for example been argued by Vācaspati Miśra (*Bhāmati*, B.S.S.B. 1.1.1) and Vidyāraṇya (*Vivaraṇa-prameya-saṃgraha*) that the process that unites the idea of empirical ego, which is superimposed, and the *adhyāsa* on *ātman*, which is the support for

And similarly beginningless is the relation between *prakṛti* and *puruṣa* (SS 3.62, 6.67-69). The proclivity towards error or non-discrimination, which is a basic *bhāva* of *buddhi*, is, in other words, a relatively permanent condition under which ordinary human experience takes place, thus leading naturally towards the experience of bondage and pain (...*tasmād duḥkhaṃ samāsena: kā.* 55). The author of *Yuktidīpikā*, admitting bondage to be the result of *viparyaya* or *ajñāna* (cf. *viparyayād iṣyate bandhaḥ: kā.* 44) speaks of three kinds of bondage: (1) *prakṛti-bandha* (natural bondage), (2) *dakṣiṇā-bandha* (acquired bondage), and (3) *vaikārika-bandha* (worldly bondage) (YD, *kā.* 44). When ignorance is conjoined with non-attachment (*vairāgya*),[1] then dissolution in (eight) *prakṛtis*[2] results and is known as *prakṛtibandha.* When ignorance is conjoined with passionate attachment to perceptible objects and those taught in the scriptures, then worldly bondage results, which is known as *dakṣiṇābandha.* And when ignorance is conjoined with pursuit of vari-

---

such superimposition, has been *anādi* or beginningless, like the mutual interdependence of seed and sprout. Similarly the *anāditva* of *saṃsāra* has been invoked by Bādarāyaṇa as the ground for absolving the Creator of all accusations of partiality or cruelty (cf. e.g. *Brahmasūtras* 2.1.34-36). Śaṅkara not only affirms but makes use of the *anāditva* idea as an answer to a number of questions at different places. Thus e.g. he says (B.S.S.B. 2.1.36) that there cannot be a body without *karma* (for the body is born as a result of actions done in a previous birth) and that there is no *karma* without a body (for without a body there can be no actions, which, considering their moral nature, require new reincarnations in which are received the deserts which we deserve.) Now if we accept that *saṃsāra* has had a beginning or some first moments in time, we should incur the defect of *itaretarāśrya* (reciprocal dependence). The defect however does not hold if we assume the *saṃsāra* to be beginningless by application of the norm called "the seed and the sprout" (*bījāṃkura*). (In his *Tattvakaumudī* (SK 52) also Vāscaspati resorts to the analogy *bījāṃkura* to explain the beginninglessness of the two-fold evolution of *bhāvasarga* and *liṅgasarga.*) In this light the question whether it was body or *karma* which came first does not arise and becomes irrelevant. No less than Hinduism, Buddhism too asserts the beginninglessness of the reincarnations' cycle, *saṃsāra.* The *pratīyasamutpāda* which later on comes to be represented as a wheel is said to have been turning around since beginningless eternity, and will go on turning round till it is stopped through (the practice of) Buddhist teachings. It thus comes to symbolize human existence, and is designated by another word: *bhāvacakra.*

[1] 'Non-attachment' here means improper non-attachment.

[2] The eight *prakṛtis* or causes are: *mūla-prakṛti, mahat, ahaṃkāra,* and five *tanmātras,* which produce dissimilar objects.

ous kinds of lordly (worldly) powers (*aṇimā*, *mahimā*, etc.), then acquired bondage results, which is known as *vaikārikabandha.*[1] To the question that if non-attachment etc. are the causes of the three

---

[1] Other commentators like Māṭhara, Vācaspati, etc. differ from the author of YD in their interpretation of these bondages. Again, all other commentators analyze these bondages in their gloss on *kā.* 44, while YD does so in its gloss on *kā.* 45, thinking this *kārikā* to be concerned with the three bondages. To refer to Māṭhara's view, *prakṛtibandha* according to him afflicts those for whom materiality (*prakṛti*) is the highest principle (*prakṛti-vādins*). *Dakṣiṇābandha* is the bondage of those who aspire to heavenly goals through sacrifice (*karmavādins*); while *vikārabandha* binds those who take the products of materiality to be spirit and hence their goal (*vikāratva-vādins*). Vācaspati (on SK 44) regards those in *prākṛtikabandha* as ones who 'worship' or 'contemplate' the 'material principle' (*prakṛtim upāsate*) as spirit. These are the *prakṛtilayas*, and Vācaspati defines them as those merged in *avyakta.* Those merged in other *tattvas* he regards as being in *vaikṛtika* bondage. He identifies them with *videhas.* (See also *TV* under YS 1.19.) Those in *dakṣiṇā* bondage are the ones who perform action influenced by desire and who are unaware of the true nature of the *puruṣa* principle (*puruṣatattva-anabhijño*). Some scholars hazard the opinion that *prakṛtibandha* referred to above is nothing other than '*prakṛtilaya*'. This receives support from the fact that under *kā.* 45, when the question is asked from which disposition (*bhāva*) follows *prakṛtibandha*, the answer, given by YD in the form of gloss upon the SK line "*vairagyāt prakṛtilayaḥ*", mentions that it (*prakṛtilaya*) ensues from non-attachment, and that this *prakṛtilaya* is what is called *prakṛtibandha.* A little later, under the same *kārikā*, YD comments that non-attachment and 'merging in *prakṛti*' 'comes under the section of contentments' (*tuṣṭikāṇḍānupatitam*: p. 275). This seems to suggest a close relation between contentments and the *prakṛtilaya* stage. Some *tauṣṭikas,* it appears, are *prakṛtilayas.*

All in all it seems some individuals regard nothing (like spirit) as existing beyond *prakṛti* and so look upon 'merger in *prakṛti*' as the *summum bonum* of human experience, and not discriminative knowledge, which latter is the true Sāṃkhyan position. Under *kā.* 50, YD describes *prakṛtilaya* thus:

> That Yogin, having attained the state of prakṛti and having seen everything as not devoid of that [*prakṛti*] because of the greatness of that [*prakṛti*] and thus believing in the absence of any category other than that, regards that state only as the state of isolation (*kaivalya*). After being separated from the body, he gets merged in *prakṛti* and then returns back. In the state of that satisfaction, the other seven causes – *mahat, ahaṃkara* and five subtle elements – should be seen as restricted from production. As in this case of the one believing in the cosmic matter as ultimate truth there is no knowledge of *puruṣa*, similarly, in the case of others there is no knowledge of the higher principles. Those who consider *mahat* (intellect) as the highest do not have knowledge about *prakṛti.* Those who consider ego as the highest principle

bondages, then absence of knowledge, *ajñana*, being a different disposition (*bhāvāntara*), should have a different result, YD answers that *ajñana* is the root-cause. The absence of knowledge acts as a (universal) cause for all the dispositions devoid of knowledge, since all the latter are caused by it (*ajñāna*).[1] And this *ajñāna*, as said above, is non-realization of the difference between (the respective natures of) *prakṛti* and *puruṣa*. Its opposite, *jñāna*, on the other hand, is the ultimate discrimination[2] (*viveka*), on *buddhi's* part, that the two realities, *prakṛti* and *puruṣa*, are distinct existents (*guṇapuruṣāntaropalabdhi*: YD, p. 219).[3]

---

have no knowledge about intellect, and those who consider the subtle elements as the highest principles have no knowledge about ego. (For Sanskrit text see YD, p. 284).

The emphasis here is that because of the ubiquitous nature and greatness of *prakṛti*, nothing seems to be devoid of this principle, and when one does not believe in (the existence of) a further principle, one is content (*tuṣṭa*) with the realization of the ultimate material principle. In YD on *kā*. 50, an opponent asserts that *tuṣṭa* and *tamas* (*avidyā*) are non-different because their definition is the same. Both *tuṣṭa* and *tamas* are understood as the belief that one of the eight creative principles is the soul (*aṣṭāsu prakṛtiṣv ātmabuddhis tuṣṭiḥ. tad eva ca tama ity avidyākāṇḍe nirdiṣṭam*: p. 285). YD denies this similarity and clarifies that *tamas* actually obtains when one, even though taught about the material and the *puruṣa* principles, decides that the material principle is superior to the latter. *Tuṣṭi* (contentment), on the other hand, is the satisfaction the yogin feels in knowing the material principle and consequently does not want to know – for he attaches no importance to it – the spiritual principle (*puruṣa*). YD also says that while ignorance (*avidyā*) abounds in *tamas guṇa*, contentment abounds in *sattvaguṇa*. And so on (p. 285).

[1] *jñānavarjitānāṃ hi bhāvānāṃ yat phalaṃ tatrājñānaṃ mūlam, tannimittatvāt sarveṣām* (YD, *kā*. 45, p. 276).

[2] This ultimate discrimination, though called knowledge, is in truth, a *sui generis* knowledge, which should not be confounded with rational discursive knowledge nor with any of the rational processes such as inference, argumentation etc. It also has nothing to do with intuition or any other empirical knowledge; nor does it bear any relation to erudition or accumulation of knowledge, however great. This knowledge, if at all it should be called "knowledge", is a state in which the seer-*puruṣa* frees himself from everything that is external to him, regains his original and inherent nature and isolates himself in his own splendid absoluteness.

[3] This *jñāna* or *sattvapuruṣānyatākhyāti* as it is called, arises from constant undeviating contemplation, on the part of the self (*puruṣa*), that it is the witness of the effect, instrument of activity and acts (*kārya-karaṇa-kriyā-sākṣī-puruṣaḥ*: YD, *kā*. 59, p. 309); that all these – the elemental objects (head, hands etc.), the products of egoism (ears etc. and organs of speech), as also mind, I-principle and *buddhi* – are not

There follows then dissociation of these two realities, and perfect isolation (*kaivalya*) of the *puruṣa*. This dissociation is thus portrayed in SK 66: The indifferent *puruṣa* thinks, "I have seen her (*prakṛti*)" and the other, i.e. *prakṛti*, thinks, "I have been seen" and ceases its operations. In that state, creation becomes purposeless, even though the *prakṛti-puruṣa* conjunction remains. This portrayal is important, for even though the *puruṣa* is otherwise considered passive and indifferent, the *kārikā* attributes a thought to him, as it does to *prakṛti*, however figurative the whole thing may appear. *Yuktidīpikā* regards *jñāna* alone to be the true means of liberation, not non-attchment or non-attachment coupled with *jñāna*. Glossing upon *jñānena cā'pavargaḥ*(*kā.* 44), it observes: *caśabdo'vadhāraṇārthaḥ. jñanenaivā 'pavargaḥ, na bhāvāntareṇa iti. yad uktam anyair ācāryaiḥ "vairāgyāt puruṣakaivalyaṃ jñānavairāgyābhyāṃ ca" iti tat pratiṣiddhaṃ bhavati* (YD, *kā.* 44, p. 273). Non-attachment (*vairāgya*) may lead to knowledge (*jñāna*) which may then lead to *kaivalya*, but it cannot itself result in liberation. But then the question is, why *vairāgya* cannot fill this bill? YDkāra faces this question squarely and answers that *vairāgya*, though it is the opposite of *rāga* (attachment) and so can annihilate the latter, it cannot cause separation of *prakṛti* and *puruṣa*, which alone constitutes *kaivalya*, for the simple reason that the *puruṣa-prakṛti* association is not spawned by *rāga*. This association, says YD, is really caused by *ajñāna* and so naturally it devolves upon *jñāna*, which is the opposite of *ajñāna*, to extirpate it and thus cause disentanglement of *prakṛti* and *puruṣa*, which is another name for knowledge. It is important to note that *Yuktidīpikā* compares *kaivalya* with the Buddhist *nirvāṇa*, in which no condition for attribute exists (*etac cā 'vasthānaṃ bauddhair nirupadhiśeṣa-nirvāṇalakṣaṇam apavargo vyākhyātaḥ*: YD, *kā.* 68, p. 312). In this state, called Brahman by YD, all the properties of the *guṇa*-constituents disappear.

On separation of the body from the self in the event of the impulse provided to it by the previous *saṃskāras* (subliminal impressions) coming to an end, *dharma* and *adharma* (merit and demerit respectively), which have fulfilled their purpose, get merged into *buddhi*; the material elements which cause the formation of the body get merged

---

myself, for they possess opposite nature; nor I am the eight *prakṛtīs* (p. 309). The knowledge takes the form: I am not, nothing is mine, not-I (*nā'smi*, *na me, nā 'ham ity apariśeṣam*: *kā.* 64).

in all the gross elements; the gross elements into the subtle elements, the senses and the subtle elements into egoism, egoism into intellect (*buddhi*) and intellect into the unmanifest *prakṛti*. The spirit then abides in its aloneness and never ever returns to the cycle of rebirth and redeath.[1]

---

[1] We say "abides", for the passage from a conditioned or sāṃsārik existence to the existence of an absolute 'alone' self is no mutation of or change in the self, it being unchanging. We can attribute liberation – as also (cosmic) experience – to the self only by "external predication", that is, according as it *appears* from our conditioned and cosmic standpoint. Experience and liberation have their cause in *buddhi's* function in so far as this cosmic function acts as a screen in respect of the witness-selves situated on the phenomenal plane. The real self perceived from its own standpoint does not depend upon prākṛtic realities to realize its own nature. The act of tearing off the screen is, like the act of 'conditional' knowing, an operation that belongs to the *prākṛtic* organism called *buddhi*.

युक्तिदीपिका

युक्तिदीपिका

प्रथममाह्निकम्

ओं श्री गणेशाय नमः। ओं नमः शिवाय। ओं।[1]

वीतावीतविषाणस्य पक्षतावनसेविनः[2] ।
प्रवादाः सांख्यकरिणः सल्लकीषण्डभङ्गुराः[3] ॥

ऋषये परमायार्कमरीचिसमतेजसे[4] ।
संसारगहनध्वान्तसूर्याय गुरवे नमः ॥ 1॥

तत्त्वं जिज्ञासमानाय विप्रायासुरये मुनिः ।
यदुवाच महत्तन्त्रं दुःखत्रयनिवृत्तये ॥ 2॥

न तस्याधिगमः शक्यः[5] कर्तुं वर्षशतैरपि ।
भूयस्त्वादिति संचिन्त्य मुनिभिः सूक्ष्मबुद्धिभिः॥ 3॥

ग्रन्थेनाल्पेन संक्षिप्य तदार्षमनुशासनम् ।

---

1. P begins with the salutation : ओं श्री गणेशाय नमः ओं नमः शिवाय ॥ ओं
   K ओं स्वस्त्यस्तु ॥ ओं नमः शिवाय ॥ ओं
   A ओं नमः कमलदलविपुलनयनाभिरामाय नारायणाय ॥ श्री गणेशाय नमः ॥
   D ओं श्री साम्बसदाशिवाय नमः। अथ। युक्तिदीपिकाभिधाना सांख्यसप्ततिपद्धतिः ॥ Chakravarti (1.1) includes the salutation found in P in the text part of his edition. Pandeya, who consults P and A, includes that of neither in the text part of his edition. Wezler (1.2) includes the salutation found in K (Wezler's KP.) in the text part of his edition.
2. A नानातीवनसेविनः Omitting पक्षता, D simply reads तावनसेविनः preceded by five dots (.....).
3. Chakravarti (1.3) reads शल्लकी°. D gives this śloka in smaller letters and starts numbering from the next śloka. Wezler (1.3-4), following D, puts it within square brackets, meaning to delete it. In A this śloka is numbered No. 1. P and K start with this śloka, though it is not, unlike the rest of the following ślokas, numbered there. We too mean to delete it.
4. A परमार्यार्क°
5. A शक्याः

निबद्धममलप्रज्ञैः शिष्याणां हितकाम्यया ॥ 4॥

प्रतिपक्षाः पुनस्तस्य पुरुषेशाणु[1]वादिनः ।
वैनाशिकाः प्राकृतिका विकारपुरुषा[2]स्तथा ॥ 5॥

तेषामिच्छाविघातार्थमाचार्यैः सूक्ष्मबुद्धिभिः ।
रचिताः स्वेषु तन्त्रेषु विषमास्तर्कगह्वराः ॥ 6॥

वीतावीतविषाणस्य पक्षतावनसेविनः ।
प्रवादाः सांख्यकरिणः सल्लकीषण्डभङ्गुराः[3] ॥ 7॥

शिष्यैर्दुरवगाहा[4]स्ते तत्त्वार्थभ्रान्तबुद्धिभिः[5] ।
तस्मादीश्वरकृष्णेन संक्षिप्तार्थमिदं कृतम् ॥ 8॥

सप्तत्याख्यं प्रकरणं सकलं शास्त्रमेव वा ।
यस्मात् सर्वपदार्थानामिह व्याख्या करिष्यते ॥ 9॥

प्रधानास्तित्वमेकत्वमर्थवत्त्वमथान्यता ।
पारार्थ्यञ्च तथाऽनैक्यं वियोगो योग एव च(1) ॥ 10॥

शेषवृत्तिरकर्तृत्वं चूलिकार्थाः[6] स्मृता दश ।
विपर्ययः पञ्चविधस्तथोक्ता नव तुष्टयः[7](2) ॥ 11॥

करणानाम[8]सामर्थ्यमष्टाविंशतिधा मतम् ।
इति षष्टिः पदार्थानामष्टाभिः सह सिद्धिभिः(3) ॥12॥

यथाक्रमं लक्षणतः कार्त्स्न्येनेहाभिधास्यते ।
तस्मादतः शास्त्रमिदमलं नानात्वसिद्धये[9] ॥ 13॥

---

1. A °शानु°
2. A विकाराः पुरुषास् Raghavan (14.1) suggests विकारिपुरुषाः.
3. A does not repeat this śloka here.
4. P दुरवगाह्यास्
5. D तत्त्वार्थभ्रान्त्रबुद्धिभिः, sec.m. तत्त्वार्थभ्रान्तबुद्धिभिः
6. Chakravarti (2.3) reads मूलिकार्थाः.
7. P तुष्टर्थाः स्मृतार्यश विपर्ययः । पंचविधस्तथो यः
8. A कारणानां
9. Raghavan (14.1) emends it as नानार्थसिद्धये.

---

(1) See सां॰ त॰ कौ॰, का॰ 72

(2) See सां॰ त॰ कौ॰, का॰ 72

(3) See, for instance, सा॰ त॰ कौ॰, का॰ 72. Vācaspati quotes there the three ślokas 10–12 with the introductory remark तथा च राजवार्त्तिकम्.

अल्पग्रन्थमनल्पार्थं सर्वैस्तन्त्रगुणैर्युतम् ।
पारमर्षस्य तन्त्रस्य बिम्बमादर्शगं[1] यथा ।। 14।।
तस्य व्याख्यां करिष्यामि यथान्यायोपपत्तये ।
कारुण्यादप्ययुक्तां तां प्रतिगृह्णन्तु[2] सूरयः ।। 15।।

आह, करिष्यति भवान्[3] व्याख्याम् । इदं त्वादावुपन्यस्तं सर्वैस्तन्त्रगुणैर्युतमिदं तन्त्रमिति । के तन्त्रगुणाः, कियन्तो वेति?

उच्यते—

सूत्रप्रमाणावयवोपपत्तिरन्यूनता संशयनिर्णयोक्तिः ।
उद्देशनिर्देशमनुक्रमश्च संज्ञोपदेशाविति[4] तन्त्रसम्पत् ।।

(इति।) सूत्राणि च प्रमाणानि च अवयवाश्च सूत्रप्रमाणावयवाः । तेषामुपपत्तिः सूत्रप्रमाणावयवोपपत्तिः । उपपत्तिः सम्भव इत्यनर्थान्तरम् । अनन्योऽर्थोऽनर्थान्तरम्[5]। उपपत्तिशब्दः प्रत्येकं परिसमाप्यते सूत्रोपपत्तिरित्यादि ।

आह[6], लक्षणोपेतसूत्रोपपत्ति[7]रिति वक्तव्यम् । इतरथा हि अलक्षणोपेतस्यापि सूत्रस्य तन्त्राङ्गभावः स्यादिति ।

उच्यते—न, नान्तरीयकत्वात् । न ह्यन्तरेण लक्षणोपेतत्वं सूत्रत्वम् । अतो न वक्तव्यमेतदिति ।

आह, अथ सूत्रमिति कस्मात्?

उच्यते—सूचनात् सूत्रम् । सूचयति तांस्तानर्थविशेषानिति सूत्रम् । तद्यथा– "कारणमस्त्यव्यक्तम्" (का॰ 16), "भेदानां परिमाणात्" (का॰ 15) इति ।। अत्र प्रतिज्ञाहेतू कण्ठोक्तौ । तयोरुपयोगि दृष्टान्तं साध्यसिद्धये समर्थमिति कृत्वा मूलशकलादयो[8]ऽत्रान्तरनभिहिता[9] अप्येतस्मादवसीयन्ते । अथवा भिक्षोरुपसंहृतबहिष्करणान्तःकरणस्य[10] तेषु तेष्वतीन्द्रियेष्वपि प्रधानादिष्वर्थेषु बुद्धिं सूचयतीति सूत्रम् । अथवा "सौक्ष्म्यात्तदनुपपत्तिः[11]" (का॰ 8) इति सूत्रम् । तद्यथा—

---

[1] D आदर्शनं, sec.m. आदर्शगं
[2] A प्रतिनन्दन्तु
[3] A भगवान्
[4] A इह
[5] A अर्थान्तरम्। अन्योऽर्थोऽर्थान्तरम्
[6] A om. आह
[7] P लक्षणोपेतस्तोपत्तिर्
[8] P K D मूलशकलादय A मूलशकलादया I follow Chakravarti (3.1).
[9] A अत्रानैंतरनभिहिता Raghavan (14.2) suggests that we should read it either as अत्र अन्तरा or अत्र अनन्तरम्, though he indicates his preference for the former.
[10] K अन्तष्करणस्य A °बहिष्करणस्य, omitting अन्तःकरणस्य
[11] A अनुपपत्तिश्चेति The Kārikā reading is सौक्ष्म्यात्तदनुपलब्धिः.

अल्पाक्षरमसन्दिग्धं सारवद्विश्वतोमुखम्।
अस्तोभमनवद्यं च सूत्रं सूत्रविदो विदुः(1) ॥

अस्तोभमपुनरुक्तमित्यर्थः। तथा—

लघूनि सूचितार्थानि स्वल्पाक्षरपदानि च।
सर्वतः सारभूतानि सूत्राण्याहुर्मनीषिणः(2) ॥

प्रमाणानि च प्रत्यक्षादीनि, तान्युत्तरत्र वक्ष्यति "दृष्टमनुमानमाप्तवचनं च" (का॰ 4), "प्रतिविषयाध्यवसायो दृष्टम्" (का॰ 5) इत्यादि[1]। अवयवाः[2] पुनर्जिज्ञासादयः प्रतिज्ञादयश्च। तत्र जिज्ञासादयो व्याख्याङ्गम्। प्रतिज्ञादयः परप्रत्यायनाङ्गम्। तानुत्तरत्र (95.7f.) वक्ष्यामः।

आह, अवयवानभिधानमनुपदेशात्। न हि यथा प्रत्यक्षादीनि प्रमाणान्युपदिष्टानि तथा अवयवा उपदिष्टाः। तस्मादवयवोपपत्तिरित्येतदसत्। भाष्यकारप्रामाण्याददोष इति चेत्, स्यान्मतम्। यद्यपि सूत्रकारेणावयवोपदेशो न कृतस्तथापि भाष्यकाराः केचि[3]देषां संग्रहं चक्रुः। ते च नः प्रमाणम्। तस्माद्युक्तमवयवोपपत्तिरिति। एतच्चायुक्तम्[4]। कस्मात्? उत्सूत्रत्वात्। न ह्युत्सूत्रं व्याचक्षाणाः भाष्यकाराः प्रमाणं भवन्ति(3)। तथा चैतदुत्सूत्रितमिति।

उच्यते— न, लिङ्गात्। नैतद्युक्त[5]मनुपदेशान्न सन्ति जिज्ञासादयः। किन्तर्ह्यनुपदिष्टमप्येषामस्तित्वं लिङ्गात् प्रतिपद्यामहे[6] यदयमाचार्यः—

दुःखत्रयाभिघाताज्जिज्ञासा तदपघातके हेतौ। (का॰ 1)

इति जिज्ञासा[7]माचष्टे। "कारणमस्त्यव्यक्तम्" (का॰ 16) इति प्रतिज्ञां करोति। "भेदानां परिमाणात्" (का॰ 15) इति हेतुं व्यपदिशति[8]। "नटवद्[9] व्यवतिष्ठते लिङ्गम्" (का॰ 42) इति दृष्टान्तं द्योतयति। "क्षीरस्य यथा तथा[10] प्रवृत्तिः प्रधानस्य" (का॰ 57) इत्युपसंहरति।

---

1. A इति for इत्यादि
2. A अवयवादयः
3. K भाष्काराष्केचिद्
4. A चासत्यम्
5. K ने ..क्तम् D नेत्थम् (?) P unclear I follow Pandeya (3).
6. A प्रतिषिध्यामहे
7. A जिज्ञासाप्रयोजनम्
8. A उपदिशति
9. A न तावद्
10. A om. तथा

---

(1) See न्या॰ वा॰ ता॰ टी॰ 1.1.2

(2) For this śloka too, see न्या॰ वा॰ ता॰ टी॰ 1.1.2

(3) यो ह्युत्सूत्रं कथयेन्नादो गृह्येत — म॰ भा॰ 1.1.1

"तस्मात् त्रिविधं करण[1] द्वारि" (का० 35) इति निगमयति। न चानभिप्रेतैराचार्याणां शास्त्रे व्यवहारो लक्ष्यते। तेन[2] वयं लिङ्गात्प्रतिपद्यामहे, सन्ति[3] जिज्ञासादयोऽवयवाः शास्त्र[4] इति।

आह, सतामनुपदेशे प्रयोजनवचनम्। एवं चेन्मन्यसे सन्ति जिज्ञासादयोऽवयवाः, शास्त्रे तेषामनुपदेशे प्रयोजनं वक्तव्यम्[5]—अमुष्माद्धेतोराचार्येण नोपदिश्यन्ते[6], सन्ति च त इति।

उच्यते—प्रमाणान्तर्भावात्। प्रमाणेष्वन्तर्भाव एषामित्ययमुपदिष्टो हेतुरस्माभिः। अनुमानाङ्गं हि जिज्ञासादयः, तस्मात्तदन्तर्भूतास्त इति न पृथगुपदिश्यन्ते। किञ्च, तन्त्रान्तरोक्तेः। तन्त्रान्तरेषु[7] हि विन्ध्यवासिप्रभृतिभिराचार्यैरुपदिष्टाः[8]। प्रमाणं च[9] नस्त आचार्या इत्यतश्चानुपदेशो जिज्ञासादीनामिति।

आह—न, प्रमाणानुपदेशप्रसङ्गात्। यदि[10] च तन्त्रान्तरोपदेशादेवावयवानामनुपदेशः, प्रत्यक्षादीन्यपि च तन्त्रान्तरेषूपदिश्यन्ते। "श्रोत्रादिवृत्तिः प्रत्यक्षम्"(1)। "सम्बन्धादेकस्माच्छेषसिद्धिरनुमानम्"(2)। "यो यत्राभियुक्तः कर्मणि[11] चादुष्टः स तत्राप्तस्तस्योपदेश आप्तवचनम्"(3) इति तेषामप्य[12]नुपदेशप्रसङ्गः। अथ सति तन्त्रान्तरोपदेशे प्रमाणान्युपदिश्यन्ते नावयवा इति, नन्वेत[13]दिच्छामात्रमिति।

उच्यते—पूर्व[14] एव तर्हि परिहारोऽस्तु। अथवा पुनरस्तु[15] तन्त्रान्तरोक्तेरित्ययमपि[16] परिहारः। य[17]त्तूक्तं[18](7.9) प्रमाणानुपदेशप्रसङ्ग इति, अत्र ब्रूमः—अयुक्तमेतत्। कस्मात्? प्रयोजनवतामुपदेशस्यादोषत्वात्। अनुपदेशो हि प्रयोजनवत[19]श्चोद्यत इति युक्तमेतत्। उपदेश

---

[1] A कारणम्

[2] A ते

[3] A सति

[4] A omits the portion शास्त्र इति। आह ... जिज्ञासादयोऽवयवाः.

[5] A वक्तव्यं प्रयोजनम्

[6] A आचार्येणोपदिश्यन्ते

[7] A तन्त्रातरे

[8] A विन्ध्यवास॰

[9] P K D omit च. A प्रमाण च

[10] D इति

[11] K युक्तष्कर्मणि

[12] A om. अप्य्

[13] P नत्वेतद् D नत्वेतद्, sec.m. नन्वेतद्

[14] A पूर्वं

[15] A पैरिहो पुनरस्तु

[16] A अस्तु for अपि

[17] D तत्, sec.m. यत्

[18] A यदुक्तं instead of यत्तूक्तं

[19] A प्रयोजनतश् instead of प्रयोजनवतश्

(1) Said to be the view of Vārṣagaṇya, a well-known Sāṃkhya teacher of antiquity. YD, while referring to this view again in its comment on का० 5, ascribes it to the followers of Vārṣagaṇya— "श्रोत्रादिवृत्तिरिति वार्षगणाः" (77.5). Cf. न्या० वा० and न्या० वा० ता० टी० 1.1.4. The latter observes: वार्षगण्यस्यापि लक्षणमयुक्तमित्याह—श्रोत्रादिवृत्तिरिति.

(2) न्या० वा० 1.1.5 refutes this view.

(3) सां० वृ०, का० 4

एव[1] तु सदोष इति कृत्वा कः प्रत्याचक्षीत? तस्मान्न किञ्चिदेतत्। किञ्चान्यत्, प्रधानोपदेशे गुणभूतान्तर्भावसिद्धेः। तद्यथा, तक्ष्णुहि चैत्र इत्युक्ते यावद्भिस्साधनविशेषै[2]र्विना तक्षणं नोपपद्यते सर्वांस्तांश्चैत्र उपादत्ते। तथा प्रत्यक्षादिषु प्रमाणेषूपदिष्टेषु यैरेषामविनाभावः सर्वाणि तान्युपादास्यामहे[3]। किञ्चान्यत्, अन्यत्रापि तदनुष्ठानात्। न केवलमिह, अन्यत्राप्ययमाचार्यः प्रधानानामेवोपदेशं करोति। तदङ्गभूतास्तु तदुपदेशादेव प्रतीयन्ते। तद्यथा, "कारणमस्त्यव्यक्तम्" (का॰ 16), "भेदानां परिमाणात्" (का॰ 15) इति[4]। इतरथा हि दृष्टान्ताभावादसाधनमेतत्स्यात्। पश्यति त्वाचार्यो नादृष्टान्तं साधनं साध्यमाप्नोतीति कृत्वा प्रातिपादकाः[5] प्रतिपादनकाले[6] तन्त्रान्तरोपदिष्टानपि मूलशकलादीनाक्षेप्स्यन्ति इति। किञ्चान्यत्, अनुमाने भूतवदुपदेशात्। अतश्चैतदेवं यदयमाचार्यः "त्रिविधमनुमानमाख्यातम्" (का॰ 5) इति ब्रवीति। कथं कृत्वा ज्ञापकम्? आख्यातस्य हि प्रत्याम्नाये भूतवाचिना शब्देनोपदेशो भवति। न चानेन[7] पूर्वं त्रिविधमनुमानमाख्यातम्। आख्यातमेवेति[8] चेत्, न। (न)[9] तदाख्यातं[10] क्वचिदिति शक्यं प्रतिपादयितुम्। सोऽयमनाख्यायापि यद्भूतवाचिनं शब्दमुपादत्ते[11] तज्ज्ञापयत्याचार्यस्तन्त्रान्तरक्लृप्तानामपीह सन्निवेशोऽङ्गीक्रियते। किमेतस्य ज्ञापने प्रयोजनम्[12]? तन्त्रान्तरोपदिष्टो[13]ऽपि कर्मयोनीनां प्राणभेदादीनां च लक्षणोपदेशः संगृहीतो[14] भवतीति सिद्धं तन्त्रान्तरोपदेशादवयवानुपदेशः। तस्मात्सूक्तमेवावयवोपपत्तिरिति[15]।

अन्यूनता (5.8)। पदार्थकार्त्स्न्यमशेषताऽन्यूनतेत्यभिधीयते। पदार्थाश्च दश चूलिकार्थाः, पञ्चाशत्प्रत्ययाः। तत्रास्तित्व[16]मेकत्वं पञ्चभिर्वीतैः सिद्धम्। अर्थवत्त्वं कार्यकारणभावः।

---

1. P उपदेशम्
2. D साधनशेषैर्, sec.m. साधनविशेषैर्
3. A उपाधास्यामहे
4. A om. इति
5. A प्रतिपादिकाः
6. P प्रातिपादनाकाले
7. D च अन्येन
8. A आख्यातं देति
9. All the Mss omit न.
10. D तथाख्यातं for तदाख्यातं
11. A उपाधत्ते
12. A प्रयोजनं नाम
13. P K D तन्त्रांतरोद्दिष्टो
14. A omits the phrase संगृहीतो ... दवयवानुपदेशः.
15. P K D read (तस्मात्सूक्तम्) अवयवोपपत्तिरिति.
16. A तत्रास्रिस्तत्वम्

पारार्थ्यं संहत्यकारिणां[1] परार्थत्वात्[2] (द्र॰ का॰ 17)। अतएवान्यत्वं चेतनाशक्तेर्गुणत्रयात्। "जन्ममरणकरणानाम्[3]" (का॰ 18) इत्येवमादिभिः पुरुषबहुत्वम्। "पुरुषस्य दर्शनार्थः" (का॰ 21) इति संयोगः। "प्राप्ते शरीरभेदे[4]" (का॰ 68) इति वियोगः। "सम्यग्ज्ञानाधिगमात्" (का॰ 67) इति शेषवृत्तिः। "तस्माच्च विपर्यासात्" (का॰ 19) इति पुरुषस्याकर्तृत्वमित्येते दश चूलिकार्थाः।

पञ्च विपर्ययभेदा भवन्त्यशक्तिश्च करणवैकल्यात्।
अष्टाविंशतिभेदा तुष्टिर्नवधाऽष्टधा सिद्धिः ॥ (का॰ 47)

इति पञ्चाशत्प्रत्ययाः। सैषा षष्टिः पदार्थानाम्। तदुपपत्ति[5]रन्यूनता।

संशयनिर्णयोक्तिः(5.8)। संशयश्च निर्णयश्च संशयनिर्णयौ[6], तयोरुक्तिः संशयनिर्णयोक्तिः। सामान्याभिधानं संशयः। तद्यथा—

महदादि तच्च[7] कार्यं प्रकृतिविरूपं सरूपं च। (का॰ 8)

इत्युक्ते संशयो भवति केन धर्मेण कार्यं प्रकृतिविरूपं केन वा सरूपमिति[8]। विशेषाभिधानं निर्णयः। स च द्विविधः, शब्दतोऽर्थतश्च। शब्दतस्तावद् यथा हेतुमदादिभिः[9] (द्र॰ का॰ 10) कार्यं प्रकृतिविरूपम्, त्रैगुण्यादिभिः प्रकृतिसरूपमिति। अर्थतस्तद्यथा "तेभ्यो भूतानि पञ्च पञ्चभ्यः, एते स्मृता विशेषाः" (का॰ 38)। किं कारणम्? "यस्मात् शान्ता घोराश्च मूढाश्च[10]" (का॰ 38)। अशान्तघोरमूढत्वात् "तन्मात्रा[11]ण्यविशेषाः" (का॰ 38)।

उद्देशनिर्देशम् (5.9)। उद्देशश्च निर्देशश्च उद्देशनिर्देशम्। "सर्वो द्वन्द्वो विभाषयैकवद् भवति"(1) इति द्वन्द्वैकवद्भावः। संक्षेपवचनमुद्देशः। तद्यथा—

एष प्रत्ययसर्गो[12] विपर्ययाशक्तितुष्टिसिद्ध्याख्यः। (का॰ 46)

---

[1] P संयत्यकारिणाम्

[2] A पदार्थत्वात्

[3] A °कारणानाम्

[4] A शरीरभेद

[5] A तदुपत्तिः

[6] A तौ संशय°

[7] P तश्च

[8] A सरूपं चेति

[9] A हेतुः पदादिभिः

[10] A om. च

[11] A °मूढ़त्वान्मात्राण्य्

[12] A om. सर्गो

---

(1) Cf. म॰ भा॰ 1. 2. 63, 2.4.12

विस्तरवचनं निर्देशः । तद्यथा "पञ्च विपर्ययभेदा भवन्ति" (का० 47) "भेदस्तमसोऽष्टविधः" (का० 48) इत्यादिः[1] ।

अनुक्रमश्च (5.9) । पदार्थानामानुपूर्व्या सन्निवेशोपदेशोऽनुक्रमः । तद्यथा—

प्रकृतेर्महांस्ततोऽहङ्कारस्तस्माद् गणश्च षोडशकः । (का० 22)

इत्यनेन ।

संज्ञोपदेशौ (5.9) । संज्ञिप्रत्यायनार्थः[2] शब्दः संज्ञा (1) । सा च द्विविधा । अर्थनिबन्धना स्वरूपनिबन्धना च । तत्रार्थनिबन्धनाऽर्थवशेनार्थक्रियापेक्षा । जात्याद्यर्थस्वरूपान्तर्भावी[3] यथाऽर्थस्तथाभूतमेव संज्ञिनं[4] प्रत्याययति। तद्यथा "पाचको लावकः"(2) इति। स्वरूपनिबन्धना पुनः संज्ञिप्रत्यायनोपायमात्रं स्वरूपमात्रोपकारिणी विनाऽवयवार्थं समयवशा[5]दतथाभूतमपि संज्ञिनं प्रत्याययति । तद्यथा, गजकर्णोऽश्वकर्ण इति(3) । प्रयत्नतो भगवतः परमर्षेरार्षेण ज्ञानेन सर्वतत्त्वानां स्वरूपमुपलभ्य संज्ञां विदधतो[6] नास्ति स्वरूपनिबन्धनः शब्दः । तद्यथा, प्रधीयन्तेऽत्र विकारा इति प्रधानम्, पुरि शेते(4) इति पुरुष इत्यादि । तन्मतानुसारिणामप्याचार्याणां ताभिरेव संव्यवहारान्नास्त्यपूर्वसंज्ञाविधानं प्रत्यादरः ।

उपदेशः (5.9)। इतिकर्तव्यताफलसमाख्यान[7]मुपदेशः । तद्यथा—

एवं तत्त्वाभ्यासान्नास्मि न मे नाहमित्यपरिशेषम् ।
अविपर्यया[8]द्विशुद्धं केवलमुत्पद्यते ज्ञानम् ॥ (का० 64)

इति। एते सूत्रोपपत्त्यादयस्तन्त्रगुणाः ।

इतिकरणं (5.9) प्रकारार्थम् । एवम्प्रकारा अन्येऽपि द्रष्टव्याः । तद्यथा, उत्सर्गोऽपवादोऽतिदेश[9] इत्यादि । तत्रोत्सर्गः "प्रकृतिविरूपम्" (का० 8) व्यक्तं "सरूपं च" (का० 8) इत्यपवादः । तथा[10] "तद्विपरीतः" (का० 11) इत्युत्सर्गः, "तथा च पुमान्" (का० 11)

---

1. A इत्यादिभिः
2. A °प्रत्ययनार्थः
3. D °आन्तर्भावे
4. D संज्ञिनः
5. D संज्ञीवशाद्
6. A विवदतो
7. A °समाध्यानम्
8. A अविपर्यासाद्
9. A °वादोपदेश
10. A omits तथा ... पुमान् इत्यपवादः.

---

(1) Cf. यया प्रत्याय्यन्ते सा संज्ञा, ये प्रतीयन्ते ते संज्ञिनः — म० भा० 1.1.1.8

(2) Cf. शा० भा० on मी० सू० 1.1.5

(3) Cf. म० भा० 1.1.44: नवेतिविभाषायामर्थसंज्ञाकरणम् शब्दसंज्ञायां ह्यर्थाऽसम्प्रत्ययो यथाऽन्यत्र.

(4) Cf. गो० ब्रा० 1.1.39

इत्यपवादः। "सामान्यमचेतनं प्रसवधर्मि व्यक्तं तथा प्रधानम्" (का॰ 11) इत्यतिदेशः। इत्येवमन्या अपि तन्त्रयुक्तयः शक्या इह प्रदर्शयितुम्। अतिप्रसङ्गस्तु प्रकृतं तिरोदधातीति[1] निवर्त्यते। सिद्धं तन्त्रयुक्तीनां सम्बन्धोपपत्तेस्तन्त्रमिदमिति[2]।

किञ्च, तन्त्रान्तरविरोधात्[3]। यदि खल्वपीदं[4] प्रकरणं स्यात्, तन्त्रान्तरेषां[5] पातञ्जलपञ्चाधिकरणवार्षगणप्रभृतीनामन्यतमस्य शेषभूतं स्यात्। तैश्चास्य विरोध[6]स्तत्र तत्रेति वक्ष्यामः। पूर्वतन्त्रशेषभावादिति चेत्, तुल्यम्। एतान्यपि पूर्वतन्त्रशेषभूतानि, तेषामपि प्रकरणत्वप्रसङ्गः। अथ मतम्, सकलपदार्थसंग्रहात्तन्त्रान्तराण्येतानि, एवमिहापि सकलपदार्थसंग्रहात्तन्त्रान्तरत्वमभ्युपगन्तव्यम्। तस्माद्युक्तमेतत्तन्त्रमिदम्। इत्युपोद्घातः(1) ॥

आह, किंविशिष्टाय[7] शिष्याय पुनरिदं तन्त्रं व्याख्येयमिति।

उच्यते—जिज्ञासवे मतिमते मीमांसकायार्थिनेऽभ्युपगताय[8] शिष्याय व्याख्येयं शास्त्रम्। कस्मात्? परमर्षिप्रामाण्यात्। यस्माद् भगवान् विश्वाग्रजः परमर्षिर्भगवदासुरे[9]र्जिज्ञासामुपलभ्योत्तरगुणविशेषसम्पदं च व्याख्यातवान्। रज एव दुखम्, तन्निराकरिष्णोर्विवेकोऽयम्, सत्त्वात्। सत्त्वं चास्मान्नानेत्येवमादिना वचनप्रतिपाद्यो[10]ऽयमर्थो महद्भिश्चोक्तः। तस्माद्रजोदुःखोपघातोपघातकजिज्ञासोः सत्त्वाद्धर्मादिकुशलमूलविपाकोत्पित्सोर्दुःखत्रयनिवृत्तय इदं शास्त्रं प्रवृत्तम्। तदर्था[11]त्परिणम्यते[12] शिष्यस्येति। कथं नाम शिष्यस्य[13] निःश्रेयसेन योगः स्यादित्येवमर्थमिद[14] व्याख्यानं क्रियत इति।

---

1. A तिरोददातीति
2. A इदमिति किमिति for इदमिति
3. P K D तन्त्रान्तराविरोधात्
4. A इदमपि
5. P K D तन्त्रान्तरेण A तन्त्रान्तरे Raghavan (14.3) suggests तन्त्रान्तरस्य. I follow Wezler (8.11).
6. P K D तैश्चास्याविरोधस् A तैश्चाप्यविरोधस् I follow Wezler (8.12)
7. A किंगुणविशिष्टाय D किंविशिष्टाय, sec.m. किंगुणविशिष्टाय
8. P ऽध्युपगताय A अभ्यपगताय
9. A परमर्षिभगवदासुरेर्
10. Raghavan (14.3) proposes वचनेन प्रतिपाद्यो.
11. A om. तदर्थात्
12. A परिणंस्यते
13. A om. शिष्यस्य
14. A om. इदं

---

(1) स्थानं निमित्तं वक्ता च श्रोता श्रोतृप्रयोजनम्।
सम्बन्धाद्यभिधानं च उपोद्घातः स उच्यते ॥ माठरवृत्ति, का॰ 1

आह, यदुक्तं (11.10) जिज्ञासवे व्याख्यानं कर्तव्यमिति तत्र कुतः पुनरियं जिज्ञासा कस्मिन् वाऽर्थे[1] भवतीति?

उच्यते—यत्तावदुक्तं (12.1) कुतः पुनरियं जिज्ञासा भवतीत्यत्र ब्रूमः—

दुःखत्रयाभिघाताज्जिज्ञासा (का॰ 1/1-2')

दुःखं रज इत्यनर्थान्तरम्। दुःखयतीति दुःखमिति भवति[2]। **त्रय**मिति संख्यापदं सर्वद्रव्यविषयम्, तद्दुःखेन[3] विशिष्यते। प्राधान्याच्च व्यतिरिक्तबुद्ध्या गृह्यमाणं सम्बन्धित्वादाधारस्य भेदनिबन्धनायाः षष्ठ्या निमित्तत्वं प्रतिपद्यते[4]—दुःखानां त्रयं दुःखत्रयम्। अभिहन्यतेऽनेनेत्य**भिघातः**।

कः पुनरयमभिघातो नाम?

उच्यते—योऽसावुपर्युक्तदुःखत्रयेणान्तःकरणेन[5] चेतनाशक्तेरभिसम्बन्धः। तस्माद् **दुःखत्रयाभिघाताज्जिज्ञासा**। यदुक्तं (12.1-2) कस्मिन्नर्थे भवतीति तत्राह[6]—

तदपघातके हेतौ। (का॰ 1/2)।

अपहन्तीत्यपघातकः, तस्यापघातकस्तदपघातकः[7]।

आह, तदपघातके इति समासाऽनुपपत्तिः[8], प्रतिषेधात्। “कर्तरि यौ तृजकौ ताभ्यां सह षष्ठी न समस्यते” (1)। तस्मात्तस्यापघातक[9] इति वक्तव्यम्।

उच्यते—न, शास्त्रे दर्शनात्। “तत्प्रयोजको हेतुश्च” (2) इति शास्त्रे दृष्टः प्रयोगः। पदकारश्चाह—“जातिवाचकत्वात्” (3)। तथा “कदाचिद् गुणो गुणिविशेषको भवति, कदाचिद् गुणिना[10] गुणो विशिष्यते” (4) इति चूर्णिकारस्य प्रयोगः। तस्मादनवद्यमेतत्। अयं तु पिण्डार्थः। त्रिविधेन दुःखेनाभिहतो ब्राह्मणस्तदपघातकं हेतुं जिज्ञासते। को नामासौ हेतुः

---

1. A om. कस्मिन् वाऽर्थे ..... पुनरियं जिज्ञासा
2. P दुःखं भवतीति KD दुःखं भवति
3. A and Dkha read दुःखशब्देन in place of तद्दुःखेन.
4. Dkha. प्रतिपाद्यते
5. A उपयुक्त॰
6. A om. तत्राह
7. A om. तस्याप ..... तदपघातकः
8. A समानुपपत्तिः
9. A तस्याभिघातक
10. Dkha. गुणिनाम्

---

(1) काशिका 2. 2.16; पा॰ सू॰ 2. 2.15

(2) पा॰ सू॰ 1.4.55

(3) वार्त्तिक 7 on पा॰ सू॰ 4.1.14; म॰ भा॰ 4.1.14; वार्त्तिक 1 on पा॰ सू॰ 1.2.10; म॰भा॰ 1.2.10

(4) म॰ भा॰ 1.4.21

स्याद्यो दुःखत्रयमभिहन्यादिति ।

आह, दुःखशब्दावचन[1]मादावमङ्गलार्थत्वात् । मङ्गलादीनि हि शास्त्राणि प्रथन्ते वीरपुरुषाणि च भवन्ति, अध्येतारश्च मङ्गलेनाभिहतसंस्काराः शास्त्रार्थानाशु[2] प्रतिपद्यन्ते(1) । दुःखमित्ययं चाऽमङ्गलार्थः शब्दः[3], तस्मान्नारब्धव्यः[4] शास्त्रादाविति ।

उच्यते—न, वाक्यस्यार्थे प्रयोगात् पदस्यानर्थक्यादमङ्गलार्थत्वानुपपत्तिः । वाक्यमर्थप्रत्यायनार्थं प्रयुज्यते, विशिष्टार्थाभिधानात् । न पदम्[5] । तथा हि पदार्थव्यतिरेकेण[6] विशिष्ट एव वाक्यार्थः प्रतीयते, केवलं तु पदं सामान्यार्थादप्रच्युतं[7] विशिष्टार्थाभिधानासमर्थम्[8] । अतएव न विवक्षितार्थप्रत्यायनयोग्यतयोपादीयते[9] । तद्यथा देवदत्तेत्ययं शब्दः कर्तृवाचकत्वेनोपात्तः, सर्वक्रियाविषयत्वात्, नान्तरेण[10] कर्मक्रियाशब्दौ विशिष्टार्थः प्रतीयते । तथा गामिति कर्म, सर्वक्रियाकर्त्रभिधाननिमित्तत्वात्[11] । तथाऽभ्याजेति[12] क्रिया, सर्वकर्मकर्तृविषयत्वात्[13] (...) । यदा तु देवदत्त गामभ्याज[14] शुक्लामित्युच्यते तदा देवदत्ते[15] गोशब्देन कर्मान्तरेभ्यो व्यवच्छिद्य[16] स्वात्मन्यवस्थाप्यते (...) क्रिया च (...) । गोशब्दश्च (देवदत्तेन) सर्वकर्तृभ्यो (व्यवच्छिद्य) देवदत्तकर्मतया व्यवस्थाप्यते । कर्तृकर्मणी चाभ्याजिक्रियायाः[17] साधनभावेनैव नियम्येते ।

---

1. A शब्दवचनम्   Tripathi (19) reads दुःखशब्दवाचनमादा°.
2. A आशु च
3. A अयथामङ्गलार्थः instead of अयं चाऽमङ्गलार्थः
4. A तावन् for तस्मात्
5. A विशिष्टार्थाभिधानानुपपदम्
6. P पदार्थं व्यतिरेकेण
7. K अदप्रच्युतं
8. A विशिष्याभिधाना°
9. D °तयोपादीयते आनर्थक्यात्
10. A om. नान्तरेण ... कर्तृविषयत्वात् (13.9-10)
11. D °कर्त्रभिधानत्वात्
12. P K D तथात्याजेति. It is here emended in order to make it consistent with what follows.
13. Dkha. सर्वकर्मक्रियाविषयत्वात्
14. P K D गामत्याज
15. A देवदत्तेन
16. P K D विच्छिद्य
17. P K चात्याजिक्रियायाः   D च अत्याज्यक्रियायाः   A चाभ्याजक्रियायाः

---

(1) मङ्गलादीनि हि शास्त्राणि प्रथन्ते वीरपुरुषकाणि भवन्त्यायुष्मत्पुरुषकाणि चाध्येतारश्च वृद्धियुक्ता यथा स्युः — म० भा० 1.1.1

शुक्लशब्दश्च[1] गोशब्दं सर्वगुणविषय[2]माधेयान्तरेभ्यो व्यवच्छिद्य[3] स्वात्मन आधारत्वेन[4] नियम्य[5] तद्विषयतां[6] प्रतिपादयतीत्यनेन क्रमेण विशिष्टो वाक्यार्थः। केवलानान्तु पदानां सामान्यार्थाद-प्रच्युतानां[7] विशेषानभिधानादानर्थक्यम्। आह च[8]—

पृथङ्निविष्टतत्त्वानां पृथगर्थाभिपातिनाम् ।
इन्द्रियाणां यथा कार्यमृते देहान्न लभ्यते ॥
तथैव सर्वशब्दानाम्पृथगर्थाभिधायिनाम्[9] ।
वाक्येभ्यः प्रविभक्तानामर्थवत्ता न लभ्यते(1)॥

इति। एवं सति कुतोऽयं निश्चयप्रतिलम्भो यद्[10]दुःखशब्दोऽयममङ्गलार्थो यावता सन्दिह्यत एव अयं किं[11] स्वार्थप्रतिपत्त्यर्थमुपात्तोऽथ हेयत्वायेति[12]। वाक्यस्य तु मङ्गलार्थत्वम्[13], दुःख-प्रहाणार्थ[14]मुपादानात्। यद्धि दुःखप्रहाणार्थं वाक्यमुपादीयते तन्मङ्गलार्थं दृष्टम्। तद्यथा व्याध्यपगमः[15] स्यादलक्ष्मीर्मा भूदिति। दुःखप्रहाणार्थं[16] चेदं वाक्यमुपात्तम्, तस्मान्मङ्गलार्थमिदम्। तत्र यदुक्तं (13.2) दुःखशब्दावचन[17]मादावमङ्गलार्थत्वादित्येतदयुक्तम्।

---

1. A शुक्लशब्दो गोशब्दश्च
2. A सर्वगुणिविषयम्
3. A व्यवच्छेद्य
4. All the Mss read आधारत्वे. But आधारत्वेन looks more appropriate.
5. P K नियम्यते D नियम्यते, sec. m. नियम्य Dkha. नियम्य
6. A तद्विषयता
7. A (सामान्यार्थात्) प्रच्युतानाम्
8. A om. च
9. P reads पृथगर्थाभिधानाद्, and repeats आनर्थक्यं ॥ आह च पृथङ्निविष्टतत्त्वानां ... शब्दानाम्पृथगर्था-भिधायिनाम्. Thus P omits सर्व of सर्वशब्दानाम्.
10. A reads निश्चयप्रतिलभ्यः कुतो यद्, and thus omits अयं.
11. Dkha. अथ किं for अयं किं
12. Dkha. प्रतिपत्त्यर्थमुपादत्ते अथ हेयत्ये (ति)
13. A मङ्गलार्थं
14. A °प्रहारणार्थम्
15. Dkha. व्यपगमः
16. A प्रहारणार्थम्
17. A दुःखशब्दवचनम्

---

(1) पृथङ्निविष्टतत्त्वानाम्पृथगर्थानुपातिनाम् ।
इन्द्रियाणां यथा कार्यमृते देहान्न कल्पते ॥
तथा पदानां सर्वेषां पृथगर्थनिवेशिनाम् ।
वाक्येभ्यः प्रविभक्तानामर्थवत्ता न विद्यते ॥
वाक्यपदीय 2.423 – 424

आह—त्रयग्रहणानर्थक्यम्, गुणैकत्वात्। दुःखं रज इति प्रतिपन्नो भवान्, तच्चैकं शास्त्रे पठ्यते। तस्मात् त्रयग्रहणमनर्थकमिति। निमित्तभेदाद् भेदोपचार इति चेत्, स्यान्मतम्। यद्यप्येकं दुःखं तथापि निमित्तानामध्यात्माधिभूताधिदैवलक्षणानां भेदादस्य भेदोपचारः करिष्यत[1] इति। तच्च नैवम्। कस्मात्? निमित्तानन्त्येन गुणानन्त्यप्रसङ्गात्[2]। आध्यात्मिकं हि[3] द्विविधम्, शारीरं मानसं च। शारीरं तावद्वातपित्तश्लेष्मणां वैषम्यनिमित्तम्। तथा मानसं कामक्रोधलोभमोहविषादभयेर्ष्याऽसूयारत्यविशेषदर्शननिमित्तम्[4]। आधिभौतिकश्च मनुष्यपशुमृगपक्षिसरीसृपस्थावरनिमित्तम्[5]। आधिदैविकं शीतोष्ण[6]वातवर्षाशन्यवश्यायावेशनिमित्तम्। तत्र निमित्तभेदात्त्रित्वप्रतिज्ञस्य गुणानन्त्यप्रसङ्गः। स च नेष्टः। तस्मान्न निमित्तभेदात्त्रित्वम्।

उच्यते—यदुक्तं (15.1-2) रजस एकत्वात्[7] त्रित्वानुपपत्तिः, तस्य निमित्तभेदात् त्रित्वोपचार इति सत्य[8]मेतत्। यत्तूक्तं (15.4) निमित्तानन्त्येन गुणानन्त्यप्रसङ्ग इति, तदयुक्तम्। कस्मात्? भेदेऽपि सति वर्णसंख्यावद्व्यवस्थानोपपत्तेः। तद्यथा चत्वारो वर्णा इत्यस्याः संख्यायाः सति पैप्पलादादिभेदे[9] तेषां ब्राह्मणत्वादिव्यतिरेकाभावान्न संख्यान्तरहेतुत्वं नो खल्वपि वर्णाव्यतिरेकादेकत्वं भवति। एवं त्रीणि दुःखानीत्यस्याः संख्यायाः सति शारीरादिभेदे[10] तेषामाध्यात्मिकादिव्यतिरेकाभावान्न[11] संख्यान्तरहेतुत्वं नो खल्वपि दुःखाव्यतिरेकादेकत्व[12] भवितुमर्हति। किञ्चान्यत्, निमित्तभेदाद् भेदोपचार इति भवानेव प्रतिपन्नः। न चोपचारः परमार्थ इत्यलमस्थाने[13] यत्नेन।

आह—अभिघाताज्जिज्ञासायामतिप्रसङ्गः, सर्वेषां सम्भवात्। यद्यासुरे[14]दुःखत्रयाभिघाताज्जिज्ञासा भवतीत्येतदिष्टम्, तेन सर्वेषामभिघातोऽस्तीति सर्वेषां जिज्ञासाप्रसङ्गः। अथ मतं[15] दुःखाभिघाते

---

[1] Dkha. तथापि अध्यात्माधिभूताधिदैवलक्षणनिमित्तभेदाद् भेदोपचारः करिष्यते

[2] Dkha. दुःखानन्त्यं

[3] P K D om. हि

[4] P K D विषादभयेर्ष्यारत्यविशेषदर्शनं   Wezler (14.15) reads °ईर्ष्यारत्यसूया°.

[5] A om. आधिभौतिकं .... स्थावरनिमित्तम्

[6] P reads °ओष्म° in place of °ओष्ण°.

[7] Pandeya (7) reads रजस कत्वात्.

[8] A समम्

[9] A पैप्यलादि°

[10] P K A शरीरादिभेदे   D शरीरादि°, sec.m. शरीरादि°

[11] A Dkha. व्यतिरेकासम्भावान्न

[12] P एकम्

[13] A इत्ययस्थने

[14] A यथासुरे

[15] P K D सति   A मत   मतं looks better.

कस्यचिज्जिज्ञासा भवति कस्यचिन्नेति। नन्वेत[1]दिच्छामात्रम्। प्राक्प्रसङ्गाच्च[2]। प्रागप्यासुरेर्जिज्ञासाया[3] दुःखत्रयाभिघातो न चास्यात्यन्तिके हेतौ जिज्ञासा बभूव। तेन किं प्राप्तम्? पश्चादस्य यतो बभूव तद्वक्तव्यम्। यथाऽन्यत्र ब्रह्मणो[4]ऽभ्यासनिमित्तादधर्मक्षयात् पूर्वधर्मानुग्रहाच्च[5] विविदिषा, तथाऽन्येषां कुशलमूलाभ्यासपरिपाकात्। न चापदिष्टमतो लघूक्तमेतत्।

किञ्चान्यत्, तदपघाताच्चाऽनिर्मोक्षोऽकृत्स्नत्वात्। मोक्षो हि कामरूपाऽऽरूप्यधातुत्रयादिष्यते(1)। दैवमानुष्यतिर्यग्योनित्रयाद्वा[6]। एकदेशश्च संसारस्य दुःखत्रयम्। तस्मात्प्रयोजनमप्ययुक्तम्। किञ्च निमित्तान्तरसद्भावाद्दिव्यकामध्यानसुखानपेक्षस्यापि विविदिषा(2) सम्भवति, न केवलं तापोद्विग्नस्य[7]। तस्मान्निमित्तमप्ययुक्तम्।

किञ्चान्यत्। उभयथा चाऽसम्भवात्। परिकल्प्यमाना खल्वपीयं[8] जिज्ञासा पुरुषस्य वा स्याद् गुणानां वा। किञ्चातः? तन्न[9] तावत्पुरुषस्य सम्भवति। कस्मात्? नैर्गुण्याभ्युपगमात्। इच्छाद्वेषप्रयत्नसुखदुःखधर्माधर्मज्ञानसंस्काराणामात्मगुणत्वं (3) न[10] भवद्भिरभ्युपगम्यते। न गुणानाम्, आचेतन्यात्[11]। न ह्यचेतना घटादयो हिताहितप्राप्तिपरिहारं[12] जिज्ञासमाना दृश्यन्ते। न च

---

[1] नन्वेतदि° seems a better reading than नन्वेवमि° found in P K A D. Dkha. reads ननु इच्छामात्रप्रसंगाच्च.

[2] D प्राक्प्रसङ्गाच्च, sec.m. प्राक्प्रसङ्गश्च

[3] A आसुरे° for आसुरेर्°

[4] A ब्राह्मणो°

[5] Dkha. पूर्वधर्मानुग्रहेण

[6] P K तैर्यग्योनि° A and Dkha. देवमानुषतिर्यग्योनि° D मानुषतैर्यग्योनि°

[7] P K A तापोद्विग्नस्यापि D °विग्नस्यापि, sec.m. °विग्नस्य

[8] A अपीय

[9] D om. तन् D तन्न, sec.m. न

[10] A न तद्

[11] A आचैतन्यात्

[12] Dkha. °परिहासं

---

(1) This is the view held by the Buddhists. Yaśomitra in his स्फुटार्थाभिधर्मकोशव्याख्या (first कोशस्थान, p.75) quotes the following sūtra while discussing different types of धातुs: आयुष्मानानन्दो भगवन्तमेतदवोचत्। कियता भदन्त पण्डितो धातुकुशलो भवति? भगवानाह ... त्रीनपि धातून् जानाति पश्यति यथाभूतम्— कामधातुं रूपधातुमारूप्यधातुमिति।

(2) एकत्वञ्च पृथक्त्वञ्च नित्यं चैवमचेतनम्।
सूक्ष्मं सत्कार्यमक्षोभ्यं ज्ञेया विविदिषा च सा॥
कार्यकारणक्षयकरी विविदिषा प्राकृतिकी वृत्तिः। — तत्त्वसमाससूत्रवृत्ति on the sūtra पञ्चकर्मयोनयः

(3) Cf. न्या॰ सू॰ 1.1.10.

चेतना[1] भवतां गुणाः, “सामान्यमचेतनं प्रसवधर्मि” (का० 11) प्रधानमिति वचनात्[2]।

किञ्चान्यत्, तत्त्वान्तरानुपपत्तेः। न च गुणपुरुषव्यतिरिक्तं वस्तत्त्वान्तरमस्ति[3] यस्य जिज्ञासा परिकल्प्यमाना[4] परिकल्प्येत। तस्मादनुपपन्ना[5] जिज्ञासा।

उच्यते। यदुक्तम् (15.17) अभिघाताज्जिज्ञासायामतिप्रसङ्गः सर्वेषां तत्सम्भवादित्यत्र ब्रूमः—न, अभिघातत्वेनाऽप्रतिपत्तेः। यद्यप्यविशिष्टोऽभिघातस्तथापि सर्वे नैनमभिघातत्वेन प्रतिपद्यन्ते। तथा हि, सत्स्वा[6]ध्यात्मिकादिदुःखेष्वर्जनरक्षणक्षयसङ्गहिंसासु[7] च प्रीत्यभिष्वङ्गादेषां न विषयेषूद्वेगापद्वेषौ[8]। न च विषयपरित्यागो भवति। तस्मान्नाऽविशिष्टो[9]ऽभिघातः। विशेषेऽभिघातबुद्धे[10]र्निमित्ताभिधान[11]मिति चेत्? अथापि स्या[12]द्येयमसति विशेषे सर्वप्राणभृतामासुरेरेव भगवतो दुःखत्रयाभिघातबुद्धिर्भवति, न पुनरन्येषामित्यत्र निमित्तमभिधानीयम्। न ह्यन्तरेण निमित्तमसौ विशेषो[13]ऽवस्थापयितु[14] शक्यत इति। एतच्चायुक्तम्। कस्मात्? प्रश्नाऽसम्बन्धात्। कुतो जिज्ञासा[15] भवतीत्येवं चोदकेन पूर्वमकारि प्रश्नस्तस्याश्च साक्षात् कारणमभिघातः कारणान्तराणामनभिधानादित्यस्यैव[16] निर्देशः कृतः। यत्तु खल्विदानीं कारणकारणमपि पृच्छ्यते तदनवस्थाप्रसङ्गभयान्नोच्यते। अथ निर्बन्धः क्रियते तेन पूर्वधर्मानुग्रहस्य कुशलमूलाभ्यासपरिपाकस्य कारणकारणत्वं न[17] प्रतिषिध्यत इति तदेव किं न गृह्यते? एतेन प्राक्प्रसङ्गः प्रत्युक्तः। यत्तूक्तं (16.5) तदपघाताच्चा[18]ऽनिर्मोक्षोऽकृत्स्नत्वादित्येतदप्ययुक्तम्। कस्मात्? शास्त्रार्थाऽनवबोधात्।

---

1. A चेतनाः
2. P K D वक्ष्यमाणवचनात्
3. K वस्त्वान्तरम् A वस्तुतत्त्वान्तरम् Dkha. नस्तत्त्वान्तरम्।
4. P परिकल्पमाना
5. A अनुपन्ना
6. D न हि सत्सु in place of तथा हि सत्स्व्
7. A अजैनरक्षण°
8. D विषयेषूद्वेगापदेशौ Dkha. विषयेषु द्वे रागद्वेषौ
9. A न विशिष्टो
10. A धातबुद्धे D अविघात°, sec.m. अभिघात°
11. Dkha. निमित्तादभिधानम्
12. Dkha. चेत्। अपि स्याद्
13. A and Dkha. विशेषे
14. Dkha. स्थापयितुम्
15. A हैतौ जिज्ञासा Dkha. कुतो हेतोर् जिज्ञासा
16. A असैव
17. A D अस्माभिर्न
18. तदपघाताच्चा° seems a better reading than तदभिघाते च, which is found in all Mss.

अष्टविकल्पो दैवस्तैर्यग्योनि[1]श्च पञ्चधा भवति।
मानुष्यश्चैकविधः। (का॰ 53)

इत्येतावानस्माकं संसारः। न तु तद्व्यतिरिक्ताः कामरूपारूप्यधातवः क्वचिदपि सिद्धाः। चतुर्दशविधे च[2] संसारे या सुखमात्रा सा दुःखभूयस्त्वात्तच्छब्दवाच्या भवतीति। तथा चोक्तम्—

अत्र जरामरणकृतं[3] दुःखं प्राप्नोति चेतनः पुरुषः।
लिङ्गस्याविनिवृत्तेस्तस्माद् दुःखं समासेन॥ (का॰ 55)

दृश्यते च लोके भूयसा ग्रहणम्। तद्यथाऽऽम्रवनमिति। तस्मात् कृत्स्नविकल्पप्रतिषेधोऽयम्[4]। यत्पुनरेतदुक्तं(16.7) दिव्यकामध्यानसुखाऽनपेक्षस्यापि विविदिषासम्भवान्निमित्तमयुक्तमिति[5], तदप्यनुपपन्नम्। कस्मात्? उत्तरत्र प्रतिषेधादिष्ट[6]मेवैतत्संगृहीतम्। तथा चोत्तरसूत्रेण प्रतिषेत्स्यत्याचार्यः—

दृष्टवदानुश्रविकः स ह्यविशुद्धिक्षयातिशययुक्तः[7]। (का॰ 2)

तस्माद्दिव्यसुखाऽनपेक्षस्यापि युक्ता[8] विविदिषा। ध्यानसुखमपि क्षयातिशयौ[9] नातिवर्तते[10]। तदप्यत्रैव संगृहीतम्। तस्मात्प्रतिषेध्य एवायं पक्ष इति न किञ्चिदभिधीयते। यदप्युक्तम्[11](16.11) उभयथाऽसम्भवाज्जिज्ञासाऽनुपपत्तिरिति, अस्तु गुणानां जिज्ञासा। यत्तूक्तम् (16.12–17.1) आचेतन्या[12]दसम्भव इति सत्याचेतन्ये[13] बुद्धेरिच्छादिसद्भावमुत्तरत्र प्रतिपादयिष्यामः (द्र॰ का॰ 20)। तस्मादुपपन्ना जिज्ञासा।

आह—तच्छब्दानर्थक्यं प्रतिपदमसम्बन्धात्[14]। योऽयमाचार्येण तच्छब्दः सूत्रे पठितोऽस्य खलु प्रतिपदमसम्बन्धात् स्वल्पामप्यर्थवत्तां नोपलभामहे। तस्मान्नैनमपुष्कलार्थमध्येष्यामह इति।

---

[1] A तिर्यगयोनिस् D तैर्यग्योनश्
[2] A om. च
[3] P K अत्र जन्मजरा॰ D अत्र जन्म॰, sec.m. तत्रजन्म॰ Raghavan (14.3) thinks that अत्र at the beginning is no part of the kārikā, and so should be taken with तथा चोक्तम्.
[4] A प्रतिषेधाऽयम्
[5] A अयुक्तं चेति
[6] D दृष्टम्, sec.m. इष्टम्
[7] A ॰क्षयातियुक्तः
[8] P D अनापेक्षस्योक्ता K ॰नपेक्षस्यक्ता
[9] P K D क्रमातिशयौ Dkha. क्षयातिशयौ
[10] A नोतिवर्तते
[11] A ॰अयुक्तम्।
[12] Dkha. अचैतन्याद् A आचैतन्याद्
[13] Dkha. सत्यपि चैतन्ये
[14] A प्रतिपदसम्बन्धात्

उच्यते—कथं हि नाम प्रयोक्तृपारतन्त्र्याच्छब्दस्य शब्दान्तरेण सम्बन्धो न स्यादिति?

आह—न ब्रूमोऽविद्यमानसम्बन्धो[1]ऽसम्बन्धः। किन्तर्हि ? अयुक्तसम्बन्धो यः स खल्वसम्बन्धः। तद्यथा अनाचारो माणवक इति द्रव्येण क्रियाशक्तित्वान्न शक्यं किञ्चिदनाचारवता[2] क्षणम[3]प्यवस्थातुम्। अयुक्तं त्वाचरन्नाचार इत्युच्यते। तथा चास्य तच्छब्दस्य प्रतिपदं सम्बन्धो न युक्तस्तस्मादनर्थकस्तच्छब्दः। आनन्तर्याज्जिज्ञासाशब्दस्येति चेत्, स्यान्मतम्। "अनन्तरस्य विधिर्वा[4] भवति प्रतिषेधो[5] वा" इत्यनया(1) युक्त्या[6] जिज्ञासाशब्दस्य तच्छब्देनाभिसम्बन्धः शक्य इति। तच्च नैवम्। कस्मात्? तदपघाते प्रयोजनासद्भावात्[7]। न हि जिज्ञासाऽपघाते किञ्चित् प्रयोजनमस्तीति सत्यपि[8] सम्बन्धे न तच्छब्देनार्थः। अभिघातस्येति चेत्? अथापि स्यात्। यदि जिज्ञासाऽपघाते न[9] किञ्चित्प्रयोजनमस्तीत्यतस्तत्सम्बन्धो[10] नेष्यते, तेन तर्ह्यभिघातशब्देनास्याभिसम्बन्धः[11] करिष्यते। तथा चापि तच्छब्दो[12]ऽर्थवान् भविष्यतीति। एतदनुपपन्नम्। कस्मात्? निमित्ताऽवस्थाने पुनः[13] पुनरुत्पत्तेः[14]। नैमित्तिकोऽयमभिघातस्तस्य निमित्तवत्त्वादात्यन्तिको[15]ऽपघातो न स्यात्। इतरथा ज्वरनिमित्तो[16] दाह इव शीतद्रव्यसंस्पर्शात्प्रशान्तोऽपि निमित्तावस्थानात्पुनः पुनः प्रवर्तत इत्यफलत्वमस्य व्यायामस्य[17]। त्रयशब्दस्येति चेत्, न, पारतन्त्र्यात्। आश्रयपरतन्त्रा[18] हि

---

1. A अविद्यमानस्सम्बन्धे
2. P अनाचारवता A अनाचारता
3. A om. अपि
4. A विधिवा
5. A प्रतिषेध
6. A युक्त्याम्
7. P K D प्रयोजनासम्भवात्
8. A om. सत्यपि सम्बन्धे ..... प्रयोजनमस्तीति.
9. The correct reading should be जिज्ञासापघाते न, as found in all Mss, rather than जिज्ञासापघातेन, which latter is the case in Chakravarti (11.22) and Pandeya (9).
10. A अतत्सम्बन्धो
11. Dkha. शब्देनास्यापघातस्याभिघातसम्बन्धः
12. D तथा चापशब्दाथो
13. P D om. पुनः
14. A उत्पक्तेः (?)
15. A निमित्तवत्त्वे त्वात्यन्तिको
16. A ज्वरनिमित्तेको
17. P K D इत्यस्याफलत्वं व्यायामस्य
18. Dkha. आश्रितपरतत्रा

---

(1) Cf. म० भा० 1. 2. 42

संख्या, तस्या नाऽन्तरेणाश्रयोपघातमपघातः[1] शक्यः[2] कर्तुम्। आनर्थक्यश्च समानमिति[3] सुतरां तच्छब्देन नार्थः। दुःखशब्दस्येति[4] चेत्स्यान्मतम्—यद्येतेषाम्पदानामभिसम्बन्धे यथोक्तदोषोपपत्तिः, दुःखशब्दं[5] तर्हि तच्छब्देनाभिसम्भन्त्स्यामः[6]। तस्मिन्नेष[7] निषेधो विशतीति। तच्च नैवम्। कस्मात्? अनेकपदव्यवधानात्। कथमनन्तरवृत्तिना[8] सर्वनाम्नाऽनेकपदव्यवहितस्य दुःखशब्दस्याभिसम्बन्धः शक्येत[9] प्रतिपत्तुम्[10]? तस्मान्न किञ्चिदेतत्।

किञ्चान्यत्। उपसर्जनत्वात्। अयं खल्वपि दुःखशब्दः समास उपसर्जनीभूतः। न चैकस्मिन्काले शब्दस्य प्रधानत्वमुपसर्जनत्वं च युक्तितः सम्भवति। प्रधानस्य च पदान्तरेणाभिसम्बन्धः[11]। तस्माद्विवादास्पदमेवैतत्सूत्रम्[12]। किञ्चान्यत्। नित्यानामपघातानुपपत्तेः। इह नित्यानामपघातः कर्तुं न शक्यते[13]। तद्यथा पुरुषाणाम्। अनित्यानाञ्चापघातो दृष्टः। तद्यथा ज्वरादीनाम्। नित्यं च दुःखम्। तस्मात्तदपघाते[14]ऽभ्युत्थानानर्थक्यम्। वृत्त्यपघाते तदपघात इति चेत्, स्यात्पुनरेषा बुद्धिः। सत्यं नित्यानामपघातो न युक्तितः सम्भवति। न तु वयं गुणलक्षणस्य दुःखस्यापघातं ब्रूमः, किन्तर्हि वृत्तिरस्याभिभूयत इति। तच्च नैवम्। कस्मात्? उक्तोत्तरत्वात्। उक्तमत्रोत्तर[15](19.11-12) निमित्तावस्थाने पुनः पुनरुत्पत्तेरिति। तस्मादयमप्यमार्गः[16]।

---

1. Dkha. नान्तरेणाश्रयं समपघातः
2. A शक्तः
3. Chakravarti (11. 29) reads अनर्थकश्च समास(:) for आनर्थक्यश्च समानम्, which latter is found in all Mss. A, however, reads समानाम् rather than समानम्.
4. A दुःखस्येति।
5. A दुःखशब्देन
6. A °अभिभत्स्यामस् D °सम्बत्स्यामः, sec.m. °सम्भत्यस्यामः
7. Raghavan (14.3) suggests तस्मिन्नैष.
8. Dkha. अन्तरवृत्तिना
9. A शक्यते
10. A प्रतिपादयितुम्
11. P K D पदार्थेना°
12. A विवादावस्थम्
13. A नाशक्यते
14. A तदुपघाते Dkha. om. तद्
15. A °अत्रोत्तरे
16. A अमार्ग इति

किञ्चान्यत् । अविशेषात् । कल्पयित्वाऽपि वृत्त्यपघातं वृत्तिवृत्तिमतो[1]रनन्यत्वाद् वृत्त्यपघाते[2] वृत्तिमदपघातः प्राप्त इति नास्ति कश्चिद्विशेषः । तस्मात् कृशोऽयं[3] परिहार इति नार्थस्तच्छब्देन ।

उच्यते—यदुक्तं (18.16) तच्छब्दानर्थक्यं प्रतिपदमसम्बन्धादिति । अस्तु दुःखशब्देनाऽभिसम्बन्धः । तत्सम्बन्धे[4] यथोक्तदोषोपपत्तिरिति चेत्, स्यान्मतम् । यदि तर्हि तच्छब्दस्य दुःखशब्देनाभिसम्बन्धो[5]ऽभ्युपगम्यते, तेन येऽस्माभिः पूर्वमभिहिता दोषास्ते प्रसज्यन्ते[6] । तस्मात् प्रतिषिद्धस्य[7] पक्षस्य[8] परिग्रहे साहसमात्रमिति । एतच्च नैवम् । कस्मात्? प्रतिविधानात् । सत्यमसति प्रतिविधाने साहसमात्रं स्यात् । प्रतिविधीयते तु, तस्माददोषोऽयमिति । किन्तदिति चेत्, स्यान्मतम्[9] । उच्यतां[10] तर्हि, किं तत् प्रतिविधानं यस्यावष्टम्भेनानेकदोषव्याहतोऽप्ययं पक्ष आश्रीयते[11] । न ह्यनुक्तमस्माभिराकारमात्रेण शक्यं प्रतिपत्तुमिति ।

उच्यते—बाढम् । यत्तावदुक्तम् (20.4) अनेकपदव्यवधानान्न[12] दुःखशब्दस्य तच्छब्देनाऽभिसम्बन्ध इत्यत्र ब्रूमः —न, अनभ्युपगमात्। यो ह्यनन्तरकृतं शब्दस्य शब्दान्तरेण सह[13] सम्बन्धमाचष्टे[14] तम्प्रत्ययमुपालम्भः[15] स्यात् । वयं त्वर्थकृतं सम्बन्धमाचक्ष्महे । तथा चोक्तम्—

यस्य येनाभिसम्बन्धो दूरस्थस्यापि[16] तस्य सः[17] ।
अर्थतस्त्व[18]समानानामानन्तर्येऽप्यसम्भवः[19] (1) ॥

---

[1] A वृत्तिमतोर् in place of वृत्तिवृत्तिमतोर्

[2] A °आपघातो

[3] A कृशोय

[4] A °सम्बन्धे

[5] A °शब्देनैवाभिसम्बन्धे D दुःखशब्दस्याभि°, sec.m. दुखशब्देनाभि°

[6] A प्रसज्येते

[7] A प्रतिशब्दस्य

[8] A पक्षे

[9] A मतं स्याद्

[10] A उच्यते

[11] A आश्रयेत Dkha. आश्रीयेत

[12] A पदव्यवधोनान्

[13] A om. सह

[14] A चाचष्टे

[15] A आरम्भः in place of उपालम्भः

[16] A दूरस्यापि

[17] P K D तत् Chakravarti also (12.26), like A, reads सः.

[18] A अर्थतो ह्य् for अर्थतस्त्व्

[19] D असम्भवः ॥, sec.m. असम्भवः ॥ इति ॥

---

(1) Cf. e.g. न्या॰ भा॰ 1. 2. 9; न्या॰ वा॰ ता॰ टी॰ 1.1. 4

किञ्चान्यत् । शास्त्रे दर्शनात् । शास्त्रे च व्यवहितानामपि सर्वनाम्नामभिसम्बन्धो दृश्यते "यस्य गुणस्य हि भावाद् द्रव्ये शब्दनिवेशस्तदभिधाने त्वतलौ"(1) इति अत्रार्थकृतश्च सम्बन्धः शब्दानामभ्युपगतः । ङ्याप्प्रातिपदिकात्,(2) बहुषु बहुवचनम्,(3) सुपो धातुप्रातिपदिकयोः,(4) अलुगुत्तरपदे(5) इत्येवमादीनां अभिसम्बन्धाभ्युपगमः[1] । तथा "अनड्वाहमु[2]दहारिणि भगिनि वहसि या त्वं शिरसा[3] कुम्भमवाचीनमभिधावन्तमद्राक्षीः"(6) इति वार्त्तिके दृष्टान्तः । न ह्यत्र सत्यानन्तर्ये शिरसाऽनडुहो वहनं कुम्भस्य वा सरणमुपपद्यते । यथा चात्र व्यवहितानामभिसम्बन्धस्तथेहापि द्रष्टव्यः ।

यत्पुनरेतदुक्तम् (20.6) उपसर्जनत्वात्पदान्तरेणाऽनभिसम्बन्ध[4] इति, एतदनुपपन्नम् । कस्मात्? समासादपोद्धारे बुद्ध्या व्यवस्थितस्य[5] स्वातन्त्र्योपपत्तेः । सत्यमुपसर्जनस्य पदान्तरेणाभिसम्बन्धो नोपपद्यते । न तु वयं समासवृत्तेरेव तच्छब्देनाभिसम्बन्ध इति प्रतिपद्यामहे; किन्तर्हि समासादपोद्धृतस्य बुद्धिव्यवस्थितस्योपजनितस्वातन्त्र्यस्य शब्दान्तरेण सम्बन्धमिच्छाम इति । अथैतदनिष्टम् "योगप्रमाणे[6] च तदभावेऽदर्शनं स्यात्"(7) "अथ शब्दानुशासनम्, केषां शब्दानाम्"(8) इति चैवमादीनां प्रयोगाणां[7] विरोधः प्राप्नोति । अनिष्टश्चैतत् ।

यत्पुनरेतदुक्तं (20.8) नित्यानामपघातानुपपत्ते[8]र्वृत्त्यपघाते[9] च तदपघातप्रसङ्गादिति,

---

[1] P K D अभिसम्बन्धाभ्युपगमात्

[2] D अनुड्वाहम्, sec.m. अनड्वाहम्

[3] P K D शिरसि

[4] P K °सम्बन्धे   A and Dkha. °सम्बन्ध   D °सम्बन्धे, sec.m. °सम्बन्ध

[5] P K संसारादपोद्धारे बुद्ध्यव° In D संसाराद् is written and deleted in the left margin. In its main text, however, it is समासादपोद्धारे बुद्ध्यवस्थितस्य. Raghavan too (14.4), like A, suggests समासात् in place of संसारात्.

[6] A योगप्रमाणो

[7] A तथा चैवमादीनाम्

[8] A अनुपघातानु°

[9] A वृत्त्युपघाते

---

(1) वार्त्तिक 5 on पा॰ सू॰ 5.1.119; म॰ भा॰ 5.1.119

(2) पा॰ सू॰ 4.1.1

(3) पा॰ सू॰ 1.4.21

(4) पा॰ सू॰ 2. 4. 71

(5) पा॰ सू॰ 6. 3.1

(6) अनड्वाहमुदहारि या त्वं हरसि शिरसा कुम्भं भगिनि साचीनमभिधावन्तमद्राक्षीरिति— म॰ भा॰ 1.1.58 on the first वार्त्तिक

(7) पा॰ सू॰ 1. 2. 55

(8) म॰ भा॰ 1.1.1

एतदप्यनुपपन्नम् । कस्मात्? गुणशक्तेः प्रयोजनोपरमे[1] सत्यात्मकल्पेन व्यवस्थानाभ्युपगमात् । नैत[2]दभ्युपगम्यते गुणस्योच्छित्तिर्भवति, वृत्तिर्वाऽस्याभिभूयते । किन्तर्हि पुरुषार्थनिबन्धना चरितार्था शक्तिरस्य पुरुषार्थप्रवृत्तौ प्रयोजनासद्भावा[3]दात्मकल्पेन व्यवतिष्ठत इत्येतद्विवक्षितम् । तस्माद्युक्तमेतत्तदपघातके हेतौ जिज्ञासा प्रवर्तत इति ।

दृष्टे साऽपार्था[4] चेत् (का॰ 1/3)

स्यादेतत् प्रत्यक्षो[5] दुःखप्रतीकारहेतुरस्ति । तस्य समतिक्रमे किं प्रयोजनम्? तद्यथा शारीरस्य तावदयमपगमहेतु[6]रनेकद्रव्यरसायनोपयोगः[7] । मानसस्यापि[8] मनोज्ञस्त्रीपानभोजनविलेपनवस्त्रालङ्कारादिविषयसम्प्राप्तिः[9] । आधिभौतिकस्य नीतिशास्त्राभ्यासः शस्त्रास्त्रकुशलता[10], विषमस्थानानध्यासनं च[11] । आधिदैविकस्यापि यथाकालं विविधनिवसनास्तरणगर्भगृहप्रासादजालान्तरचन्दनव्यजनमणिहारादिसेवाविविधौषधमङ्गलस्तुतिमन्त्रप्रयोगानुष्ठानमिति[12] । दृष्टे[13] हेतौ सा जिज्ञासाऽपार्थेति चेत्—

नैकान्ताऽत्यन्ततोऽभावात् ॥ का॰ 1/4॥

एतच्च[14] नैवम् । कस्मात्? **एकान्ताऽत्यन्ततोऽभावात्**[15] । एकान्तो[16] नाम नियमेन भावः । अत्यन्तं भूतस्याविनाशः । एकान्तश्च अत्यन्तं च ते एकान्तात्यन्ते तयोरभाव एकान्तात्यन्ततोऽभावः,

---

1. A प्रयोजनेऽपरमे
2. A न तद् for नैतद्
3. P K D पुरुषं प्रति प्रवृत्तौ प्रयोजनासम्भवात्
4. A समर्था
5. A प्रत्यक्षे
6. K उपगमहेतुर् D अपघातहेतुर्
7. A रसायनोपभोग
8. Dkha. मानसस्तस्यापि
9. A °आदिविषमसम्प्राप्तिर् P K °स्त्रीपानविलेपनभोजनवस्त्रालङ्कारादि°
10. A शास्त्रार्थकुशलता
11. A विषमस्थानाध्यासनम् D विषमस्थानानध्यासनम्, sec.m. विषमस्थानाध्यासनम् Dkha. °स्थानासनम्
12. A यथाकालविविधिनिस्वरणगर्भ°
13. A om. दृष्टे ... ऽत्यन्ततोऽभावात् (23.10-13)
14. A तच्च
15. A एकान्ताऽत्यन्तोऽभावः
16. A om. एकान्तो नाम ... ऽभावः, तस्मात् (23.13–24.1)

तस्मात् । षष्ठीस्थाने पञ्चमी । षष्ठ्या एव वा तसिः "षष्ठ्या व्याश्रये"(1) इति योगविभागात् । असमासकरणं वृत्तपूरणार्थम्, मानसस्य च दुःखस्य प्रतीकारे दोषान्तरोपसंग्रहार्थम्[1] । तथा हि, स्त्र्यादीनां[2] सत्ये[3] तस्मिन् दोषद्वयेऽशक्य[4]मर्जनं[5] कर्तुमस्वाभाविकत्वात् । सत्यर्जने रक्षणमशक्यम्, साधारणत्वात् । सति च रक्षणे क्षयः, कृतकत्वात् । सङ्गाच्चानुपशमो भूतोपघातमन्तरेण चासम्भव इत्येते दोषाः ।

आह—कथमेतदवगम्यते यद् दृष्टस्य हेतोरनैकान्तिकत्व[6]मनात्यन्तिकत्वं चेति?

उच्यते—प्रत्यक्षत[7] एवैतदुपलभ्यते । यदायुर्वेदविहितस्य[8] क्रियाक्रमस्याभियुक्तमात्मवन्तं भेषजभिषक्परिचारकसम्पन्नं[9] प्रत्यानर्थक्यम् । आह च—

सर्वेषां व्याधिरूपाणां निदानं त्रिविधं स्मृतम्(2) ।
आहारश्च विहारश्च कर्म पूर्वकृतं तथा ॥
तत्राहारविहारोत्थान् रोगान् द्रव्यमपोहति ।
यस्तु कर्मकृतो व्याधि[10]र्मरणात्स निवर्तते ॥

पुनरप्याह—

सोपद्रवः सर्वरूपो बलमांसेन्द्रियापहः ।
सारिष्टश्चैव यो व्याधिस्तं भिषक् परिवर्जयेत् ॥

इत्येवमनैकान्तिकत्वम् । अनात्यन्तिकत्वं तु निवृत्तानामपि व्याधीनां पुनरुत्पत्तिदर्शनात् । महता खल्वपि प्रयत्नेन निवर्तिता[11] व्याधयः पुनरुत्पद्यन्ते । तथा चोक्तम्—

---

1. A °संग्रहणार्थम्
2. D सूत्रादीना, sec. m. स्त्र्यादीनां
3. D सत्त्वे°, sec.m. सत्ये°
4. P K D न शक्यम्
5. A अर्जन्यम्
6. A अनैकान्तिकम्
7. P K D प्रत्यक्ष
8. A आयुवेदस्य
9. Dkha. °परिचारसम्पन्नम् ।
10. A omits व्याधिर् ... चैव यो (24.12-15), and lets only व्याधिस्तं भिषक् परिवर्जयेत्.
11. Dkha. विवर्तिता

---

(1) पा॰ सू॰ 5. 4. 48

(2) कर्मजा व्याधयः केचिद्दोषजाः सन्ति चापरे ।
सहजाः कथिताश्चान्ये व्याधयस्त्रिविधा मताः ॥
— हारीतसंहिता 3.2.23

पुनर्ज्वरे समुत्पन्ने क्रिया पूर्वज्वरानुगा ।

इति । तस्माद्यथैवास्यायुर्वेदादेः[1] प्रतीकारहेतुत्वं प्रत्यक्षसिद्धमेवमेकान्तात्यन्ततोऽभावो[2]ऽपि । तथा मानसस्य च । यथा च शारीरदुःखप्रतीकारहेतवो[3]ऽनैकान्तिकास्तथा स्त्र्यादयोऽपि[4] । कस्मात्? तत्सन्निधाने[5] विषयान्तराभिलाषदर्शनात् । यदि हि स्त्र्यादयो विषयाः सर्वदा दुःखप्रतीकारसमर्था[6] भवेयुः, किमिति तेषु सन्निहितेषु विषयिणो विषयान्तरजिघृक्षा स्यात्? एवमनैकान्तिकत्वम् । अनात्यन्तिकत्वमपि, निवृत्तेच्छानामपि भूयः प्रार्थनासम्भवात्[7] । यदि हि विषयोपभोगो[8]ऽत्यन्तमेव मानसं दुःखमपहन्यात्, किं प्राप्तं येन[9] भूयस्तं प्रति विषयिणोऽभिलाषः[10] स्यात्? किं कारणम्? यस्मान्न ह्यविद्यमाने तमसि देवदत्तस्य प्रदीपं प्रत्यपेक्षा[11] भवति । दृश्यते च निवृत्तेच्छानामपि विषयोपभोगा[12]द्विषयिणां भूयो[13] विषयाभिलाषः । तेन मन्यामहे नायं दृष्टो हेतु[14]र्दुःखमपहन्ति । किन्तर्हि सुतरां वृद्धिं करोति । आह च[15]—

न जातु कामः कामानामुपभोगेन शाम्यति ।
हविषा कृष्णवर्त्मेव भूय एवाभिवर्धते(1)॥

अपर आह—

संवेद्यत्वाद् गुरुत्वाच्च निन्दितत्वा[16]च्च साधुभिः ।
सर्वत्रासन्निधानाच्च न दृष्टो हेतु[17]रिष्यते ॥

1. D यथा स्यायुर्वेदादेः
2. A एकान्त्यतोऽभावो
3. A °प्रतीघात° Dkha. °प्रतिघात° Dkha. °हेतुर्, sec.m. °हेतवो
4. D यथा च शारीरदुःखप्रतिघातेहेतुवस्तथा मानसस्य च नैकान्तिकाः स्त्र्यादयोऽपि । in place of तथा मानसस्य ... स्त्र्यादयोऽपि ।
5. A तात्सन्निधाने
6. A दुःखप्रतीकारहेतवो
7. P K D प्रार्थनासद्भावात्
8. A विषयोपयोगौ P विष्टयोपभोगो Dkha. विषयोपयोगः Chakravarti (15.4) too, like K and D, reads विषयोपभोगो, which we have adopted.
9. A om. येन
10. A अभिलास्
11. Dkha. प्रतीक्षा
12. A विषयोगाद् Dkha. विषयोपयोगाद्
13. A भूयोऽपि
14. P K D नायं दृष्टो हेतुर् A नायं तुर् Dkha. नायं हेतुर्
15. A om. च
16. A निर्मितत्वात्
17. A तुर् for हेतुर्

---

(1) Cf. मनुस्मृति 2.94

संवेद्यत्वात् । भोगसाधनविकलानामर्थिनां मध्ये विषयिणोपयुज्यमाना[1]स्तैः संवेद्यन्ते[2] । तेषामप्रदायोपयुज्यमानं[3] नैर्घृण्यमाविष्कुर्यात् । विषयिणा[4] प्रदीयमानो वाऽर्थिभ्यः परिमितत्वादवच्छिद्येतेत्य[5]नुपायोऽयं[6] दुःखापघाते[7] बुद्धिमताम् ।

किञ्च गुरुत्वात् । भोगानां विविधनिवसनस्त्रीपानभोजनविलेपनालङ्कारादीनां[8] सामग्र्ये[9] सुखमुत्पद्यते । नाऽन्यतरवैकल्ये । सामग्र्य[10] चैषा[11] स्वाभाविकत्वादनुपपन्नम् । आह च[12]—

नाभिजाति[13] न विज्ञानं[14] न च शौर्य[15]मपेक्षते ।
लक्ष्मीः संस्कारयोगाच्च क्वचिदेवावतिष्ठते(1) ॥

इत्येवमनेकाश्रयत्वाद्[16] गुरुर्विषयभोगः[17] ।

किञ्च निन्दितत्वाच्च[18] साधुभिः । निन्दितः खल्वपि साधुभिर्विषयोपभोगः[19] । यस्मादाह—

आयासाश्च विघाताश्च[20] विप्रलम्भभयानि च ।

---

[1] D °भुज्यमास्, sec.m. °युज्यमानास्

[2] Raghavan (14.4) suggests the singular form उपयुज्यमानः तैः संवेद्यते.

[3] Rahgavan (14.4) suggests उपयुज्यमानः in place of उपयुज्यमानं.

[4] A विपयिणः

[5] A अवच्छिद्यतेत्य

[6] Dkha. om. ऽयम्

[7] Dkha. दुःखापघातो बुद्धिः

[8] P K D °भोजनविलेपनादीनां

[9] A सामर्थ्ये

[10] A सामर्थ्यम्

[11] Chakravarti (15.18) reads चैषामस्वा°.

[12] A om. च

[13] D नाभिजात्यम्

[14] A विज्ञातिम्

[15] A मोहम् for शौर्यम्

[16] A Dkha. अनेकार्थाश्रयत्वाद्

[17] A Dkha. गुरु विषयोपयोगः

[18] P K निन्दिताच् Chakravarti too (15.21) reads, like A and D, निन्दितत्वाच्च, which reading we have adopted

[19] D विषयभोग, sec.m. विषयोपभोगः

[20] A आयासाच्च प्रतीघाताः for आयासाश्च विघाताश्च D आयासाच्च विघाताच्च, sec.m. आयासाश्च विघाताश्च

---

(1) Cf. कादम्बरी, 'शुकनासोपदेश', pp. 56ff. for a similar characterization of लक्ष्मी.

यच्चान्यदशिवं[1] लोके तत्कामेभ्यः प्रवर्तते ॥

पुनरप्याह—

अयं स क्षेत्रियो व्याधिरयमात्यन्तिको ज्वरः ।
इदमास्पदमीतीनामेष योनिः सपाप्मनाम्[2] ॥
अगाधमेतत्पातालमेष पङ्को दुरुत्तरः ।
क्लेशव्याधिभयाकीर्णमेतच्छ्वभ्रं[3] भयावहम्[4] ॥
विविधायासशोकानामेतदायतनं महत् ।
दैन्यश्रमविषादानामेतत्क्षेत्रमपावृतम् ॥
योऽस्मा[5]द्विषयसम्भोगा[6]द्विहगः पञ्जरादिव ।
गतो वनेषु रमते स सुखानि समश्नुते[7] ॥

तस्मात् साधुभिरपाकृतत्वादसाधुर्विषयोपभोगः ।

किञ्च सर्वत्रासन्निधानात् । न हि सुप्रतिनिविष्टस्या[8]पि कामिनः सर्वत्र विषयसन्निधानेन भवितव्यम् । नो खल्वप्येकस्मिन्[9] देशेऽवस्थानं[10] सम्भवति, विषयाभावप्रसङ्गात् । तस्मादवश्यं वियोगेन भवितव्यम् । वियोगे च सति ध्रुवोऽनिष्टानुबन्ध इति कोऽर्थो विषयपरिग्रहेण? तत्र यदुक्तं[11](23.10-11) दृष्टस्य हेतोः सद्भावादपार्थका जिज्ञासेत्येतदयुक्तम् ॥1॥

आह—यद्येकान्तात्यन्ततोऽभावाद् दृष्टे हेताव[12]परितोषस्तेन तर्ह्यस्त्ययमन्यो हेतुरुभयदोषवर्जितः, स कस्मान्न परिगृह्यते? कोऽसौ[13] चेत्? उच्यते—शास्त्रोक्तः कर्मविधिः[14] । स ह्यैकान्तिकः । कथम्? एवं ह्याह—"पशुबन्धेन सर्वाल्ँलोकान् जयति"(1) । न तूक्तं कदाचि-

---

1. K यच्चाशिवं in place of यच्चान्यदशिवं
2. P सपाप्मनात्   Raghavan (14.4) suggests स पाप्मनाम्.
3. A च्छुभ्रम्
4. A Dkha. भयानकम्
5. PK यस्माद्
6. AD °संयोगाद् for °सम्भोगात्
7. A मुखाभिसमश्नुते
8. A सुप्रतिनिष्टस्य
9. A चैकस्मिन्
10. Chakravarti (16.7) omits अवस्थानं.
11. A युक्तम्
12. Dkha. दृष्टहेताव्
13. PKD कोऽसाविति चेत्   A om. चेत्   Dkha. कोऽसावित्
14. A कर्मविधस्

---

(1) शा॰भा॰ 1.2.4; शत॰ ब्रा॰ 11.7.1.1 : पशुबन्धेन यजते and 11.7.1.2,3: स यत्पशुबन्धेन यजते.

ज्जयति, कदाचिन्नेति । फलस्य प्रत्यक्षानुपलब्धे[1]रनैकान्तिकत्वमिति चेत्, स्यान्मतम् । प्रत्यक्षत एवेदं विहितस्य कर्मणः फलं नोपलभ्यते । तथा हि पुत्रकाम इष्टिं निरूप्य दुहितरमपि न प्राप्नोति[2] । अर्थकामश्च कर्म कृत्वा माषकमपि न लभते। तस्मान्नायमैकान्तिक[3] इति । एतच्च नैवम् । कस्मात्? साधनवैकल्यात्तदनुपपत्तेः । अनेकसाधनसाध्यो हि कर्मविधिः । यत्र फलं[4] नोपलभ्यते तत्र साधनवैकल्यमनुमातव्यम् । कस्मात्? न ह्येतदिष्टम्, सति कारणे कार्यं न भवतीति[5]। किञ्चान्यत्, संसाराऽभावप्रसङ्गात्[6] । यदि खल्वपि कर्मणः फलवत्त्वं नेष्यते तेन तन्निमित्तस्य संसारस्याभावप्रसङ्गः[7] । अनिष्टं चैतत् । तस्मात्सिद्धमस्यैकान्तिकत्वम् । आत्यन्तिकत्वमपि सिद्धमेव[8] । यस्मादाह "अपाम सोमममृता अभूम"[9](1) इति । अत्र सोमपानादमृतत्वावाप्तिः[10] श्रूयते । तस्मात्तदेवानुष्ठातव्यम् । किमन्येन हेतुना परिकल्पितेनेति जिज्ञासाऽपाथैवेति ।

उच्यते—

दृष्टवदानुश्रविकः (का॰ 2/1)

अनुश्रूयते इत्यनुश्रवः । अनुश्रवे भव(2) **आनुश्रविकः** । दृष्टेन तुल्यं वर्तते[11] **दृष्टवत्**[12](3) । किमसौ अनभिप्रेत इति वाक्यशेषः ।

आह, कः पुनरयमनुश्रवः?

उच्यते—मन्त्रब्राह्मणं यावद्वा पुरातनमनुश्रूयमाणं प्रामाण्येनाभ्युपगम्यते तत्रभवद्भिः । यथा श्रुतिनिबन्धनाः[13] स्मृतयोऽङ्गानि वेदास्तर्का वा । यथाह—

---

1. Dkha. प्रत्यक्षतानुपलब्धेर्
2. Dkha. लभते
3. A एकान्तिक
4. A फलेन
5. P भवति
6. Dkha. संसारभावप्रसंगात्
7. D संसारस्य भाव॰, sec.m. संसारभाव॰
8. A om. एव
9. A reads the full text as follows: अपाम सोमममृता अभूम अगन्मज्योतिरविदाम वेदान् । किन्नूनमस्मान्कृ- णवदरातिः किमु धूर्त्तिरमृत मर्त्यस्येति । (अथर्वशिर उप॰ 3) सोमपानाममृतत्वावाप्तिः श्रूयते ।
10. P D प्राप्तिः for तवाप्तिः
11. A om. वर्तते
12. A दृष्टवान्
13. A ॰निबन्धनः

---

(1) ऋग्वेद 8.48.3 (3) Cf. पा॰ सू॰ 4. 3. 53

(2) Cf. पा॰ सू॰ 5.1.115

वेदवेदाङ्गतर्केषु वेदसंज्ञा निरुच्यते ।

इति[1] ।

आह, किं पूर्वस्मादेव हेतोरयमानुश्रविको हेतुरनभिप्रेत इति?

नेत्युच्यते । किन्तर्हि—

स ह्य[2]विशुद्धिक्षयातिशययुक्तः[3] । (का॰ 2/2)

इति । स इत्यानुश्रविकस्य हेतोः प्रतिनिर्देशः । हिशब्दो यस्मादर्थे । अविशुद्धिश्च क्षय[4]श्चातिशयश्चाविशुद्धिक्षयातिशया[5]स्तैर्युक्तोऽयं[6] स भवत्यविशुद्धिक्षयातिशययुक्तः । एतदुक्तं भवति । यस्मादयमानुश्रविको हेतुरविशुद्धोऽनित्यस्तारतम्यवांश्चातो दृष्ट इवानभिप्रेतः[7] । तत्राविशुद्धियुक्तस्तावत् हिंसाविधानात् । यदा[8]ह ब्राह्मणे—"ब्राह्मणमालभेत"(1)इत्यादि। तथा—

षट्शतानि नियुज्यन्ते पशूनां मध्यमे[9]ऽहनि ।
अश्वमेधस्य वचनादूनानि पशुभिस्त्रिभिः ॥

इति । हिंसा चाविशुद्धिः, प्राणिनामिष्टशरीरव्यापादनात् ।

आह, तदनुपपत्तिः । शास्त्रचोदितत्वात् । यदि शास्त्रचोदितेयं हिंसा न स्यात्[10], मुक्तसंशयमविशुद्धित्वमस्याः प्रतिपद्यामहे। शास्त्रचोदिता तु । तस्मान्नेयमविशुद्धिः[11] । तत्प्रामाण्यानभ्युपगमाददोष[12] इति चेत्, स्यान्मतम् । वेदप्रामाण्यमभ्युपगच्छतामसंशयमेतदेवं स्यात् । हेतुवादकुशलास्तु

---

1. A om. इति
2. A हि
3. A om. अविशुद्धिक्षया ... हिशब्दो यस्मादर्थे
4. A विशुद्धिक्षयम्
5. KPD om. अविशुद्धिक्षयतिशयास्
6. PKD om. अयं स भवत्य ... अतिशययुक्तः
7. A इव नाभिप्रेतः Dkha. (इव) नाभिप्रेतः
8. A यस्माद्
9. Dkha. प्रथमे
10. Wezler (31.19) omits हिंसा. PKD शास्त्रे चोदितेयं हिंसा न स्यात् A शास्त्रेण चोद्यतेऽयं हिंसा न स्यान् D शास्त्रचोदितोऽयं न स्यात्
11. A अशुद्धिः
12. A अविशुद्धिर्

---

(1) तै॰ ब्रा॰ 3.4.1. The reading in that (तै॰) ब्राह्मण is : (ब्रह्मणे) ब्राह्मणमालभते.

वयम्। तस्मादभिधीयतां[1] यदि कश्चिदस्त्युभयपक्षप्रसिद्धो हेतुः यतो न संशयप्रत्ययः[2] स्यादिति। एतच्चायुक्तम्। कस्मात्? अभ्युपगमविरोधात्[3]। "दृष्टमनुमानमाप्तवचनं च" (का॰ 4) इति प्रामाण्यत्रय[4]मभ्युपगतं भवद्भिः। इदानीं वेदस्याप्तवचनत्वे[5] सत्यप्रामाण्यं ब्रुवतः स्वमतव्याघातः[6]। तस्मादयुक्तमेतत्। वेदस्याप्तवचनत्वानुपपत्ते[7]रदोष इति चेत्स्यान्मतम्। आप्तवचनत्वं प्राक्प्रसाध्यास्य[8] वेदस्य पश्चादयमुपालम्भो युक्तमभिधातुं स्यात्। तत्त्वसिद्धम्। तस्मादनुपालम्भोऽयमिति। एतदप्ययुक्तम्। कस्मात्? (अपुरुषबुद्धिपूर्वकत्वात्[9](?)) पुरुषबुद्धिपूर्वकत्वे सति रागादियोगाच्छब्दो विचारार्हः स्यात् किमाप्तवचनं न वेति। अपुरुषबुद्धिपूर्वकस्त्वाम्नायः स्वतन्त्रः पुरुषनिःश्रेयसार्थं प्रवर्तते। तस्मान्नैवंविधमनिष्टं विचारमर्हति।

किञ्चान्यत्, अविशुद्धित्वानुपपत्तिप्रसङ्गात्। यदि चैतस्मिन्नर्थे भवानपि पर्यनुयुज्येत[10], कथमिदं निश्चीयते यदुत प्राणिनामिष्टशरीरव्यापादनादविशुद्धिर्हिंसेति? अवश्यमभिधानीयं शास्त्रत इति। तदेव च शास्त्रं क्रतौ हिंसामाह। तस्मात् कोऽत्र हेतुः अन्यत्र प्रमाणमिहैवैतदप्रमाणं भवितु[11]मर्हति हिंसातो धर्म[12] (इतीति)[13]? अनुग्रहोपघातलक्षणत्वादहिंसाहिंसयोः प्रत्यक्षसिद्धिरिति चेत्—अथापि स्यात्, अहिंसातश्चानुग्रहो[14] भवतीष्टशरीराव्यापादनलक्षणः[15], हिंसातश्चोपघातो[16] भवति अभिप्रेतशरीरव्यापादनलक्षणः[17]। क्रियानुरूपं च फलमनुमातुं युक्तमिति प्रत्यक्षसिद्धमनयो[18]रिष्टानिष्टफलहेतुत्वम्। तस्मात् कोऽत्र शास्त्रव्यापार इति? एतच्चानुपपन्नम्।

---

[1] P K D अधीयताम्

[2] A निस्संशयः प्रत्ययः

[3] A अभ्युपगविरोधात्

[4] K D प्रमाणत्रयम्

[5] A आप्तवचने

[6] A स्वपक्षव्याघातः

[7] A आप्तवचनानुपपत्तेर् Dkha. वचनत्वादुपपत्तेर्

[8] A प्रसाध्यस्य

[9] This parenthetical insertion is made in agreement with Wezler (32.11).

[10] A पर्यनुयुज्यते D प्रर्यनुयोज्येत, sec.m. पर्यनुयुज्येत

[11] A अप्रमाणमिदमथ प्रमाणं भवितुम्

[12] P K D हिंसोऽधर्म Chakravarti (17.27) reads हिंसा धर्म (इति), which Raghavan (14.5) corrects into हिंसाधर्म (इति).

[13] All the Mss read इति. I follow Wezler (33.2).

[14] A अहिंसातः प्राणिनामनुग्रहो

[15] P इष्टशरीरव्यापादानलक्षणः A शरीराऽनभिद्रोहलक्षणः instead of इष्टशरीराव्यापादनलक्षणः

[16] K D हिंसातश्चापघातो

[17] D ॰व्यापादलक्षणः

[18] D एतयोर्

कस्मात्? अनिष्टप्रसङ्गात्। एवं हि परिकल्प्यमाने गुरुभार्यागमने[1]ऽपि सत्त्वान्तरानुग्रहसामर्थ्यादिष्टफलसम्बन्धः स्यात्। माणवकं चोपनीय व्रतादेशशौच-ब्रह्मचर्यस्वाध्यायाभ्यासभैक्षाग्निपरिचरणगुरुशुश्रूषादिषु[2] प्रवर्तयतोऽनिष्टफलसम्बन्धः स्यात्। तस्माल्लोकशास्त्रविरुद्धोऽसत्तर्को नेष्ट इति। उभयाभिधनाच्छास्त्रविरोधाप्रसङ्ग इति चेत्, स्यान्मतम्—तदेव शास्त्रमहिंसामाह, तदेव हिंसाम्। एवं सति परस्परविरुद्धयोर[3]र्थयोश्चोदितत्वादुभयानुग्रहासम्भवे शास्त्रविरोधप्रसङ्ग इति। तच्च नैवम्। कस्मात्? उत्सर्गापवादयो[4]र्विषयभेदात्। सामान्ये हि शास्त्र[5]महिंसामुत्सृज्य[6] विशेषे क्रतुलक्षणे[7]ऽपवादं शास्ति। सामान्यविहितं च विशेषविहितेन बाध्यते। तद्यथा "दधि ब्राह्मणेभ्यो दीयतां तक्रं कौण्डिन्याय"(1) इति। तस्मादुत्सर्गापवादयोर्विषयभेदान्नास्ति शास्त्रविरोधः[8]।

किञ्चान्यत्। कन्यागमनवत्[9] पुनर्विधाने दोषाभावात्। यथा खल्वपि[10] शास्त्रे प्रतिषिद्धं कन्यागमनमिति नेदानीमभिरूपः प्रतिगृह्य तामभिगम्याधर्मभाग्भवति। "गृहस्थः सदृशीं भार्यां विन्देतानन्यपूर्विकाम्"(2) इति शास्त्रान्तरसद्भावात्। एवं शास्त्रे प्रतिषिद्धा हिंसा। नेदानीं क्रतौ हिंसायां प्रवर्तमानोऽनिष्टफलः[11] स्यात्। पूर्वोक्तादेव शास्त्रान्तरसद्भावात्। तत्र यदुक्तं(29.12) प्राणिनामिष्टशरीरव्यापादनादविशुद्धिर्हिंसेत्येतदयुक्तम्।

उच्यते—न, अभिप्रायानवबोधात्। चित्रमपि बह्वेतदभिधीयमानो नाभिप्रायं[12] स्पृशतीत्युपेक्ष्यते[13]। किं कारणम्? {यस्मान्[14]} न वयं वेदस्य प्रामाण्यं[15] प्रत्याचक्ष्महे[16]। नो खल्वपि

---

1. P K D गुरुभार्यानुगमने
2. P K D °गुरुशुश्रूषादि A °भैक्षाग्निचरण°
3. A Dkha. परस्परविरोधिनोर्
4. A तत्सर्गापवादयो
5. P K D शास्त्रे
6. A उत्सृ
7. D कृत°, sec.m. क्रतु°
8. P K D शास्त्रे विरोधइति
9. P K D कन्यागमनात्
10. A om. खल्वपि
11. A ऽनिष्टफलभाक्
12. Dkha. अभिधीयमानं नो नाभिप्रायं
13. A नाभिप्रायं वेद भवान्
14. A om. किं कारणं यस्मात्
15. P K D om. प्रामाण्यम्
16. K प्रात्याचक्ष्महे

---

(1) Cf. म॰ भा॰ 1.1.47

(2) गौ॰ धर्म॰ 1.4.1

ब्रूमः शास्त्रचोदितायां[1] हिंसायां प्रवर्तमानस्यानिष्टफलसम्बन्धो[2] भवति। किन्तर्हि, सति स्वर्गप्राप्ति[3]निमित्तत्वे वेदविहितस्य कर्मणः समनुष्ठानं प्राणिना[4]मुपघातमन्तरेण न सम्भवति इति[5] हितकामैरप्युपेक्ष्यते। यस्मान्न ह्येतदुक्तं यदन्येषामुपघातेनात्मानुग्रहः[6] कार्य इति। आह—

न तत्परस्य सन्दध्यात्प्रतिकूलं यदात्मनः।
एष संक्षेपतो धर्मः कामादन्यः प्रवर्तते(1)॥

आह, यद्येतन्नाभ्युपगम्यते कथं पूर्वमुक्तं प्राणिना[7]मिष्टशरीरव्यापादनादविशुद्धिर्हिंसेति[8]?

उच्यते—कार्ये कारणोपचारात्। योऽसौ हिंसानिमित्तकः कारुण्यान् मनसि नः परिताप उत्पद्यते सा खल्वविशुद्धिरभिप्रेता। तस्यां[9]कारणमुपचर्योक्तमविशुद्धिर्हिंसेति। यथा मुद्गैस्तृप्ताः गोभिः सुखिन इति।

आह—कथमेतदवगम्यते हिंसाकार्यं परितापमात्रमविशुद्धिराचार्यस्याभिप्रेता[10], न पुनर्हिंसैवेति?

उच्यते—प्रकर्षप्रत्ययोपलब्धेः। वक्ष्यत्युपरिष्टात्[11] "तद्विपरीतः श्रेयान्" (का॰ 2) इति। समानजातीयं च प्रतियोगिन[12]मपेक्ष्य प्रकर्षप्रत्यय उत्पद्यते[13]। यदि चानुश्रविकस्य प्रशस्यता[14] नाभिप्रेता स्यात्, प्रकर्षप्रत्ययानुपपत्तिप्रसङ्गः। तस्मान्नोत्सूत्रमेतत्।

---

[1] A शास्त्रे चोदितायां
[2] A °सम्बन्धा
[3] A स्वप्राप्ति°
[4] All the Mss. read प्राणिजम्.
[5] A सम्भवेतीति
[6] A उपघातोऽन्तात्मानुग्रहः
[7] A न प्राणिणाम्
[8] A om. हिंसेति ... खल्वविशुद्धिर् (32.10 - 32.12)
[9] A किं तु तस्यां
[10] A आचार्यस्याभिस्सुखिना इति। आह। कथमेतदवगम्यते हिंसाकार्यं परितापमात्रमशुद्धिराचार्यस्याभिप्रेता। (A repeats सुखिना ... अविशुद्धिर्.)
[11] KD उपरिष्ठात्
[12] KPD चाप्रतियोगिनम् Raghavan (14.5) also corrects (च) अप्रतियोगिनम् into (च) प्रतियोगिनम्
[13] P उत्पद्येत
[14] A प्रशस्यत

---

(1) महाभारत 5. 39. 57, 13.114. 8

आह, सन्न्यासाऽनुपपत्तिः, अवियोगश्रवणात्[1]। न हि कर्मणोऽत्यागसन्न्यासयोस्त्व[2]मीशिषे। किन्तर्हि शास्त्रं यदाह तदवश्यं कर्तव्यम्[3]। तच्चामरणात् कर्मभिरवियोगं[4] शास्ति। कस्मात्? एवं ह्याह—"जरामर्यमेतत् सत्रं यदग्निहोत्रदार्शपौर्णमासौ[5], जरया ह एतस्मात्[6] सत्राद्विमुच्यते[7], मृत्युना च"(1)। पुनरप्याह—

कुर्वन्नेवेह कर्माणि जिजीविषेच्छतं समाः(2) ॥

तस्मादामरणात् कर्मणामत्यागः। तस्मिन् सति हेत्वन्तरकर्मणामानर्थक्यम्[8]।

उच्यते—न, साधनाना[9]मस्वाभाविकत्वात्। पत्नीसंयोगादिभिरनेकैः साधनैरयं कर्मविधिः प्रसाध्यते। तेषां चास्वाभाविकत्वादशक्यमर्जनं प्रयोगतः[10] पूर्वं कर्तुमिति प्रतिपादितम्(24.3)। तस्मादनित्यानि कर्माणि। हेतुशास्त्रविप्रतिपत्तौ शास्त्रबलीयस्त्वा[11]दिति चेत्, स्यान्मतम्। यत्र हेतुशास्त्रयोर्विप्रतिपत्तिर्भवति तत्र विप्रलम्भ[12]भूयिष्ठत्वादनुमानस्य बलीयः शास्त्रमित्यवश्यमभ्युपगन्तव्यमिति। तच्चानुपन्नम्। कस्मात्? शक्तितो विनियोगात्[13]। शक्तिमपेक्ष्य शास्त्रमग्निहोत्रादीनि कर्माणि विदधत्तेषामनित्यतां ज्ञापयति। कथम्? एवं ह्याह, "योऽलं सन्नग्निहोत्रायाग्निहोत्रं न[14] जुहोति तमेषा देवताऽपरुद्धाऽपरुणद्ध्यस्माच्च लोकादमुष्माच्चोभाभ्याम्"(3)। तस्मादनित्यानि कर्माणि। किञ्चान्यत्[15]। जराग्रहणसामर्थ्यात्[16]। त्वदीय[17] एव ज्ञापके[18] जराग्रहणमस्ति। अतोऽनुमीयते शक्त्यपेक्षमनित्यं च कर्म। किञ्चान्यत्, शास्त्रहानेः। उभयं हि शास्त्रे दृष्टम्। कर्माणि[19] सन्न्यासश्च। यदि पुनः कर्माणि कर्तव्य[20]तयेष्यन्ते, तेन सन्न्यासशास्त्रं हीयते। तस्माद्विषयरागाविष्करणमेतद्वः।

---

1. A अवियोगान् D अभियोगश्रवणात्
2. A कर्मणोस्त्यागसयोस् Dkha. कर्मणस्त्यागसंन्यासे यस् Chakravarti (19.4-5) and Wezler (35.9-10) read कर्मणस्त्यागसन्न्यासयोस्.
3. KPD अवश्यकर्त्तव्यम्
4. A अभियोगम्
5. D यदग्निहोत्रं दर्श॰
6. D एकस्मात्
7. A ह वा एतस्मात्सूत्राद् विप्रमुच्यते
8. KPD हेत्वन्तराणामानन्तर्यम् A आनर्थ्यक्याम्
9. Dkha. साधारणम्
10. KPD नियोगतः
11. A शास्त्रबलीयस्त्वम्
12. Dkha. विलम्भ॰
13. PKD यस्माच्छक्तितो विनियोगः
14. A नाग्निहोत्रं
15. Chakravarti (19.17) omits किञ्चान्यत् ... मनित्यं च कर्म.
16. A ॰सामर्थ्या
17. PKD तदीयम्
18. PKD om. ज्ञापके
19. A निर्दिष्टकर्माणि for दृष्टम्। कर्माणि
20. KPD नित्यकर्तव्यतयेष्यन्ते A ॰तयेष्यते D कर्तव्येष्यन्ते, sec.m. कर्तव्यतेष्यन्ते

---

(1) See शा॰ भा॰ 2.4.4, where it is quoted with some variants in reading. Also see शत॰ ब्रा॰ 12.4.1.1

(2) ईश॰ उप॰ 2

(3) ऐत॰ ब्रा॰ 25.5.12

आह—न, श्रुतिबलीयस्त्वात्[1]। तुल्यबलयोर्हि[2] शास्त्रयोरेकविषयसन्निपाते द्वयोर्युगपदनुग्रहासम्भवे विकल्पपर्यायौ भवतः। श्रुतिस्मृतिसन्निपाते च श्रुतिर्बलीयसी, स्मृतिविहितश्च सन्न्यासः। तस्मान्नानयोर्विकल्पः। नो खल्वपि पर्यायो न्याय्यः[3]।

उच्यते—तदितरत्र तुल्यम्। यथैव कर्मणां समनुष्ठानं शास्ति शास्त्रं तथा सन्न्यासमपि। कथम्? एवं ह्या[4]ह—

> न कर्मणा न प्रजया धनेन त्यागेनैकेनामृतत्वमानशुः।
> परेण नाकं निहितं गुहायां विभ्राजते यद्यतयो[5] विशन्ति(1) ॥

तथा—

> कर्मणा[6] मृत्युमृषयो निषेधुः[7] प्रजावन्तो द्रविणमिच्छमाणाः।
> अथाऽपरे[8] ऋषयो मनीषिणः परं कर्मभ्योऽमृतत्वमानशुः ॥

ब्राह्मणं[9] चात्र भवति—"तद्य इदं विदुः, ये चेमेऽरण्ये[10] श्रद्धातप इत्युपासते तेऽर्चिषमभिसम्भवन्ति। अर्चिषोऽहरह्न[11] आपूर्यमाणपक्ष[12]मापूर्यमाणपक्षा[13]द्यान्षडुदङ्ङेति[14] मासांस्तान्मासेभ्यः संवत्सरं संवत्सरादादित्यमादित्याच्चन्द्रमसं चन्द्रमसो[15] विद्युतं तत्पुरुषोऽमाणवः स एतान्[16] ब्रह्म गमयति"(2)। पुनरप्याह—"एतमेव विदित्वा मुनिर्भवति, एतमेव प्रव्राजिनो लोक[17]मिच्छन्तः प्रव्रजन्ति।

---

1. A अश्रुतिबलीयं for न, श्रुतिबलीय॰
2. A एव in place of हि
3. KPD न्यायः
4. A om. हि
5. D विभ्राजदेतद्यतयो
6. A न कर्मणा
7. PKD निषेदुः
8. K अथवापरे D अथ वापरे Dkha. अथ वा परे
9. A ब्रक्ताणं
10. All the Mss. read ऽरण्याः. I follow Chakravarti (20.1).
11. A इत्युपासेतेऽचिरभिसंवर्त्यर्चिषः अहः अर्कः Dkha. (इत्यु) उपासते न चाभिसम्भवत्यथोऽहरह्न
12. A आपूर्यमाणपक्षस्
13. A तस्माद् for ॰पक्षाद्
14. A यान्तूदाङ्ङः (?)
15. A चन्द्रमसा
16. Dkha. एतम्
17. A लोकं प्रव्राजिन

---

(1) कैवल्योपनिषद् 3
(2) Cf. छा॰ उप॰ 5.10.1-2

एतद्वः सर्वे[1] पूर्वे विद्वांसः प्रजां नाकामयन्त[2], प्रजया किं[3] करिष्यामो येषां नायमात्मा नायं लोक इति ते ह स्म पुत्रैषणायाश्च वित्तैषणाया लोकै[4]षणायाश्चाथ[5] भिक्षाचर्यं चरन्तीति”(1)। तस्मादेतेऽत्याग[6]सन्न्यासयोरुभयो[7]र्लिङ्गम् ।

आह—यद्यप्येवं शास्त्रं[8] तथापि समनुष्ठाने विधिरस्ति। विहितं चावश्यं कर्तव्यम्। सन्न्यासे त्वर्थवादमात्रमित्यनयोरयं विशेषः। तस्मिन् सति समनुष्ठानं ज्यायो, न त्यागः।

उच्यते—कोऽयं विधिः[9], कोऽयमर्थवादः[10]?

आह—विधिस्तदर्थत्वेनापूर्वोपदेशः[11]। यो हि विध्यर्थेन लिङा लोटा कृत्यैर्वाऽपूर्वोपदेशः[12] क्रियते स विधिः। यथा[13]—“अग्निहोत्रं जुहुयात् स्वर्गकामः”। “वायव्यं श्वेतमजमालभेत भूतिकामः”(2) इति[14]। स्तुतिरर्थवादः। तस्य तु विहितस्य प्ररोचनार्थं[15] या स्तुतिः[16] सोऽर्थवादः। तद्यथा—“वायु[17]र्वै क्षेपिष्ठा देवता वायुमेव तेन भागधेयेनोपधावति, स एवैनं भूतिं[18] गमयति”(3) इति[19]। एवंविधां स्तुति[20]मुपश्रुत्य फलार्थिने हि यजमानाय विधिः प्ररोचते। एतस्मिन् हितकामः

---

1. A एतद्ध स्म वै
2. P प्रजानां कामयन्तु　D Kha. प्रजानां कामयन्ते
3. A किं प्रजया
4. P K D पुत्रेषनायाश्च वित्तेषणायाश्च लोकेषणायाश्च
5. च व्युत्थायाथ
6. ऽत्यागसन्न्यासयोर् looks more apposite and consistent, though all Mss read त्याग. (P writes त्याग below the line.)
7. A उभयो for उभयोर्
8. A D शास्त्रवचनं
9. A कोऽयं विधिर्नाम
10. A कोऽर्थवाद :
11. A and Dkha. तदार्थेनापूरोपदेशः　Chakarvarti (20.11) and Wezler (38.12) read तदर्थेनापूर्वोपदेशः.
12. A कृत्यैर्वापूर्वोपदेशः
13. A तद्यथा
14. Dkha. इत्यादि
15. P K D प्रयोजनार्थं
16. A and Dkha. स्तुतिः क्रियते ।
17. A वा
18. A भूविं　Dkha. om. भूतिं
19. A om. इति
20. P K D insert हि before स्तुतिम्.　A एवंविधाश्रुतिम्

---

(1) बृहदा॰ उप॰ 4. 4. 25
(2) तै॰ सं॰ 2.1.1.1
(3) Cf. तै॰ सं॰ 2.1.1.1.

प्रवर्तत इति।

उच्यते—न, अत एव सन्न्याससिद्धिः। एवं चेन्मन्यसे यमाम्नायः श्रेयांसमर्थं मन्यते तं प्ररोचनाय स्तौति (इति) तथा सन्न्याससिद्धिः। कस्मात्? स्तुतत्वात्। बहुलार्थिनां[1] सन्न्यासमाम्नायः स्तौति। स कस्मान्न प्ररोचते? इतरथा ह्यानर्थक्यम्। यदि खल्वप्यर्थवादः स्तुवन्नपि[2] न[3] प्ररोचयेत्, यदुक्तं (35.9) प्ररोचनार्थोऽर्थवाद इति तद् भवद्भि[4]र्हापितव्यं स्यात्। अनर्थको ह्येवं सत्यर्थवादो न प्ररोचनार्थः। अर्थान्तरवचनं वा[5]। यदि[6] प्ररोचनार्थत्वमस्य नेष्यते, तेन तर्ह्यर्थान्तरं[7] वक्तव्यं मा भूदनर्थकत्वं वेदैकदेशस्येति[8]। तस्मान्नानया विभीषिकया वयं शक्याः सन्मार्गादपनेतुम्[9]।

किञ्चान्यत्। उभयथा विकल्पेऽनिष्टप्रसङ्गात्[10]। इहायमाम्नायो विधेयत्वेन[11] वा सन्न्यासं स्तूयात् अविधेयत्वेन वा। किञ्चातः? तद्यदि ताव[12]द्विधेयत्वेन स्तौति किमन्यद्विचार्यते? सिद्धः सन्न्यासः। अथाविधेयत्वेन, स्तुतावस्य[13] प्रयोजनं कर्तव्यम्[14]। यद्धि कर्तव्यतया नेष्टं[15] तदपुरुषबुद्धिपूर्वकः स्वतन्त्रः पुरुषनिःश्रेयसार्थं प्रवर्तमान[16] आम्नायः किमिति प्ररोचयेत्? तस्मादेतामपि कल्पनां कृत्वा कृशमेवैतत्। अथवोभयथा विकल्प इत्यस्यायमन्योऽर्थः। इहायमाम्नायो[17] भूतार्थेन वा सन्न्यासं प्ररोचयेदभूतार्थेन वा? किञ्चातः? तद्यदि[18] तावद् भूतार्थेन

---

[1] PKD बहुबलार्थिनां Dkha. बहुफलार्थिनां Raghavan (14.5) too suggests, like Dkha., बहुफलार्थिनाम्.

[2] A om. स्तुवन्नपि ... ऽर्थवाद

[3] Wezler (39.8) omits न.

[4] A भवद्भिरेव

[5] A om. वा after अर्थान्तरवचनं

[6] A यदि वा

[7] A तेनेर्ह्यर्थान्तरं

[8] A वैदकदेश°

[9] A सन्मार्गाद–

[10] D विकल्पे अनिष्टप्रसंगः Dkha. उभयाविकल्पेऽनिष्टप्रसंगात्

[11] A विधयत्वेन

[12] A om. तावद्

[13] A स्तुतावश्यप्रयोजनम्

[14] A वर्तव्यम्

[15] D निष्ठं, sec.m. नेष्टम्

[16] A प्रवर्तमानस्य (?)

[17] A आम्नाये

[18] A किंचातत्पैद्यदि (?)

प्रोचयति तथा सत्य[1]मृतत्वप्रापकस्य सन्न्यासस्यापरिग्रहे विषयरागादन्यो हेतुर्वक्तव्यः। अथाभूतार्थेन[2], पुरुषो निःश्रेयसाद्धीयते[3]। कस्मात्? न ह्येतद्युक्तं यदश्रेयसि मार्गे प्रमाणभूत आम्नायो मातृमोदकन्यायेन[4] हितार्थिनः प्राणिनः प्रतारयेत्[5]। तस्मादयुक्तमेतत्।

किञ्चान्यत्, अनेकान्तात्। न चायमेकान्तो यद्विहितमेव कर्तव्यम्। तथा च शाबराः[6] पठन्ति "ग्रामगमनं भवतः शोभनमित्यत्रान्तरेण विधिं स्तुतिरेव देवदत्तं ग्रामगमनाय प्रोचयति" इति।

किञ्चान्यत्, आशङ्काप्रसङ्गात्। यदि खल्वपि किञ्चित् सत्यं किञ्चिदनृतं[7] ब्रूयाद्वेदस्तथा सति पौरुषेयवाक्यवद्वेदवाक्येष्वपि आशङ्का प्रसज्येत[8]। तथा च सति यदुक्तं "(मा तारि(?))[9] श्रुतौ भक्तिः सहसैव महात्मनाम्" इति तद् व्याहतमिति।

किञ्चान्यत्। (अवैशद्य)प्रसङ्गात्[10]। यदि खल्वपि किञ्चित्सत्यं किञ्चिदनृतं ब्रूयाद्वेदस्तथा सति (अवैशद्य)प्रसङ्गः[11]। अनिष्टश्चैतत्[12]।

किञ्च। विध्यनुमानं[13] वा तदेवमेकदेशभूतत्वात्[14]। अथवा विध्येकदेशो[15]ऽर्थवाद इत्यतिसृष्टं[16] भवता। तत्र सन्न्यासे[17]ऽर्थवादमुपलभ्य विधिरप्यस्तीति अनुमातव्यम्। अनुपलम्भा[18]ददोष इति चेत्, स्याच्चैवं यद्यसौ विधिरुपलभ्यते। तस्मादनुपलम्भादयं[19]

---

1. A भूतार्थे यथा सत्य्
2. P K D अभूतार्थेन for अथाभूतार्थेन
3. A पुरुषनिःश्रेयसार्थो हीयते
4. P and Dkha. मातृमोदकन्यायने A मोदकन्यायेन for मातृमोदक°
5. A प्रतोरयेत्
6. K D शावराः
7. Dkha. पूरितम् instead of अनृतं
8. A प्रसज्यते
9. P K D om. (मा तारि(?) ... वेदस्तथा सति (37.8-11) A मा तरि
10. A आह वैशद्यप्रसंगात्
11. P अव ... प्रसंगः K अर्थवंसप्रसंगः A अवैशस्यप्रसंगः D प्रसङ्गः, sec.m. अध्वंशप्रसङ्गः
12. K चैत्
13. A बुद्ध्यनुमानं
14. तत् ... भूतत्वात् is the reading in P K and D. Wezler (40.16), however, reads तदेकदेशभूतत्वात्. A ददेकदेश°
15. A विध्यैकदेशौ
16. A अभिसृष्ट
17. P K D न्यासे
18. A उपालम्भात्
19. Chakravarti (21.11-12) reads तस्मान्नाऽनुप°.

दोषान्निवर्तिष्यत इति । एतच्चानुपपन्नम् । कस्मात्? अनेकभेदत्वात् । उपलब्धौ[1] यत्नः क्रियताम्(1) । अनेकभेदो हि प्रतिवेदमाम्नायः । तत्र यदुक्तं (35.4) विधिसद्भावात् क्रियाप्राधान्यमित्येतदप्ययुक्तम् । इतिकर्तव्यतानुपदेशात्[2] सन्न्यासानुपपत्तिरिति चेत्, अथापि स्यात् । यदि सन्न्यासमप्याम्नायो विधेयं मन्येत[3], तेन यथा गार्हस्थ्यस्येतिकर्तव्यतां भार्योद्वहनादिकां मन्त्रवदुपदिशति तथा सन्न्यासमप्युपदिशेत् । न तूपदिष्टवान् । तस्मान्नास्ति सन्न्यास इति । एतदप्ययुक्तम् । कस्मात्? अभावात्[4] । इतिकर्तव्यतानां हि सर्वासामभावः सन्न्यासः । तत्र किं शास्त्रमुपदेक्ष्यति[5]? यावती खल्वितिकर्तव्यता सन्न्यासाङ्गं तामु[6]पदिशति शास्त्रम्[7] । कथम्? एवं ह्याह—

तपःश्रद्धे ये ह्युपवसन्त्यरण्ये शान्ता विद्वांसो भैक्षचर्यां[8] चरन्तः ।
सूर्यद्वारेण ते विरजाः[9] प्रयान्ति यत्रामृतः स पुरुषो(ह्य्)अव्ययात्मा[10](2) ॥

तत्र तपःश्रद्धे ये ह्युपवसन्तीत्यनेन श्रद्धयोपेतं[11] यमनियमलक्षणं[12] धर्ममाह । अरण्य इति गृहेभ्यो विनिस्सृतिम् । शान्ता इतीन्द्रियाणामन्तःकरणस्य च विषयाभिलाषाद्विनिवर्तनम् । विद्वांस इति पूर्वरात्रापररात्रादिषु कालेष्वनिर्विण्णस्य[13] योगिनो ज्ञानाभ्यासम् । भैक्षचर्यां[14] चरन्त इति शरीरस्थितिनिमित्तं परिमित[15]मभ्यवहारनियोगम्[16] । उत्तरार्धेन च[17] फलमाचष्टे । तन्निबन्धनश्च

---

[1] A उपलब्धे Wezler (41.1) reads उपलम्भौ, as if it is a reading from some Ms, though there is no such evidence in any Ms.

[2] A इत्येतानुपदेशात्

[3] P K D मन्यते

[4] A अभावतः

[5] D उपदिक्ष्यति

[6] Chakravarti (21.19) reads सन्न्यासाङ्गताम्. Raghavan (14.5) corrects it into सन्न्यासाङ्गं ताम्, which agrees with the reading (of the Mss) adopted by us.

[7] P K D read आदिशति, thus omitting शास्त्रम्.

[8] K भैर्यचर्यां A भिक्षाचर्यं

[9] P अरणसः K रजसः D ऽरजसः, sec. m. विरजसः I follow Chakravarti (21.22), who anticipates Wezler (41.13).

[10] A व्यया

[11] P K D अत्रोपेतं instead of अनेन श्रद्धयोपेतम्

[12] A यमनियमवाचकं लक्षणं

[13] P कालेषु निर्विण्णस्य A कालष्वेविषणगस्य

[14] A भिक्षाचर्यां

[15] A and Dkha. om. परिमितम्

[16] A अध्याहारनियोगम् for परिमितमभ्यवहारनियोगम्

[17] A फ च

---

(1) म॰ भा॰ 1.1.1

(2) मुण्डक उप॰ 1. 2.11

विस्तरः सन्न्यासेतिकर्तव्यतायां[1] मन्वादिभिरभिहितः। श्रुतिनिर्वचनाश्च[2] स्मृतयो भवतां प्रमाणमिति पक्षः। तत्र यदुक्तम् (38.3) इतिकर्तव्यताऽनुपदेशान्नास्ति सन्न्यास इत्येतदयुक्तम्। एवं च न नित्यानि[3] कर्माणि। यत्त्वनेनैतदुक्तम् (27.17f.) आनुश्रविको हेतुरैकान्तिक[4] इति, सत्यमेतत्। अवश्यं हि कर्मणः फलमभ्युपगन्तव्यम्। इतरथा हि तन्निमित्तस्य संसारस्याभावादनिष्टप्रसङ्गः। तस्मादनिष्ट[5]मेवैतदाचार्यस्य।

आह, कथमेतदनुमातव्यमिति?

उच्यते—क्षयग्रहणसामर्थ्यात्। यदि पूर्वसूत्रोक्तमिहानुवर्तते, क्षयग्रहणमनर्थकं स्यात्। कस्मात्? अत्यन्ताभावपर्यायो हि क्षय इति कृत्वा। एवं सिद्धो[6]ऽविशुद्धियोगः।

आह—क्षययोग इदानीं कथ[7]मनुमातव्य इति?

उच्यते—क्षययोगोऽङ्गपरिमाणात्[8]। क्षययोगः पुनरस्य हेतो[9]रङ्गपरिमाणा[10]द्वेदितव्यः। यानि हि यजेरङ्गानि पशुपुरोडाशादीनि[11], तानि परिमितानि। परिमितानां[12] साधनानां तन्त्वादीनां परिमितं कार्यं पटादि दृष्टम्। परिमितं[13] क्षयधर्मि दृष्टम्[14]। तद्वदेव[15] (एतद्)।

किञ्चान्यत्। संसारोपलम्भात्। दृश्यते चायं वाग्बुद्धिस्वभावाहारविहारभेदभिन्नकर्मविपाक-वैचित्र्यनिमित्तः संसारः[16]। यदि पुनः साक्षात्कृतं कर्माक्षयफलं स्यात्, स[17] पुनरावृत्त्यभावात्

---

1. A om. सन्न्यासेतिकर्तव्यतायां ... ऽनुपदेशान्नास्ति
2. KPD श्रुतिनिर्वचनाच्
3. A एवमनित्यानि Dkha. एवं चानित्यानि
4. PKDA अनैकान्तिक Dkha. एकान्तिक I follow Wezler (42.5).
5. A इष्टं for अनिष्टम्
6. A सिद्धौ
7. A कथमिदानीं
8. A अंगपरिणामान्
9. PKD हेतोः पुनर्
10. A अंगं परिणामाद्
11. A पशुपुरोडागशप्रभृतीनि
12. A and Dkha. परिमितानां हि
13. A and Dkha. परिमितं च
14. A ष्टम् for दृष्टम्
15. A एवं
16. All the Mss read–कर्मविहार –. Wezler's proposal (43.3) °भेदभिन्नः कर्मविपाकवैचित्र्यनिमित्तः संसारः seems equally plausible.
17. A om. स

प्राणिनां नोपलभ्येत[1]। शब्दसामर्थ्यान्नित्यत्वमिति चेत्, स्यादेतत्। "शब्दप्रमाणका वयम्, यच्छब्द आह तदस्माकं प्रमाणम्"(1)। स चास्य हेतोरमृतत्वमाह "तरति मृत्युं, तरति पाप्मानम्"(2) इत्यादि। तस्मादनिच्छताऽप्येतदवश्यमभ्युपगन्तव्यम्। अनभ्युपगमे[2] वा प्रतिज्ञाहानिः—वेदः प्रमाणमिति। एत[3]च्च नैवम्। कस्मात्? शब्दान्तरेण[4] विरोधात्। अनित्यत्वमस्य हेतोः शब्दोऽनुमन्यते। तस्यैवं सति विरोधः प्राप्नोति। कथम्? एवं ह्याह—"अथ ये इमे ग्रामे इष्टापूर्ते[5] दत्तमित्युपासते[6], ते धूममभिसम्भवन्ति। धूमो भूत्वाऽभ्रं भवति। मेघो भूत्वा प्रवर्षति। त इह व्रीहियवा ओषधिवनस्पतयस्तिलमाषा[7] इति जायन्ते। (अ)तो[8] वै योऽन्नमत्ति यो रेतः सिञ्चति स[9] भूय एव[10] भवति"(3)इति। तत्र यदुक्तं (40.1) शब्दसामर्थ्यान्नित्यत्वमित्येतदयुक्तम्। उभयाभिधाना[11]च्छास्त्रविरोधप्रसङ्ग इति चेत्[12], स्यान्मतम्। तदेव शास्त्रं नित्यत्वमाह तदेवानित्यत्वम्। एवं सति परस्परविरोधिनोरर्थयोश्चोदितत्वात् उभयानुग्रहासम्भवे सति शास्त्रविरोधप्रसङ्ग इति। तच्च नैवम्। कस्मात्? असम्भवे सत्यर्थान्तरक्लृप्तेः। यत्र[13] हि प्रमाणभूता श्रुतिरसम्भविनमर्थं चोदयति, तत्रार्थान्तरं कल्पयति। तद्यथा—"स आत्मनो वपामुदखिदत्[14]"(4) "स्तेनं मनो[14]ऽनृतवादिनी वाक्"(5) इत्येवमादिषु। एवमिहापि नास्ति सम्भवः यदेकोऽर्थो नित्यश्च स्यादनित्यश्चेति। तस्मान्नित्यत्ववाचकस्य शास्त्रान्तरस्य[16] भक्त्याऽर्थान्तरं परिकल्पयिष्यामः। तद्वदितरत्रापीति चेत्, स्यान्मतम्—यथैव भवता नित्यानित्ययोरेकत्रासम्भवा[17]न्नित्यत्वस्य[18] भक्त्या कल्पना कृता, तथैवानित्यत्वस्यापि करिष्यत इति। एतच्चायुक्तम्। कस्मात्? सर्वप्रमाणविरोधप्रसङ्गात्। विनाशे हि[19] भक्त्या कल्प्यमाने सर्वप्रमाणविरोधः[20] प्रसज्येत। कथम्? प्रत्यक्षविरोधस्तावत् संसारोपलम्भात्।

---

[1] A °लभ्यते

[2] A अभ्युपगमे

[3] A तच्

[4] Dkha. शब्दान्तरे

[5] D इष्टापूर्ती

[6] After उपासते P, K and D add words from छा॰ उ॰ 5.10.5, which are as follows: अथैतमेवाध्वानं पुनर्निवर्तन्ते यथेतम् (D यथा इतम्) आकाशमाकाशाद्वायुं.

[7] A तिलामाषा

[8] All the Mss read ततो. I follow the Upaniṣadic reading.

[9] A तद्

[10] A भूय एव भूय एव भूयरिव in place of भूय एव

[11] A उभयथाभि°

[12] A om. चेत्... °विरोधप्रसङ्ग इति (40.9–40.11)

[13] PKD यदि

[14] A उदखिन्दत्

[15] A मनुः for मनो

[16] A शास्त्रस्य

[17] A नित्यानित्यायोरिकत्रासम्भावान्

[18] A नित्यत्वमस्य

[19] P विनाशो

[20] A सर्वप्र for सर्वप्रमाणविरोधः

---

(1) Cf. म॰ भा॰ 1.1.1, 2.1.1

(2) मुण्डक उप॰ 3. 2. 9

(3) छा॰ उप॰ 5.10. 3, 5, 6

(4) तै॰ स॰ 2.1.1.4

(5) शा॰ भा॰ 1. 2.2

अनुमानविरोधोऽङ्गपरिमाणे[1] सत्यङ्गिनो नित्यत्वानुपपत्तेः। शब्दविरोधः "ते धूम[2]मभिसम्भवन्ति"(1) इति[3] वचनात्। न तु नित्यत्वे भक्त्या कल्प्यमाने दोषोऽयमुपपद्यते[4]। तस्माद्विषममेतत्[5]।

आह[6], कथमिदानीं भक्त्या कल्पयितव्यं शास्त्रमिति?

उच्यते—प्रकृष्टार्थतया। यथा खल्वपि "अमृतं वा मृत[7]मतिजीवो[8] मा ते[9] हासिषुरसवः शरीरम्"(2)इत्यभिधीयते। न च प्राणिनामत्यन्तायासवो न[10] जहति, किन्तर्हि प्रकृष्टं कालम्। एवमिहाप्युच्यते[11] "तरति मृत्युम्"(3) इति। नात्यन्ताय मृत्युं तरति, किन्तर्हि प्रकृष्टं कालम्। उपचर्यते हि[12] लोके प्रकृष्टे[13] नित्यशब्दः। तद्यथा "नित्यप्रहसितो नित्यप्रजल्पित[14]"(4) इति। एवं सिद्धः क्षययोगः।

आह, अतिशययोग इदानीमस्य हेतोः कथ[15]मनुमातव्य इति?

उच्यते—अतिशययोगः क्रियाभ्यासात्। यत्र हि क्रिया सकृत्[16] प्रवर्तते यत्र चासकृदावर्तते तत्रातिशयो दृष्टः। तद्यथा कृष्यादिषु। यज्ञे च द्रव्योपादानशक्त्यपेक्षा। क्वचित् सकृदेव

---

[1] A अंगोंगपरिमाण

[2] K D शब्दविरोधते धूमम् A शब्दविरोध इष्टापूर्तस्य धूमम् Dkha. शब्दविरोधस्तेधूमम् (above this phrase D writes ग॰पुस्तकेऽपि.)

[3] A अभिसम्भवतीति

[4] D उपपद्यते इति

[5] A विषयम् for विषमम्

[6] A om. आह

[7] A वामृतो

[8] A हि जीवे

[9] A तो

[10] P K D om. न

[11] A om. उच्यते

[12] A om. हिं

[13] A प्रकम्पे for प्रकृष्टे Dkha. प्रकृतो

[14] A नित्यजल्पित

[15] A कथमस्य हेतोर्

[16] K D ऽसकृत्

---

(1) छा॰ उप॰ 5.10.3

(2) अथर्व॰ सं॰ 8. 2. 26

(3) मुण्डक उप॰ 3. 2. 9

(4) म॰ भा॰ 1.1.1

प्रवृत्तिः, क्वचित् पुनःपुनरावृत्तिः[1]। तस्मादतिशयेन भवितव्यम्। किञ्चान्यत्, अङ्गातिशयात्[2]। इहाङ्गानामतिशयादङ्गिनोऽपि घटादेरतिशयो दृष्टः। अस्ति चायं प्रतियज्ञमङ्गानां दक्षिणादीनामतिशयः। तस्मादत्राप्यतिशयेन[3] भवितव्यम्[4]। देवताङ्गभावगमनात् क्षयातिशयानुपपत्तिरिति चेत्। अथापि[5] स्यात्। यो हि यज्ञे द्रव्यमात्रस्य साधनभावमनुमन्यते[6], तं प्रति क्षयातिशययोगाव[7]परिहार्यौ स्याताम्।

वयं तु द्रव्यसमवायिनीं देवतां क्रतावङ्गभावमुपगच्छन्तीं विद्मः। तस्माददोषोऽयमिति[8]।

तच्चानुपपन्नम्। कस्मात्? साध्यत्वात्। देवतानामपरिमितत्वं साध्यम्। तदङ्गभावगमनाच्च (दोषाभावोऽपि साध्यः[9])। न चात्मा क्रियाङ्ग[10]मुदासीनत्वात् इति नः सिद्धान्तः। तस्मादयुक्तमेतत्। उपेत्य वा, क्रतुसमनुष्ठानानर्थक्यप्रसङ्गात्। यदि द्रव्यसमवायिनीं देवतामुपलभ्य तदङ्गभावगमना[11]दक्षयो[12] निरतिशयश्च हेतुरवाप्यत[13] इतीष्टं वः[14], तेन तर्हि यद्वा तद्वा वेदोक्तकर्म[15] कृत्वा शक्योऽवाप्तुमर्थः। किं प्राणिविनाशहेतुभिः[16]? कथम्? न हि किञ्चित्कर्म विद्यते यत्र शरीरस्याङ्गभावो न स्यात्। सर्वदेवतामयं शरीरं[17] यस्मादाह—

तस्माद्वै विद्वान्पुरुषमिदं ब्रह्मेति मन्यते।

---

1. A प्रवृत्तिः for आवृत्तिः
2. Dkha. किं चाङ्गातिशयात्
3. A अतिरेकेण
4. A repeats किञ्चन्यात्, अङ्गातिशयात्। ... भवितव्यम्.
5. A अथ वा
6. A उपमन्यते for अनुमन्यते
7. A क्षयातिशयदोषाव्
8. A om. इति
9. All the Mss read दोषाभावः. I follow Wezler's (46.9) emendation. Raghavan (14.5) feels that either there should be न before दोषाभावः, or तदङ्गभावगमनाच्च should read यदङ्गभावगमनाच्च.
10. A न चात्मक्रियाङ्गत्वम्
11. P K D तदाङ्गभावगमनाद्
12. A अयक्षयो
13. P K D हेतुरवगम्यते
14. A इत्येष्टव्यः
15. A वेदोक्तं कर्म
16. P K D read °हेतुभिः क्रतुभिः.
17. A च शरीरं

सर्वा ह्यस्मिन् देवताः शरीरे[1]ऽधि समाहिताः(1) ॥

तत्र यदुक्तं (42.11) देवताभावगमनात् क्षयातिशयानुपपत्तिरित्येतदयुक्तम् । एवमयं हेतुस्त्रिदोषः । तेन यः फलविशेषोऽभिनिर्वर्त्यते सोऽपि तथाजातीय[2] इति शक्यमनुमातुम् । तस्मान्नास्य[3] जिज्ञासोरत्र समाधिः[4] ।

आह, यदि नायं श्रेयानिति कृत्वाऽस्य जिज्ञासोर्नात्र समाधिः[5], तेन तर्हि यः श्रेयान् फलविशेषः स उपदेष्टव्य इति ।

उच्यते—

तद्विपरीतः श्रेयान् (का॰ 2/3)

तदित्यनेन कर्मविधिनिष्पादितस्य स्वर्गप्राप्तिलक्षणस्य फलस्याभिसम्बन्धः । तस्माद्विपरीतः[6] शुद्धोऽक्षयो निरतिशय इत्यर्थः । कोऽसावित्युच्यते मोक्षः **श्रेयान्** । एतदुक्तं भवति । उभावप्येतौ प्रशस्यौ स्वर्गापवर्गौ, आम्नायविहितत्वात् । मोक्षस्तु प्रशस्यतरः । कस्मात्? यथोक्तदोषानुपपत्तेः । स ह्यवश्यंभावित्वादै[7]कान्तिकः । अतीन्द्रियत्वादसंवेद्यः । स्वात्मन्यवस्थितत्वाल्लघुः[8] सर्वत्र सन्निहितश्च । आम्नायस्तुतत्वा[9]त्प्रशस्तः । सद्भिरासेवितत्वादनिन्दितः । यमनियमवैराग्यज्ञानाद्युपायशुद्धे[10]र्विशुद्धः[11] । अद्रव्यत्वादक्षयो निरतिशयश्च ।

आह, कथं पुनरयमपवर्गः प्राप्यत इति?

उच्यते—संयोगाभावात् । दुःखं च[12] प्रधानम्[13] । तथा च तन्त्रान्तरेष्वप्युक्तम्—"दुःखहेतुः

---

1. D शरीरे देवताः rather than देवताः शरीरे
2. A and Dkha. तथाजातीयक
3. D नास्ति
4. D अत्र समाधिः, sec.m. अत्रासमाधिः
5. A अत्रासमाधिस् D अत्र समाधिः, sec.m. अत्रासमाधिः
6. A om. विपरीतः ... प्रशस्यतरः। कस्मात् (43.9-11)
7. Chakravarti (24.5) reads स ह्यवश्यं भावित्वात्. Raghavan (14.5) corrects it into स ह्यवश्यंभावित्वात्, which agrees with the reading (of the Mss) adopted by us.
8. Dkha. अवस्थितत्वाच्च लघुः
9. D A आम्नायस्तु तत्त्वात्
10. A यमनियमज्ञानवैराग्याभ्युपायशुद्धेर्
11. Wezler (47.16-17) regards यम ... शुद्धेर् as uncertain.
12. A om. च
13. A प्रधान

---

(1) Cf. प्रा॰ उप॰ 3-4

कार्यकरणशक्तिः[1]" इति । तेन यदा पुरुषस्य[2] संयोगस्तदाऽविशुद्धित्व[3]मस्य । स्वशक्तिविशेषयोगात्तेषु तेषु जात्यन्तरपरिवर्तेषु धर्मादिनिमित्तसामर्थ्यादायासमनुभवति । यदा तु प्रधानसंयोगो विनिवर्तते[4] तदा निमित्ताभावे नैमित्तिकस्याप्यभाव इति कृत्वा न पुन[5]र्द्वन्द्वान्यनुभवति ।

आह, किमर्थः[6] पुनरयं प्रधानस्य पुरुषेण सह संयोगः?

उच्यते, नैतदिहाभिधानीयम् । वक्ष्यत्ययमुपरिष्टादाचार्यः—

> पुरुषस्य दर्शनार्थः[7], कैवल्यार्थस्तथा प्रधानस्य ।
> पङ्ग्वन्धवदुभयोरपि संयोगः । (का॰ 21)

इति ।

आह, वियोगस्तर्हि कस्मान्निमित्ताद् भवतीति?

उच्यते—

व्यक्ताव्यक्तज्ञविज्ञानात् ॥ का॰ 2/4 ॥

व्यक्तं चाव्यक्तं च ज्ञश्च व्यक्ताव्यक्तज्ञाः । तेषां विज्ञानं व्यक्ताव्यक्तज्ञविज्ञानं तस्मात्[8] । बहुष्वनियमादल्पाचोऽपि[9] ज्ञशब्दस्य न[10] पूर्वनिपातः(1) । अथवा ज्ञानस्य साधकतमं[11] व्यक्तम् । तत्पूर्वकत्वादव्यक्तसमधिगमस्ये[12]त्यभिहितम् । यद्वा व्यक्तं च अव्यक्तं च ते[13] व्यक्ताव्यक्ते, ते विजानाति इति व्यक्ताव्यक्तज्ञः, तद्विज्ञानात् संयोगो निवर्तते । वक्ष्यति[14]

---

1 A कार्यकारणशक्तिः

2. A पुरुष्य

3. A तदाविशुद्धत्वम्

4. A निवर्तते Wezler (48.6) regards विनिवर्तते as uncertain reading.

5. A reads पुनः पुनर् for न पुनर्, thus omitting न.

6. D किमर्थं Wezler (48.8) regards किमर्थः as uncertain reading.

7. A प्रधानार्थः

8. A om. तस्मात्

9. A अल्पस्यापि ज्ञशब्दस्य PKD do not include ज्ञशब्दस्य.

10. A om. न

11. A ज्ञासाधकतमम्

12. A om. अव्यक्तसमधिगमस्य ... यद्वा व्यक्तं च (45.14)

13. A चेति for च ते

14. A इति वक्ष्यति

---

(1) पा॰ सू॰ 2. 2. 34

चैतत्—

दृष्टा मयेत्युपेक्षत[1] एको दृष्टाऽहमित्युपरम[2]त्यन्या[3]। (का॰ 66)

इति। तत्र रूपप्रवृत्तिफललक्षण[4] व्यक्तम्। रूपं पुनः महान्, अहङ्कारः, पञ्च तन्मात्राणि, एकादशेन्द्रियाणि, पञ्च महाभूतानि। सामान्यतः प्रवृत्तिर्द्विविधा। हितकामप्रयोजना च, अहितप्रतिषेधप्रयोजना च। विशेषतः पञ्च कर्मयोनयो धृत्याद्याः[5]। प्राणाद्याश्च पञ्च वायवः[6]। फलं द्विविधम्। दृष्टमदृष्टं च। तत्र दृष्टं सिद्धितुष्ट्यशक्तिविपर्ययलक्षणम्। अदृष्टं ब्रह्मादौ स्तम्बपर्यन्ते संसारे शरीर[7]प्रतिलम्भ इत्येतद् व्यक्तम्। एषां[8] गुणानां सत्त्वरजस्तमसामङ्गाङ्गिभावगमनाद्विशेषगृहीतिः। यदा त्वङ्गभाव[9]मगच्छन्तो निर्लिखितविशेषा[10] व्यवतिष्ठन्ते तदाऽव्यक्तमित्युच्यन्ते। चेतनाशक्तिरूपत्वा[11]च्चित्रं गुणवृत्तं जानातीति ज्ञः। एषां त्रयाणां भेदमभेदं च विज्ञाय संयोगनिवृत्तिं लभते। कस्मात्? संयोगनिमित्तप्रतिद्वन्द्विभूतत्वा[12]द्वियोगनिमित्तस्य। इह यदाऽदर्शननिमित्तः[13](1) प्रधानपुरुषयोः संयोगः, तस्मादस्य प्रतिद्वन्द्विभूतेन ज्ञानेन वियोगहेतुना भवितव्यम्। को दृष्टान्तः? तमःप्रकाशवत्। यथा तमसा तिरोहितानि द्रव्याणि घटादीनि नोपलभ्यन्ते, तत्प्रतिद्वन्द्विभूतेन तु प्रदीपेन[14] प्रकाशितानामुपलब्धिर्भवति[15], तद्वदिहापि द्रष्टव्यमिति सिद्धं ज्ञानान्मोक्षः। उक्तं च—

---

1. A उपेक्षा
2. A om. उपरमत्यन्या। इति
3. D (उपरम)त्यन्यः   Dkha. उपरतैक
4. A रूपवृत्तिल॰
5. It should be धृत्याद्याः instead of वृत्याद्याः, which latter happens to be the reading in all Mss. It is धृति, श्रद्धा etc. which are regarded as कर्मयोनिs; cf. युक्तिदीपिका 242.15-244.3
6. A पञ्चावयवाः
7. P K D कर्म for शरीर
8. D येषां
9. A अगभावं
10. P K D ऽनिर्लिखितविशेषा
11. A चेतनारूपशक्तित्वात्
12. P K D संयोगनिवृत्तिप्रतिद्वन्द्वि॰ Raghavan also (14.5) offers the emended reading संयोगनिमित्त॰, thus betraying agreement with A's reading, which we have adopted.
13. P यदादर्शन॰   K D यदाऽदर्शनं   A यददर्शननिमित्तिकः
14. P K D om. प्रदीपेन
15. A प्रकाशितानामेषामुप॰

---

(1) परमार्थसार 83

वृक्षाग्राच्च्युतपादो यद्वदनिच्छन्नरः[1] पतत्येव।
तद्वद् गुणपुरुषज्ञोऽनिच्छन्नपि केवली भवति।।(1)

किञ्चान्यत्। आम्नायाभिहितत्वात्। आम्नायनिबन्धनो ह्ययमर्थो[2] ज्ञानान्मोक्ष इति, न यादृच्छिकः। कथम्? एवं ह्याह—

सत्यं ज्ञानमनन्तं ब्रह्म।
यो वेद निहितं गुहायां परमे व्योमन्[3]।
सोऽश्नुते सर्वान् कामान्। सह ब्रह्मणा विपश्चिता[4](2)।।
यतो वाचो निवर्तन्ते अप्राप्य मनसा[5] सह।
आनन्दं ब्रह्मणो विद्वान्[6] न बिभेति कुतश्चन (3)।।
तमेव[7] विदित्वाऽमृतत्वमेति नान्यः पन्था अयनाय विद्यते (4)।

तथा ब्राह्मणे[8]ऽप्युक्तम्—"तरति शोकमात्मवित्"(5)। "ब्रह्मविद्[9] ब्रह्मैव भवति इति"। तस्मादाम्नायप्रामाण्यादपि मन्यामहे ज्ञानान्मोक्ष इति।

आह, ज्ञानवाचिनो[10]ऽमृतत्वनिमित्ताभ्युपगमान्महत आम्नायान्तरस्यानर्थक्यम्। यदि[11] ज्ञानवाचिन आम्नायखण्डकादमृतत्वमवाप्यत इत्येतदभ्युपगम्यते, तेन क्रियावाचिनो महत आम्नायान्तरस्यानर्थक्यं प्राप्तम्। किं कारणम्? न ह्यनायासेनेष्टावाप्तौ[12] सत्यामायासभूयिष्ठे

---

1. A अनिच्छन्नन् नरः
2. A and Dkha. आम्नायनिबन्धनश्चायमर्थो
3. A व्योम्नि
4. A विपश्चित
5. A मनसो
6. A मत्वा for विद्वान्
7. A om. तमेव ... अयनाय विद्यते
8. A ब्राह्मण
9. A om. ब्रह्मविद् ... भवति
10. A D ज्ञानवादिनो
11. P K D om. यदि ... आनर्थक्यम्   A यदि ज्ञानवाचिनो महत आम्नायान्तरस्यानर्थक्यं यदि
12. A आयासेनेष्टाव्याप्तौ

---

(1) See यो॰भा॰ 2. 23. Vātsyāyana also refers to अदर्शन in his भाष्य on न्या॰ सू॰ 3. 2. 68.
(2) तै॰ उप॰ 2.1
(3) तै॰ उप॰ 2. 9
(4) श्वेता॰ उप॰ 3. 8, 6.15
(5) छा॰ उप॰ 7.1.3

कर्मणि प्रवर्तमानः कृती भवतीति। आह च—

अर्के[1] चेन्मधु विन्देत किमर्थं पर्वतं व्रजेत्[2]।
इष्टस्यार्थस्य संप्राप्तौ को विद्वान् यत्नमाचरेत् (1)।।

उच्यते[3]—यदि पुनः कर्माण्यत्यन्तकर्तव्यतयेष्यन्ते[4], ज्ञानवाचिन आम्नायस्य कथ[5]मर्थवत्ता सिद्धा भवति?

आह—समुच्चये तूभयार्थवत्त्वम्। ज्ञानकर्मणोस्तु समुच्चयेऽभ्युपगम्यमाने द्वयोरप्याम्नायार्थवत्ता सिद्धा भवति। "विद्वान् यजेत विद्वान् याजयेत्" इति वचनात्, तथा सर्वपुरुषाणां क्रतावधिकार[6] अश्रोत्रियषण्ढशूद्र[7]वर्जमिति न्यायात्। तस्माज्ज्ञानकर्मणोः समुच्चयादिष्टप्रसिद्धिः।

उच्यते—न, पूर्वदोषापरिहारात्। यदि नियमतो विदुषैव कर्माणि कर्तव्यानीत्यभ्युपगम्यते[8], तेन यः पूर्वोक्तो दोषः संसाराभावप्रसङ्गः तस्यापरिहारः।

किञ्च शास्त्रहानेश्च। यच्च[9] शास्त्रं "इष्टापूर्ते[10] समुपासते (ये) ते[11] धूममभिसंभवन्ति[12]"(2) इति तदेतस्यां कल्पनायां हीयते। किञ्चान्यत्। भिन्नफलत्वात्। इहाभिन्नफलानि द्रव्याणि समुच्चीयन्ते। तद्यथा भुज्यङ्गानि सूपादीनि। अभिन्नं तेषां तृप्तिलक्षणं फलमिति। न[13] चैतज्ज्ञानकर्मणोरभिन्नं

---

1. P K D अक्के
2. A चरेत्
3. P K D om. उच्यते
4. A अन्त्यन्तकर्त्तव्य॰
5. A कथमाम्नायस्य
6. A अनधिकारो
7. A om. शूद्र
8. A उपगम्यते for अभ्युपगम्यते
9. P यश् A reads यः and omits च. Pandeya (22) is uncertain and so reads यश्च (च्च?).
10. A इष्टापूर्तो
11. K and D read समुपास्यते, omitting the following ते.
12. A अभिसम्भवति
13. A om. न चैतत् ... फलमिति

---

(1) Cf. e.g. शा॰ भा॰ 1. 2. 4; न्या॰ वा॰ ता॰ टी॰ 1.2.1. See also जयमङ्गला, का॰ 57:
मध्वर्थं प्रस्थितः कश्चिद् ग्रामाभ्याशे तु माक्षिकम्।
अक्के चेन्मधु विन्देत किमर्थं पर्वतं व्रजेत्।।

(2) Cf. छा॰ उप॰ 5.10. 3

फलम्। स्वर्गापवर्गहेतुत्वात्। ज्ञानसामर्थ्यात्कैवल्यमभिन्नं फलमिति चेत्, पूर्वेणाविशेषः[1]। यदुक्तं (28.6) संसाराभावप्रसङ्ग[2] इति तदनपह्नुतमेव[3] भवति।

किञ्चान्यत्—श्रूयमाणफलविरोधश्च। यच्च क्रियायाः फलं[4] श्रूयते "अग्निहोत्रं जुहुयात् स्वर्गकामो[5], राष्ट्रमग्निष्टोमेन जयति[6]" इति तद्विरुध्यते।

(किञ्चान्यत्।) कर्मणश्च शेषभावः। स्वार्थो[7]पसर्जनत्वे सत्यर्थान्तरनिष्पादकत्वात्[8]। यथाऽवहन्तीत्येवमाद्याः[9](1) क्रियाः स्वं फलमुपसर्जनीकृत्य तद्द्वारेण यजेरुपकुर्वन्त्यस्तच्छेषभूता[10] भवन्ति, एवं क्रियापि ज्ञानफलभूतत्वात्तच्छेषभूता स्यात्। विधिसद्भावात् क्रियाप्राधान्यमिति चेन्न, उक्तत्वात्। कथमेतत्? नास्ति विधिकृतो[11] विशेषः। उपेत्य[12] वा तत्रापि तदुत्पत्तेः। अस्ति हि ज्ञानस्यापि विधायकं शास्त्रम्। कथम्? एवं ह्याह—"य आत्मापहतपाप्मा[13] विजिघत्सो[14] विपिपासो विजरो विमृत्युर्विशोकः (सत्य)संकल्पः[15] सोऽन्वेष्टव्यः स जिज्ञासितव्यः। स[16] सर्वाँश्च कामानवाप्नोति सर्वाँश्च लोकान्[17] यस्त[18]मात्मानमनुविद्य विजानातीति प्रजापतेर्वचनं श्रूयते"(2) (इति)। पुनरप्याह—"द्वे विद्ये वेदितव्ये[19] परा चैवापरा च या"(3)इति।

---

1. A पूर्वण विशेषः
2. D on the right margin reads संसाराभावेति पाठः.
3. A अनपकृतम् Dkha. अपनीतम्
4. A फलं क्रियय:
5. A सुर्गकामो
6. A यजति
7. A स्वर्गोपसर्जनत्वे
8. A अर्थान्तरफलनिष्पादकत्वात्
9. Chakravarti (26.16) reads यथा वहन्तीत्येवमाद्याः. Raghavan (14.5) suggests the correction यथावहन्तीं, saying that आवहन्ती is the word here.
10. A तच्छेषभूत
11. A विरोध° for विधि°
12. Raghavan (14.5) suggests the emended reading अभ्युपेत्य वा.
13. A आत्माहतपाप्मा
14. After विजिघत्सो there is in A a blank followed by पिपासां विजरों.
15. PKD सन्नस्तसंकल्पः A सत्यस्थसंकल्पस्
16. PKD om. स
17. PKD om. सर्वाँश्च लोकान्
18. PKD om. तम्
19. A वेदितव्येते

---

(1) तै॰ ब्रा॰ 3. 2. 5.6

(2) छा॰ उप॰ 8.7.1

(3) मुण्डक उप॰ 1. 1. 4

तस्माद्विधिसद्भावात्क्रियाप्राधान्यमिति स्वपक्षानुरागमात्रमेतत् ।

दृष्टार्थत्वादित्येके[1] । एके पुनराचार्या मन्यन्ते दृष्टमेव ज्ञानस्याज्ञाननिवृत्तिलक्षणं[2] फलम्, तस्मान्न शास्त्रेण[3] विधीयते । किं कारणम्? दृष्टार्थस्य हि कर्मणो न शास्त्रं प्रयोजकम्[4] । स्वयमेवार्थितत्वा[5]त्तत्र प्रवृत्तेर्भुज्यादिवत्[6] । तेषां ज्ञानविधायकानि वाक्यानि तान्युपायगुणविधानार्थ[7]मनुवादभूता[8]न्याश्रीयन्ते । तद्यथा "दध्ना जुहोति, पयसा जुहोति" इति ।

यत्तु[9] खल्विदमुच्यते "विद्वान् यजेत विद्वान् याजयेत्, श्रोत्रियस्य च कर्मण्यधिकारः" इति, तस्यायमर्थः—अधीत्य वेदं क्रियानुपूर्वीं च ज्ञात्वा कर्मणि (प्रवर्तितव्यं प्रवर्तयितव्यं च)[10] । एवं च सति न कश्चिद्दोषः । यदि पुनर्नियमत एवात्मविदां कर्मण्यधिकारस्तेन संसाराभाव[11]प्रसङ्गः, स्वाभाविकत्वात् । विज्ञानस्य शास्त्रस्य सर्वाधिकारविरोधः (च(?)) । तस्मान्नास्ति समुच्चयो ज्ञानकर्मणोः ।

अपर आह—सत्यम्, नास्त्यनयोः समुच्चयः । किन्तर्हि । सर्वार्था क्रिया, ज्ञानं प्रतिषिद्धार्थम्[12] । ये हि[13] पण्डान्धबधिरादयः[14] कर्मणोऽत्यन्तं निराकृतास्तेषां ज्ञानादाश्रमान्तरेऽमृतत्वावाप्तिः । इतरेषां तु मूलाश्रमे कर्मण एवेति तस्य नाय[15] वादिनः परिहार इति ।

---

[1] A एवं

[2] A ज्ञाननिवृत्ति°

[3] A शास्त्रे

[4] A प्रजोजकं

[5] A एवार्थत्वात्

[6] Chakravarti (27.3) reads भोज्यादिवत्.

[7] A उपागुण°

[8] A अनुवादप्राप्तान्य्

[9] P K D om. यत्तु

[10] P K D instead read प्रवर्तयितव्यम्, while A reads प्रवर्तितव्यम्. I follow Wezler (53.9).

[11] P संसारप्र ... सङ्गः for संसाराभाव°. In K there is a spot between संसार and प्रसङ्ग. D संसाराभावप्रसङ्गः

[12] Chakravarti (27.9) reads सर्वार्थक्रियाज्ञानं प्रतिषिद्धार्थम्.

[13] A om. हि

[14] P K D षण्डान्धं A पण्डान्धबधिरप्रभृतयः

[15] P K D वायं

उच्यते—न, स्वसमयविरोधात्। एवं ब्रुवाणस्यास्य वादिनः स्वसमय एव विरुध्यते यदुक्तं "विद्वांसः प्रजां नाकामयन्त[1], किं प्रजया करिष्यामः"(1) अथ[2] यदुक्तं "पुत्रैषणायाश्च[3] वित्तैषणायाश्च व्युत्थायाथ[4] भैक्षचर्यं चरन्ति"(2) इति। न च पण्डानां पुत्रैषणाव्युत्थानमर्थवद् भवति, देवकृतत्वात्[5]।

किञ्चान्यत्, रहस्यभूतत्वात्। रहस्यभूतं हि वेदानां[6] ज्ञानम्। यस्मादाह—"तद्ध[7] स्मैतदारुणिरौद्दालकिर्ज्येष्ठाय पुत्राय प्रोवाच। इदं (वाव)[8] ज्येष्ठाय पुत्राय[9] पिता[10] ब्रह्म प्रब्रूयात्[11] प्रणाय्याय चान्तेवासिने[12] नान्यस्मै यस्मै कस्मैचन। य इमामद्भिः परिगृहीतां वसुना वसुमतीं पूर्णां दद्यादेतदेव ततो भूयः"(3) इति। भवति चात्र[13]—

> परं रहस्यं वेदानामवसानेषु पठ्यते[14]।
> पण्डाद्यर्थं[15] तदिष्टं चेद्दिष्ट्या सफलता श्रुतेः ॥
> विद्वान् कर्माणि कुर्वीतेत्येतदुक्तं किल श्रुतौ।
> स च पण्डादिरेव[16] स्याद्यो[17]ऽत्यन्तं कर्मणश्च्युतः[18] ॥

---

[1] PKD न कामयन्ते
[2] A om. अथ
[3] A om. च
[4] P om. अथ A om. व्युत्थायाथ ... पण्डानां पुत्रैषणा
[5] KAD दैवकृतत्वात्
[6] A देवानां
[7] A यद्ध
[8] A वात It is here emended into वाव. PKD omit (वाव).
[9] PKD ज्येष्ठपुत्राय
[10] A om. पिता
[11] A व्रब्रूयात्
[12] A प्रणाय्यायाते वासिने Chakravarti (27.17) reads ... वाऽन्तेवासिने.
[13] A त्रात्र
[14] Chakravarti (27.18) does not read this line as a śloka.
[15] Tripathi (79) emends it as षण्डाद्यर्थं.
[16] Tripathi (79) emends it as षण्डादिरेव.
[17] A reads only या and omits स्याद् ... इन्द्रियार्थानुरागो वा (50.12–51.2).
[18] A reads स्याद्विषां वा मोक्षवर्त्मनि in place of स्याद्योऽत्यन्तं कर्मणश्च्युतः, and omits the next śloka.

---

(1) बृहदा॰ उप॰ 4.4.22
(2) बृहदा॰ उप॰ 3.5.1, 4.4.22
(3) Cf. छा॰ उप॰ 3.11.4-6

स एव वर्त्यतां प्राज्ञैः किं न्याय्योऽथ[1] मतिभ्रमः ।
इन्द्रियार्थानुरागो वा द्वेषो[2] वा मोक्षवर्त्मनि ॥
कैवल्यप्राप्तिहेतुत्वाद्या वेदविहिता स्तुतिः[3] ।
प्रशस्ता याज्ञवल्क्याद्यैर्विशिष्टैस्तत्त्वनिश्चयात् ॥
सेयं विषयरागान्धैर्विपरीतार्थवादिभिः ।
विद्या कन्येव पण्डाय[4] दीयमाना न शोभते ॥
तस्माद्रागानुगैरुक्तां कुहेतुपृतनामिमाम् ।
अपोह्य मतिमान्युक्त्या[5] ह्याश्रमादाश्रमं[6] व्रजेत् ॥

॥ इति युक्तिदीपिकायां सप्ततिपद्धतौ[7] प्रथममाह्निकम्[8] ॥

---

[1] KD न्यायोथ Chakravarti (27.22) and Tripathi (79) read न्यायोऽथ.

[2] A द्वेषां

[3] P K D स्तुता

[4] Tripathi (80) emends it as षण्ढाय.

[5] A and Dkha. युक्त्या मतिमान् in place of मतिमान्युक्त्या

[6] P K D अश्रमं D sec. m. आश्रमं

[7] The reading in P K D is: इति श्रीमदाचार्येश्वरकृष्णविरचितायां सांख्यसप्ततौ युक्तिदीपिकानाम्नि विवरणे

[8] D आह्निकं समाप्तम् for आह्निकम्

द्वितीयमाह्निकम्

आह[1]—सम्यगुपदिष्टं भवता[2] व्यक्ताव्यक्तज्ञविज्ञानान्मोक्षोऽवाप्यत इति[3]। इदानी[4]मुपदेष्टव्यम्, कथमेतत्त्रयं प्रतिपत्तव्यमिति।

उच्यते—त्रयस्यास्य प्रतिपत्तिं द्वेधा[5] समामनन्ति। समासतो विस्तरतश्च। तदेव त्रयं पञ्चभिरधिकरणैर्भिद्यते।

कानि पुनरधिकरणानीति?

उच्यते—प्रकृतिविकारवृत्तम्, कार्यकारणवृत्तम्, अतिशयानतिशयवृत्तम्, निमित्तनैमित्तिकवृत्तम्, विषयविषयिवृत्तमिति। तत्र प्रकृतिविकारवृत्तपूर्वकत्वा[6]दितरेषामधिकरणानां तद्भेदान्वक्ष्यामः। तत्पुनतश्चतुर्धा भिद्यते। किञ्चित्कारणमेव न कार्यम्। किञ्चित्कारणं च कार्यं च। किञ्चित्कार्यमेव न कारणम्[7]। किञ्चिन्नैव कारणं न चापि कार्यमिति।

आह—अतिसामान्योपदिष्ट[8]मेत[9]न्नास्माकं बुद्धाववतिष्ठते। तस्माद्विविच्यो[10]पदिश्यतां कस्य पदार्थस्य किं वृत्तमिति?

उच्यते—बाढम्[11]। उपदिश्यते—

---

1. D अथ द्वितीयमाह्निकमारभ्यते। आह
2. A भगवता
3. P K D om. इति
4. A चेदानीं D इदादीम्, sec. m. इदानीम्
5. A om. द्वेधा
6. A प्रकृतिविकारपूर्वकत्वाद्
7. A om. न कारणम्
8. P K D सामान्योद्दिष्टम् Dkha अत्र सामान्योद्दिष्टम् Wezler (58.5) emends it into सामान्योपदिष्टम्.
9. A इति for एतत्
10. A विभाज्योप°
11. A सुत्रातुम् (: सूत्रंतु?)

मूलप्रकृतिरविकृतिः (का॰ 3/1)

मूलमाधारः प्रतिष्ठेत्यनर्थान्तरम्[1]। प्रकरोतीति प्रकृतिः[2]। मूलं चासौ प्रकृतिश्च[3] **मूलप्रकृतिः**। मूलप्रकृतिः[4] कस्य मूलम्? महदादीनाम्[5]। संज्ञा खल्वियं प्रधानस्य[6] मूलप्रकृतिरिति। सा चाविकृति[7]रविकाराऽनुत्पाद्येत्य[8]र्थः।

आह—समासानुपपत्तिः, विशेषणान्तरोपादानात्[9]। मूलमित्ययं शब्दः प्रकृतिविशेषणार्थमुपात्तो महदादिविशेषणान्तरमुपादत्ते। तत्र "सविशेषणानां वृत्तिर्न"(1) इति समासप्रतिषेधः प्राप्नोति। समासान्तरविधानाददोष इति चेत्, स्यान्मतम्—यद्येतस्मिन् समासे दोषोऽयमुपपद्यते समासान्तरमत्र विधास्यते मूलं प्रकृतीनां मूलप्रकृतिरिति। एतच्चानुपपन्नम्। कस्मात्? दोषान्तरोपपत्तेः। एवमपि "उपसर्जनं पूर्वं(2) निपतति"(3) इति षष्ठ्योक्तस्योपसर्जनत्वात्पूर्वनिपातः[10]। तत्रैव[11] भवितव्यम् मूलं प्रकृतीनां प्रकृतिमूलमिति। तस्मादिदमप्यसार[12]मिति।

उच्यते—पूर्व एव समासोऽस्तु, सम्बन्धिशब्दः[13] सापेक्षो[14] नित्यं वृत्तौ समस्यते। यत्तूक्तं (54.5) विशेषणान्तरोपादानात्समासानुपपत्तिरिति, तत्र[15] ब्रूमः सम्बन्धिशब्दानां

---

1. P K D प्रतिष्ठेयमर्थान्तरम्
2. A प्रकृति
3. P K D om. च
4. A om. मूलप्रकृतिः
5. A महादादीनाम्
6. A प्रधानसा
7. Dkha. सा चासौ विकृतिर्
8. A विकारानुत्पाद्येत्य् D अविकारः अनुत्पाद्या इत्य्
9. A विशेषणार्थमपात्तो महदादिविशेषणान्तरोपादानात्
10. A षष्ठ्यं तस्योपसर्जनात्वात्
11. A om. तत्रैवं ..... मूलमिति
12. A अपसारम्
13. P K D om. सम्बन्धिशब्दः ... वृत्तौ समस्यते
14. A साक्षेपो I follow Pandeya (25).
15. A इत्यत्र

---

(1) म॰ भा॰ 2.1.1, 3.1.8

(2) पा॰ सू॰ 2.2.30

(3) म॰ भा॰ 2.1.1

सम्बन्ध्यन्तरमनपेक्ष्य स्वरूपप्रतिलम्भ एव नास्तीत्याकाङ्क्षावता[1]मेव वृत्त्या भवितव्यम्। तद्यथा देवदत्तस्य गुरुकुलमिति सम्बन्धिशब्दत्वाद्देवदत्तशब्दमपेक्षमाणोऽपि गुरुशब्दः कुलशब्देन सह वृत्तिं प्रतिपद्यते(1)। एवमिहापि मूलमित्ययं[2] सम्बन्धिशब्दत्वा[3]न्महदाद्यपेक्षोऽपि प्रकृतिशब्देन सह वृत्तिं प्रतिपद्यत(2) इति।

किञ्चान्यत्, वाक्यप्रतिपाद्यस्यार्थस्य वृत्तावुपलब्धेः। यत्र हि वाक्यप्रतिपाद्योऽर्थो वृत्त्या न गम्यते[4], यथा ऋद्धस्य राज्ञः पुरुष इति, तत्र "सविशेषणानां[5] वृत्तिर्न"(3)इति व्यवस्थितं[6] शास्त्रे। गम्यते चेह[7] वाक्यप्रतिपाद्यो[8]ऽर्थो वृत्तावपि[9] सत्याम्। तस्माददोषोऽयमिति।

किञ्च, ज्ञापकाच्च[10]। ज्ञापकं खल्वपि "कर्मवत्कर्मणा तुल्यक्रियः"(4)। तथा "अकारस्य विवृतोपदेशः"(5) इत्यादि। तस्मात् "नात्रासूया[11] कर्तव्या"(6) इति।

आह—अवयवस्य प्रत्यवमर्शानुपपत्तिः, संज्ञाशब्दत्वात्। संज्ञाशब्देषु हि नावयवस्य परामर्शो भवति। तद्यथा गजकर्णोऽश्वकर्णः। कस्य गजस्य कस्याश्वस्येति[12]।

---

[1] P K D आकांक्षावत

[2] P K D अयं शब्दः for अयं

[3] After सम्बन्धिशब्दत्वान् A repeats देवदत्तशब्दम्... सम्बन्धिशब्दत्वान्.

[4] A लभ्यते

[5] K सविशेषाणां

[6] A व्यवस्थापितं

[7] A गम्यत एव

[8] A वाक्यप्रतिपादितो

[9] P K D om. अपि

[10] P K D om. च

[11] A नान्यासूया

[12] A कस्याश्वास्यति

---

(1) Cf. म० भा० 2.1.1 etc.

(2) म० भा० 2.1.1

(3) म० भा० 2.1.1, 3.1.8

(4) पा० सू० 3.1.87

(5) म० भा० 1.1.2

(6) म० भा० 5.1.59: यावताऽत्रापि सन्देहो नासूया कर्तव्या यत्रानुगमः क्रियते.

उच्यते—न, अर्थोपपत्तेः। यत्र ह्यर्थ उपपद्यते भवत्येव तत्र संज्ञाशब्देष्ववयवपरामर्शः[1]। तद्यथा सप्तपर्णान्यस्य पर्वणि पर्वणि, अष्टौ पदान्यस्य पङ्क्तौ पङ्क्तौ सप्तपर्णोऽष्टापदमिति। उपपद्यते चेहायमर्थः, तस्माददोषोऽयम्।

आह[2]—मूलप्रकृतेः प्रकृतित्ववचनम्[3]। मूलप्रकृतिरविकृतिः, प्रकृतिरिति वक्तव्यम्[4]। यदाह[5] "महदाद्याः प्रकृतिविकृतयः सप्त" (का० 3) इति।

उच्यते—प्रकृतित्वावचनम्[6]। प्रकृतित्वं च मूलप्रकृतेर्न वक्तव्यम्[7]। किं कारणम्? अर्थादापत्तेः[8]। मूलप्रकृतिरविकृतिरित्येव सिद्धम्[9]। उच्यमानं[10] हि तदनर्थकं स्यात्।

आह, प्रकृतित्वानुपपत्तिः। सत्कार्यवादाभ्युपगमात्[11]। प्रकरोतीति प्रकृतिः, तद्भावः प्रकृतित्वम्। तच्च सति कार्ये न घटते। कस्मात्[12]? न हि सतामात्मादीनां कारण[13]मुपपद्यत इति।

उच्यते—तदितरत्रापि[14] तुल्यम्। यथैव हि[15] सतामात्मादीनां कारण[16] नोपपन्नमेवमसतां शशविषाणादीनामपीति[17] नास्ति कश्चिद्विशेषः। तृतीया तु विषादावस्थैव[18] कोटिः।

---

[1] P K D संज्ञाशब्देष्ववयवेष्वपरामर्शः A अवयवपरामर्षः Wezler (60.7) suggests the emendation अवयवेषु परामर्शः.

[2] A and Dkha. om. आह

[3] P, K, D and Dkha. om. मूलप्रकृतेः प्रकृतित्ववचनम्

[4] A reads the sentence thus : मूलप्रकृतेः मूलप्रकृतिरविकृतिरिति वक्तव्यम्. Dkha. reads आह अविकृतिर्न वक्तव्यम् instead of इति वक्तव्यम्.

[5] A यथाह

[6] A प्रकृतिवचनम्

[7] A अवक्तव्यम्

[8] P K D अर्थोपपत्तेः

[9] P K D सिद्धिः

[10] P सूच्यमानं हि K मुच्यमानं D सूच्यमानम्, sec. m. सूच्यमानं हि

[11] A तत्कार्यं॰ for सत्कार्य॰

[12] A यस्मात् Dkha. यस्मिन्

[13] P K D करणं for कारणम्

[14] A om. अपि

[15] A यथैवेति

[16] Tripathi (86) prefers करणं.

[17] A चेति for अपीति

[18] P K D विवादावस्थैव Tripathi too (86) suggests विवादावस्थैव.

एव[1]मुभयपक्षव्युदासात्स्वपक्षसिद्धिरिति[2] चेत्, अथापि[3] स्यात्—सदसतोः क्रियासम्बन्धप्रत्यविशेष[4] उपदर्श्यते भवता। तेनोभयोरपि पक्षयोर्व्युदासः कृतो भवति। तेन[5] चोभयपक्षव्युदासात्स्वपक्षसिद्धिरिति। एतच्चायुक्तम्। कस्मात्? उत्तरत्र प्रतिषेधात्। स खल्वेष वादी सत्कार्यवादं प्रत्याचष्टे। तस्मात्स्वक एवैनमधिकारे निवर्तयिष्यामः[6] (117.3ff.)।

आह, अविकृत्यभिधानानर्थक्यम्[7]। मूलप्रकृतित्वात्तत्सिद्धेः[8]। या हि मूलं सर्वासां[9] प्रकृतीनाम्, अविकृत्यैव[10] तया भवितव्यम्। इतरथा हि मूलप्रकृतित्वानुपपत्तिः। यदि खल्वपि प्रधानस्यापि प्रकृत्यन्तरं स्यान्मूलप्रकृतित्वं नोपपन्नं भवेत्[11]। तस्मान्मूलप्रकृतित्व–वचनादेव तत्सिद्धेरविकृतिग्रहणमनर्थकमिति।

उच्यते—न, अनवस्थाप्रसङ्गनिवृत्त्यर्थत्वात्। यथा हि[12] मूलादीनां बीजं प्रकृतिस्तस्याप्यन्यत्त[13]स्याप्यन्यदित्यनवस्था, एवं[14] महदादीनां प्रधानं मूलप्रकृतिः, तस्याप्यन्यदित्यनवस्था प्रसज्येत। सा मा भूदि[15]त्यतस्तन्निवृत्त्यर्थं तदभिधानम्।

आह, न। हेत्वनुपदेशात्[16]। असंशयमेतदेव[17] स्यात्, न तु हेतुरत्रोपदिष्टो

---

1. A इति for एवम्
2. Tripathi (86) inserts न after उभयपक्षव्युदासात्
3. A अथवापि
4. A अवशेष
5. PKAD न Dkha. तेन
6. A वर्त्तयिष्यामः
7. A ॰त्यभिधानार्थं
8. PKD तत्सिद्धिः
9. A सर्वासां
10. A हविकृत्यैव
11. A स्यात् for भवेत्
12. A om. हि
13. A om. तस्याप्यन्यत्
14. A om. एवं ... अन्यदित्यनवस्था
15. After इत्य् A repeats अनवस्था प्रसज्येति स मा भूदित्य्.
16. A हेत्वपदेशात्
17. A असंशयामवस्थादेतदेवं Wezler (61.18) reads it thus: असंशयमेव स्यादेतदेवम्. It is clear that since Wezler does not show it as his emendation, the source of his reading is A. But that, as we can see, is an error.

भवद्भिः। न चानुपदिष्टहेतुकं विपश्चिद्भिः प्रतिपत्तुं न्याय्यम्[1]। तस्मादयुक्तमेतत्।

उच्यते—कारणान्तरप्रतिषेधात् पुरुषाकर्तृत्वा[2]त्प्रधानाख्यानां गुणानां चावस्थान्तरानुपपत्तेरविकृतित्वसिद्धिः। इहारभ्यमाणा प्रकृतिः कारणान्तरैरीश्वरादिभिरारभ्यते, पुरुषेण वा[3], गुणैर्वा। किञ्चातः? तन्न तावत्कारणान्तरैरीश्वरादिभिरारभ्यते। कस्मात्? प्रतिषेधात्। यथा कारणान्तराणि न सन्ति तथोत्तरत्र[4] (171ff.) प्रतिषेधः करिष्यते। इदानीं सत्त्वं रजस्तमः पुरुष इति पदार्थचतुष्टयं प्रतिज्ञायते। तत्रापि पुरुषकर्तृत्वं प्रत्याख्यायते। तस्मिन्प्रत्याख्याते[5] गुणानामेवावस्थान्तरापेक्षः कार्यकारणभावः। सूक्ष्माणां मूर्तिलाभः कार्यम्। निवृत्तविशेषाणा[6]मविभागात्मनावस्थानं[7] कारणमित्ययं सिद्धान्तः। तत्रास्तङ्गतविशेषाणां निवृत्तपरिणामव्यापाराणामङ्गाङ्गिभावमनुपगच्छतामुपसंहृतशक्तीनां[8] सर्वविकारसाम्यं सर्वशक्तिप्रलयं निस्सत्तासत्तं निस्सदसदव्यक्तलक्षणमवस्थान्तरमुपसंप्राप्तानां(1) नास्त्यन्यत्सूक्ष्मतरमवस्थान्तरं यस्येदं प्रधानलक्षणमवस्थान्तरं कार्यं स्यात्। तस्मात्सुष्ठूच्यते मूलप्रकृतिरविकृतिरिति।

महदाद्याः प्रकृतिविकृतयः[9] सप्त। (का॰ 3/2)

महानाद्यो यासां ता **महदाद्याः**। अवयवेन विग्रहः, समुदायः समासार्थः। अन्यथा महानेवात्रापरिगृहीतः स्यात्। प्रकृतयश्च विकृतयश्च **प्रकृतिविकृतयः**। कारणानि[10] कार्याणि चेत्यर्थः। तत्र महानहङ्कारस्य प्रकृतिः प्रधानस्य विकृतिः[11]। अहङ्कारोऽपि तन्मात्रेन्द्रियपर्वणोः प्रकृतिर्महतो विकृतिः[12]। तन्मात्राणि[13] च भूतपर्वणः प्रकृतिरहङ्कारस्य विकृतिः।

---

1. P K D न्यायम्
2. Dkha. पुरुषस्याकर्तृत्वात्।
3. A om. वा
4. A तथात्र
5. A om. तस्मिन्प्रत्याख्याते
6. A निवृत्तिविशेषाणाम्
7. A अभिभवात्मनावस्थानं
8. A अङ्गाङ्गिनुपसंहतशक्तीनां for अङ्गाङ्गि ... शक्तीनां
9. A om. प्रकृतिविकृतयः ... यासां ता महदाद्याः
10. D कारणाणि च, sec. m. कारणानि
11. A प्रकृतिः instead of विकृतिः
12. P K D प्रकृतिर्विकृतिर्महतः A प्रकृतिमहतोर्विकृतिः I follow Wezler (62.23).
13. P K D om. तन्मात्राणि ... विकृतिः

---

(1) Cf. यो॰ भा॰ 2.19, where it is stated : प्रतिसंसृज्यमानाश्च तस्मिन्नेव सत्तामात्रे महत्यात्मन्यवस्थाय यत्तन्निःसत्तासत्तं निःसदसन्निरसदव्यक्तमलिङ्गं प्रधानं तत्प्रयन्ति।

आह—सप्तग्रहणं किमर्थम्?

उच्यते—सप्तग्रहणमवधिपरिच्छेदार्थम्। अक्रियमाणे हि सप्तग्रहणे न ज्ञायते कियान्प्रकृतिगणः प्रकृतिविकृतिसंज्ञो भवतीति[1] तत्र महाभूतेन्द्रियपर्वणोरपि प्रकृतित्वं प्रसज्येत[2]।

आह—नैतदस्ति प्रयोजनम्, परिशेषसिद्धेः। इह भवतां पञ्चशिखानां पञ्चविंशतिस्तत्त्वानि। तत्र "मूलप्रकृतिरविकृतिः" (का॰ 3) इत्युक्तम्।

षोडशकस्तु विकारो न प्रकृतिर्न विकृतिः पुरुषः। (का॰ 3)

इति वक्ष्यति। परिशेषतः सप्तैवावशिष्यन्ते। तस्मान्नार्थस्तदर्थेन सप्तग्रहणेन।

उच्यते—अहङ्कारपरिग्रहार्थम्। एवं तर्हि नैवाहङ्कारो विद्यत इति पतञ्जलिः[3] महतोऽस्मिप्रत्ययरूपत्वाभ्युपगमात्[4]। तत्परिहारार्थ[5]मेतद् भविष्यति।

आह, न। उत्तरत्र परिग्रहात्। एतदपि नास्ति प्रयोजनम्। वक्ष्यति हि महता कण्ठेनोपरिष्टा[6]दाचार्यः "प्रकृते[7]र्महांस्ततोऽहङ्कारः" (का॰ 22) इति[8]। तेनैवेदं सिद्धम्[9]। नार्थस्तदर्थेनापि सप्तग्रहणेन।

उच्यते—रूपभेदेऽपि तत्त्वाभेदज्ञापनार्थम्। एवं तर्हि धर्मादीन्यष्टौ रूपाणि बुद्धेर्वक्ष्यमाणानि (द्र॰ का॰ 23), अहङ्कारश्च वैकारिकतैजसभूतादिरूपत्वात् त्रिलक्षणो[10] वक्ष्यमाणः[11] (का॰ 25)। तत्र रूपभेदात्तत्त्वभेदो मा भूदित्येवमर्थं सप्तग्रहणं क्रियते।

आह, हेतुमन्तरेणाप्रतिपत्तेः। कण्ठोक्त[12]मपि युक्तिमन्तरेण न तर्कशीलाः[13] प्रतिपद्यन्ते,

---

1. P K D om. इति
2. A प्रसज्यते
3. A पातञ्जलिः
4. A महतोऽस्मितात् प्रत्यय॰ Dkha. महतोऽस्मिन्प्रत्यय॰
5. A तत्परिग्रहार्थम्
6. A कंठकेनोपरिष्टाद्
7. A प्रकृते instead of प्रकृतेर्
8. D om. इति
9. D तेनैव सिद्धमिदम्
10. A and Dkha. ॰भूतादिलक्षणत्वात् त्रिरूपो for ॰भूतादिरूपत्वात् त्रिलक्षणो
11. A वक्ष्यामाणः
12. P K D कण्ठोक्ताम्
13. D तर्कशूराः

कि पुनर्लेशोपपादितम्[1]। तस्मादत्र समाधिर्वाच्यः कथमनेकरूपा बुद्धिरेकैवेति?

(उच्यते—) न, उत्तरत्र विचारणात्। उत्तरत्रैतद्विचारयिष्यामः[2] (193.4ff.) किमनेकरूपाविर्भावेऽपि तदेव तद्वस्तु भवति, आहोस्विद्रूपभेदात्तत्त्वभेदः (इति?)। तस्मादिह तावद् दृश्यतामिति सिद्धं महदाद्याः प्रकृतिविकृतयः सप्तेति।

षोडशक[3]स्तु विकारः (का॰ 3/3)

षोडशपरिमाणमस्य सोऽयं[4] षोडशकः संघः। "तदस्य[5] परिमाणम्"(1) "संख्यायाः संज्ञासंघसूत्राध्ययनेषु"(2) इति[6] कन्प्रत्ययः।

आह—कः पुनरयं षोडशक इति?

उच्यते—पञ्च महाभूतानि, एकादशेन्द्रियाणि[7]। तुशब्दो[8]ऽवधारणार्थः।

आह[9]—शक्यः पुनरयमर्थोऽन्तरेणापि[10] तुशब्दमवाप्तुम्। कथम्? महदाद्याः प्रकृतिविकृतयः सप्तेत्यपदिष्ट[11] पुरस्तात्। ततो[12]ऽहङ्कारतन्मात्रपूर्वकत्वे सिद्धे सति इन्द्रियमहाभूतपर्वणोः पुनः श्रुतेर्नियमो भविष्यति[13]। तद्यथा "पञ्च पञ्चनखा भक्ष्याः"(3)

---

1. A क्लोशोपपादितम्
2. A विचारयिष्यामिः
3. P षडोशकस्
4. P K D om. सोऽयं
5. P K D तस्य instead of तदस्य
6. A om. इति
7. A इन्द्रियाण्येकादश
8. Raghavan (14.6) suggests insertion of आह before तुशब्दो to show the pūrvapakṣa.
9. P K D om. आह
10. A अर्थान्तरेणापि Chakravarti also (32.18) reads अर्थान्तरेणापि, which Raghavan (14.6) corrects into ... अर्थः, अन्तरेणापि ....
11. P K D (सप्तेति) ह्युपदिष्टं
12. A तत्र for ततो
13. D sec. m. भविष्यति तद्यथा

---

(1) पा॰ सू॰ 5.1.57
(2) पा॰ सू॰ 5.1.58
(3) पा॰ सू॰ 1.1.1

इत्यत्र क्षुत्प्रतीकारसमर्थानां द्रव्याणामर्था[1]देव सर्वेषां भक्षणे सम्प्राप्ते पुनः श्रुतेर्नियमो भवति, तद्वदिदं द्रष्टव्यम्। इष्टतो[2]ऽवधारणार्थ इति चेत्, स्यान्मतम्। इष्टतोऽवधारणार्थस्तर्हि तुशब्दो भविष्यति। कथं नाम षोडशको विकार एवेति विज्ञायते[3], षोडशकस्तु विकार इत्येवं मा ज्ञायीति[4]। यद्येवम्, अस्थाने[5] तर्हि तुशब्दः पठितः। षोडशको विकारस्त्विति वक्तव्यम्। अथ मतं वृत्तपरिपूरणार्थ[6]मयमस्मिन्प्रदेशे पठितस्तुशब्दः। यत्र निर्दोषस्तत्रैवायं द्रष्टव्य इति। एतदनुपपन्नम्। कस्मात्? असन्देहात्। महदाद्याः प्रकृतिविकृतयः सप्तेत्यपदिष्टे किमिति सांशयिका भविष्यामः। तस्मात्पेलवमस्य पाठे[7] प्रयोजनं पश्यामः। अथाय[8]मभिप्रायः स्यात् यद्यप्येतदर्थतः[9] सिद्धं[10] तथाप्ययमाचार्यः स्फुटप्रतिपत्त्यर्थमवधारणं प्रत्याद्रियते। किं कारणम्? यस्माच्चित्राः[11] सूत्रकाराणामभिप्रायगतयः। तद्यथा भगवान् पाणिनिः "नः क्ये"(1), "रात्सस्य"(2) इत्येवमादिष्वन्तरेण[12] प्रयत्नमिष्टतोऽवधारणे सिद्धे अन्यत्र "अजादी गुणवचनादेव"(3) "स्तौतिण्योरेव षण्यभ्यासात्"(4) इत्येवमादिषु यत्नं[13] करोति। तद्वदिहापि द्रष्टव्यमिति। एतदनुपपन्नम्। कस्मात्? अशक्यत्वात्। सति वा पुनरवधारणार्थत्वे तुशब्दस्य कथमिवात्र[14] शक्यमव-

---

1. A अर्थित्वाद Dkha. अर्थत्वाद्
2. A om. इष्टतो ... स्यान्मतम्
3. A यथा विज्ञायते
4. A विज्ञायीति D ज्ञायि, sec. m. विज्ञायि Dkha. विज्ञायि (इति)
5. A अस्थानेने
6. A वृत्तपूरणार्थम् D वृत्तपूर्णार्थम्, sec. m. वृत्तपरिपूरणार्थम्
7. A not much clear
8. A अथाप्ययम्
9. A अर्थस्
10. A om. सिद्धं
11. P विचित्राः
12. A वान्तरेण
13. A प्रयत्नं
14. K कथमेवात्र A इवत्र for इवात्र

---

(1) पा॰ सू॰ 1. 4. 15

(2) पा॰ सू॰ 8. 2. 24

(3) पा॰ सू॰ 5. 3. 58

(4) पा॰ सू॰ 8. 3. 61

धारणं प्रतिपत्तुं यावता महाभूतानामपि शरीरादिलक्षणं कार्यमुपलभ्यत इति। तत्र केचित् समाधिमाहुः—शरीरादीनामनर्थान्तरभावा[1]त्पृथिव्यादीनामप्रकृतित्वम्। यस्मात् किल पृथिव्यादीनां सन्निवेशविशेषमात्रं कार्यं मुष्टिग्रन्थिकुण्डलादिवन्नार्थान्तरभूतम्। अत एवैषा[2]मप्रकृतित्व[3]मिति। एत[4]च्चानुपपन्नम्। कस्मात्? अविशेषात्। सर्व[5]मेव हि सांख्यानां कार्यमनर्थान्तरभूतम्। तत्रैतस्यां[6] कल्पनायां सर्वतत्त्वानामप्रकृतित्वं प्रसज्येत। अथैत[7]दनिष्टम्, सत्कार्यव्याघातः[8]। अन्ये पुनराहुः—अपरिणामित्वान्महाभूतानां विकारित्वानवधारण[9]मिति। तदप्यनुपपन्नम्। कस्मात्[10]? प्रत्यक्षोपलब्धेः। प्रत्यक्षत एवोपलभ्यते महाभूतानां कलिलाङ्कुरक्षीरादिपरिणामः[11]। अनुमानग्राह्य[12]स्तु तत्त्वान्तराणाम्। तदेतदवरोत्तरं[13] भवति। तस्मा[14]दयुक्तमेतत्। {आह}[15] न तर्हि[16] प्रतिपत्तव्यं षोडशको विकार एवेति।

उच्यते—प्रतिपत्तव्यम्। किं कारणम्? तत्त्वान्तरानुपपत्तेः[17]। इह[18] पुरुषार्थेन हेतुना साम्यात्प्रच्युतानां गुणानां योऽयं महदादिविशेषान्तो[19] विपरिणामः[20] स तत्त्वान्तरोत्प-

---

1. A अनर्थान्तराभावात्
2. P अत ए ..... षाम् K D अत एषां
3. A प्रकृतित्वम् instead of अप्रकृतित्वम्
4. A तत् instead of एतत्
5. A पूर्वम् instead of सर्वम्
6. A तत्रेतस्यां
7. A तथैदद्
8. A अनिष्टसत्कार्यव्याघातः Wezler (65.6) proposes the emended reading सत्कार्यव्याघातात्, which seems equally plausible. I, however, opt for the reading found in P K D.
9. A विकारित्वावधारणम्।
10. A om. कस्मात्
11. A कालाङ्कुरक्षीरादिविपरिणामः
12. P अनुमानग्रहास्तु Chakravarti (33.15) reads °ग्रहात्तु.
13. A and Dkha. अधरोत्तरं
14. A कस्माद्
15. I follow Wezler (65.10) in deleting आह, which is found in all Mss.
16. A and Dkha. तर्हीदम्
17. P K D तत्त्वानुपपत्तेः
18. A इह इह
19. A महदादिर्विशेषान्तो
20. A ऽपि परिणामः

त्तिनियमेन[1] व्यवतिष्ठते। न तु पृथिव्यादिभ्यस्तत्त्वान्तरोत्पत्तिरस्ति। तस्मादेतेषां विकारत्वमेवेति।

किञ्चान्यत्। ग्राहकान्तराभावात्। यथा तन्मात्रैरारब्धेषु पृथिव्यादिषु अहङ्कारात्तद्योग्यं ग्राहकान्तरमिन्द्रियलक्षणमुत्पद्यते, नैवं पृथिव्यादिविकाराणां घटादीनां ग्राहकान्तरमस्ति। तस्मान्न तत्त्वान्तरम्। अतश्च पृथिव्यादयो विकारा एवेति।

किञ्चान्यत्। प्रधाने प्रकृतिभावप्रत्यस्तमयव[2]त्तेषु[3] विकारभावप्रत्यस्तमयात्[4]। यथा प्रधानात्सूक्ष्मतरमवस्थान्तरं नास्तीति तत्र[5] प्रकृतिभावस्य प्रत्यस्तमय[6]स्तथा[7] तेषु विकारभावप्रत्यस्तमयः। तस्माद्युक्त[8]मुच्यते षोडशकोऽयं विकार एवेति।

आह—पुरुषे तर्हि[9] का प्रतिपत्तिरिति?

उच्यते—

न प्रकृतिर्न विकृतिः पुरुषः ॥ का॰ 3/4 ॥

न[10] ह्यय[11]मवस्थान्तरं प्रतिपद्यते। नो[12] खल्वप्यवस्थान्तरस्यावस्थान्तरं भवतीति।

आह[13]—न त[14]द्युक्तिमन्तरेण श्रद्धीयते। तस्मादुपपाद्यतां कथ[15]मस्याप्रकृतित्वमविकृतित्वं चेति।

---

1. A तत्त्वान्तेरो॰
2. A प्रकृतिभावः प्रत्यस्तमयवत् Dkha. प्रकृतिभाव प्रत्यस्तमयात् Chakravarti (33.22-23) reads (प्रकृति-) भावप्रत्यस्तमयवर्तें (f) षु, which Raghavan (12.5) corrects into ॰प्रत्यस्तमयवत् तेषु. This agrees with the reading (of the Mss) adopted by us.
3. P प्रत्यस्तमयवर्तेषु
4. P K D ॰प्रत्यस्तमयः
5. P K om. तत्र
6. A स्तमयः D प्रत्यस्तमयः, sec. m. प्रत्यस्तमयात्
7. A om. तथा ... प्रत्यस्तमयः
8. P K D om. तस्माद्युक्तं ... विकार एवेति Wezler (66.1) regards युक्तमुच्यते ... विकार एवेति as uncertain.
9. A तर्हिदानीं for तर्हि
10. Pandeya (29) inserts पुरुषो before न, but the source of his addition is not known. None of the Mss used by us, which include those used by Pandeya, has this addition.
11. A om. एयम्
12. A नौ
13. A om. आह
14. A नैतद् for न तद्
15. P कम् for कथम्

उच्यते—प्रकृतित्वानुपपत्तिः। उत्तरत्र प्रतिविधानात्। "तस्माच्च विपर्यासात्" (का॰ 19) इत्यत्र युक्तिमुपदेक्ष्यामः। तस्मात्तावदस्याप्रकृतित्वम्[1]। अविकृतित्वं प्रधानवत्। यथा[2] प्रधानमेवमयमपि[3] पुरुषः क्रियमाणः[4] कारणान्तरैरीश्वरादिभि[5]र्नारभ्यते। कस्मात्? प्रतिषेधात्। यथा कारणान्तराणि न सन्ति तथोत्तरत्र प्रतिषेधः करिष्यते[6](171.7ff.)। कारणान्तराणि सन्तीति चेन्न[7], पुरुषान्तरैः समत्वात्[8]। समाः सर्वे पुरुषाः, न च समानां कार्यकारणभावो दृष्टः।

किञ्च, निष्क्रियत्वात् शुद्धत्वाच्च। एषां विपरिणामलक्षणा परिस्पन्दलक्षणा वा क्रिया विभुत्वादनुपपन्ना। (नो खल्वपि परस्परारम्भकत्वम्।)[9] कस्मात्[10]? एषामितरेतरानारम्भकत्वात्। न गुणैर्भिन्नजातीयकत्वात्[11]। इहाचेतना गुणा[12] इत्येतत्प्रतिपादयिष्यामः। यच्च येनारभ्यते तन्मयं तद् भवति[13]। यदि गुणैः पुरुषाणामारम्भः स्यात्[14], तेषामप्यचेतनत्वं स्यात्। चेतनास्तु ते[15]। तस्मान्न गुणैरारभ्यन्त इति सिद्धमेतत्।

किञ्चित्कारणमेव न कार्यम्। किञ्चित्कारणं च[16] कार्यं च। किञ्चित्कार्यमेव।

---

[1] A तस्मादस्य तावदप्रकृतित्वम्

[2] Dkha. यदा

[3] Chakravarti (34.2) reads यथा प्रधानमेवमपि (पुरुषः).

[4] Raghavan (14.6) suggests the reading न क्रियमाणः in place of क्रियमाणः.

[5] D कारणान्तरैमीश्वरादिभि, sec. m. कारणान्तरैरीश्वरादिभिः

[6] A प्रतिषेधः करिष्यते आह

[7] P K D om. कारणान्तराणि सन्तीति चेन्न

[8] A पुरुषः सम्बन्धात् Chakravarti (34.4) proposes न पुरुषान्तरैः—समत्वात्. Tripathi too (98) emends it as न पुरुषान्तरैः, समत्वात्.

[9] The text here seems to be broken. I follow Tripathi (98) in filling in the blanks in the absence of any better alternative.

[10] A तस्मात्

[11] A भिन्नजातीयत्वात्

[12] A गुण

[13] P K D तच्च तन्मयं भवति in place of तन्मयं तद् भवति

[14] A तदा for स्यात्

[15] A om. ते

[16] P K D om. च

किञ्चिन्नैव कारणं नैव कार्य[1]मिति चतुर्विधं कार्यकारणवृत्तं प्रतिपादितम्[2]। एतत्प्रतिज्ञापिण्डसूत्रम्। य[3]दपदिष्टं भवद्भिरस्मिन् शास्त्रे[4] (तत्) प्रमेय[5]मित्यवगन्तव्यम् ॥ 3॥

आह—अथास्य प्रमेयस्य कुतः सिद्धि[6]रिति?

उच्यते—

प्रमेयसिद्धिः प्रमाणाद्धि ॥ का॰ 4/4 ॥[7]

प्रमीयते त[8]दिति प्रमेयम्। प्रमेयस्य सिद्धिः **प्रमेयसिद्धिः**। सिद्धिरधिगमो[9]ऽवबोध इत्यर्थः। प्रमीयतेऽनेनेति प्रमाणम्। करणसाधनो[10] ल्युट्(1)। तदेकमेव, बुद्धेरेकत्वाभ्युपगमात्। उपाधिवशात्तु भिन्नमाश्रीयते प्रत्यक्षमनुमानमित्यादि। तस्य योऽसावुपाधिकृतो भेदस्तमनाश्रित्य प्रमेयपरिच्छेदकत्वसामान्य[11]मङ्गीकृत्यैकवचननिर्देशः क्रियते **प्रमाणादिति**। एतस्मात्प्रमेयसिद्धि[12]रित्यवगन्तव्यम्। कथम्? व्रीह्यादिवत्। यथा व्रीह्यादि प्रमेय[13] प्रस्थादिना परिमाणेन[14] परिच्छिद्यत एव[15]मिहापि व्यक्तादिप्रमेयं प्रत्यक्षादिप्रमाणेन[16]

---

1. D नैव कार्यं नैव कारणम्, sec. m. नैव कारणं नैव कार्यम्
2. A and Dkha. व्याख्यातम् for प्रतिपादितम्
3. A अत्र यद् for यद्
4. PKD शास्त्रम् Chakravarti (34.11) reads एतत् प्रतिज्ञापिण्डसूत्रम्। यदपदिष्टं भवद्भिरस्मिन् शास्त्रे etc. Raghavan (14.6) corrects it into एतत् प्रतिज्ञापिण्डसूत्रम्, यदुपदिष्टं भवत्यस्मिन् शास्त्रे etc.
5. PKD om. प्रमेयम्
6. P सिद्धेर
7. The order of the पाद्s of this कारिका is changed here.
8. Dkha. यद् for तद्
9. P K अवगमो D अवगमो, sec. m. अधिगमो
10. A कारणसाधनो
11. PKD read प्रमेयपरिच्छेदकत्वम (ङ्गीकृत्य), thus omitting सामान्य.
12. Dkha. पूरितम्
13. A प्रमाणं for प्रमेयं
14. A प्रमाणेव
15. PK om. एवं ... परिच्छिद्यते, which is added by D in the right margin.
16. D प्रत्यक्षादिना प्रमाणेन

---

(1) Cf. पा॰ सू॰ 3.3.117

परिच्छिद्यत इति[1]। हिशब्द इदानीं किमर्थः[2] स्यात्? अवधारणार्थ इति।

आह—यद्येवम्, हिशब्दावचनम्[3], अवधारणानुपपत्तेः। न ह्येतस्मिन्सूत्रे कथञ्चिदवधारणमुपपद्यते[4]। तस्मादवचनमेव हिशब्दस्य न्याय्यम्[5]। प्रमेयस्यैवेति[6] चेन्न, अन्यस्यासम्भवात्। सति हि व्यभिचारसम्भवे[7] वस्त्ववधार्यते। तद्यथा गौरेवायं नाश्वः, देवदत्त एवायं न यज्ञदत्त इति। न च प्रमेयाप्रमेययोः प्रमाणपरिच्छेद्यत्वेऽस्ति प्रसङ्गो[8] यन्निवृत्त्यर्थं प्रमेयस्यैवेत्यवधार्यते। प्रमाणेभ्य एवेति चेन्न, आर्षज्ञानविरोधप्रसङ्गात्[9]। परमर्षेर्हि भगवतो ज्ञानं[10] सांसिद्धिकमप्रमाणपूर्व[11]मिति वः पक्षः।

सांसिद्धिकाश्च भावाः प्राकृतिका वैकृताश्च[12] धर्माद्याः। (का॰ 43)

इति वचनात्। तदेवं सति विरुध्येत[13]। उभयावधारणमिति चेन्न, उभयदोषप्रसङ्गात्। उभयावधारणे सति उभयोरपि पक्षयोर्ये दोषास्ते प्रसज्यन्ते। तस्मादयुक्तमेतत्। सिद्धिरेवेति चेन्न, अनेकान्तात्[14]। कदाचिद्ध्ययं प्रमाता सन्निहितेऽप्यादित्यादौ लिङ्गे दिङ्निश्चयादिष्वर्थेषु[15] प्रतिहन्यते। तस्मादनेकान्तात् सिद्धिरेवेत्येतदयुक्तमवधारणम्।

उच्यते—यदुक्तं (66.3) हिशब्दावचनमवधारणानुपपत्तेरिति, अस्तु प्रमाणेभ्य एवेत्यवधारणम्। यत्तूक्तम् (66.6f.) आर्षज्ञानविरोधप्रसङ्ग इति, अयमदोषः। कस्मात्?

---

[1] A इह for इति

[2] D किमर्थकः, sec. m. किमर्थः

[3] A हिशब्दवचनम्

[4] A उत्पद्यते for उपपद्यते

[5] P K D न्यायम्

[6] P K D प्रमेयस्येति

[7] A व्यभिचारस्यसम्भवे Dkha. व्यभिचारसद्भावे

[8] A om. प्रसङ्गो

[9] P K D आत्मज्ञानविरोधप्रसंगात् for आर्षज्ञान॰

[10] P K D om. ज्ञानं

[11] P K D अप्रमाणपूर्वकम्

[12] A D वैकृतिकाश्च

[13] A विरुध्यते

[14] A अनैकान्तात्

[15] A दिङ्निदयुक्तमेतत्। सिद्धिरेवेति चेत् न। अनैकान्तात् कदाचिश्च्यादिषु

सिद्धरूपत्वात्। साध्यमानरूपाणि हि वस्तूनि नान्तरीयकत्वात्[1] स्वरूपनिष्पत्तेः[2] साधनसम्बन्धं प्रति आकाङ्क्षावन्ति भवन्ति, सिद्धरूपं तु[3] भगवतः परमर्षेर्ज्ञानम्। तस्मादस्य साधनसम्बन्धं प्रत्याकाङ्क्षा नोपपद्यत इति। अथवा पुनरस्तु सिद्धिरेवेत्यवधारणम्। यत्तूक्तम् (66.12) अनेकान्तादिति, त[4]दनुपपन्नम्। कस्मात्? सत्त्वादीनामङ्गाङ्गिभावानियमात्[5]। तमःप्रकर्षसामर्थ्या[6]त्प्रमाणवैकल्योपपत्तेः। इह सत्त्वादीनामनियतोऽङ्गाङ्गिभावः। देशकालनिमित्तसामर्थ्याद्धि कदाचित्सत्त्वं[7] प्रकृष्यते, कदाचिद्रजः, कदाचित्तमः। सत्त्वप्रकर्ष[8]श्च प्रकाशरूपत्वात्प्रमाणम्। तत्र यदा तमः प्रकृष्यते तदा तेनाभिभूतत्वात् सत्त्वस्य तत्कार्यमनुमानं विकलाङ्ग[9]मुपतिष्ठत इत्यतः सत्यामप्यादित्यादिलिङ्गप्रवृत्तौ दिङ्निश्चयादिष्वर्थेषु प्रतिहन्यते। इतरथा तु न स्वरूपहानम्। यस्य तु निष्पत्तिवैकल्यात्प्रमाणप्रतिबन्धो[10] नेष्टः तस्य स्वरूपहानं प्रमाणानां प्राप्तम्। कथम्? एतावद्धि तेषां स्वरूपं यदुत प्रमेयपरिच्छेदः। तस्माद्युक्तमेतदवधारणार्थो हिशब्दः (इति)।

आह—बहूनि प्रमाणान्याचार्यैरभ्युपगम्यन्ते। तानि सर्वाणि किं भवा[11]ननुमन्यते? नेत्युच्यते। किं तर्हि।

त्रिविधं प्रमाणमिष्टम्[12]। (का॰ 4/3)

विधानं विधा, तिस्रो विधा अस्य तत्त्रिविधं त्रिप्रकारमित्यर्थः। अनेनैतदाचष्टे—एकमेव बुद्धिलक्षणं सत्त्वं निमित्तान्तरानुग्रहोपजनिताभिः कार्यविशेषपरिच्छिन्नरूपभेदाभिः शक्तिभिरुपकाराद् भिन्नमिव प्रत्यवभासमानं दृष्टादिशब्दवाच्यं भवति। न तु यथा

---

1. A नान्तरीयत्वात्
2. P निष्पत्तये
3. A om. तु
4. A अनैकान्तादयुक्तं तदित्येतद्
5. P K D अङ्गाङ्गिभावनियमात्   A अङ्गाङ्गिभावो   I follow Pandeya (30).
6. P K read तमःप्रकार्षसामग्र्यात् न   A om. तमः प्रकर्षसामग्र्यात् ... अनियतोऽङ्गाङ्गिभावः
   D ततः प्रकर्षसामग्र्यात्, sec.m. तमः प्रकर्ष॰   I follow Chakravarti (35.7).
7. P K सत्यं   D सत्यं, sec. m. सत्त्वं
8. P K D simply read प्रकाशश्च.   A सत्त्वप्रकर्षाश्
9. All the Mss read त्रिकालाङ्गम्.   I follow Raghavan (12.6).
10. A प्रमाणप्रबन्धो
11. A भावान्
12. Pandeya (30) puts किंतर्हि after प्रमाणमिष्टम्.

तन्त्रान्तरीयाणां विषयोपनिपातिभिरिन्द्रियैरुपजनिता बह्व्यो[1] बुद्धयस्तथेह विद्यन्ते, याः परिकल्प्यमानाः स्वतन्त्राणि त्रीणि[2] प्रमाणानि स्युः।

स्यान्मतम्। कथं पुनः प्रमाणलक्षणानां शक्तीनामेकवस्तुसन्निवेशे रूपभेदा[3] भवन्तीति?

उच्यते—सत्त्वादिवत्। यथा सत्त्वादीनां गुणानामेकशब्दादिवस्तुसन्निवेशेऽपि प्रकाशादिकार्यभेदाद्रूपसंकरो न भवति, यथा वा शब्दस्पर्शरूपरसगन्धानामेकद्रव्यसन्निवेशेऽपि ग्राहकान्तरगम्यत्वात्,[4] यथा वा कर्तृकरणाधिकरणसम्प्रदानापादानकर्मलक्षणानां शक्तीनामेकद्रव्यसन्निवेशेऽपि कार्यविशेषपरिच्छिन्नानि स्वरूपाणि न संकीर्यन्ते, तद्वदिदं द्रष्टव्यम्। शक्त्यन्तरोपजनने वस्त्वन्तरोपपत्तिरिति चेन्न, अनभ्युपगमात्। न हि क्षणभङ्गसाहसं[5] युक्तिमन्तरेण दण्डभयादपि प्रतिपद्यामहे। न तु (तस्यायमवसर)[6] इति स्थीयतां तावत्।

आह, कथं पुनरेतद् गम्यते यथा त्रिविधमेव प्रमाणं न पुनरनेकविध[7]मपीति?

उच्यते—

सर्वप्रमाणसिद्धत्वात्। (का॰ 4/2)

सर्वाणि च तानि प्रमाणानि सर्वप्रमाणानि[8]। सिद्धस्य भावः सिद्धत्वम्(1)। सर्वप्रमाणानां सिद्धत्वं सर्वप्रमाणसिद्धत्वम्। सिद्धत्वमन्तर्भाव इत्यर्थः। तस्मात् **सर्वप्रमाणसिद्धत्वात्**। तस्मिन्नेव त्रिविधे प्रमाण इति वाक्यशेषः। सर्वेषां परपरिकल्पितानां प्रमाणानामस्मिन्नेव त्रिविधे प्रमाणेऽन्तर्भावादिति यावदुक्तं स्यात्तावदिदमुच्यते **सर्वप्रमाणसिद्धत्वा**दिति। अथवा सर्वप्रमाणेषु सिद्धं **सर्वप्रमाणसिद्धम्**। सप्तमी "सिद्धशुष्कपक्वबन्धैः"(2) इति समासः, यथा साङ्काश्यसिद्धः[9] पाटलिपुत्रसिद्ध इति। तद्भावः सर्वप्रमाणसिद्धत्वम्,

---

[1] Pandeya (30) reads °रुपजनितावध्यो.

[2] A om. त्रीणि

[3] P एकवस्तुसन्निवेशरूपभेदा Pandeya (30) reads शक्तीनामकवस्तुसन्निवेशरूपभेदा.

[4] A °गम्यकत्वान्

[5] A क्षणभङ्गिसहसं

[6] P K D तस्यामवसर A तस्यावसर

[7] A एकविधम्

[8] After सर्वप्रमाणानि P adds सिद्धत्वात् सर्वाणि च तानि प्रमाणानि सर्वप्रमाणानि.

[9] A संकाश्यसिद्धः

---

(1) Cf. पा॰ सू॰ 5.1.119

(2) पा॰ सू॰ 2.1.41

तस्मात् **सर्वप्रमाणसिद्धत्वात्**। कस्य त्रिविधस्य[1] प्रमाणस्येति वाक्यशेषः।

केन पुनराकारेण त्रिविधं प्रमाणं सिद्धमिति?

उच्यते—परस्पराविशेषात्[2]। अन्यानि पुनरस्मात् त्रयाद् यथाऽभिन्नानि तथा प्रतिपादयिष्यामः (69.19ff.)।

आह, किं पुनस्तत् त्रिविधं प्रमाणमिति?

उच्यते—

दृष्टमनुमानमाप्तवचनं च (का॰ 4/1-2')

तत्र **दृष्टं** नाम उपात्तविषयेन्द्रियवृत्त्युपनिपाती योऽध्यवसायः। **अनुमानं** द्वयोरविनाभाविनोरेकं प्रत्यक्षेण प्रमाय तत्पूर्वकं सम्बन्ध्यन्तरे यत् पश्चान्मानं भवति। **आप्तवचनं** तु प्रमाणभूतद्वारकोऽत्यन्तपरोक्षेऽर्थे निश्चय इत्युद्देशमात्रमिदम्। मूललक्षणं[3] तु आचार्यो वक्ष्यति स्वयमेव "प्रतिविषयाध्यवसायो दृष्टम्" (का॰ 5) इत्यादि।

आह—त्रैविध्यानुपपत्तिः[4], न्यूनाधिकश्रवणात्। तन्त्रान्तरीयाः[5] केचित् चत्वारि प्रमाणानीच्छन्ति "प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानि" (1) इति वचनात्। तथा षडित्यन्ये(2)।

प्रत्यक्षमनुमानं च शब्द(श्)[6]चोपमया सह ।
अर्थापत्तिरभावश्च हेतवः साध्यसाधकाः ॥

इत्यभिधानात्। एतानि सम्भवैतिह्यचेष्टासहितानि नवेत्यपरे। प्रत्यक्षानुमाने एवेति वैशेषिकबौद्धाः। तत्र कथमिदं निश्चीयते त्रिविधमेव प्रमाणम्, न पुनर्न्यूनमधिकं वेति?

उच्यते—किं पुनरिदमुपमानं नाम?

आह, "प्रसिद्धसाधर्म्यात् साध्यसाधनमुपमानम्"(3)। प्रसिद्धः प्रज्ञातः, तेन साध-

---

1. The portion स्य ... चाप्तोपदेशबलात् प्रतिपत्ताऽप्रसि-(69.1–70.9) is omitted in P K D, all of them showing blank space with dots.
2. परस्पराविशेषात् seems to be the correct reading rather than A's परस्परविशेषात्, which Pandeya (31) for instance follows. Tripathi (107) and Wezler (70.7) also read as we do.
3. Wezler (70.15) omits मूल in मूललक्षणं, though it is there in A.
4. A त्रिविध्यानुपवत्तिर् I follow Pandeya (31).
5. A तृतीयान्तीयाः I follow Pandeya (31).
6. A शब्दं

---

(1) न्या॰ सू॰ 1.1.3
(2) Reference here is perhaps to the Mīmāṃsakas who believe in six *pramāṇas*.
(3) न्या॰ सू॰ 1.1.6

र्म्यात् साध्यस्याऽप्रसिद्धस्य साधनमधिगमो यस्तदुपमानम्। अवबोधविधिस्तु येनानुपलब्धो गवयः स तस्योपलब्ध्यर्थमधिगतगवयं पर्यनुयुङ्क्ते—किंरूपो गवय इति। स तस्मा आचष्टे—यथा गौरेवं गवय इति। तत्र प्रतिपत्त्याऽत्यन्तानुपलक्षितगवयस्वरूपो[1] व्याख्यातृप्रतिपादितप्रसिद्धवस्तुसाधर्म्यज्ञानाहितसंस्कारः प्रतिपद्यते—नूनमेवंरूपो गवय इति।

अपर आह—प्रति(पत्तुरा)[2]प्तवचनोपजनितप्रसिद्धवस्तुसाधर्म्यज्ञानाहितसंस्कारस्योत्तरकालं प्रत्यक्षेण तमुपलभ्य या समाख्यासम्बन्धप्रतिपत्तिः—अयमसावर्थोऽस्य शब्दस्य समाख्या इति—तदुपमानम् (इति)।

उच्यते—यद्येवम्, उपमैतिह्यावचनम्, आप्तोपदेशसिद्धेः। यथा गौरेवं गवय इति चाप्तोपदेशबलात् प्रतिपत्ताऽप्रसिद्धं गवयमुपलभते, न[3] साधर्म्यमात्रात्[4]। तस्मान्न शब्दात् पृथगुपमा। यत्तु खलु "इति ह उवाच याज्ञवल्क्यः"(1) इत्येतदैतिह्यं नाम प्रमाणान्तरमुपकल्प्यते[5], तदपि वक्तृविशेषापेक्षत्वान्न शब्दादर्थान्तरम्।

आह, न। साधर्म्यापेक्षत्वात्। यदि ह्याप्तोपदेश उपमा स्यात्तेन यथा स्वर्गेऽप्सरसः, उत्तराः कुरव इत्येवमादिष्वन्तरेण[6] साधर्म्योपादानं प्रतिपत्तिर्भवति, एवमिहापि स्यात्। गवयं त्वयमाख्याता प्रतिपादयिष्यन्[7] प्रसिद्धसाधर्म्यगर्भं शब्दमुपादत्ते, न केवलम्। प्रतिपत्ताऽपि तस्मादेव प्रतिपद्यते, न शब्दमात्रात्। तस्मात्पृथगेवास्योपदेशः कर्तव्यः। शब्दव्यापारात्तदन्तर्भाव[8] इति चेन्न, वीतावीतयोरपि तत्प्रसङ्गात्। स्यान्मतम्[9]। शब्दव्यापारसहितोऽयं प्रसिद्धसाधर्म्यलक्षणोऽर्थो[10] गवयप्रतिपत्तौ न केवलः। तस्मादस्य तत्रान्तर्भाव इति। तदप्यनुपपन्नम्। कस्मात्? वीतावीतयोरपि तत्प्रसङ्गात्। वीतावीतावपि[11] हेतू

---

1. A प्रतिपत्त्यात्यतानुपलक्षित॰
2. A प्रतिर् I follow Tripathi (109) and Wezler (70.33) in their emendation प्रतिपत्तुर्.
3. P K D om. न
4. A साधर्म्येमात्रात्
5. A उपकल्प्येत
6. A अन्तरेणो
7. Dkha. प्रतिपादयन्
8. P om. तद् of तदन्तर्भाव
9. P K D om. स्यान्मतम्। .... अप्यनुपपन्नम्। कस्मात्? वीतावीतयोरपि तत्प्रसङ्गात् (70.16–70.18).
10. A ॰लक्षणार्थो It should be लक्षणोऽर्थो.
11. P K D ॰वीतावीतावेव

---

(1) बृहदा॰ उप॰ 2.4.13 इत्यादि.

परप्रतिपादनार्थमुपादीयमानौ शब्दव्यापारमपेक्षेते[1]। तयोरप्याप्तवचनत्वप्रसङ्गः। अनिष्टं चैतत्। तस्मान्नोपमानमाप्तोपदेशः।

उच्यते—साधर्म्याऽव्यतिरेकः[2], उपायभूतत्वात्। आख्यातृप्रामाण्या[3]देव[4] प्रतिपत्तु[5]र्गवयविज्ञान[6]मुपपद्यते। स तु कौशलाद्दुरुपपादो[7]ऽयमर्थ इति कृत्वा[8] प्रसिद्धसाधर्म्यमुपादत्ते। तस्मादाख्यातुर्गवयप्रतिपादनार्थमुपायभूतं साधर्म्यमुपाददानस्य[9] शब्दादनर्थान्तरमुद्भवति[10]। अथैवंजातीयकानामपि प्रमाणान्तरत्वमिष्यते। तेनात्यल्प[11]मिदमुच्यते चत्वारि प्रमाणानीति। किं तर्हि पाणिविहाराक्षिनिकोचप्रभृतीनामप्युपसंख्यानं कर्तव्यम्[12]।

किञ्च, वक्तृविशेषापेक्षत्वात्। यत्र ह्यर्थवशात्प्रतिपत्तिरुत्पद्यते न[13] तत्र प्रतिपत्ता वक्तृविशेष[14]मपेक्षते दृष्टार्थोऽयमदृष्टार्थोऽयमिति। तद्यथाऽनुमाने[15]। अस्ति चोपमाने वक्तृविशेषापेक्षा। तस्मान्न शब्दादर्थान्तरं तत्। अवश्यं चैतदेवं[16] विज्ञेयम्। यो हि मन्यते प्रसिद्धसाधर्म्यादेव तस्य या प्रतिपत्ति[17]र्यथाश्वस्तथा गवय इत्येतस्मादपि सम्प्रतिपत्तिः[18] स्यात्, न चार्हति भवितुम्, मिथ्याज्ञानत्वात्[19]। यत्तु खल्विदमुच्यते

---

1. D sec. m. उपेक्षेते
2. D साधर्म्याव्यतिरेके
3. D आख्यातप्रामाण्याद्
4. A om. एव
5. A प्रतिपत्ति्
6. A गवये विज्ञानम्
7. A दुरुपसादो
8. P K कृत्वात्
9. A उपादधानस्य
10. A न शब्ददर्थान्तरं भवति
11. A तेनाल्पम्
12. A कर्तव्यं स्यात्
13. P K D om. न
14. P K D read तत्र प्रतिवक्तृविशेषम्. D sec. m. तत्र प्रतिपत्तिः वक्तृविशेषम् Raghavan too (14.6) suggests प्रतिपत्ता in place of प्रति°, which latter Chakravarti (37.3) adopts following P.
15. Chakravarti (37.4) omits अनुमाने.
16. P K D चैतदेव
17. A reads गवयप्रतिपत्ति instead of तस्य या प्रतिपत्तिर्.
18. A अपि तस्य सम्प्रतियत्तिः
19. D sec. m. मिथ्याज्ञानत्वम्

यतः समाख्यासम्बन्धप्रतिपत्तिरिति[1] त[2]दुपमानमित्येत[3]दनुपपन्नम्। कस्मात्[4]? अनवस्थाप्रसङ्गात्। यथा[5] बहुषु निषण्णेषु[6] कोऽत्र देवदत्त इत्युक्ते यो मुकुटी कुण्डली व्यूढोरस्कस्ताम्रायताक्ष⁽¹⁾ इति प्रत्याह। ततश्च समाख्यासम्बन्धप्रतिपत्तिरिति प्रमाणान्तरप्रसङ्ग[7] इत्येवमनवस्था प्रमाणानां स्यात्। अनिष्टं चैतत्। एवं हि[8] न[9] तावत्परत उपमानं प्रमाणान्तरम्। यदा स्वयमेव गां गवयं चोपलभ्य विकल्पयति यथाऽयं तथाऽयमिति, तदा तस्यार्थस्य प्रमाणान्तरेणाधिगतत्वात् प्रमाणमेव तन्न भवतीति। तस्मात् सुष्ठूक्तमुपमैतिह्यावचन[10]मा प्तोपदेशात् सिद्धे[11]रिति।

किञ्चान्यत्, अर्थापत्तिसम्भवाभावचेष्टानामनुमानसिद्धेः[12]। अवचनमित्यनुवर्तते। तत्रार्थापत्ति[13]र्नाम यत्रार्थयोः पूर्वमव्यभिचारमुपलभ्य पश्चादन्यतरस्य दर्शना[14]च्छ्रवणाद्वाऽन्यतरस्मिन्प्रतिपत्तिर्भवति। दर्शनाद्यथा[15] गुडमुपलभ्य माधुर्यमिन्द्रियान्तरविषयं प्रतिपद्यते। श्रवणाद्यथा गुडशब्दं श्रुत्वा माधुर्यमशब्दकं प्रतिपद्यत इति। अपरा खल्वर्थापत्तिः। यत्र धर्मयोरव्यभिचारमुपलभ्य तत्प्रतिद्वन्द्विनोरपि साहचर्यकल्पना। सा तु द्विविधा, व्यभिचारिणी चाव्यभिचारिणी च[16]। तत्र व्यभिचारिणी यथा सावयवमनित्यमित्युक्तेऽर्थादापन्नं[17] निरवयवं[18]

---

1. A om. इति
2. A तद्वद्
3. A obscure
4. A om. कस्मात्
5. A तद्यथा for यथा
6. D not clear, sec.m. निषण्णेषु
7. A प्रमाणान्तरत्व॰
8. D encircles हि.
9. A om. हि न
10. A अयमैतिह्यावचनं
11. A आप्तोपदेशसिद्धेर्
12. Raghavan (14.6) proposes अनुमानात् सिद्धेः in place of अनुमानसिद्धेः.
13. A तत्रार्थापत्ति
14. D अन्यतरस्योपलम्भनात्, sec. m. अन्यतरस्य दर्शनात्
15. A तद्यथा for यथा
16. A om. च
17. D sec. m. आपतितं
18. A· निरवयवं

---

(1) Cf. म॰ भा॰ 1.3.2 इत्यादि.

नित्यमिति । तच्च कर्मादिष्वदृष्ट[1]मित्येषाऽनैकान्तिकत्वात्प्रमाणमेव न भवतीति । या त्वविनाभाविनी अव्यभिचारिणी[2] यथा केसरिवराहयोरुपह्वरे[3] सन्निपातमुपलभ्योत्तरकालं केवलं केसरिणं[4] वराहव्रणाङ्कितशरीरं[5] प्रयान्तमुपलभ्य[6] प्रतिपद्यते जितो वराह इति, तदनुमानम् । कथम्? यस्मात्केसरिवराहयो[7]र्यौ जयपराजयौ तयोरव्यभिचारी[8] सम्बन्धः । तत्र यदा केसरिणो जयमुपलभ्याव्यभिचारिणमितरस्य[9] पराजयं प्रतिपद्यते किमन्यत्स्यादृतेऽनुमानात्? अधिगतोभयसम्बन्धिसमुदायस्य हि प्रतिपत्तुः प्रत्यक्षीभूतान्यतरसम्बन्धिनो[10] या सम्बन्ध्यन्तरप्रतिपत्तिस्तदनुमानम् । इत्थं चार्थापत्तिरतो न तस्मात्पृथ[11]ग्भवितुमर्हति[12] ।

सम्भवो नाम द्रोणः[13] प्रस्थ इत्युक्तेऽर्धद्रोणादीनां सन्निधानमवसीयते । इय[14]मपि साहचर्यकल्पनयाऽर्थापत्तिरेव । कथम्? यस्मादुक्तपरिमाणे द्रव्ये द्रोणशब्दो वर्तते[15], न न्यूने नाधिके[16] । तत्र द्रोण इत्युक्ते यदत्यन्तसहभुवां तदवयवानामन्यशब्दवाच्याना[17]मपि सन्निधानं तदर्थापत्तिरिति[18] । सा[19] चानुमानमित्युक्तम्[20] ।

---

[1] A कर्मादिष्टदृष्टम् (?)

[2] A om. अव्यभिचारिणी

[3] A केसरवराहयोरुपगह्वरे

[4] P केवलं केसरिवराहयोरुपह्वरे for केसरिणं

[5] Raghavan (14.6) suggests वराहं व्रणाङ्कितं.

[6] A प्रतियान्तमुपलभ्यमानः

[7] A कैसरिवराहयोर्

[8] A अव्यभिचारे

[9] P K D उत्तरस्य for इतरस्य

[10] A प्रत्यक्षे भूतान्यतर°

[11] A om. पृथग्

[12] A अर्हति भवितुम्

[13] A om. द्रोणः प्रस्थ इत्युक्तेऽर्धा

[14] A इत्ययम्

[15] A अनुवर्तते

[16] A न न्यूनाधिके

[17] A तदवयवानामशब्दवाच्यानाम्

[18] A एव for इति

[19] A स for सा

[20] A and Dkha. उक्तप्रकारम्

अभावो नाम तद्यथा धूमस्य भावादग्निभावः[1] प्रतीयते एवं धूमाभावादग्न्यभाव इत्ययं[2] प्रतिद्वन्द्विसाहचर्यकल्पनयाऽर्थापत्ति[3]रभिहितः। तत्र यदा व्यभिचारसाहचर्यकल्पना तदा प्रमाणाभाव एव। तद्यथा {ह्य}[4]अयोगुडाङ्गारादिषु[5] धूमाभावो नाग्न्यभावः। यत्र तु क्वचिदेकान्तः[6] स्याद् यथाऽकृतकत्वान्नित्य इति तत्रानुमानम्। कथम्? साहचर्योपपत्तेः[7]। कृतकत्वानित्यत्ववत्[8]। अन्ये तु अभावमन्यथा वर्णयन्ति। तद्यथा गेहे नास्ति चैत्र इत्युक्ते बहिरस्तीति सम्प्रत्ययो भवति। तत्र गेहाभावो बहिर्भावसम्प्रतिपत्तिहेतुरर्थापत्ति[9]रेव प्रतिद्वन्द्विसाहचर्यकल्पनया। कथम्? यथैव हि दिवा न भुङ्क्ते देवदत्त इ[10]त्यत्राभोजनप्रतियोगिनो[11] मेदुरत्वस्योपलम्भाद्दिवाप्रतियोगिनि काले[12] भुजिरवसीयत, एवमिहापि गेहाभावाभिधानसामर्थ्यात्तत्प्रतियोगिनि विपर्ययः कल्प्यते। अन्यथा तु यद्यभाव एवाभिप्रेतः स्यान्नास्ति चैत्र एवेति ब्रूयात्। अर्थापत्तिश्चानुमानम्।

चेष्टा नाम अभिप्रायसूचकः कश्चिदेवोदरताडनाञ्जलिकरणादिः[13] शरीरव्यापारः। स हि बुभुक्षादीन्यप्रतीयमानान्यपि प्रतिपादयतीति[14] प्रमाणमित्युच्यते। स चानुमानमेव। कस्मात्[15]? यस्माद् भोजनेच्छादिसहचरो[16] हि व्यापारोऽनुष्ठीयमानो यदि सहचारिणं गमयति तदा[17] नानुमानात्पृथगिति शक्यं प्रतिज्ञातुम्।

---

1. P K D read अग्नेर्भावः.
2. A अय
3. Dkha. कल्पना अर्थापत्तिर्   A om. -कल्पनयाऽर्थापत्ति ... व्यभिचारसाहचर्य-
4. D encircles ह्य.
5. P K D ह्ययोगुडा°   A अयोगुडांकारादिषु
6. A ऐकान्तस्
7. A सहचर्यापपत्तेः
8. A कृतकत्वान्नित्यत्ववत्
9. A इत्ययमप्यर्थान्तरापत्तिर्
10. A देवदत्तः पीन इत्य्
11. P K D अत्र भोजनप्रतियोगिनो instead of अत्राभोजन°
12. A adds रात्रौ after काले.
13. A °एवोदरतानुनाञ्जलिकरणादिः   Dkha. °करणादिभिर्
14. A reads this sentence as स हि बुभुक्षादीन्यप्रतीयमानान्यपि प्रमाणमुच्यते. P K D read बुभुक्षादीन्यपि प्रतीयमानानि प्रतिपादयतीति ...
15. A कथम्
16. A reads भोजनेच्छासहचरो हि व्यापारोऽनुष्ठीयमानो भवति सहचारिणं च यदि गमयति कथं तदनुमानात् पृथगिति शक्यं प्रतिज्ञातुम्?
17. A कथं तद्

आह—प्रतिभा तर्हि प्रमाणान्तरं भविष्यति।

उच्यते—केयं प्रतिभा नाम?

आह—योऽयमनादौ संसारे देवमनुष्यतिरश्चा[1]मभिन्नेऽर्थे बाह्ये स्त्र्यादौ प्रत्यये पूर्वाभ्यासवासनापेक्षः कुणपकामिनीभक्ष्याद्याकारभेदभिन्नप्रत्यय इतिकर्तव्यताङ्गमुत्पद्यते सा हि प्रतिभा। तथा चोक्तम्—

यथाभ्यासं हि वाक्येभ्यो विनाप्यर्थेन जायते।
स्वप्रत्ययानुकारेण प्रतिपत्तिरनेकधा(1) ॥

येन हि योऽर्थोऽभ्यस्तः सुखादित्वेन तस्य विनाऽपि तेनार्थेन शब्दमात्रात् प्रतिपत्तिरुत्पद्यते। तद्यथा व्याघ्रोऽत्र प्रतिवसतीत्युक्ते विनाऽपि बाह्येनार्थेनाभ्यासवशादेव स्वेदवेपथुप्रभृतयो भवन्ति। तस्मात् प्रतिभैव देवमनुष्यतिरश्चा[2]मितिकर्तव्यताङ्गत्वात्प्रमाणमिति। आह च[3]—

प्रमाणत्वेन तां[4] लोकः सर्वः समनुगच्छति।
व्यवहाराः प्रवर्तन्ते तिरश्चामपि तद्वशात्(2) ॥

उच्यते—प्रतिभाया दृष्टादिव्यतिरेकेण रूपान्तरानुपपत्तेः। अवचनमित्यनुवर्तते। यदि पूर्वाभ्यासवासनापेक्षः प्रत्ययः प्रतिभेत्यभ्युपगम्यते[5], तेन तर्ह्यसौ प्रत्यक्षमनुमानमाप्तवचनं[6] (वे)[7]त्येतदापन्नम्। कस्मात्? यतो न हि दृष्टादिव्यतिरेकेण[8] प्रत्ययरूपं कदाचि[9]दप्युपलभामहे। तस्मान्न[10] तेभ्योऽर्थान्तरं प्रतिभा। आर्षप्रत्ययसम्भवादयुक्तमिति चेत्, स्यादेतत्[11]।

---

[1] P K D om. देवमनुष्य ... तस्मात्प्रतिभैव (75.3-10)।

[2] A दवमनुष्य°

[3] P K D om. च

[4] A तांल्

[5] A प्रतिभेत्युपगम्यते D प्रतिभोच्यते अभ्युपगम्यते, sec. m. प्रतिभेत्यभ्युपगम्यते

[6] D प्रत्यक्षमातवचनमनुमानं, sec. m. प्रत्यक्षमनुमानमाप्तवचनं

[7] All the Mss read चेत्य्. I follow Wezler (75.17) in having वेत्य् instead.

[8] A and Dkha. दृष्टादिव्यतिरिक्तं

[9] A om. अपि

[10] D तस्मान्न(?), sec. m. तस्मान्ने

[11] A स्यान्मतम्

---

(1) प्र॰ समु॰ 5.47

(2) वाक्यपदीय 2.147

अस्त्यार्षो[1] हि[2] दृष्टादिव्यतिरेकेण सर्वपदार्थेषु सांसिद्धिकः प्रत्ययः। स प्रातिभो[3] भविष्यतीति। एतच्चाप्ययुक्तम्। कस्मात्? उक्तत्वात्। उक्तमेतत् (67.2) सिद्धरूपं भगवतः परमर्षेर्ज्ञानम्। अतो न प्रमाणापेक्षमिति[4]। योगिनामिति चेन्न, अनभ्युपगमात्। न हि योगिनामप्रमाणपूर्वकं ज्ञानमिति यथा तथा वक्ष्यामः। स लौकिक इति चेन्न, अनिश्चितत्वात्[5]। स्यादेतत्—अस्ति लौकिकः प्रत्ययो दृष्टादिव्यतिरेकेण[6]। तद्यथा सन्तमसे व्रजतो द्रागिति विज्ञान[7]मुत्पद्यते—अस्ति मे प्रतीघाति[8] द्रव्यं पुरस्तादूर्ध्वमवस्थितमिति। तच्च नैवम्। कस्मात्? अनिश्चितत्वात्। न हि तत्र निश्चय उत्पद्यते इदं तद् द्रव्यमस्ति पुरतो वा व्यक्तमस्तीति। न चानिश्चितं प्रमाणज्ञानमिष्यते।

किञ्चान्यत्। अनवस्थाप्रसङ्गात्। यदि चैवंजातीयकोऽपि प्रत्ययः प्रमाण[9]मभ्युपगम्यते, तेनानवस्था प्राप्नोति। किं कारणम्? अनवस्थानाद्धि विकारस्य[10]। कामक्रोधलोभभयविषादद्वारको[11] विकल्पः सम्यङ् मिथ्या वा यस्मादनेक उत्पद्यते, तस्मान्न लौकिकः प्रत्ययः प्रतिभा।

यत्तु खल्विदमुच्यते (75.8), अर्थाभ्यासवासनापेक्षाऽसत्स्वपि[12] व्याघ्रादिषु प्रतिपत्तिरुत्पद्यत इति, सत्यमेतत्। सा तु मिथ्याज्ञानत्वात्प्रमाणत्वेन न परिगृह्यत इत्ययमदोषः। तस्मात् सिद्धं दृष्टादिव्यतिरेकेण[13] रूपान्तरानुपपत्तेः प्रतिभायाः पृथगनभिधानम्[14]। ततश्च "सर्वप्रमाणसिद्धत्वात् त्रिविधं प्रमाणमिष्टम्" (का॰ 4) इति[15] स्थितमेतत् ॥4॥

---

[1] P K आर्षे

[2] P K D om. ह

[3] A प्रतिभा

[4] A प्रमाणापेक्षाणि भवन्ति

[5] A निश्चितत्वात्

[6] A adds तु after व्यतिरेकेण.

[7] D ज्ञानम्, sec.m. विज्ञानम्

[8] Dkha. प्रतीघाताद्

[9] D ऽपि प्रमाणम्, sec. m. ऽपि प्रत्ययः प्रमाणम्

[10] P K D °कारणस्य for °विकारस्य A अनवस्थितत्वाद् for अनवस्थानाद्धि Chakravarti (39.8) reads अनवस्थानाद्धिकरणस्य, and Pandeya (34) reads अनवस्थानाद्धि करणस्य.

[11] P K D oṃ -आदि- A om. -लोभ-

[12] A अभ्यासवासना° instead of अर्थाभ्यासवासना° D वासनापेक्षा सत्स्वपि Raghavan (14.6) also suggests असत्स्वपि व्याघ्रादिषु in place of सत्स्वपि व्याघ्रादिषु.

[13] A दृष्टाव्यतिरेकेण

[14] A पृथगभिधानम्

[15] A इति चेष्टं

आह—अस्त्वेवमेतत्। लक्षणानवस्थाना[1]त्तदप्रतिपत्तिः। तस्मात्तदभिधानम्। अनवस्थितं हि दृष्टादीनां लक्षणम्[2], दृष्टिवैचित्र्यात्[3]। "इन्द्रियार्थसन्निकर्षोत्पन्नं ज्ञानमव्यपदेश्यमव्यभिचारि व्यवसायात्मकं प्रत्यक्षम्"(1) इति केचित्। तथा "आत्मेन्द्रियमनोऽर्थसन्निकर्षाद्यन्निष्पद्यते तदन्यत्[4]" इत्येके(2)। "सत्सम्प्रयोगे[5] पुरुषस्येन्द्रियाणां बुद्धिजन्म तत्प्रत्यक्षम्" इत्यपरे(3)। "श्रोत्रादिवृत्तिः" (द्र॰ 7.10) इति वार्षगणाः। "कल्पनाऽपोढम्" इत्यन्ये (4)। इत्थमनवस्थितं लक्षणमिति दृष्टादीनामप्रतिपत्तिः[6]। तस्माल्लक्षणमभिधानीयम्।

उच्यते—

प्रतिविषयाध्यवसायो दृष्टम् (का॰ 5/1-2')

विषिण्वन्तीति[7] विषयाः शब्दादयः[8]। अथवा विषीयन्त उपलभ्यन्त इत्यर्थः। ते च द्विविधाः। विशिष्टा अविशिष्टाश्च[9]। विशिष्टाः[10] पृथिव्यादिलक्षणा अस्मदादिगम्याः। अविशिष्टाश्च तन्मात्रलक्षणा योगिनामूर्ध्वस्रोतसां[11] च गम्याः। वक्ष्यति चैतदुपरिष्टात्—

---

1. All the Mss read लक्षणानभिधानात्. I follow Wezler's emendation (76.15).
2. A om. लक्षणम्
3. A दृष्टवैचित्र्यात्
4. A तदध्यक्षम् for तदन्यत्
5. A तत्संयोगे
6. Chakravarti (39.19-20) reads दृष्टादीनामप्रतिपन्नः.
7. A प्रैविषण्वंतीति D प्रतिविषुण्वन्ति इति, sec. m. विषष्वन्ति इति
8. A om. शब्दादयः। अथवा विषीयन्त
9. PKD om. विशिष्टा अविशिष्टाश्च
10. A विशिष्टाश्च
11. A ऊधर्वरेतसां

---

(1) न्या॰ सू॰ 1.1.4

(2) वै॰ सू॰ 3.1.13 Cf. also न्यायमञ्जरी, Pt. 1, p. 163 : यदपि कैश्चित् प्रत्यक्षलक्षणमुक्तम्, आत्मेन्द्रियमनोऽर्थसन्निकर्षाद् यदुत्पद्यते ज्ञानं तदन्यदनुमानादिभ्यः प्रत्यक्षमिति...

(3) मी॰ सू॰ 1.1.4

(4) "प्रत्यक्षं कल्पनाऽपोढम्" is the definition of प्रत्यक्ष given by Diṅnāga. See his प्र॰ समु॰ 1C in Hattori. न्या॰ वा॰ 1.1.4 states : अपरे तु मन्यन्ते कल्पनापोढमिति। अथ केयं कल्पना? नामजात्यादियोजनेति. On this Vācaspati in न्या॰ वा॰ ता॰ टी॰ 1.1.4 observes: सम्प्रति दिङ्नागस्य लक्षणमुपन्यस्यति—अपर इति.

बुद्धीन्द्रियाणि तेषां पञ्चविशेषाविशेषविषयाणि[1]। (का० 34)

"अध्यवसायो बुद्धिः" (का० 23) इति च वक्ष्यति। विषयं विषयं प्रति वर्तत इति प्रतिविषयम्। किं तत्? इन्द्रियम्। तस्मिन् योऽध्यवसायः स **प्रतिविषयाध्यवसायः**। उपात्तविषयाणामिन्द्रियाणां वृत्त्युपनिपाति सत्त्वोद्रेका[2]दरजस्तमस्कं[3] यत्प्रकाशरूपं {तद्[4] दृष्टमिति यावत्।} तद् **दृष्टम्** प्रत्यक्षमित्यर्थः। एत[5]त्प्रमाणम्। अनेन यश्चेतनाशक्ते[6]रनुग्रहस्तत्फलम्(1)। प्रमेयाः शब्दादयः। एवमुत्तरत्रापि प्रमाणफलभावो द्रष्टव्यः।

आह—किं पुनरिदं प्रमाणात्फलमर्थान्तरमाहोस्विदनर्थान्तरम्?

(उच्यते—) कथं तावद्[7] भवितुमर्हति?

अनर्थान्तरमित्याह। कस्मात्? अधिगमरूपत्वात्। अधिगमरूपं हि ज्ञानम्, तस्योत्पत्त्यैवाधिगतोऽर्थ इति कुतः फलभेद इति।

उच्यते—करणभाव[8] इदानीं कथं स्यात्?

आह[9]—करणभावस्तु[10] प्रसिद्धिवशात्[11]। विषयनिर्भासा हि ज्ञानस्योत्पत्तिः

---

1. P पञ्चविशेषाः विशेषविषयाणि Dkha. reads बुद्धीन्द्रियाणि पञ्च च कति वर्णाः सन्तो विशेषाविषयाणि, which phrase is deleted with a wavy line across it.
2. A सत्त्वोत्सेधात् I follow P's reading, which, contrary to Wezler's view (p.77.fn.3), is quite clear and agrees with the readings of K and D.
3. A अरजस्तमसं
4. P K D read यद् for तद्.
5. A तत् for एतत्
6. P चेतनाशक्तैर्
7. A ककथरं (?) तावद्. The portion कथं तावद्... कुतः फलभेद इति (78.9-11) is not found in P K D. I follow Pandeya (35), though I have slightly changed the punctuation.
8. P K D कारणभाव instead of करण०
9. P K om. आह D adds it (आह) in the right margin.
10. P K D कारणभावस् for करणभावस्
11. D sec. m. प्रसिद्धिवधात्

---

(1) Cf. उपात्तविषयाणामिन्द्रियाणां वृत्तौ सत्यां बुद्धेस्तमोऽभिभवे सति यः सत्त्वसमुद्रेकः... अनेन यश्चेतनाशक्तेरनुग्रहस्तत् फलं प्रमा बोधः— सा० त० कौ०, का० 5

अधिगमरूपापि[1] लोके सव्यापारेव प्रतीतिरिति[2] (?) कल्पनया करणभावो[3]ऽभ्युपगम्यते, न परमार्थतः।

उच्यते—फलस्यार्थान्तरभावः[4]। अधिकरणभेदात्। बुद्ध्याश्रयं हि प्रमाणमध्यवसायाख्यम्[5], पुरुषाश्रयं[6] फलमनुग्रहलक्षणम्। न च भिन्नाधिकरणयोरेकत्वमर्हति भवितुम्। यत्तूक्तम् (78.10) अधिगमरूपत्वात् ज्ञानमेव फलमिति, तदनुपपन्नम्। कस्मात्? असिद्धत्वात्। यथैव हि घटादयोऽर्था ज्ञान[7]मन्तरेण न तद्रूपा नातद्रूपा[8] इति न[9] शक्यं प्रतिपत्तुम्, एवं ज्ञानमपि पुरुषप्रत्यय[10]मन्तरेण न विषयरूपं नाविषयरूपम्। तथा च शास्त्रम्—

तस्मात्[11] तत्संयोगा[12]दचेतनं चेतनावदिव लिङ्गम्। (का॰ 20)

इति वक्ष्यति[13]। अतः पुरुषप्रत्यय[14]मन्तरेण ज्ञानमधिगमरूपमिति सांख्यं प्रत्यसिद्धमेतत्[15]। उभयपक्षप्रसिद्धेन च व्यवहारः। पुरुषाभावादयुक्तमिति चेन्न, उत्तरत्र प्रतिपादनात्। "संघातपरार्थत्वात्" (का॰ 17) इत्यत्र पुरुषास्तित्वं प्रतिपादयिष्यामः। तस्मात् सिद्धमध्यवसायप्रमाणवादिनः[16] प्रमाणात्फलमर्थान्तरमिति।

---

[1] A अधिगमरूपाहि

[2] P K D प्रतीतेति A प्रतीति I follow Wezler (77.18).

[3] D sec. m. कारणभावो A reads this sentence thus : अधिगमरूपा हि लोके सव्यापारेव प्रतीतिकल्पनया करणभवो ...

[4] P K D °अन्तर्भावः Raghavan (12.6) suggests, like A, (फलस्य) अर्थान्तरभावः, which reading we have adopted.

[5] A अध्यवसायसाध्यम् for अध्यवसायाख्यम्

[6] Dkha. पुरुषाश्रयं हि

[7] A घटादया अर्थज्ञानम् for घटादयोऽर्था ज्ञानम्

[8] D न तद्रूपा नातद्रूपा, sec. m. तद्रूपेण तद्रूपा

[9] A om. न

[10] A पुरुषस्य प्रत्ययम्

[11] P K D om. तस्मात्

[12] A तरत्संयोगाद्

[13] A वचनात्

[14] Dkha. पुरुषस्य प्रत्ययम्

[15] A साध्यप्रत्यक्षसिद्धम् for सांख्यं प्रत्यसिद्धमेतत् Dkha. (सांख्यं) प्रतिसाध्यम्

[16] P K D °प्रमाणवाचिनः Raghavan (14.7) suggests अध्यवसायवाचिनः and thus omits – प्रमाण– after अध्यवसाय. I follow Pandeya (35).

आह—यदि तर्ह्यध्यवसाय:[1] प्रमाणं कथं लौकिकः प्रयोगोऽर्थवान् भवति प्रत्यक्षं वस्तु[2] इति?

उच्यते—विषये प्रत्यक्षशब्दः तत्प्रमितत्वात् तत्कारणत्वाच्च[3]। यथा प्रस्थप्रमितो व्रीहिराशिः प्रस्थशब्दवाच्यो भवति, एवं प्रत्यक्षप्रमितोऽर्थः प्रत्यक्षशब्दवाच्य:[4] स्यात्।

आह, न[5]। अन्यत्रापि तत्प्रसङ्गात्। यदि प्रत्यक्षप्रमितत्वाद्विषये प्रत्यक्षशब्दस्तेन तर्हि अनुमानप्रमितोऽर्थो[6]ऽनुमानमिति स्यात्। शब्दप्रमितोऽर्थः शब्द इति। न चाग्निस्वर्गादय:[7] प्रमाणशब्दवाच्या भवन्ति। तस्माद्विषममेतत्। एतेन तत्कारणभावः प्रत्युक्तः। योऽपि हि मन्यते प्रत्यक्षोपदेश[8]स्तत्कारणेष्वप्रतिषेध्य इति विषये[9] प्रत्यक्षशब्दस्तस्याप्यनुमानप्रसङ्गोऽसाववस्थित इति[10]।

उच्यते—कारणतुल्यत्वात्तु शब्दतुल्यत्वम्[11]। एवं तर्हि अक्षमक्षं प्रति वर्तत इति प्रत्यक्षमुच्यते। द्वयं चाक्षं प्रति वर्तते—विषयोऽध्यवसायश्च। विषयोऽनुग्राहकत्वेनानुग्राह्यत्वेने[12]तरः। तेनोभयोरपि तुल्यं निमित्तमिति कृत्वा तुल्यशब्दवाच्यता भविष्यति।

आह—इतरत्र कथम्?

उच्यते—तदभावादितरत्राप्रवृत्तिः। प्रमाणान्तरे तु नास्ति सामान्यं निमित्तम्। कथम्? अनुमीयतेऽनेनेत्यनुमानम्। न चाग्न्यादिभि:[13] कश्चिदनुमीयत इत्यतस्तुल्यशब्दवाच्यता न भवति।

आह—अध्यवसायग्रहणं किमर्थम्?

---

1. P K D ह्यध्यवसाय: for तर्ह्यध्यवसाय:
2. A इदं वस्तु
3. P K D om. तत्कारणत्वाच्च
4. D प्रत्यक्षवाच्य:, sec.m. प्रत्यक्षशब्दवाच्य:
5. A not clear
6. A ऽथर्थो
7. A चाग्निस्वर्गादयोऽर्थ:
8. A प्रत्यक्षव्यपदेशस्
9. A अतो विषये in place of विषये
10. A अनुमानंप्रसंगो(ऽ)सा एवेति Raghavan (14.7) suggests अनुमाने प्रसङ्ग:.
11. P K D read कारणतुल्यत्वम् after उच्यते, and omit तु शब्दतुल्यत्वम्. A omits उच्यते.
12. A अनुग्राह्यकवेने°
13. D न चाज्ञादिभि:

उच्यते—अतिप्रसङ्गनिवृत्त्यर्थम्। प्रति विषयं दृष्टमितीयत्युच्यमाने यावत्किञ्चित् प्रतिविषयं[1] वर्ततेऽनुग्राहकत्वेनोपघातकत्वेन वा, तत् सर्वं दृष्टमित्येतदापद्यते। अध्यवसायग्रहणे[2] पुनः क्रियमाणे न दोषो भवति[3]।

आह—न[4], प्रमाणाधिकारात्। नाध्यवसायशब्दस्य प्रयोजनम्। कुतः? प्रमाणाधिकारोऽयम्। न चाध्यवसायादृते यत्किञ्चिद्विषयं प्रति वर्तते[5] तेन किञ्चित्[6] प्रमीयते[7]। तेन वयं सामर्थ्यादध्यवसायमेवाभिसंभन्त्स्यामः[8]। तद्यथा अध्ययनाधिकारे ब्राह्मणा आनीयन्तामित्युक्ते य एवाधीयन्ते त एवानीयन्ते[9]।

उच्यते—करणान्तराणां[10] तु सन्देहनिवृत्त्यर्थम्। एवं तर्हि श्रोत्रादीनामन्यतममन्तःकरणं चेत्येतद् द्वारद्वारिभावेन चतुष्टयं विषयं प्रति वर्तते। तस्मादध्यवसायग्रहणं क्रियते सन्देहो मा भूदिति।

आह—अस्त्वत्र सन्देहः। नैकेन केनचित् कश्चि[11]द्विषय उपादीयते[12]। तेन[13] वयं सर्वेषां प्रत्यक्षत्वं प्रतिपत्स्यामहे।

उच्यते—सर्वाभ्युपगमे हि शास्त्रहानिः[14]। यदि पुनः सर्वेषामेव प्रमाणत्वमभ्युपगम्यते, तेन यच्छास्त्रं "एकमेव दर्शनं ख्यातिरेव दर्शनम्"(1) इति तद्धीयते। वक्ष्यति चाचार्यः[15] "एते प्रदीपकल्पाः" (का॰ 36),

---

1. A विषयं प्रति
2. Chakravarti (41.16) reads अध्यवसाये ग्रहणे.
3. A भति
4. P K D om. न
5. A प्रपिद्यते for प्रति वर्तते
6. A तेनाकेश्चित् D sec.m. (तेन) किंचित् च · Raghavan (14.7) suggests येन किञ्चित् ... in place of तेन किञ्चित् ...
7. P प्रनीयनीयते Chakravarti (41.18) reads प्रतीयते.
8. A चाभिसंन्धास्यामः D एवाभिसम्भत्स्यामः
9. A reads तेषामेवानयनं भवति न ब्रह्मणमात्रस्य instead of य एवाधीयन्ते त एवानीयन्ते.
10. A कारणान्तरे Dkha. करणान्तरं
11. A and Dkha. read न कश्चिद् instead of नैकेन केनचित् कश्चिद्.
12. A विशेष उपाधीयते for विषय उपादीयते
13. A and Dkha. ते
14. P K D शास्त्रहानिः प्रमाणम्
15. A चायमाचार्यः

---

(1) Sec यो॰ भा॰ 1.4: तथा च सूत्रम्—"एकमेव दर्शनं ख्यातिरेव दर्शनम्" इति.

सर्वं प्रत्युपभोगं यस्मात् पुरुषस्य साधयति बुद्धिः। (का॰ 37)

इति तद्विरुध्यते। तस्मादध्यवसायग्रहणं कर्तव्यम्, सन्देहो मा भूदिति।

आह—"सन्देहमात्र[1]मेतद् भवति। सर्वसन्देहेषु चेद्[2]मुपतिष्ठते"(1) "व्याख्यानतो विशेषप्रतिपत्तिर्न हि सन्देहादलक्षणम्[3]"(2) इति[4]। तत्राध्यवसायो दृष्टमिति व्याख्यास्यामः[5]।

उच्यते[6]—मुक्तसंशयं चेन्द्रियवृत्तिप्रतिपत्तिः[7]। स्यादेतत्, यद्यत्र सन्देहः स्यात्। नैव त्वत्र[8] सन्देहः प्राप्तः। किन्तर्हि? श्रोत्रादिवृत्तेरेव ग्रहणम्।

आह—किं पुनः कारणं[9] निमित्ताविशेषेऽपि श्रोत्रादिवृत्ते[10]रेवात्र[11] ग्रहणं प्राप्नोति, नान्तःकरणस्यैव प्रत्यक्षत्वम्?

उच्यते—तत्र च[12] मुख्या श्रोत्रादिवृत्तिः। कस्मात्? साक्षा[13]द्विषयग्रहणसामर्थ्यात्। नान्तःकरणम्, तद्द्वारेण प्रतिपत्तेः। गौणमुख्ययोश्च[14] मुख्ये सम्प्रतिपत्तिः[15]। तद्यथा—"गौरनुबन्ध्योऽजोऽग्नीषोमीय इति[16] न बाहीकोऽनुबध्यते[17]"(3)।

---

1. A न सन्देहमात्रम्
2. P K D चैतद्
3. A om. न हि सन्देहादलक्षणम्
4. P K D om. इति
5. A adds एवं before व्याख्यास्यामः.
6. A om. उच्यते
7. P K D प्रतिपत्ते :
8. A नैव वा पुनरत्र
9. A करणं
10. P K D om. निमित्ताविशेषे In A we have येन before निमित्ताविशेषेऽपि श्रोत्रादिवृत्तेर्. I am not very sure about the inclusion of निमित्ताविशेषेऽपि in the text.
11. A एव instead of एवात्र
12. A तत्रापि
13. A पक्षाद्
14. A om. च
15. Dkha. संप्रत्ययः
16. A अनुबन्ध्येति D अनुबन्ध्या, अजोऽग्नि॰, sec.m. अनुबन्ध्यः, अजोऽग्नि॰
17. P K D बाहीको नानुबध्येत

---

(1) मा॰ भा॰ 1.1.3 इत्यादि, 1.2.49 इत्यादि.

(2) म॰ भा॰ 1.1.1

(3) Cf. म॰ भा॰ 1.1.15 इत्यादि.

आह—यदीयं[1] श्रोत्रादिवृत्तिरेव[2] प्रत्यक्षमि[3]त्यभ्युपेयते[4], क एवं सति दोषः स्यात्[5]?

उच्यते—रागादिविषयं[6] यद्विज्ञानं लिङ्गलिङ्गिपूर्वकम्[7], योगिनां[8] च ध्यानभूमिकासु विहरतामनुमानागमातीतं[9] प्रातिभं यद्विज्ञानमुत्पद्यते तदुपसंख्येयं[10] स्यात्। न[11] हि सुखादयः श्रोत्रादिवृत्तिग्राह्याः, योगिनां चातीन्द्रियं ज्ञानमिति। यथान्यासं तु क्रियमाणे तेऽपि विषयाः, तेषां[12] योऽध्यवसायस्तस्य प्रत्यक्षत्वं केन वार्यते[13]?

आह—प्रतिविषयग्रहणं तर्हि[14] किमर्थम्?

उच्यते—प्रतिविषयग्रहणमसद्व्युदासार्थम्। अध्यवसायो दृष्टमितीयत्युच्यमाने मृगतृष्णिकाऽलातचक्रगन्धर्वनगरादिषु यो[15]ऽध्यवसायस्तद् दृष्टमिति स्यात्। प्रतिविषयग्रहणात्तु[16] तेषां व्युदासः कृतो भवति।

आह[17]—यद्येवम्, विषयाध्यवसाय[18] इत्येवोच्यताम्[19]। किं प्रतिग्रहणेन?

---

1. A यदि पुनरियं
2. A एव हि
3. A om. इति
4. A अभ्युपगम्यते
5. A om. स्यात्
6. D रागा°, sec. m. सुखा° D writes पाठ above (the corrected) सुखा in the right margin.
7. A लिंगं। लिंगिपूर्वकं
8. A तथा योगिनां instead of योगिनां
9. P K D om. अनुमानागमातीतं
10. After उत्पद्यते A reads तत्र प्रमाणान्तरत्वमुपसंख्यातम्.
11. P K D read कुतो न in place of न.
12. A तेषु
13. A वार्यात
14. A om. तर्हि
15. Adding अपि, A reads °आदिष्वपि यो.
16. A om. तु
17. P K D om. आह
18. A om. विषयाध्यवसाय ... सन्निकर्षार्थम्
19. P एवचोच्यताम्

उच्यते—प्रतिग्रहणं सन्निकर्षार्थम्। विषयाध्यवसायो दृष्टमितीयत्युच्यमाने विषयमात्रे सम्प्रत्ययः स्यात्। प्रति(ग्रहणे) पुनः क्रियमाणे प्रतिराभिमुख्ये वर्तते[1](1)। तेन सन्निकृष्टेन्द्रियवृत्त्युपनिपाती योऽध्यवसायस्तद् दृष्टमित्येतल्लभ्यते[2]।

आह—कस्य पुनरतीन्द्रियसन्निकर्षे[3] प्रत्यक्षत्वं प्राप्नोति[4]?

उच्यते[5]—अनुमानस्य। कस्मात्? तद्धि लिङ्गदर्शनादसन्निकृष्टे विषये[6] भवति।

आह—अनुमानस्याप्रसङ्गः। सामान्यविहितस्य विशेषविहितेन बाधनात्(2)। सामान्ये[7] हि[8] विषयमात्रे[9]ऽध्यवसायस्य प्रत्यक्षत्वं विधाय विशेषे[10] लिङ्गलिङ्गिपूर्वकेऽनुमानं शास्ति। सामान्यविहितं च[11] विशेषविहितेन बाध्यते(3), यथा "दधि ब्राह्मणेभ्यो[12] दीयतां तक्रं कौण्डिन्याय"(4) इति[13]।

उच्यते—स्मृतेस्तर्हि प्रत्यक्षत्वं प्राप्नोति[14]। तत्राय[15]मपवादो नाभिनिविशत इति।

---

1. P K D read प्रतिना त्वाभिमुख्यं द्योत्यते for प्रतिग्रहणे ... वर्तते. A प्रतिग्रहे पुनः क्रिय° I follow Pandeya's (37) emended reading.
2. P K D इत्युपलभ्यते A इत्येतल्लभ्य भवति Dkha. (इत्) एतल्लभ्यते
3. A पुनः कस्यासतीन्द्रियसन्निकर्षे instead of कस्य पुनरतीन्द्रियसन्निकर्षे
4. A inserts ज्ञत्वं before प्राप्नोति.
5. A adds यदर्थो यत्नः क्रियत इति before उच्यते.
6. A अग्न्यादौ in place of विषये
7. P K D सामान्य A स्यमान्ये I follow Pandeya (37).
8. P K D om. हि
9. A विशेषमात्रे
10. P विशेषो
11. A om. च
12. A तद्यथा ब्राह्मणेभ्यो दधि (दीयतां)
13. D om. इति
14. A om. प्राप्नोति ... अस्तु तर्हीन्द्रियाणां प्रति- (84.10–85.20)
15. Dkha. यत्रायम्

---

(1) Cf. न्यायमञ्जरी, Pt.1, p. 163 : यत्तु राजा व्याख्यातवान् 'प्रतिराभिमुख्ये वर्तते, तेनाभिमुख्येण विषयाध्यवसायः प्रत्यक्षमिति'...

(2) Cf. म॰ भा॰ 2.1.24 इत्यादि.

(3) Cf. म॰ भा॰ 2.1.24 इत्यादि.

(4) Cf. म॰ भा॰ 1.1.47 इत्यादि.

(आह—) न स्मृतेः, प्रमाणाधिकारात्। प्रमाणाधिकारोऽयम्। न च स्मृत्या किञ्चित् प्रमीयते, स्मृतेः प्रमितेऽर्थे प्रादुर्भावात्[1]।

उच्यते—संशयस्य तर्हि प्राप्नोति।

(आह—) न संशयस्य, अध्यवसायग्रहणात्[2]। अध्यवसायो हि दृष्ट[3]मित्युच्यते। न च संशयोऽध्यवसायोऽनिश्चितत्वात्।

उच्यते—इन्द्रियान्तराकूतविषये तु प्रसङ्गः[4]। एवं तर्हीन्द्रियार्थसन्निकृष्टेन्द्रियवृत्त्युपनिपातीति दोषो न भवति[5]।

आह—रागाद्युपसंख्यानम्। यदि सन्निकृष्टेन्द्रियवृत्त्युपनिपाती योऽध्यवसायस्तद् दृष्टमित्यभ्युपेयते, तेन रागादिविषयं विज्ञानमतीन्द्रियत्वात्प्रत्यक्षं न प्राप्नोति। तस्योपसंख्यानं कर्तव्यम्[6]।

उच्यते—न[7] तर्हीदं प्रतिग्रहणमिन्द्रियविशेषणं विषयं विषयं प्रति यो वर्तते तस्मिन् योऽध्यवसायस्तद् दृष्टमिति। किं तर्हि? अध्यवसायविशेषणं विषयं विषयं प्रति योऽध्यवसाय इति।

आह—अध्यवसायविशेषणमिति चेत्, शब्दाद्युपसंख्यानम्। शब्दादीनामेव तेन प्रत्यक्षत्वं न[8] प्राप्नोति[9]। तेषामुपसंख्यानं कर्तव्यं प्राप्नोति। किं कारणम्? अन्तःकरणस्य तैः सन्निकर्षानुपपत्तेः। प्रतिग्रहणं सन्निकर्षार्थमिति पूर्वमतिसृष्टं (84.2) भवता। तच्चेदानीमन्तःकरणविशेषणम्। न चान्तःकरणस्य शब्दादिभिः सन्निकर्ष उपपद्यते, श्रोत्रादिवैयर्थ्यप्रसङ्गाद्[10] द्वारिद्वारभावस्यापघातप्रसङ्गाच्च। तस्मात्सुदूरमपि गत्वा प्रतिग्रहणं प्रत्याख्यानान्न मुच्यते रागाद्युपसंख्यानाद्वेति।

उच्यते—अस्तु तर्हीन्द्रियाणां प्रतिविषयग्रहणं विशेषणम्। यत्तूक्तं (85.9) रागादीनामु-

---

[1] D स्मृतेः प्रमित्यर्थे प्रादुर्भावात्, sec.m. स्मृतिप्रमितेऽर्थप्रादुर्भावात्

[2] Dkha. संशयेऽध्यवसायग्रहणात्

[3] D दृश्यम्, sec.m. दृष्टम्

[4] D °आकूतविषये तु प्रसङ्गः, sec.m. °आकूते तु विषयप्रसङ्गः Dkha. °आकूते तु विषयप्रसङ्गः Tripathi (131) suggests इन्द्रियान्तरमन्तराकूतविषये ...

[5] D दोषो न भवति, sec. m. नादोषो भवति

[6] D adds प्राप्नोति after कर्तव्यम् in the right margin and encircles it.

[7] Dkha. ननु for न

[8] P K D om. न

[9] Tripathi (131) reads शब्दादीनामेव ते न प्रत्यक्षत्वं प्राप्नोति.

[10] D सूत्रादिवैयर्थ्य°, sec. m. श्रोत्रादिवैयर्थ्य°

पसंख्यानं कर्तव्यमिति तत्र[1] ब्रूमः—एकशेषनिर्देशात्[2](1) सिद्धम्। एवं तर्हि प्रतिविषयाध्यवसायश्च प्रतिविषयाध्यवसायश्च[3] प्रतिविषयाध्यवसाय इति सरूपाणामेकशेषः(2) करिष्यते। तत्रैकेन बहिरङ्गस्यैन्द्रियस्य प्रत्यक्षस्य परिग्रहः[4]। द्वितीयेनान्तरङ्गस्य[5] प्रातिभस्येति[6] रागादिविषयं योगिनां च यद्विज्ञानं तत् संगृहीतं[7] भवतीति व्याख्यातं प्रत्यक्षम्।

आह—अनुमानमिदानीं वक्तव्यम्।

उच्यते—

त्रिविधमनुमानमाख्यातम्[8]। (का॰ 5/2')

अनुमानं त्रिप्रकारमाचार्यैराख्यातम्[9]। पूर्ववत्, शेषवत्, सामान्यतोदृष्टं च। तत्र पूर्वमिति कारणमुच्यते[10]। यस्य हि यत् कारणं स लोके तत्पूर्वक[11] इत्युच्यते। यथा[12] तन्तुपूर्वकः पटः, देवदत्तपूर्वको[13] यज्ञदत्त इति। पूर्वमस्यास्तीति पूर्ववत्। शेष इति विकारनाम, शिष्यत इति कृत्वा। तथा चोक्तं[14] "न शेषोऽग्ने[15]ऽन्यजात[16]मस्ति[17]"(3)

---

1. A इत्यत्र
2. A एकदेश°
3. A om. प्रतिविषयाध्यवसायश्च D, on the other hand, adds this word in the top margin.
4. A reads बहिरंगस्यैद्रियकस्य प्रत्यक्षस्य परिग्रहः. Dkha. एकेनेन्द्रियस्य बहिरङ्गपरिग्रहः P K D read बहिरङ्गस्येन्द्रियस्य, but omit प्रत्यक्षस्य. Though following A I retain प्रत्यक्षस्य, I do so hesitatingly.
5. A द्वितीयानंतरंगस्य
6. D repeats प्रातिभस्य and strikes off the second प्रातिभस्य.
7. A and Dkha. तत्सर्वं संगृहीतं
8. A अनुमाख्यातम् in place of अनुमानमाख्यातम्
9. P K D व्याख्यातम् for आख्यातम्
10. A कारणपर्यायोऽयम् instead of कारणमुच्यते
11. A यस्य हि लोके यत्कारणं स तत्पूर्वक instead of यस्य ... तत्पूर्वक
12. A तद्यथा for यथा
13. A देवदत्तकपूर्वको
14. P K D om. तथा चोक्तं
15. P K D ऽग्रे A ऽग्नेः We correct it into ऽग्ने.
16. A ऽन्यस्य जातम्
17. P K D A read इत्यस्ति. Dkha. अस्ति

---

(1) म॰ भा॰ 1.1.6

(2) See पा॰ सू॰ 1.2.64

(3) ऋग्वेद 7.4.7; निरुक्त 3. 2

(इति)। नापत्यमन्येन जातं[1] सम्भवतीत्यर्थः। शेषोऽस्यास्तीति शेषवत्। तत्र पूर्ववद्[2] यदा कारण[3]मभ्युदितं दृष्ट्वा भविष्यत्त्वं कार्यस्य प्रतिपद्यते। यथा मेघोदये भविष्यत्त्वं[4] वृष्टेः।

आह—नैतदस्त्युदाहरणम्, अनेकान्तात्[5]। न हि मेघोदयोऽवश्यं वृष्टेः कारणं भवति[6], वाय्वादिनिमित्तप्रतिबन्धसम्भवात्[7]।

उच्यते—यदि[8] तर्हि कारणशक्तिं सहकारिशक्त्यन्तरानुगृहीतामप्रतियोगिनीं दृष्ट्वा कार्यस्य व्यक्तिं[9] प्रतिपद्यते[10]। तद्यथा[11] यदा (चक्रोदक)दण्डादिसाधनसम्पन्नेन[12] व्यापारवता कुम्भकारेणाधिष्ठितां मृदमुपलभ्य घटस्य, तदा पूर्ववत्। शेषवत् यदा कार्यनिर्वृत्तिं[13] दृष्ट्वा कारणसद्भावं प्रतिपद्यते। तद्यथा कुमारकं दृष्ट्वा द्वयसमापत्तिम्।

आह—नैतद[14]प्यस्त्युदाहरणम्, अनेकान्तात्[15]। न हि द्वयसमापत्तिपूर्वक एव प्राणभृतां[16] प्रादुर्भावो, द्रोणादीनामन्यथो[17]त्पत्तिविशेषश्रवणात्।

---

[1] Dkha. om. जातं

[2] Chakravarti (44.4) reads तत्र शेषवत्.

[3] P K D कारणत्वं

[4] P K D read भवितव्यं. A reads तद्यथा मेघोदयं दृष्ट्वा भविष्यत्त्वं instead of यथा मेघोदये भविष्यत्त्वं. Chakravarti (44.5) suggests the emendation भवितव्यता ... Wezler (83.8) follows Chakravarti.

[5] A अनैकान्तात्

[6] A न हि मेघोदयं वृष्टेरवश्यं कारणं भवति

[7] A °निमित्तप्रतिबन्धात् Chakravarti (44.8) reads बाधादिनिमित्त°.

[8] P K D यदा

[9] P व्यक्तिः

[10] A प्रतिपद्यन्ते

[11] The portion तद्यथा ... कारणसखावं प्रतिपद्यते (87.7-9) is not found in P K D.

[12] A चाण्डालौदिदण्डादिसाधनसम्पन्नेन I follow Wezler's emendation (83.12).

[13] A कार्यनिवृत्तिं I follow Pandeya (38).

[14] A om. अपि

[15] A अनैकान्तात्

[16] A प्रमाणभृतां

[17] A द्रोणादीनां ह्यन्यथो°

उच्यते—यदा तर्हि प्रभानुरञ्जितमन्तरिक्षं दृष्ट्वा चन्द्रार्कयोरुदयं प्रतिपद्यते, तदा शेषवत्।

आह[1]—एत[2]दपि नास्त्युदाहरणम्, अनेकान्तात्[3]। न हि प्रभाऽनुरागोऽन्तरिक्षे[4] चन्द्रार्कनिमित्त एव भवति। किं तर्हि? दिग्दाहादिनिमित्तोऽपि[5]।

उच्यते—यदा तु[6] नदीपूरं दृष्ट्वा वृष्टिं प्रतिपद्यते[7], तदा शेषवत्।

आह[8]—एतदपि नास्त्युदाहरणम्, अनेकान्तात्[9]। नदीपूरस्य हि निमित्तमनेकविधं भवतीति[10] हिमविलयनसेतुभङ्गगजक्रीडादि। तस्मादयुक्तमेतत्।

उच्यते—यदा तर्हि पर्णं दृष्ट्वा शालूकं प्रतिपद्यते, अङ्कुरं वा दृष्ट्वा बीजमिति, तदा शेषवत्। अथवा पुनरस्तु पूर्व[11]मेवोदाहरणम्। यत्तूक्तम् (87.6) अनेकान्ता[12]दिति, अत्र ब्रूमः—वीतावीतसामर्थ्यात्। वीतावीताभ्यां हेतुभूताभ्यामभिप्रेतार्थसिद्धिरिति वक्ष्यामः। प्रसङ्गिधर्मान्तरनिवृत्तिमुखेन चावीतप्रयोगः[13]। तत्र यदा प्रसङ्गिनां हिमविलयनादीनां[14] देशकाललिङ्गैः प्रतिषेधः क्रियते तदा मुक्तसंशयं प्रतिपत्ति[15]र्भवति। देशतस्तावत्तद्यथा[16]—दक्षिणापथे नास्ति हिमविलयनसम्भवः[17]। कालतो यथा प्रावृट्काले[18]। लिङ्गतोऽपि यस्मान्मुद्गगवेधुकश्यामाककाष्ठतृणमूत्रशकृत्प्रभृतीनाम्-[19]

---

1. P K D om. आह
2. D एतद्, sec.m. तत्
3. A अनैकान्तात्
4. A ऽन्तरिक्षस्य
5. A तर्ह्युत्पातादिनिमित्तोऽपीति for दिग्दाहादि°
6. A तर्हि for तु
7. A नवप्रवृद्धजलां नदीं दृष्ट्वा भूतत्वं वर्षस्य प्रतिपद्यते instead of नदीपूरं ... वृष्टिं प्रतिपद्यते
8. P K D om. आह
9. A अनैकान्तात्
10. D भवति, sec. m. भवतीति
11. All the Mss read पूर्वकम्. I go with Wezler (84.18).
12. A अनैकान्तात्
13. A °प्रसंगः for °प्रयोगः
14. A हिमविलयादीना
15. A मुक्तसंशयप्रति°
16. P यथा for तद्यथा
17. A हिमसम्भवः for हिमविलयनसम्भवः
18. Omitting कालतो यथा, A reads प्रवृट्काले च.
19. P -तृणसूत्र-

नुपलम्भ[1]स्तथोष्मकलुषत्वादीनामुपलम्भः[2]। तस्मात् परिशेषतो मेघ्या[3] एवाप इति। तस्मान्नाऽनेकान्तः[4]। एवं कृत्वा पूर्वाण्य[5]प्युदाहरणानि उपपन्नानि भवन्ति, देशादिविचारसामर्थ्यात्[6]। सामान्यतोदृष्टं नाम[7] यत्रैकदाऽर्थयोर[8]व्यभिचारमुपलभ्य देशान्तरे कालान्तरे च तज्जातीययोरव्यभिचारं प्रतिपद्यते। तद्यथा क्वचिद्धूमाग्निसम्बन्धं दृष्ट्वा क्वचिद्धूमान्तरेणाग्न्यन्तरस्यास्तित्वं प्रतिपद्यते।

आह—नैतदस्त्युदाहरणम्। अविशेषप्रसङ्गात्। सर्वत्रैव ह्यनुमाने[9] क्वचिदर्थयोरव्यभिचारमु[10]पलभ्यान्यत्र तज्जातीययोरर्थयोरव्यभिचारं प्रतिपद्यते। तद्यथा क्वचित् साधनवतो[11] मृत्पिण्डाद् घटनिष्पत्तिमुपलभ्यान्यत्र साधनवतः पिण्डान्तराद् घटान्तरनिष्पत्तिं प्रतिपद्यते, तथैकत्र[12] नदीपूराद् वृष्टिमुपलभ्यान्यत्र नदीपूराद्[13] वृष्ट्यन्तरमवसीयते। तथा च सति त्रयाणामविशेषप्रसङ्गः।

उच्यते—यदा तर्हि[14] सहभुवामेकस्य विशिष्टगुण[15]मुपलभ्य शेषाणामपि[16] तद्वत्त्व[17]मनुमीयते[18], तदा सामान्यतोदृष्टम्। तद्यथा वृक्षादेकस्य फलस्य[19] पाकमुपलभ्य

---

[1] A अनुपलभ्भोत् (?) Raghavan (14.7) suggests उपलम्भः in place of अनुपलम्भः.

[2] K D A तथोष्णकालुष° Raghvan (14.7) suggests अकलुषत्व in place of कलुषत्व and अनुपलम्भः in place of उपलम्भः.

[3] P मेघा Raghavan (14.7) suggests मेघाद् in place of मेघाः, which latter is accepted by Chakravarti (44.24), following P.

[4] A नानैकान्तः D नानेकान्ताः, sec. m. नानेकान्तः

[5] D om. अप्य्

[6] D देशादिविकार°, sec. m. देशादिविचार°

[7] P K D om. नाम

[8] P K D यत्रार्थयोर् A यत्रैकदार्थयौर् Dkha. यत्रैकार्थयोर् I follow Pandeya (38).

[9] A reads अनुमाने, omitting ह्य्.

[10] A om. अव्यभिचारमुपलभ्यान्यत्र तज्जातीययोरर्थयोर्

[11] A साधनतो

[12] A तत्रैकत्र

[13] A नदीपूरान्तराद्

[14] A तर्हिं

[15] A विशिष्टगुणयोगम्

[16] A reads शेषणाम् and omits अपि.

[17] A तत्त्वेन for तद्वत्त्वम् Dkha. तद्वत्तेन

[18] A ग्रहणं for अनुमीयते Dkha. om. अनुमीयते

[19] Dkha. वृक्षादेः फलस्य

शेषाणां फलानां वृक्षान्तराणां[1] च पाकोऽनुमीयते।

आह—एतदपि नास्त्युदाहरणम्। अनेकान्तात्[2]। न हि सर्वेषां फलानां तुल्यकालं पाको भवति, पूर्वापरकालनिष्पन्नत्वान्निमित्तभेदाच्च।

उच्यते—यदा तर्हि समुद्रादेकमुदबिन्दु[3] प्राश्य शेषस्य लवणताऽनुमीयते[4], स्थाल्यां[5] वैकं पुलाकमुपलभ्य शेषाणां पाकोऽनुमीयते, तदा सामान्यतोदृष्टम्।

आह—नैतदप्य[6]स्त्युदाहरणम्। अकृत्स्नसंग्रहात्। वक्ष्यत्ययमुपरिष्टादाचार्यः

सामान्यतस्तु दृष्टादतीन्द्रियाणां प्रसिद्धि[7]रनुमानात्। (का॰ 6)

इति। तत्रैवं प्रमाणे परिकल्प्यमाने कार्यकारणयो[8]स्तत्संघातानां च सुखदुःखमोहस्वभावोपलम्भात्तन्मात्राहङ्कारमहत्प्रधानानां[9] समधिगमः[10] स्यात्, न पुरुषस्य, तज्जातीयार्थाऽनुपलम्भात्।

उच्यते—यदा[11] तर्हि क्वचिद्धर्मेण धर्मान्तरस्याव्यभिचारमुपलभ्यैकधर्मोपलम्भाद्[12] भिन्नजातीये[13]ऽत्यन्तानुपलब्धस्य धर्मान्तरस्य प्रतिपत्तिस्तदा सामान्यतोदृष्टम्। तद्यथा देवदत्ते गमनाद्देशान्तरप्राप्तिमुपलभ्यात्यन्तादृष्टं ज्योतिषां[14] देशान्तरप्राप्तेर्गमन[15]मनुमीयते। तथा प्रासादादीनां वृद्धिपूर्वकं दीर्घत्वमुपलभ्यौषधिवनस्पतीनां दीर्घत्वदर्शनाद् वृद्धिरनुमीयते।

---

[1] PKD शेषाणां वृक्षाणां Dkha. शेषाणां फलानां

[2] A अनैकान्तान्

[3] A उदकबिन्दुं

[4] A लवणतामनुमीयते

[5] A स्थाल्या

[6] PKD नैतदस्त्य् A एतदपि नास्ति

[7] PKD for प्रतीतिर for प्रसिद्धिर्

[8] A कार्यकारणयास्

[9] PKD om. –महत्– D स्वभावोपलम्भाच्च तन्मात्र°, sec. m. °लम्भात्तन्मात्र°

[10] A ह्यधिगमस्

[11] A यदि for यदि

[12] PKD उपलभ्यैवं धर्मोपलम्भाद् for उपलभ्यैकधर्मो°

[13] A भिन्नजातीयो

[14] PK °अत्यन्तादृष्टज्योतिषां D °अत्यन्तादृष्ट°, sec. m. °अत्यन्तदृष्ट°

[15] A प्राप्तेऽर्थम् for प्राप्तेर्गमनम्

आह—नैतदप्य[1]स्त्युदाहरणम्। पूर्वेणाविशेषात्। कार्यात् कारणस्याधिगमः शेषव[2]दिति पूर्वमतिसृष्टं भवता[3]। अत्रापि च[4] देशान्तरप्राप्तिलक्षणात् कार्याद् गतिलक्षणस्य कारणस्याधिगमः। तस्मात् शेषवत्सामान्यतोदृष्टयोरभेदप्रसङ्गः।

उच्यते—न, अनियमात्। यत्र हि नियमतः[5] कार्येण कारणमधिगम्यते तच्छेषवदित्यमस्मदभिसन्धिः[6]। न तु तदस्ति सामान्यतोदृष्टे[7]। कस्मात्? संघातत्वसामान्यात् पारार्थ्यसामान्यसाधन[8]मपि दृश्यते। यथाह[9]—

(व्य)भिचाराद्विशेषास्तु[10] प्रतीताः प्रतिपादकाः(1) ॥

इति। साध्यसाधनसामान्ययोरपि दृश्यते, यथाऽनित्यः शब्दः कृतकत्वादिति। तत्रैवं सति नियमवादिनः प्रतिज्ञाहानिः। एतेनासिद्धविरुद्धानैकान्तिकसाधनाभासाः[11] प्रत्युक्ताः। ते हि संशयविपर्ययाज्ञान[12]हेतुकत्वादगमका[13] इति व्याख्यातमनुमानम्।

आह—आप्तवचनस्य किं लक्षणमिति?

उच्यते—

[14]आप्तश्रुतिराप्तवचनं तु ॥ का॰ 5/4 ॥

आप्ता नाम रागादिवियुक्तस्यागृह्यमाणकारणा परार्था[15] व्याहृतिः। श्रवणं श्रुतिः।

---

1. A एतदपि नास्त्य्
2. A शेषवाद्
3. A भगवता
4. A om. च
5. PKD नियमः
6. PKD अस्मादभिसन्धिः
7. A संशयतोदृष्टे
8. A पारार्थ्यसाधनसामान्यम्
9. A यथा
10. All the Mss read अव्यभिचाराद्. I follow Wezler (86.20).
11. A साध्यवचनेनानिरुद्धानैकांतिकाभासाः
12. PKD °विपर्ययज्ञान°
13. A आगमका
14. The third पाद of this कारिका (5) has not been found commented upon in any of the Mss consulted by this editor.
15. Pandeya (39) reads °कारणपरार्था.

---

(1) प्र॰ समु॰ 2.19

आप्ता चासौ श्रुतिश्चाप्तश्रुतिः। अथवा आप्ताऽस्यास्ती[1]त्याप्तः[2]। अकारो मत्वर्थीयः(1)। तद्यथा तुन्दो घट[3] इति। आप्तेभ्यः श्रुतिराप्तश्रुतिः। आप्तश्रुतिश्चाप्तश्रुतिश्चाप्तश्रुतिः। सरूपाणामित्येकशेषः[4](2)। तत्र पूर्वेणाप्तश्रुतिग्रहणेनेदं[5] प्रतिपादयति[6]—अपुरुषबुद्धिपूर्वक आम्नायः स्वतन्त्रः[7] पुरुषनिःश्रेयसार्थं प्रवर्तमानो निःसंशयं प्रमाणमिति। द्वितीयेन मन्वादिनिबन्धनानां च स्मृतीनां वेदाङ्गतर्केतिहासपुराणानां शिष्टानां[8] नानाशिल्पाभियुक्तानां[9] चादुष्टमनसां य[10]द्वचस्तत्प्रमाणमित्येत[11]त्सिद्धं भवति। तुशब्दोऽवधारणार्थः। आप्तश्रुतिरेवा[12]प्तवचनम्, न[13] शब्दमात्रम्। एवं सति यदुक्तं तन्त्रान्तरीयैः "शिंशपादिशब्दानां निर्विकल्पमनुमानेऽन्तर्भावस्त्रिलक्षणत्वात्" इति, तदयत्नतः प्रतिक्षिप्तं भवतीति व्याख्यातानि प्रमाणानि। एतैः[14] पूर्वोक्तं प्रमेयं यथास्वं प्रतिपत्तव्यमिति ॥ 5 ॥

आह—अस्तु तावदक्षसन्निकर्षभाजा[15]मर्थानां प्रत्यक्षेणोपलब्धिः। असन्निकर्षभाजामपि चोपलब्धसम्बन्धानामनुमानेन। ये त्वतीन्द्रिया भावास्तेषामुभयवैलक्षण्यान्नास्ति प्रत्यक्षानुमानाभ्यामुपलब्धिः। आगमिकत्वे[16] सर्ववादसिद्धिप्रसङ्गः। इत्यतोऽत्यन्त[17]मेवाग्रहणं प्राप्तम्।

---

[1] P K D अथवाप्तोऽस्यास्तीत्य्

[2] A आप्तैः

[3] A तुण्डो मुत्र

[4] A सरूपाणामेकशेष एकविभक्तावित्येकशेषः

[5] Pandeya (39) reads °नैवं instead of °नेदं.

[6] A प्रतिपादयत्व्

[7] P K D read स in place of स्वतन्त्रः.

[8] A has तथा before शिष्टानां.

[9] A नानातिशिल्पाभियुक्तानां

[10] A च यद् for यत्

[11] A चैतत् for एतत्

[12] P K D om. एव

[13] P K D om. न

[14] A अन्यैः for एतैः

[15] D अक्षसंकर्षभाजाम्, sec. m. अक्षसन्निकर्षभाजाम्

[16] A आगमिकत्वे च

[17] D इति त्वत्यन्तम्

---

(1) Cf. पा॰ सू॰ 5.2.197

(2) Cf. पा॰ सू॰ 1.2.64

तत्र यदुक्त[1]मेतावद्भिः प्रमाणैः सकलपदार्थावबोध इति, एतदयुक्तम्[2]।

उच्यते—स्यादेतदेवं यद्येक[3]रूपमेवानुमानमधीतं[4] स्यात्। किं तर्हि? त्रिविधम्। तत्र सत्यमेव पूर्ववच्छेषवती[5] प्रागनुभूतसम्बन्धविषयफले[6] इति कृत्वा न ताभ्यामशेषपदार्थाधिगमोऽभ्युपगम्यते।

सामान्यतस्तु दृष्टा[7]दतीन्द्रियाणां प्रसिद्धि[8]रनुमानात्[9]।(का० 6/1-2)

यत्त्वेतत्सामान्यतोदृष्ट[10]मनुमानं तस्मा[11]दतीन्द्रियाणामर्थानां समधिगमः प्रत्यवगन्तव्यः। कथम्? यथा हि कृतकत्वानित्यत्वयोर्घटे[12] सहभाव[13]मुपलभ्यान्यत्र शब्दादौ कृतकत्वदर्शनादनित्यत्वमनुमीयते, एवं शकलादीनां तज्जातीयतया चन्दनादिपूर्वकत्वसिद्धेः कार्यकरणस्य[14] सुखादिजातीयतया[15] तत्पूर्वकत्वसिद्धिः[16], शयनादीनां च संघातत्वात्पारार्थ्यसिद्धेः कार्यकरणस्यापि[17] संघातत्वात्पारार्थ्यसिद्धिरिति सर्वमिष्टं संगृहीतं भवतीति। येषां तु शेषवदेव सामान्यतोदृष्टम्, तेषां[18] तस्य कार्यद्वारेण[19] समधिगमहेतुत्वात् पुरुषस्याग्रहणप्रसङ्गः[20]।

---

[1] Chakravarti (46.15) reads तत्र युक्तमेतावद्भिः. Raghavan's corrected reading (14.7) agrees with the reading (of the Mss) adopted by us.

[2] A एदयुक्तम्

[3] A एवयेद्येक

[4] P एवानुमानुमधीतं   A एवानुमधीतम्

[5] A पूर्ववच्छेषवत्   D पूर्ववच्छेषवती, sec. m. पूर्ववच्छेषवत् ते

[6] Raghavan (12.7) emends it as प्रागनुभूतसम्बन्धे विषयफले.

[7] A ष्टाद् for दृष्टाद्

[8] Dkha. प्रतीतिर् for प्रसिद्धिर्

[9] D अनुमानात्, sec. m. अनुमानं

[10] A दृष्टं सामान्यतो

[11] P K D अनुमानमेतस्मात्

[12] A कृतकत्वानित्ययोर् etc.

[13] A समभाघम्

[14] All the Mss read कार्यकारणस्य.

[15] D मुखादि°, sec. m. सुखादि°

[16] A °पूर्वकत्वसिद्धेः

[17] P K D कार्यकारणस्यपि   A अकार्यकारणस्यापि

[18] A तु तेषां तु

[19] A तस्य कार्यशेषवतः कार्यद्वारेण

[20] A reads, instead, पुरुषस्य ग्रहणप्रसंगः

वृत्तौ कार्योपचाराददोष इति चेत्, स्यान्मतम्—यद्यपि पुरुषस्य कार्याभाव[1]स्तथापि पुरुषाव्यक्तमहदहङ्काराविशेषाणां[2] साम्प्रते काले[3] स्ववृत्तिभ्यस्तेषां ग्रहणमित्युक्तम्। कस्मात्[4]? वृत्तिशक्ति[5]रेषां कार्यत्वेनोपचरिता स्वमात्मानं[6] व्यनक्तीति[7]। तच्चायुक्तम्। कस्मात्? हेत्वन्तराभिधानात्[8]। यदि वृत्त्या ग्रहणं पुरुषस्य सूपपादमभविष्यत्, संहतपारार्थ्यमाचार्यो हेतुत्वेन[9] नावक्ष्यत्[10]। तच्चावृत्तिभूतमित्यवश्यं शेषवत्सामान्यतोदृष्टयोरर्थान्तरभावोऽभ्युपगन्तव्यः[11]। तस्मात् सिद्धं सामान्यतोदृष्टादतीन्द्रियाणा[12]मर्थानां[13] समधिगमः।

तस्य[14] प्रयोगमात्रभेदाद् द्वैविध्यं वीतोऽवीत[15] इति। तयोर्लक्षणमामनन्ति—

यदा हेतुः स्वरूपेण साध्यसिद्धौ प्रयुज्यते।
स वीतोऽर्थान्त(र)क्षेपा[16]दितरः परिशेषतः[17]॥

स्वरूपं हि साधनस्य द्विविधम्—साधारणमसाधारणं च। तत्र साधारणं साध्यसहभावी[18] तत्प्रतिपत्तिहेतुत्वेन यथावदाश्रीयमाणोऽर्थात्मा। असाधारणं पुनः "परिमाणमन्वयः" (द्र० का० 15) "संघातपरार्थत्वम्" (द्र० का० 17) इत्यादि। तत्र यदा हेतुः परपक्षम-

---

[1] A कार्यभावस् Dkha. कार्यता भवेत

[2] P K D °विशेषणाग्रहणेषु A पुरुषव्यक्तमहदहंकारादविशेषाणां Pandeya (40) reads °महदहङ्कारविशेषाणां. Our view coincides with Wezler's (88.14-15).

[3] A सम्प्रतिकाले

[4] P K D तस्मात्

[5] A वृत्तिर् instead of वृत्तिशक्तिर्

[6] A आत्माना

[7] P K D read युनक्तीति.

[8] A न हेत्वन्तरा°

[9] Dkha. हेतुना Chakravarti (47.5) reads °र्थ्यसाहचर्यं हेतुत्वेन ...

[10] A नोवक्ष्यत्

[11] A भेदोऽप्यवगन्तव्यः for अर्थान्तरभावोऽभ्युपगन्तव्यः

[12] A एवातीन्द्रियाणाम्

[13] Dkha. (सामान्यतो) दृष्टानामर्थानाम् in place of सामान्यतोदृष्टादतीन्द्रियाणामर्थानां

[14] A तूस्य

[15] A reads आवीत for अवीत uniformally. Wezler (89.1) regards ऽवीत as uncertain.

[16] All the Mss read अर्थान्तराक्षेपाद्. I follow Raghavan (12.7), who anticipates both Tripathi (143) and Wezler (89.3).

[17] P K D परिशेषितः

[18] D साध्यसहभावे

नपेक्ष्य[1] यथार्थेन[2] स्वरूपेण साध्यसिद्धावपदिश्यते तदा वीताख्यो भवति। यदा तु स्वसाध्यादर्थान्तरभूतानां प्रसङ्गिनां[3] क्षेपमपोहं कृत्वा परिशेषतः साध्यसिद्धावपदिश्यते तदाऽवीताख्यो भवति—तद्यथा[4] न चेत् परमाणुपुरुषेश्वरकर्मदैवकालस्वभावयदृच्छाभ्यो जगदुत्पत्तिः सम्भवति परिशेषतः प्रधानादिति, तदा पुनरवीताख्यो भवति। तत्र यदा वीतो हेतुः स्वबुद्धाववहितविज्ञानस्वरूपं[5] विज्ञानान्तरमादधानेन[6] वक्त्रा प्रतिपाद्यादौ वाक्यभावमुपनीयते—वाक्यमन्तरेणार्थस्य[7] बुद्ध्यन्तरे संक्रामयितुम[8]शक्यत्वात्—तदाऽवयविवाक्यं परिकल्प्यते। तस्य पुनरवयवाः जिज्ञासासंशयप्रयोजनशक्यप्राप्तिसंशयव्युदासलक्षणाश्च[9] व्याख्याङ्गम्। प्रतिज्ञाहेतुदृष्टान्तोपसंहारनिगमनानि[10] परप्रतिपादनाङ्ग[11]मिति।

तत्र ज्ञातुमिच्छा जिज्ञासा। कश्चित्[12] कश्चिदुपसद्याह—पुरुषं[13] ज्ञातु[14]मिच्छामि[15], किमस्ति[16] नास्तीति? कुतः संशय इति पर्यनुयुक्तः प्रत्याह—अनुपलभ्यमानस्योभयथा दृष्टत्वात्। इहानुपलभ्यमानमुभयथा दृष्टम्—सद्भूतमसद्भूतं चेति[17]। सद्भूतं चा[18]र्केन्दुमण्डलापरभागादि, असद्भूतं च[19] शशविषाणादि। अयमपि चात्मा[20] नोपलभ्यते। अतः

---

1. All the Mss. read अपेक्ष्य.
2. A यथोक्तेन Chakravarti (47.13) reads यथाऽर्थेन.
3. P K प्रासंगिकानां D प्रासंगिकणां, sec. m. °काणां
4. A omits the portion तद्यथा ... पुनरवीताख्यो भवति (95.3-4).
5. A आहितविज्ञानसरूपं
6. A आन्दधानेन D आददानेन
7. A वाक्यमर्थान्तरेणार्थस्य
8. A संक्रमयितुम्
9. P K °संशयव्युदानलक्षणाश् D °संशयविदानलक्षणाश् A °संशयव्युदासलक्षणेच्
10. A °दृष्टान्तोपनयनिगमनानि
11. A inserts च before परप्रतिपादनांगम्.
12. A adds यथा before कश्चित्
13. D पुरुष, sec. m. पुरुषं
14. A संज्ञातुम्
15. D इच्छा मे
16. A किस्ति
17. A om. इति
18. A om. सद्भूतं च
19. A om. च
20. A चात्म

संशयः कि[1]मस्ति नास्तीति[2]? किमस्या[3]श्चिन्तायाः प्रयोजनमिति पृष्टो व्याचष्टे— शास्त्रसतत्त्वाधिगमः, ततश्च मोक्षावाप्तिः। कथमिति? यदि तावदयमात्माऽस्ति ततो[4]ऽस्य अप्रकृतित्वौदासीन्यविभुत्वादिसतत्त्वविज्ञानान्नैरात्म्यभ्रान्तिविपक्षभूतादपवर्गप्राप्तिरवश्यंभाविनीति[5] यदुक्तं "व्यक्ताव्यक्तज्ञविज्ञानान्मोक्षोऽवाप्यते" (द्र. का॰ 2) इति, तच्छास्त्रमर्थवद् भवति[6]। अथ नास्तीति निश्चीयते, तेन[7] सामान्यतोदृष्टादनुमाना[8]त्तद्वदन्येऽपि पदार्था न सन्तीति विप्रलम्भभूयिष्ठमार्षं दर्शनमपहायात्मग्रहदृष्टिविगमाल्लोकोत्तरमनवलम्बन(म्) शून्यं ध्यानविषय[9]मुपसम्प्राप्तस्त्रैधातुकक्लेशनिरोधलक्षण[10]मात्यन्तिकं निर्वाणमवाप्स्यसीति[11]। शक्यश्चायमर्थो[12] निश्चेतु[13] प्रमाणत्रयपरिग्रहादिति व्यवस्थिते व्युदस्य[14] संशयम्। साध्यावधारणं प्रतिज्ञा। साध्यस्य[15] यदवधारणमस्ति पुरुष इति, सा प्रतिज्ञा।

साधनसमासवचनं हेतुः। साध्यतेऽनेनेति[16] साधनं लिङ्गम्[17]। समासः संक्षेपः। साधनस्य समासवचनं साधनसमासवचनम्। साधनग्रहणं तदाभासप्रतिषेधार्थम्। न हि तानि साधनम्, संशयविपर्ययहेतुत्वात्। समासग्रहणमवयवान्तरावकाशप्रदानार्थम्[18]। लिङ्गनि-

---

1. A किंम
2. A वा नास्तीति
3. A अस्या (चिन्तायाः)
4. A आत्मस्थितो for आत्माऽस्ति ततो
5. A om. इति
6. P K D भवतीति
7. A येन for तेन
8. A अनुमानस्
9. P K D अवलम्बनशून्यं ध्यानविषयम् A अनबलम्बनं शून्यध्यानविषयं I follow Pandeya (41).
10. A त्रैधातुकक्लेशनिरोधे लक्षणम्
11. A अवाप्स्यामीति for अवाप्स्यसीति
12. A चायमंगर्थो
13. A निश्चतुं
14. P व्युदास्य
15. The portion साध्यस्य ... सा प्रतिज्ञा is not found in P K D.
16. A ननेति
17. A लिंगाम्
18. A अवयवावकाशदानार्थम्

देशमात्रं हेतुः। यस्तु तस्य साध्यसहभावित्वलक्षणः प्रपञ्चः[1] सोऽवयवान्तराणीत्युक्तं[2] भवति।

उदाहरणं तु[3] निदर्शनं दृष्टान्तः[4]। तस्य साधनस्य[5] साध्येन सहभावित्वनिदर्शनं यदसौ दृष्टान्तः। तद्यथा संहत्यकारिणां परार्थत्वं दृष्टम्, यथा शयनासनरथशरणानाम्[6]। व्यतिरेकस्त्ववीतस्य[7] प्रसङ्गिधर्मान्तरनिवृत्तिरूपत्वादन्तर्भूत[8] इति न तदर्थं वैधर्म्यदृष्टान्त उच्यते।

साध्यदृष्टान्तयोरेकक्रियोपसंहार उपनयः। साध्यस्य[9] चक्षुरादिपारार्थ्यलक्षणस्य दृष्टान्तस्य च शयनादेरेकक्रियोपसंहारः[10]। तत्रार्थान्तरभूतत्वात् साध्यदृष्टान्तयोरञ्जसा नैकक्रियोपपद्यते। तेनैव तस्यानिदर्शनादित्यतो धर्मसामान्याद् यथेदं तथेदमित्येकक्रियोपचर्यते। यथा शयनादयः संहतत्वात्परार्था[11] एवं चक्षुरादिभिरपि परार्थै[12]र्भवितव्यम्। योऽसौ परः, स पुरुषः।

तद्वशात्प्रतिज्ञाभ्यासो निगमनम्। हेतुदृष्टान्तोपसंहारापेक्षया यः प्रतिज्ञायाः[13] पुनरभ्यासः, तन्निगमनम्। तद्यथा—तस्मादस्ति पुरुष इत्येषामवयवानां[14] परस्परसम्बन्धाद्[15] विशिष्टार्थः

---

1. A लक्षणप्रपञ्चस्
2. Wezler (90.20) regards the phrase सोऽवयवान्तराणीत्य् as uncertain.
3. P K D त्वत्र for तु D उदाहरणत्वनिदर्शनं
4. P K repeat दृष्टान्त ..... सहभावित्वनिदर्शनं. D adds the same phrase in the bottom margin, but deletes it with a wavy line.
5. A तस्यधौसाधनस्य
6. P K D रथचरणानाम् D रथचारणानाम्, sec.m. रथशरणानाम्
7. तावीतस्य for त्ववीतस्य
8. A तदन्तर्भूत
9. A साध्यस्यां च (?)
10. A एकक्रियोपहारः
11. A परा
12. A पदाशर्थैर्
13. P K D om. प्रतिज्ञायाः
14. A अषामरयवानां
15. P K D om. परस्परसम्बन्धाद्

समुदायो[1] वाक्य[2]मित्यपदिश्यते[3]। वाक्यमप्यनेकं यदा गुणीभूतस्वार्थ[4]मर्थान्तरोपकारित्वादितरेण[5] संसृज्यते, तदा शास्त्रमप्येकं वाक्य[6]मित्यवसीयते[7]।

आह—जिज्ञासाद्यनभिधानम्। तद्व्यतिरेकेणापि स्वयमर्थगतेः। स्वनिश्चयवच्च परप्रतिपादनात्। यथा हि स्वयमुत्पद्यते[8] निश्चेतुः प्रत्ययस्तथैवान्यः प्रत्याय्य[9] इत्येतन्न्याय्यम्। न च स्वयमेवार्थं प्रतिपद्यमानस्य[10] जिज्ञासादीनां तत्र व्यापारः। तस्मात् परार्थमप्येषामुपादानं[11] न कल्प्यते। संशयवचनानर्थक्यम्, प्रतीतार्थत्वात्। निश्चितौ हि वादिप्रतिवादिनौ स्वपक्षयोः[12]। तयोरितरेतरसंशयपर्यनुयोगे[13] नास्ति प्रयोजनम्।

किञ्चान्यत्, प्रयोजनशक्यप्राप्त्यवचनं च, साधनाभ्युपगमादेव तत्प्रतीतेः। न हि महतां निष्प्रयोजना प्रवृत्तिरुपपद्यते। न चाशक्येऽर्थे, हिमवत्समीकरणादिष्वप्रवृत्तेः[14]। तस्मादनर्थकं तदभिधानम्। तद्भावे भावादिति चेत्, स्यादेतत्। सत्सु जिज्ञासादिषु सतत्त्वाधिगमं[15] प्रति प्रवृत्तिर्भवति, असत्सु न भवति। तस्मादेतान्यपि साधनं भविष्यन्तीति। एतच्चानुपपन्नम्। कस्मात्? अतिप्रसङ्गात्। सत्स्वात्मान्तःकरणेन्द्रियालोकविषयेषु[16] प्रवृत्तिदर्शनात्तेषामपि साधनत्वं स्यात्। अनिष्टं चैतत्। तस्माज्जिज्ञासादयोऽनर्थकाः।

---

1. P K D विशिष्टार्थसमुदयो
2. D समुदायो वाक्यम्, sec. m. समुदायवाक्यम्
3. P K D अतिदिश्यते
4. P K D गुणीभूतं स्वार्थम्
5. A om. इतरेण
6. A एकवाक्यम्
7. A अदसीयते After अदसीयते A repeats वाक्यमप्यनेकं यदा गुणीभूतस्वार्थमर्थान्तरोपकारित्वादितरेण संसृज्यते तदा शास्त्रमप्येकं वाक्यमित्यवसीयते.
8. A उजात्पद्यत
9. A प्रत्याय
10. A एवार्थप्रतिपद्य°
11. A उपाधानम्
12. A स्वरपक्षयोः
13. P °पर्यनुयोगेनास्ति प्रयोजनम् A इतस्संशयपर्यनुयोगे Our emendation coincides with Raghavan's (12.7).
14. P K आदिषु प्रवृत्ते A D आदिष्वप्रवृत्तेः
15. A तत्त्वाधिगमं
16. Dkha. तत्स्वात्मान्तःकरणे°

प्रतिज्ञादयो दुर्विहिताः। कथम्[1]? साध्यावधारणस्यावयवान्तरेष्वप्युपपत्तेः। यदि साध्यावधारणं प्रतिज्ञेत्युच्यते, तेन साध्यस्य हेतोर्दृष्टान्तस्य वा[2] यदवधारणं तदपि प्रतिज्ञा[3] प्राप्नोति निमित्ताविशेषात्। साध्यशब्दो ह्ययं सामान्यवृत्तिः। न यत्न[4]मन्तरेण विशेषेऽवस्थापयितुं शक्यत इति।

किञ्च हेतुलक्षणानुपपत्ति[5]श्च, साधनाऽनुपदेशात्। यो हि साधनसमासवचनं हेतुरित्येतल्लक्षणमाचष्टे, तेन[6] प्राक्साधनमभिधेयं[7] स्यात्। ततो वक्तव्यममुष्य समासवचनं हेतुरिति। न चैवमुक्तम्। तस्मादलक्षणमेतत्।

किञ्चान्यत्, समासावचनं[8] च विस्तरनिषेध[9]प्रसङ्गात्। यदि हि समासग्रहणं क्रियते, किं प्राप्तम्। योऽयमाध्यात्मिकानां भेदानां कार्यकरणात्मकानां[10] चैकजातिसमन्वयो दृष्ट इत्येवमादिः साधनप्रपञ्चः, सोऽहेतु[11]रित्युक्तं भवति। तस्मात् समासग्रहणमनिष्टम्। लिङ्गाभिधानाददोष इति चेत्, स्यान्मतम्—लिङ्गं हि नः साधनम्। तस्यात्र निर्देशः कृतः[12]। तस्मात्स्वमतिजाड्यादिदमनिष्टमध्यारोप्यते, न त्वस्मत्प्रमादादिति[13]। एतदप्ययुक्तम्। कस्मात्? तस्य द्विधा भिन्नस्य पञ्चधा[14] साधनभावात्[15]। तद्धि लिङ्गं वीतावीतत्वेनेष्टम्।

---

[1] After कथम् A adds साधयाभिधायिनः प्रतिज्ञाम्युपगमाद्धेतुदृष्टान्तयोरपि तत्प्रसंग.

[2] A च

[3] Both Chakravarti (49.6) and Tripathi (150) suggest प्रतिज्ञात्वं.

[4] D नेतरम् instead of न यत्नम्

[5] P K D अहेतु° Raghavan (12.7) too suggests the same reading as found in A, and adopted by us.

[6] A आचष्टैते न for आचष्टे तेन

[7] A अभिधानीयं for अभिधेयं

[8] All the Mss read समासवचनं. I however follow Tripathi (151), who anticipates Wezler (92.18).

[9] A °प्रतिषेध° in place of °निषेध°

[10] All the Mss read कार्यकारणात्मकानां.

[11] D स्वः अहेतुः, sec. m. सोऽहेतुः or सहेतुः Dkha. स हेतुर्

[12] A तस्य निर्देशः Dkha. तस्यानिर्देशः Chakravarti (49.13) reads तस्मान्न निर्देशः कृतः.

[13] A अस्मत्प्रसादाद् D °प्रसादाद्, sec. m. प्रमादाद् Dkha. अस्मत्प्रमादाद्

[14] P K D भिन्नपञ्चधा Chakravarti (49.15) reads तस्य द्विधा, भिन्नं (पञ्चधा). Raghavan (12.7) proposes the correction तच्च द्विधा भिन्नम्, पञ्चधा etc.

[15] A and Dkha. साधनाभावात् D भिन्नपञ्चधा साधनभावात्, sec. m. भिन्नपञ्चसाधनाभावात् वा साधनभावात्

तेन द्विधा भिन्नम्। तत्रापि वीतः पञ्चप्रभेद इत्यतः समुदायान्निष्कृष्टस्यैकस्य लिङ्गत्वमशक्यं वक्तुमिति।

किञ्चान्यत्, दृष्टान्तलक्षणायोगश्च, शब्दार्थलक्षणे[1]ऽनिष्टप्रसङ्गात्। तन्निदर्शनं दृष्टान्त इत्यत्र शब्दो वाऽर्थो[2] वा येन साध्यसाधने निदर्श्येते[3], स दृष्टान्तः स्यात्। {अर्थो वा यत्र[4] निदर्श्यते।} किञ्चातः? तद्यदि तावच्छब्दः परिगृह्यते, तत उपनयलक्षणं[5] बाध्यते[6]। कस्मात्? न हि[7] यथाऽभिधानं तथा साध्यमित्येकक्रिया युज्यत इति। अथार्थः[8] परिगृह्यते, तेनाभिधेयस्य[9] वाक्यानवयवत्वात्पञ्चावयवत्वविरोधः[10]।

किञ्चान्यत्, दृष्टान्तोपनयनिगमनाऽभेदश्च[11] हेतुप्रतिज्ञार्थाभिधानात्[12]। साधनत्व[13]मेव साध्याविनाभावित्वलक्षणं दृष्टान्तोपनययोः[14] प्रत्याय्यते[15]। प्रतिज्ञार्थं च निगमनस्य नावयवान्तरत्वं युज्यते।

उच्यते—यदुच्यते (98.3f.) स्वनिश्चयेऽनङ्गभावगमना[16]त्परप्रत्यायनार्थं जिज्ञासाद्यनभिधान[17]मिति, अत्र ब्रूमः—न, उक्तत्वात्। उक्तमेतत् (95.7-8) पुरस्ताद्व्याख्याङ्गं

---

[1] A शब्दार्थकल्पने

[2] A omits वार्थो, and D encircles it.

[3] P K निदर्श्यते A निर्देश्येते D not clear

[4] A यो यत्र The phrase अर्थो वा यत्र निदर्श्यते is better deleted.

[5] A उपनयनलक्षणं

[6] A बाध्येत

[7] P K D om. न हि

[8] A अयथार्थः

[9] Dkha. नाभिधेयस्य

[10] Dkha. °विरोधाद्° योगः, sec. m. °विरोधः

[11] A reads °निगमनभेदश्च.

[12] A हेतुप्रतिज्ञानाभिधानात्

[13] A साधनधर्मम् for साधनत्वम् Dkha. साधनम्

[14] D दृष्टान्तोविनाभाविनां, sec. m. दृष्टान्तोपनययोः

[15] P K D प्रत्याययते A and Dkha. प्रत्याययतोः I follow the emendation suggested by Pandeya (42). Tripathi (152) and Wezler (93.10) also think likewise.

[16] K ऽनाङ्गभावगमनात् Dkha. नांगभावगमनात्

[17] Dkha. जिज्ञासभिधानम्

जिज्ञासादयः (इति)। सर्वस्य चानुग्रहः कर्तव्य इत्येवमर्थं[1] शास्त्रव्याख्यानं विपश्चिद्भिः प्रतायते[2], न स्वार्थं स्वसदृशबुद्ध्यर्थं[3] वा। तत्रैवं[4] कल्प्यमाने ये व्युत्पाद्यास्तान्प्रति नैषामानर्थक्यम्[5]। अथैतदनिष्टम्, यदुक्तं सन्दिग्धविपर्यस्ताव्युत्पन्नबुद्ध्यनुग्रहार्थो[6] हि सतां विनिश्चयः शास्त्रकथेत्यस्य व्याघातः[7]। किञ्च नियमानभ्युपगमात्। न हि वयमेषामावश्यकम[8]भिधानमाचक्ष्महे[9], किं तर्हि यदा[10] प्रतिवादी पर्यनुयुङ्क्ते—किं[11] जिज्ञासस इति अवश्यमभिधानीयं शब्द[12]मिति। केन धर्मेण? किं[13] नित्योऽनित्य इति? कुतः संशयः? अमूर्तत्वात्[14]। यस्तु न पर्यनुयुङ्क्ते, न तं प्रत्येते वाच्याः। क्वचिदानर्थक्यात् सर्वत्र प्रसङ्ग इति चेन्न, इतरेषामपि तत्प्रसङ्गात्। प्रतिज्ञादीनामपि तर्हि क्वचिदनभिधानम्[15], अतस्तेषामपि सर्वत्रावचनं प्रसज्यते। तथा च भवतोक्तं[16] कस्यचित्तु किञ्चित् प्रसिद्धमेव भवती[17]त्यन्यतरोक्ति[18]रपि साधनं भवति, शब्द इवार्थद्वयप्रतीतत्वा[19]दुभयानभिधानमिति।

यदप्युक्तं (98.7) निश्चितत्वात् संशयावचनमिति, असदेतत्। कस्मात्? उक्तत्वात्। उक्तमेतत् (96.1), सति पर्यनुयोगे तद्वचनमिति। एतेन प्रयोजनशक्यप्राप्ती प्रत्युक्ते[20]। यो हि पर्यनुयुञ्जीत किंप्रयोजनोऽयं[21] शक्यो वाऽयमर्थ इति, तं प्रति वाच्य[22]मेतत्।

यदप्युक्तं (98.11f.) तद्भावे भावा[23]दिति—न, अनभ्युपगमात्। न ब्रूमो यस्मात् सत्सु जिज्ञासादिषु संतत्त्वाधिगमसद्भाव[24]स्तस्मादेतेषामवयवत्वमिति। किं तर्हि? यं[15] प्रत्येषां प्रतिपत्तावङ्गभावगमनम्, तं प्रत्येतानि साधनमिति।

---

[1] A इति चैवमर्थं

[2] P K प्रताय्यते D प्रतायते, sec. m. प्रत्यायते

[3] A स्वसदृशबुद्धार्थं

[4] A तत्रैव

[5] P K D वैषां आकुल्यम Dkha. वैषम्याकुल्यम्

[6] A संदेहरवविपर्यस्ता° Dkha. सन्देहविपर्यस्तावुत्पन्न°

[7] P K D व्याख्यातः for व्याघातः

[8] A अवश्यम्

[9] D आवश्यकमाचक्ष्महे, sec. m. आवश्यकमभिधानमाचक्ष्महे

[10] P K D om. यदा

[11] A om. किं

[12] P K D om. शब्दम्

[13] A om. किं

[14] P मूर्तत्वात्

[15] A अनभिधानात्

[16] Dkha. भवतोक्तस्य

[17] A भवतीति चेत्य्

[18] D अन्यत्रोक्तिर्, sec. m. अन्यतरोक्तिर्

[19] A °प्रतीतव्यात्वाद्

[20] A प्रयुक्तेः

[21] A किंप्रयोजनम्

[22] A बाध्यम्

[23] P K D read सिद्धिभावाद् for भावाद्

[24] A तत्त्वाधिगम°

[25] A ये

यदप्युक्तं (99.2) साध्याभिधायिनः प्रतिज्ञाभ्युपगमा[1]द्धेतुदृष्टान्तयोरपि तत्प्रसङ्ग इति, अयुक्तमेतत्[2]। कस्मात्? जिज्ञासादेः सद्भावे सति तत्प्रतीतेः। यद्यपि साध्यशब्दोऽयमविशेषेण सिद्धत्वादर्थान्तर[3]माचष्टे, तथापि यं प्रति जिज्ञासासंशयप्रयोजनशक्यप्राप्तयस्तस्य व्युदस्य संशयं साध्यस्यावधारणं प्रतिज्ञा, न हेतुदृष्टान्तयोस्तदाऽस्ती[4]त्यसदेतत्[5]। किञ्चान्यत्, तद्भावे चाविरोधात्[6]। यदा तु[7] जिज्ञासादयो[8] हेतौ दृष्टान्ते वा भवन्ति तदा[9] किं कृतकः शब्दोऽथ न कृतकोऽथ बुद्धिर्नित्या क्षणिका वेति भवत्येव तदवधारणं[10] प्रतिज्ञा।

यदप्युक्तं (99.7) साधनानुपदेशाद्धेतुलक्षणायोग इति, असदेतत्। कस्मात्? लोकप्रसिद्धत्वात्। यथा साध्यत्वेने[11]प्सितः पक्ष इति[12] प्रतिज्ञालक्षणमाचक्षाणो भवान्न साध्यलक्षणमाचष्टे। कस्मात्? साधनीयं साध्यमिति लोके सिद्धत्वात्। एवं साधनसमासवचनं हेतुरिति[13] हेतुलक्षणमाचक्षाणा वयं न साधनमाचक्ष्महे। कस्मात्? साध्यतेऽनेनेति कृत्वा साधनमिति लोके[14] सिद्धत्वात्। उपेत्य[15] वाऽनुमाननिर्देशात्[16]। लिङ्गं हि नः साधनं तच्च निर्दिष्टमिति[17]।

---

1. P K D प्रतिज्ञायुतत्वाभ्युपगमाद् A प्रतिज्ञाव्युपगमाद् Dkha. प्रतिज्ञाय तत्त्वाभ्युपगमाद्
2. P K D उक्तमेतत्
3. A ... सिद्धादर्थान्तरम् Dkha. अविशेषिणः सिद्धार्थान्तरम्
4. Dkha. तदस्तीत्य् A तदस्तात्य् Raghavan (14.8) and Pandeya (43) read तदस्तीति.
5. A reads एतदसत् for सदेतत्.
6. A तद्भावेनाविरोधात् Pandeya (43) reads तद्भावेऽविरोधात्.
7. A स यदा तु
8. After जिज्ञासादयो A repeats हेतुदृष्टान्तयो .... जिज्ञासादयो, but omits तु in यदा तु in the repeated phrase.
9. A om. तदा
10. A तदा तदवधरणं
11. Raghavan (12.7), who anticipates Pandeya (43), suggests साध्यवत्त्वेन.
12. D om. इति
13. P K D om. हेतुरिति
14. P K D साध्यतेऽनेनेति लोके सिद्धत्वात्
15. D उपेति, sec.m. उपेत्य
16. Raghavan (14.8) suggests अनुमाने निर्देशात्.
17. A reads साधनां तश्च निर्दिष्टम्, thus omitting इति.

यत्तूक्तं[1] (100.1f.) वीतावीतभेदे[2] सति पञ्चधा साधनभावादिति, अत्र ब्रूमः— अयुक्तमेतत्। कस्मात्? समासग्रहणसामर्थ्यात्। अतएव समासग्रहणं क्रियते, साधनस्वरूपाभिधानमात्रं[3] हेतुरिति यथा विज्ञायते[4]। प्रपञ्चस्त्ववयवान्तराणीति। एतेन विस्तरप्रतिषेधप्रसङ्गः प्रत्युक्तः। कथम्? न हि समासशब्दस्यायमर्थ इति कृत्वा[5]।

यत्पुनरेतदुक्तं (100.3) शब्दार्थकल्पनेऽनिष्टप्रसङ्गाद् दृष्टान्तलक्षणायोग इति, अस्तु तावच्छब्दो दृष्टान्तः। यत्तूक्तम् (100.5f.) उपनयलक्षणं[6] बाध्यत इति, अनुपपन्नमेतत्। कस्मात्? असम्भवे सति सम्बन्ध्यन्तरे कार्यविज्ञानात्। शब्देऽसम्भवादर्थे कार्यं[7] विज्ञास्यामः। अथवा पुनरस्त्वर्थो दृष्टान्तः। यत्तूक्तम् (100.7), अभिधेयस्य वाक्यानवयवत्वात्पञ्चावयवत्वविरोध इत्यर्थेऽसम्भवाच्छब्दे कार्यं[8] विज्ञास्यामः। यदप्युक्तं (100.8) प्रतिज्ञाहेत्वर्थाभिधानाद् दृष्टान्तोपनयनिगमनानां नावयवान्तरत्वमिति, अयमदोषः[9]। कस्मात्? अप्रतिज्ञानात्। न ह्येतदस्माभिः प्रतिज्ञायते। किं तर्हि? प्रमेयवचनं प्रतिज्ञा। प्रमाणरूपमात्रवचनं हेतुः। तस्य प्रमेयसहभावित्वनिदर्शनं[10] दृष्टान्तः। साध्यदृष्टान्तयोर्धर्मसामान्यादेकक्रियोपसंहार उपनयः। समुदायस्य साध्यसिद्धये व्यापारनिर्देशो निगमनम्। तस्मादयुक्तमेतत्। किञ्चान्यत्। एकस्य[11] साध्यसाधनभावपरिकल्पनावत्तत्परिकल्पने[12] दोषाभावात्। यथा वाक्यमेकं च[13] तदर्थश्च मुख्यौ शब्दार्थौ, तयोरभिन्नार्थत्वा[14]दित्यभ्युपगमादेकमेवार्थमभागमक्रमं[15] च बुद्धाववस्थाप्य श्रोत्रग्राह्यत्वानित्यत्वकृतकत्वप्रमेयत्वादिलक्षणानां[16] शक्तीनामपोद्धारात्साध्यसाधनसंशयरूपापन्नं वक्तारो भिन्नमाचक्षते, न चैकार्थधर्मत्वात्साध्यसा-

---

[1] A यत्तूक्त

[2] P वीतावीते भेदे

[3] D साधनस्वरूपानभिधान°, sec. m. साधनस्वरूपाभिधान°

[4] In A there is a blank space in place of यथा विज्ञायते.

[5] A not clear

[6] A उपनयनलक्षणं

[7] A अर्थकार्यं

[8] A अर्थकार्यं

[9] A अयं दोषः

[10] P K D प्रमेयसहभाविनिदर्शनं

[11] A एवमस्य for एकस्य

[12] PKD (एकस्य) साधनभावपरिकल्पनातत्परिकल्पने

[13] PKD एवं च A एच I follow Wezler (96.21).

[14] Dkha. अभिन्नत्वाद्

[15] A reads उपगमाद् for अभ्युपगमाद्.

[16] A श्रोत्रग्राह्यत्वान्नित्यत्वाकृतकत्वं प्रमेयतादिलक्षणानां

धनसंशयाभिधानानामेकत्वमनुषज्यते, तथैकस्य साधनस्य साध्यधर्मतत्सहभावित्वलक्षणानां शक्तीनामभिधानं हेतुदृष्टान्तादिनाऽवयवान्तरं[1] नः स्यात्। तत्र यदुक्तं (100.9) प्रतिज्ञाहेत्वर्थाभिधानाद् दृष्टान्तोपनयनिगमनानां नावयवान्तरत्वमिति, एतदयुक्तम्।

तस्मात्सूक्तं दशावयवो वीतः। तस्य पुरस्तात्प्रयोगं न्याय्य[2]माचार्या मन्यन्ते। किं कारणम्[3]? अवीतलक्षणाविरोधात्[4]। अवीतस्य[5] हि लक्षणं परिशेषतः साध्यानुग्रहः। तत्रान्वयादिना स्वरूपेणाधिगते[6] प्रधानलक्षणे धर्मिणि परपक्षप्रतिषेधमात्रेणोपसंहारे क्रियमाणे परिशेषलक्षणं बाध्यते। कस्मात्? इह प्रतिषेधमात्रमादावुच्यते। तेन यथा हेतुविरोधात्परमाण्वादिभ्यो न व्यक्तमुत्पद्यते, तथा हेत्वभावात् प्रधानादपि नोत्पद्यत इति शक्यं कल्पयितुम्। अतस्तद्व्यवच्छेदोऽपि (ना)वीताद्[7] गम्यते। तथा सति कः परिशेषः स्यात्? स्वरूपेण तु परिच्छिन्ने धर्मिण्युपसंहारो यथावदवकल्प्यते[8]। न चेत्परमाण्वादिभ्य उत्पद्यते[9], परिशेषतः[10] प्रधानादेव व्यक्तमुत्पद्यते[11]। परिशेषत इति[12] यथोक्तेभ्योऽन्वयादिभ्य इत्युक्तं भवति। तस्मात्प्रागवीतप्रयोग इति सिद्धं सामान्यतोदृष्टादनुमानादतीन्द्रियाणामर्थानां समधिगम इति।

आह[13]—न, कारणान्तरतो[14]ऽनुपलभ्यमानानामग्रहणात्। यदि सामान्यतोदृष्टादनुमानात्सर्वं परोक्षमधिगम्यत इत्यभ्युपगम्यते[15], प्राप्तमिदम्—येषामप्यर्थानां कारणान्तरतो[16]ऽनुपलब्धिस्तेषामपि तस्मादेव ग्रहणम् (इति)। तद्यथा—

---

1. D हेतुः। दृष्टान्तादिना अवयवान्तरं
2. P K D read न्यायम् for न्याय्यम्.
3. A किकराणम्
4. A आवीत°
5. A आवीतस्य
6. P K D read स्वरूपेणानधिगते.
7. P K D चावीताद् A reads आवीताद्, omitting च. I follow Wezler's emendation (नावीताद्) (97.12).
8. K D A अवकल्पते
9. A न चेत्परमाण्वादिभ्यो न व्यक्तमुत्पद्यते
10. A om. परिशेषतः ... व्यक्तमुत्पद्यते
11. K adds परिशेषत after व्यक्तमुत्पद्यते
12. P परिशेष इति
13. P K D om. आह
14. D कारणतः, sec. m. कारणान्तरतः
15. P K D अधिगम्यते इत्यधिगम्यते Though Wezler (97.19-20) prefers the reading इत्यधिगम्यते, he deletes अधिगम्यते, retaining only इति.
16. D कारणतः, sec. m. कारणान्तरतः

अतिदूरात्सामीप्यादिन्द्रियघातान्मनोऽनवस्थानात् ।
सौक्ष्म्याद् व्यवधानादभिभवात्समानाभिहाराच्च (1) ॥ का॰ 7 ॥

तत्रातिदूरात्तावत्[1] तद्यथा प्रोड्डीनस्य[2] शकुनेः। अतिसामीप्यादञ्जनप्रभृतीनाम्। इन्द्रियघाताच्छब्दादीनाम्[3]। मनोऽनवस्थानाच्छकटादीनाम्। सौक्ष्म्यात्त्रुट्यादीनाम्[4]। व्यवधानाद्धिरण्यादीनाम्। अभिभवात्सूर्यप्रकाशाद् ग्रहादीनाम्। समानाभिहारादनेकप्रदीपप्रभाणाम्[5] चशब्दादैश्वर्ययोगाद्देवादीनाम्[6]। न चार्हति भवितुं धर्मसामान्यानुपपत्तेः[7]। तस्मादयुक्तं सर्वमतीन्द्रियमनुमानग्राह्य[8]मिति।

उच्यते—शक्यं तावत्कारणान्तरतोऽनुपलभ्यमानं किञ्चित्सामान्यतोदृष्टादनुमानादधिगन्तुम्। तद्यथा समीपावस्थितस्य शकुनेरयत्नेन चक्षुषा ग्रहणम्[9]। यथा यथा तु विप्रकर्षं प्रतिपद्यते तथा तथा[10] प्रणिधाय चक्षुर्गृह्यते तावद्यावत्क्रमेणादर्शनमुपसम्प्राप्तः। तत्र देशविप्रकर्षे प्रचीयमाने[11] दर्शनमु[12]पचीयमानमवगम्यात्यन्तादर्शनमपि पश्चात्तद्धेतुकमनुमीयते। तथा नातिसमीपावस्थितस्य द्रव्यस्यास्फुटमाकारमवधार्य[13] पश्चाद्यथा यथा आरादुपसम्पद्यते[14]

---

1. A तत्रातिदूर, omitting तावत्
2. A प्रोतीनस्य
3. P K D read (इन्द्रियघाताद्) बधिरादीनाम् for इन्द्रियघाताच्छब्दादीनाम्.
4. D obscure
5. K °प्रदीपप्रभानां　D समानाभिहारादनेक°, sec. m. समानाभिहारानेक°
6. P ऐश्वर्ययोगाच्च देव्यदानां　Chakravarti (52.4) reads च शब्दादैश्वर्ययोगाद्, which Raghavan (12.7) obviously rightly corrects into चशब्दाद°.
7. P K D धर्मसामान्यादनुपपत्तेः　A धर्मसामान्यापत्तेः　I follow Raghavan's emendation (12.7).
8. Dkha. अनुमानाग्रह्यम्
9. P K D read चक्षुर्ग्रहणं, which also is a plausible reading.
10. P K D om. तथा तथा
11. P देशविप्रकर्षं प्रदीयमानं　K D देशविप्रकर्षं प्रचीयमानं　A देशविप्रकर्षे प्रदीयमाने
12. Pandeya (44), followed by Tripathi (161), reads प्रचीयमानेऽदर्शनमुप°.
13. P K D द्रव्यस्फुट आकारोऽवधार्यते
14. In the right margin D reads आरादुपसर्पतीति पाठः। समीपमुपसर्पति, but makes no mention of any other Ms.

---

(1) (a) षड्भिः प्रकारैः सतां भावानामनुपलब्धिर्भवति, अतिसन्निकर्षात्, अतिविप्रकर्षात्, मूर्त्यन्तरव्यवधानात्, तमसावृतत्वात्, इन्द्रियदौर्बल्यात्, अतिप्रमादादिति— म॰ भा॰ 4.1.3
(b) सताञ्च रूपाणामतिसन्निकर्षादतिविप्रकर्षादावरणात् करणदौर्बल्यात्मनोऽनवस्थानात् समानाभिहारादभिभवादतिसौक्ष्म्याच्च प्रत्यक्षानुपलब्धिः —चरकसंहिता 11.8

तथा तथा प्रतिपद्यमानदर्शनशक्तयोऽनुमातारः कृष्णसाराञ्जनप्रभृतीना[1]मग्रहणमतिसामीप्यादनुमिमते। तथा गिरिसरित्समुद्रसमीपवर्तिनं[2] श्रवणप्रतिघातिनं[3] प्राक् शब्दमुपलभ्य पश्चात्तस्मिन्नेव देशे शब्दमगृह्णानाः श्रवणोपघातमनुमिमते।

तस्मादपि चासिद्धं[4] परोक्षमाप्तागमात्साध्यम्[5] ॥ का॰ 6/3-4॥

तस्मादपि चासिद्धमित्यनेनागमविषये[6] सामान्यतोदृष्टस्यानवतारमा[7]चष्टे। **परोक्ष**मिति विषयं प्रतिनिर्दिशति[8]। **आप्तागमात्साध्य**[9]मिति विषयिणमाह। एतदुक्तं भवति—तस्मादपि सामान्यतोदृष्टादनुमानाद् यन्न सिद्ध्यति, प्रत्यक्षग्राह्यमपि स्वयमदृष्टं कारणान्तरप्रतिबद्धविषयभाव[10]मत्यन्तपरोक्षं वा स्वर्गापवर्गदेवतादि धर्मसामान्यरहितं[11] तदाप्तागमा[12]त्साध्यम्। सर्ववादसिद्धिप्रसङ्गा[13]दप्रामाण्यमिति चेत्, स्यादेतत्[14]। यदि तर्ह्यागमः[15] प्रमाणीक्रियते तेन प्रतिशास्त्रं येऽभियुक्तास्तेषां प्रामाण्यमित्यवश्यमभ्युपगन्तव्यम्। एवं सति सर्वाचार्यप्रामाण्यादनेकविकल्पविचित्रा[16] तर्कवृत्तिरित्यपरिनिश्चितत्वाद्[17] भ्रान्तिः प्रसज्येत। तथा च सति जिज्ञासूनामपवर्गाप्राप्तिः[18]। तस्माद् भिषजेव भवता परोपदेशः प्रयुक्तो नास्मानयं

---

[1] P D कृष्णशाराञ्जन॰

[2] A गिरिसरित्समीपपरिवर्तिनं

[3] A द्रविणप्रतिघातिनण्

[4] A तस्मादपि सिद्धं

[5] P K सिद्धम् D सिद्धम्, sec. m. साध्यम् In D साध्यम् occurs below the title indication of ग॰ पु॰ in the right margin.

[6] A अनेन विषये

[7] Dkha. अनवरताम्

[8] A प्रतिनिन्दितस्य for प्रतिनिर्दिशति

[9] D सिद्धम्, sec. m. साध्यम्

[10] P K D read कारणान्तर प्रतिबन्ध॰.

[11] Chakravarti (52.18) reads स्वर्गापवर्गदेवतादि-धर्मसामान्यरहितं as one word.

[12] A आत्मागतात्

[13] A सर्ववादिसिद्धिप्रसंगाद्

[14] P K D read तत् for स्यादेतत्.

[15] A चागमः

[16] A ॰विकल्पविदित्रा

[17] A अत्र परिनिश्चितत्वाद्

[18] P K D अपवर्गप्राप्तिः A अपवर्गप्राप्तिविघातः स्यात् I follow Raghavan (12.7).

प्रीणातीति[1]। एतच्चायुक्तम्। कस्मात्? आप्तलक्षणस्यानवधारितत्वात्[2]। व्यपगतरागादि[3]दोषाणामसन्दिग्धमतीना[4]मतीन्द्रियार्थदृश्वनामीश्वरमहर्षीणामाप्तत्वमाचक्ष्महे, न सर्वेषाम्। यदि वान्यो[5]ऽप्येवंधर्मोऽस्ति, भवतु[6] प्रमाणम्।

किञ्चान्यत्। स्वविषये[7] च[8] तत्प्रामाण्यस्यादोषवत्त्वात्। यस्य खल्वपि यो विषय[9]स्तस्य तस्मिन्विषये वचोऽन्तरेणापि साधनं प्रमाण[10]मित्यवश्यमभ्युपगन्तव्यम्। इतरथा प्रतिशास्त्रमाचारस्थितिनियमानामदृष्टार्थानामप्रतिपत्तिः स्यात्। एतेनाखिललिङ्गा[11]दनर्थान्तरत्वं प्रत्युक्तम्[12]। यस्मान्महताभिधानेन युक्तिरन्विष्यते, तस्माद्युक्त्यपेक्षालिङ्गा[13]दागमोऽर्थान्तरमिति।

आह—न, अन्वयव्यतिरेकाभ्यामधिगमहेतुत्वात्। यथा कृतकत्वादिर्धर्मो[14]ऽनित्यत्वादौ[15] विषये दृष्टस्तदभावे चादृष्ट इत्यनित्येऽर्थे निश्चयमादधाति[16], एवं[17] शब्दोऽपि स्वार्थे दृष्टोऽन्यत्र तज्जातीये[18] न दृष्टः प्रतिपत्तिहेतु[19]र्भवति। तस्मादनुमानादभिन्न[20] एवायमिति।

---

[1] P K D om. प्रीणाति Dkha. प्रीणातीति

[2] Raghavan (12.8) suggests °लक्षणस्यावधारितत्वात्.

[3] Chakravarti (52.23) reads व्युपगतरागादि°. Raghavan (12.8) suggests the corrected reading व्यपगत° or व्युपरत°.

[4] A असन्दिग्धबुद्धीनाम्

[5] Tripathi (163) reads चान्यो°.

[6] A भवितुं

[7] P K D read अविषये for सविषये.

[8] D तु for च

[9] Raghavan (14.8) suggests योऽविषयः in place of यो विषयः.

[10] A साधनमनुमानं प्रमाणम् for साधनं प्रमाणम्

[11] A एतेनाखिलाल्लिंगादा गमोऽर्थांतरमिति D एतेनाक्षरलिंगात्

[12] P K D लिङ्गादर्थान्तरत्वं प्रत्युक्तम् A omits अ(न)र्थान्तरत्वं प्रत्युक्तम्... तस्माद्युक्त्यपेक्षा. I follow Raghavan (14.8).

[13] Dkha. °पेक्षाल्लिङ्गाद्

[14] A कृतकत्वादियेत्सो

[15] D नित्यवादौ

[16] A आददाति for आदधाति

[17] P एव

[18] A ऽन्यत्र चातज्जातीये Dkha. यत्र तज्जातीये

[19] P K D न दृष्टप्रतिपत्तिर्

[20] P K D भिन्न instead of अभिन्न Raghavan (12.8) too proposes अभिन्नः, which agrees with the reading (of the Ms) adopted by us.

उच्यते—चन्द्रादिष्विदानीमसाधारणविषयेषु का प्रतिपत्तिः स्यादिति?

आह—अवयवापेक्षत्वात्। चन्द्रशब्दो ह्यनेकेषु अवयवेषु[1] वर्तते[2], जातिद्रव्यगुणक्रियासु[3] च। तथा डित्थादिशब्दः[4]। तस्मादेवंजातीयकानामपि चानुमानादभेदः।

उच्यते—स्वर्गादीनां तर्हि कथमनुमानत्वमिति?

आह—आप्तवादाविसंवादसामान्यात्[5]। यथा हैरण्यकप्रभृतीनामा[6]प्तानां वाक्यमव्यभिचारि, एवमीश्वरमहर्षयोऽपि चाप्ताः[7]। तस्मादेषामपि वाक्यमव्यभिचारीति शक्यमत्रापि सामान्यविषयत्वं कल्पयितुम्। एवमनुमानमेवागम[8] इति।

उच्यते—यदुक्तमन्वयव्यतिरेकाभ्यामधिगमहेतुत्वा[9]च्छब्दोऽनुमानमिति, अत्र ब्रूमः—न[10], अप्रतिज्ञानात्। न हि वयं व्यवहारानुपातिनां वृक्षादीना[11]मागमत्व[12]माचक्ष्महे। किं तर्हि स्वर्गादीनामत्यन्तपरोक्षविज्ञानानाम्[13]। तस्मादप्रतिज्ञानादनुपालम्भोऽयमिति। उपेत्य वा वक्त्रपेक्षत्वात्। अथवोपेत्यापि[14] सर्वशब्दानामागमत्वमेवानुमाना[15]दर्थान्तरभावं ब्रूमः। तथा हि कृतकत्वादिति लिङ्गं चण्डालकापालिकैरपि प्रयुज्यमानं साहचर्यापेक्षं निश्चयमाद-

---

[1] P K D read वचनेषु instead of अवयवेषु.

[2] A वर्त्तते

[3] D जातिगुण°, sec.m. जातिद्रव्यगुण°

[4] Chakravarti (53.5-6) reads ... ह्यनेकेषु वचनेषु वर्तते, जातिद्रव्यगुणक्रियासु च तदा डित्थादिशब्दः. Raghavan (12.8) here suggests removal of comma after वर्तते, and substitution of न तथा for च तदा.

[5] P K D आप्तवाचोऽविसंवादसामर्थ्यात्
A आप्तवादाविसंवादावगमात् Consistency of usage warrants our emendation here. See below (110.12).

[6] Dkha. यथा हिरण्यक°

[7] A महर्षयोऽत्याप्ताः

[8] P K D एवमागम for एवागम

[9] A अन्वयवयतिरेकाभ्यामपि चाधिगम°

[10] P K D om. न

[11] A वृक्षादिशब्दानां

[12] Dkha. अगमत्वम् instead of आगमत्वम्

[13] A °परोक्षविषयाणाम् Wezler (101.7) regards अत्यन्तपरोक्षविज्ञानानाम् as uncertain.

[14] Dkha. अथवोपेत्यादि

[15] A अनुमानाद् for एवानुमानाद्

धाति[1]। न वक्तृविशेषमपेक्षते। वक्तृविशेषापेक्षस्तु शब्दः। तस्मान्न लिङ्गम्। किञ्चान्यत्, विपर्ययात्। न हि लिङ्गं देशान्तरे विपर्येति। शब्दस्य तु दृष्टो विपर्ययः[2]। स एव हि शब्दो देशान्तरे, कालान्तरे तु[3] स्वार्थं न प्रत्यययायत्यर्थान्तरं च प्रशंसति। सम्बन्धानुपलब्धेरिति चेत्, स्यादेतत्। सम्बन्धान्तरं[4] देशान्तरेऽनुपलक्षितम्[5]। तस्माच्छब्दार्थ-विपर्यय[6] इति। एतदनुपपन्नम्, लिङ्गवैधर्म्यात्। न हि प्रत्यक्षाभिमतस्य लिङ्गिन उपलब्धौ गवादेर्लिङ्गं नोपलभ्यते[7]। शब्दस्तूपलभ्यमाने गवादौ नोपलभ्यते। तस्मान्न लिङ्गम्।

किञ्चान्यत्। देशनियमात्। न हि लिङ्गस्य देशनियमो दृष्टः। अस्ति तु शब्दस्य देशनियमः। तद्यथा शवतिर्गतिकर्मा[8] काम्बोजेष्वेव[9] भाष्यते। रंहतिः प्राच्येषु[10], तथा दातिर्लवनार्थो[11] (प्राच्येषु)[12], दात्रमुदीच्येषु नान्यत्र(1)। तस्मान्न शब्दो लिङ्गम्।

किञ्चान्यत्। इष्टतो विनियोगात्। स्वाभाविकं लिङ्गम्। न हि धूमोऽग्नेरपकृष्य शक्यतेऽप्सु वायावाकाशेऽन्यत्र[13] वा[14] विनिवेशयितुम्[15]। शब्दस्तु यत्र यत्र वक्तुरभिप्रायस्तत्र तत्र विनिवेश्यते[16]। यथा[17] वृद्ध्यादयः[18] शब्दाः स्वाङ्गाभ्युच्चयादिषु[19] प्रसिद्धा आदैक्षु(2) विनिवेश्यन्ते[20]। तस्मान्न ते लिङ्गम्[21]। सर्वाभिधानशक्तित्वाच्छब्दस्यादोष इति चेत्, स्यान्मतम्। सर्वाभिधानशक्तिः शब्दः सर्वाभिधेयशक्तिश्चार्थः। तयोः पुरुषव्यापारेण शक्त्यवच्छेदः क्रियते। कथम्? अयमेव शब्दोऽस्यार्थस्य प्रत्यायको भवतु। अयमेव चार्थोऽनेन शब्देनाभिधीयताम्। एतावति[22] पुरुषव्यापारः। तस्माच्छब्दस्य

---

[1] A आददाति for आदधति

[2] P K D दृष्टो विपर्ययो दृष्टः Chakravarti (53.16-17) reads ... विपर्ययोऽदृष्टः. Raghavan (12.8) suggests removal of अदृष्टः after विपर्ययः, as we have done following A.

[3] Wezler (101.13) deletes कालान्तरे तु.

[4] A सम्बन्धे for सम्बन्धन्तरं

[5] A अनुपलक्षितस्

[6] P K D °अर्थविषयं for °अर्थविपर्यय

[7] A गवादे लिंगिनोपलभ्यते

[8] A शवतिकर्मा

[9] A चाको .... ष्व, dots indicating small blank space.

[10] A प्राच्यभरतेषु

[11] P K D लवणार्थो   A तथा दा लवनार्थे

[12] I follow Raghavan (14.8) in adding प्राच्येषु. Pandeya (46) and Wezler (102.5) too are anticipated by Raghavan.

[13] A आकाश इत्यत्र for आकाशेऽन्यत्र

[14] A om. वा

[15] P K D निवेशयितुम् for विनिवेशयितुम्

[16] A निवेश्यते

[17] A तद्यथा

[18] A बुद्ध्यादयस्

[19] P K स्वार्थाभ्यु°   A स्वात्यु°   D स्वार्थाभ्यु°, sec.m. स्वाङ्गाभ्यु° We follow the emendation made by D.

[20] A निवेश्यन्ते

[21] A नैतल्लिंगं

[22] A एव तावति

---

(1) शवतिर्गतिकर्मा कम्बोजष्वेव भाषितो भवति विकार एनमार्या भाषन्ते शव इति। हम्मतिः सुराष्ट्रेषु, रंहतिः प्राच्यमध्येषु, गमिमेव त्वार्याः प्रयुञ्जते दातिर्लवनार्थे प्राच्येषु, दात्रमुदीच्येषु—म॰भा॰ 1.1.1 on the वार्त्तिक 'सर्वे देशान्तरे'.

(2) Cf. वृद्धिरादैच्—पा॰ सू॰ 1.1.1

स्वाभाविकः सम्बन्धो वक्त्रपेक्षया व्यज्यत[1] इति। एतद[2]प्यनुपपन्नम्। कस्मात्? सुतरामनुमानादर्थान्तरत्वप्रसङ्गात्। एवमपि कल्पयित्वाऽनुमानात्सुतरां शब्दस्यार्थान्तरत्वमापद्यते। कस्मात्? न हि यथा[3] वक्त्रपेक्षया सर्वार्थस्य[4] सतः शब्दस्य शक्त्यवच्छेदस्तथा सर्वार्थं लिङ्गं वक्त्रपेक्षयाऽर्थान्तरादवच्छिद्यते। यथा चैकः शब्दो जगत्येव[5]मुदितः पुरुषविनियोगापेक्षः सर्वमर्थमभिधातुं समर्थः (न) तथैकं लिङ्गं कयाचि[6]द्युक्त्या सर्वार्थप्रत्यायन[7]समर्थम्। तस्मान्न[8] शब्दो लिङ्गम्।

यत्पुनरेतदुक्तं (108.2) चन्द्रादीनामवयवापेक्षं सामान्यविषयत्वमिति, एतदसत्। कस्मात्? स्वमतिव्याघातात्। यदि खल्वपिचन्द्रादीनां शब्दानामवयवापेक्षं सामान्यविषयत्वमभ्युपगम्यते, यदुक्त[9]मसाधारणत्वादनुमानाभावे शब्दप्रसिद्धोऽर्थ इति, तस्य[10] व्याघातः।

किञ्चान्यत्। जात्यादिसाध्यत्वात्। जातिद्रव्यगुणक्रियाणां[11] च परस्परतोऽर्थान्तरत्वम्, समुदायश्च साध्यः। तस्मादयुक्तमेषां तदपेक्षया सामान्यविषयत्वम्। यदप्युक्तम्[12] (108.5) आप्तवादाविसंवादसामान्या[13]त्स्वर्गादिशब्दानामनुमानत्व[14]मिति, अत्र ब्रूमः—एतदप्यनुपपन्नम्।

---

1. D युज्यते
2. A om. अपि
3. A यात्र
4. A सवार्थस्य
5. A त्रगादित्येवमु°
6. A न कयाचिद्
7. A सवार्थप्रत्यन°
8. P reads स्माशब्दो लिङ्गं कयाचिद्युक्ता सर्वार्थप्रत्यायनसमर्थम्। तस्मान्न शब्दो लिङ्गम् for तस्मान्न शब्दो लिङ्गम्.
9. P K D तदयुक्तम् for यदुक्तम्
10. P K D om. तस्य
11. P K D जातिगुणद्रव्यक्रियाणां
12. A अक्तम्
13. P K D °वादाविसंवादनसामान्यात्
14. A अनुमानता

कस्मात्? प्रमाणविषयत्वात्। सत्यमस्त्येषां सामान्यपरिकल्पना। सा तु प्रमाणविषया, न[1] प्रमेयविषया। प्रमेयं तु सामान्यमनुमानस्येत्ययमभ्युपगमो वः। तच्चासाधारणत्वात्स्वर्गादीनां प्रतिषिद्धम्। तस्मात्त्यज्यता[2]मियमाशङ्काऽनुमानमेवागम इति।

अन्यः पुनरनुमानागमयोरभेदप्रतिज्ञ इदमाह। स्वर्गादयः शब्दा न[3] प्रमाणम्। कस्मात्? प्रमाणान्तरेण तदर्थानुपलब्धेः। यस्य हि शब्दस्यार्थः प्रत्यक्षतोऽनुमानतो वा नोपलभ्यते, स न प्रमाणम्। इतरस्तु प्रमाणं[4] तद्यथा नद्यास्तीरे पक्वमाम्रवनम्[5], पथि गुडशकट[6] विपर्यस्तमिति। न च स्वर्गादिशब्दानामर्थः प्रमाणान्तरेणोपलभ्यते। तस्माद्यथा विभुरात्मा सर्वत्र सुखादिसम्भवादित्येवमादयो बौद्धं प्रति धर्म्यसिद्धत्वा[7]दयथार्था[8]स्तथा वेदशब्दा अपि प्रायेणेति। एतत्तु न युक्तरूपम्। कस्मात्? अन्यायेन[9] सर्वशब्दापवादात्। का ह्यत्र युक्तिर्यदस्मदादिभिरनुपलभ्यमानार्थं प्रमाणभूतानामपि वाक्यमयथार्थं[10] स्यात्? सर्वेण चावश्यं[11] कश्चिदाप्तोऽभ्युपगन्तव्यः[12]। अतोऽयं तत्रापि[13] समानः प्रसङ्गः। न च प्रमाणं स्वार्थसिद्धये प्रमाणान्तर[14]मपेक्षते। तत्र यदि शब्दस्य प्रमाणान्तरापेक्षं यथार्थत्व[15]माश्रीयते, तेन न[16] केवलं स्वर्गादयः, किं तर्हि शब्दा

---

[1] PKD insert तु after न.

[2] A त्यजताम्

[3] A स्वर्गादयो न शब्दा

[4] A न प्रमाणम् in place of प्रमाणं

[5] A आम्रवणं

[6] A गुडशर्करां

[7] PKD read धर्म्यसिद्धादयो for धर्म्यसिद्धत्वाद्.

[8] PK यथार्थाम् A अयथार्थस् D सिद्धादयो यथा अर्थः, sec.m. सिद्धा न यथार्थः In reading अयथार्थास्, I follow Raghavan (14.8), who anticipates Tripathi (169) and Wezler (104.11).

[9] Raghavan (14.8) suggests अनेन न्यायेन.

[10] P अयथार्थ्यं A अयथार्थ

[11] A चायश्यं

[12] A आप्तस्तस्य च वाक्यमदृष्टार्थमित्यभ्युपगन्तव्यम्

[13] Raghavan (14.8) suggests तवापि.

[14] A न च प्रमाणान्तरम्

[15] Chakravarti (54.27) reads यथाऽर्थत्वम्.

[16] A om. न

[17] A गमकत्वाभ्युपगमाद्

एवाप्रमाणमिति प्राप्तम्। अनुमानस्य च प्रमाणान्तरनिरपेक्षस्य गमकत्वानभ्युपगमा[17]दागमस्य ततोऽर्थान्तरत्वं[1] सुतरां प्रसज्यते[2]। तस्माद्युक्त्यागमविरोधिन एवंविधा नास्तिकवादाः[3] श्रेयोऽर्थिभिर्दूरादपोह्या इति स्थितमेतत्—अनुमानादसिद्धं वस्तु[4] यत्तदाप्तागमात्साध्यमिति[5]।

एवमस्य त्रिविधस्य प्रमाणस्यैन्द्रियिकं कारणान्तरतो[6]ऽनुपलभ्यमानं च प्रमेयं व्याख्यातम्। एतस्मात्तु यदन्यत्तदसदिति प्रत्यवगन्तव्यम् ॥ 6-7 ॥

आह—यद्येवम्[7], प्रधानस्यासत्त्वप्रसङ्गः। अनुपलब्धौ[8] कारणान्तरत्वानुपलब्धेः[9]। तद्धि प्रत्यक्षाविषयत्वे[10] सत्यतिदूरादिभिरनुपलब्धिकारणै[11]र्नोपलभ्यते। तन्न तावदतिदूरात्सामीप्याद्व्यवधानाच्चास्याग्रहणम्। कस्मात्? विभुत्वात्। नेन्द्रियघातात्, अविकलेन्द्रियै[12]रग्रहणात्[13]। न[14] मनोऽनवस्थानात्, अवस्थितमनोभिरग्रहणात्। न सौक्ष्म्यात्[15], शशविषाणादीनां सत्त्वप्रसङ्गात्[16]। नाभिभवात्, असम्भवात्। न समानाभिहारात्, एकत्वात्। तस्मात्[17] कारणान्तराभावतोऽनुपलभ्यमानस्यासत्त्व[18]मिच्छतः प्रधानस्य[19] शशविषाणवदसत्त्वप्रसङ्गः।

---

[1] P K D ऽर्थान्तरं Raghavan's (14.8) emendation (अर्थान्तरत्वं) agrees with the reading (of the Ms) adopted by us.

[2] P प्रसज्येते K D प्रसज्येत

[3] A नास्तिवाचकाः

[4] A असिद्धवस्तु

[5] A om. इति

[6] P K D ऐन्द्रियककारणान्तरतो Our emendation ऐन्द्रियकं ... coincides with Raghavan's (14.8).

[7] D इत्येवं

[8] A °सत्त्वप्रसंगोपलब्धौ

[9] A कारणान्तरानुपलब्धेः

[10] P K D प्रत्ययाविषयत्वे for प्रत्यक्षावि°

[11] Chakravarti (55.5) reads अनुपलब्धकारणैर्. Raghavan (12.8) also emends it as अनुपलब्धिकारणैः.

[12] Dkha. अविकल्पेन्द्रिय D अविक्लवैन्द्रियैर्, sec. m. अविक्लवेन्द्रियैर्

[13] A अनुमानान् for अग्रहणात्

[14] D ने

[15] D नाभावात् for न सौक्ष्म्यात्

[16] D शशविषाणवदसत्त्वप्रसंगात्

[17] D कस्मात्, sec. m. तस्मात्

[18] A °मानस्य सत्त्वम्

[19] P K D प्रधानस्यापि for प्रधानस्य

अथैतन्नेष्यते। कारणान्तरं तर्ह्यनुपलब्धौ वक्तव्यमिति।

उच्यते—यत्तावदुक्तम् (112.6) अनुपलब्धौ कारणान्तरानुपपत्तेः[1] प्रधानस्यासत्त्वप्रसङ्ग इति, अत्रास्तु[2]—

सौक्ष्म्यात्तदनुपलब्धिर्नाभावात् (का॰ 8/1-2')

यत्तूक्तं (112.9f.) शशविषाणादीनामपि सत्त्वप्रसङ्ग[3] इति, तदयुक्तम्। कस्मात्? साधनोपपत्तेः। अस्ति हि प्रधानस्य सौक्ष्म्यात्तदनुपलब्धौ साधनं न शशविषाणादीनाम्। किं तत्? उच्यते—

कार्यतस्तदुपलब्धिः। (का॰ 8/2')

प्रधानस्य हि कार्यत[4] उपलब्धिरित्येतदुपरिष्टात्प्रतिपादयिष्यामः[5] (द्र॰ का॰ 9)। न तु शशविषाणादीनां कार्यमस्ति। तस्माद्विषमोऽयमुपन्यासः(1)।

आह—एवमपि प्रतिज्ञान्यतरानर्थक्यम्[6], एकेन कृतत्वात्। सौक्ष्म्यात्तदनुपलब्धिरित्युक्ते गम्यत एतन्नाभावादिति। तस्मात्तद्वचनमनर्थकमिति।

उच्यते—न, वीतावीतपरिग्रहार्थत्वात्[7]। एवं सिद्धे[8] यत्प्रतिज्ञाद्वयं करोति तज्ज्ञापयत्याचार्यो(2) वीतावीताभ्यामभिप्रेतार्थसिद्धिः (इति)। प्राक्च[9] सौक्ष्म्यातिशयात्त[10]दनुपलब्धिरित्याचक्षाणः प्रतिपादयति—पुरस्ताद्वीतः प्रयोक्तव्य इति। एकस्मिंश्च विषये द्वौ[11] प्रयुञ्जानः समुच्चयेन सिद्धिं द्योतयति। किं सिद्धं भवति? यदुक्तं तन्त्रान्तरीयैः "न पृथक्प्रतिपत्तिहेतू वीतावीतौ" इति तदिष्टमेव[12] संगृहीतं भवति। तत्र वीतस्य

---

1. PKD कारणान्तरानुपपत्तिः
2. PD अतस्तु for अत्रास्तु K अत्रस्तु
3. A शशविषाणादिवदसत्वप्रसङ्ग
4. A कार्य for कार्यत
5. A प्रदतिपादयिष्यामः
6. PKD प्रतिज्ञान्तरानर्थक्यम् A प्रतिज्ञांनतरा॰ I follow Wezler (106.14).
7. D sec. m. परिग्रहार्थं
8. A सिद्धेसति in place of सिद्धे
9. PKD प्राक्तत्
10. A सौक्ष्म्यात्
11. PKD om. द्वौ
12. A एवं for एव

---

(1) Cf. म॰ भा॰ 1.1.1, शिवसूत्र 2

(2) Cf. म॰ भा॰ 1.1.1, शिवसूत्र 5, शिवसूत्र 6

प्रतिज्ञा[1] सौक्ष्म्यात्तदनुपलब्धिः तत्र[2] चावीतस्य प्रसङ्गिधर्मान्तर[3]निवृत्तिरूपेण, नाभावात्। हेतुरुभययोगी। कथम्? यस्य प्रत्यक्षतोऽनुपलभ्यमानस्य "कार्यतस्तदुपलब्धिः"(का॰ 8) तस्य "सौक्ष्म्यात्तदनुपलब्धिः"[4] (का॰ 8) दृष्टा[5] तद्यथेन्द्रियाणाम्[6]। यदि पुनरस्याभावादनुपलब्धिः स्यात्, कार्यतोऽनुपलब्धिप्रसङ्गः। अस्ति चेयं कार्यत उपलब्धिः। तस्मात् "नाभावात्" (का॰ 8)। न चेदभावात्, परिशेषतः "सौक्ष्म्यात्तदनुपलब्धिः" (का॰ 8) इति॥

आह—किं पुनस्तत्कार्यं यद् भवान्प्रधानस्यास्तित्वे लिङ्ग[7]माचष्ट इति?

उच्यते—

महदादि तच्च कार्यं प्रकृतिविरूपं सरूपं च[8]॥ का॰ 8/3-4॥

तद्धि महदहङ्कारेन्द्रियविशेषाविशेषलक्षणं कार्यं[9] प्रधानेन विसदृशं सदृशं चेत्युपरिष्टात्प्रवेदयिष्यामः[10] (का॰ 10, 11)।

आह—प्रस्तावाभावादयुक्तमेतत्। किं पुनरधिकृत्येदमुच्यते **प्रकृतिविरूपं सरूपं च महदादि कार्यम्** इति?

उच्यते[11]—"व्यक्ताव्यक्तज्ञविज्ञानान्मोक्षोऽवाप्यते" (द्र॰ का॰ 2) इत्येतत्प्रकृतम्।

---

1. A om. प्रतिज्ञा
2. P K D A तस्य Dkha. तत्र
3. A प्रसिद्धिधर्मान्तर॰ for प्रसङ्गिधर्मान्तर॰
4. Chakravarti (56.2) reads ॰तदुपलब्धिर्.
5. P K D omit दृष्टा ... । परिशेषतः सौक्ष्म्यात्तदनुपलब्धिः (114.15–115.2).
6. Tripathi (174) reads तद्यथेन्द्रियाणि.
7. A अस्तित्वलिङ्गम्
8. A च सरूपं instead of सरूपं च
9. A महदहंकारेन्द्रियाविशेषविशेषलक्षणकार्य
10. A प्रतिपादयिष्यामः
11. P K D om. उच्यते

एतानि[1] च परस्परवैधर्म्यसाधर्म्यप्रतिपत्ति[2]मन्तरेण न शक्यं[3] विज्ञातु[4]मित्येवमर्थमिदं[5] प्रस्तूयते। तस्मान्नाकस्मिको वैरूप्यसारूप्योपन्यास इति ॥ 8 ॥

॥ इति युक्तिदीपिकायां सप्ततिपद्धतौ[6] द्वितीयमाह्निकम् ॥

---

1. A तानि for एतानि
2. D ॰साधर्म्यप्रतिपक्षम्, sec. m. ॰साधर्म्यप्रतिपत्तिम्
3. A शक्यानि
4. A ज्ञातुम् for विज्ञातुम्
5. P K D om. इदं
6. P इति श्रीयुक्तिदीपिकायां सप्ततिपद्धतौ D इति श्रीमदाचार्येश्वरकृष्णविरचितायां सांख्यसप्ततौ युक्तिदीपिकानाम्नि विवरणे

तृतीयमाह्निकम्

{ओं नमः शिवाय[1]।}

आह—आस्तां तावद्वैरूप्यसारूप्यचिन्ता[2]। कार्यमिदमेव ताव[3]न्महदादि परीक्षिष्यामहे—किं प्रागुत्पत्तेरस्ति नास्तीति? कुतः संशय इति चेत्, स्यान्मतम्। असङ्गतार्थं प्रकरणान्तर[4]मुपक्षिप्यते भवता। न चाविद्यमानसम्बन्धस्य संशयस्य[5] प्रकरणान्तरेऽभिधीयमानस्य निर्णीतिं साध्वीमाचार्या मन्यन्ते, अवकाशासम्भवादिति। उच्यते—अस्ति संशयावकाशः। कस्मात्? आचार्यविप्रतिपत्तेः। प्रागुत्पत्तेः कार्यमसदित्याचार्याः कणादाक्षपादप्रभृतयो[6] मन्यन्ते। सदसदिति बौद्धाः। नैव सद् नासदित्यन्ये। तस्मादुपपन्नः संशयः। तत्रेदानीं भवतः का प्रतिपत्तिरिति?

उच्यते—नाविद्यमानस्य महदादेर्विकारस्य प्रधानादाविर्भाव इति प्रतिजानीमहे। कस्मात्[7]? सन्निवेशविशेषमात्राभ्युपगमात्। न हि नः कारणादर्थान्तरभूतं कार्यमुत्पद्यत इत्यभ्युपगमः। किं तर्हि? विश्वात्मकानां सत्त्वरजस्तमसामपगतविशेषाविशेषाः सन्मात्रलक्षणोपचयाः[8] प्रतिनिवृत्तपरिणामव्यापाराः परमविभागमुपसम्प्राप्ताः सूक्ष्माः शक्तयः। तासा[9]मधिकारसामर्थ्यादुपजातपरिणामव्यापाराणां सन्मात्रानुक्रमेण[10] प्रचयमुपसम्पद्यमानानां सन्निवेशविशेषमात्रं (1) व्यक्तम्[11]। एतस्यां कल्पनायामसत[12] उत्पत्तौ कः प्रसङ्ग

---

[1] P and K begin this Āhnika with this salutation, which precedes आह आस्तां ... . D अथ तृतीयमाह्निकमारभ्यते On the other hand, no salutation is found in A.

[2] Dkha. वैरूप्यचिन्ता instead of वैरूप्यसारूप्यचिन्ता

[3] A and Dkha. read इदमेतावन्

[4] P K असंगतार्थप्रकरणान्तरम् D असंगतात्प्रकरण°, sec.m. असंगतार्थप्रकरणम्

[5] P K D om. संशयस्य

[6] P काणादा° A काणाद°

[7] A प्रतिजानीमहैकस्मात्

[8] A अपगतविशेषास्सन्मात्र° D sec.m. अपगतविशेषाविशेषसन्मात्रोपलक्षणो°

[9] A तेषाम्

[10] Chakravarti (57.13) suggests तन्मात्रा° instead of सन्मात्रा°.

[11] A om. व्यक्तम्

[12] Chakravarti (57.15) reads आप्तत for असत.

---

(1) Cf. यो॰ भा॰ 4.13 : सर्वमिदं गुणानां सन्निवेशविशेषमात्रम्...

इति? एतेनैव बाह्यानां तन्त्वादिकार्याणां पटादीनां सन्निवेशविशेषमात्रत्वा[1]दसत उत्पत्तिः[2] प्रतिषिद्धा बोद्धव्या।

आह—अविद्यमानमेतत्[3]। कस्मात्? असिद्धेनार्थान्तरासिद्धेः[4]। यदि हि सन्निवेशविशेषमात्रत्वं कार्यस्य सिद्धं स्यादत[5] एतद्युज्यते वक्तुम्—तदभ्युपगमादसदुत्पत्तेरप्रसङ्ग इति। तत्त्वसिद्धम्, द्रव्यान्तरभूतस्यावयविनो निष्पत्तिप्रतिज्ञानात्। तस्मात् काकविषाणाच्छशविषाणसिद्धिवदयुक्तं सन्निवेशविशेषमात्राभ्युपगमा[6]त्सत्कार्यसिद्धिरिति।

इतश्चासत् कार्यम्। अग्रहणात्। इह श्रोत्रादीनां विषयभूतस्य तत्सन्निधानादवश्यं ग्रहणेन भवितव्यम्। यदि च प्रागुत्पत्तेः सत्कार्यं स्यात्, तदपि श्रोत्रादिसन्निधानात् गृह्येत[7]; न तु गृह्यते। तस्मादसत्कार्यम्। अनुपलब्धिकारणसद्भावा[8]दिति चेत्, तत्रैतत्स्यात्। अस्ति प्रागुत्पत्तेः कार्यस्यानुपलब्धिकारणम्, तस्मादस्य[9] सतो[10]ऽप्यग्रहणं[11] भवति। उत्तरकालं तद्विगमाद् ग्रहणमिति। एतच्चानुपपन्नम्। कस्मात्? असम्भवात्[12]। तद्धि प्रत्यक्षविषयत्वे[13] सत्यतिदूरादिभिरनुपलब्धिकारणैः (द्र० का० 7) नोपलभ्यते। न चैषां तत्र सम्भवः। तस्मादसदेतत्। (किञ्चान्यत्।) कारणान्तरानभिधानात्[14]। न चातिदूरादिव्यतिरिक्तमनुपलब्धौ कारणान्तरमधीध्वे, यतोऽस्याग्रहणं स्यात्। अतश्चासदेव। किञ्चान्यत्, कारणानुपलब्धिप्रसङ्गात्। अनुपलब्धिकारणसद्भावात्कार्यस्याग्रहणमिच्छतः कारणाग्रहणप्रसङ्गः। कस्मात्? अभिन्नदेशत्वात्, एकेन्द्रियग्राह्यत्वात्, स्थूलत्वाच्च। तत्त्वनिष्टम्। तस्मादयुक्तमनुपलब्धिकारणसद्भावात्सतः कार्यस्याग्रहणमिति। प्रमाणान्तरनिवृत्तिप्रसङ्गादयुक्त-

---

1. A सन्निवेशमात्रत्वाद्
2. Dkha. असदुत्पत्तिः
3. A आपद्यमानमेतत्
4. PKD सिद्धेनार्थान्तरासिद्धेः A असिद्धेनार्थान्तरसिद्धेः Dkha. असिद्धेनार्थान्तरासिद्धेः Chakravarti (57.17) reads सिद्धेनार्थान्तरसिद्धेः. Pandeya (48) and Tripathi (177) read असिद्धे, नार्थान्तरसिद्धेः.
5. P तत for अत A om. अत
6. PKD सन्निवेशमात्राभ्युपगमात्
7. P गृह्यते
8. A अनुपलब्धिकारणं सद्०
9. Dkha. यस्य
10. D स्वतो, sec.m. सतो
11. A अपिग्रहणं
12. A अनुपसम्भवात् Pandeya (48) inserts अनुप[लब्धि] before असम्भवात्.
13. PKA प्रत्यक्षाविषयत्वे D प्रत्यक्षाविषयत्वे, sec.m. प्रत्यक्षविषयत्वे
14. PKD om. कारणान्तरनभिधानात् ... अतश्चासदेव

मिति चेत्, स्यादेतत्। यदि तर्हि प्रत्यक्षविषयमेवास्ति ततोऽन्यन्नास्तीत्येतदुपगम्यते[1], तेनातीन्द्रियविषयस्यानुमानस्य निवृत्तिप्रसङ्गः। अनिष्टं चैतत्। तस्मान्नानुपलब्धेरसत्कार्यमिति। एतदप्ययुक्तम्। कस्मात्? क्रियागुणव्यपदेशासम्भवात्। यद्धि प्रत्यक्षतो नोपलभ्यते त[2]त्क्रिययास्तीति संसूच्यते। यथा हर्म्यावस्थितानां तृणानामुद्वहना[3]द्वायुः, गुणेन यथा मालतीलता गन्धेन[4], व्यपदेशेन वा कार्यादिना यथेन्द्रियाणि। न[5] प्रागुत्पत्तेः कार्यस्य क्रियागुणव्यपदेशसम्भवः(1)। तस्मादसत्कार्यम्।

इत[6]श्चासत्कार्यम्। कर्तृप्रयाससाफल्यात्। इह प्राग् व्यापारोपक्रमात् कर्तारस्तस्मात्फलमुपलिप्समानाः कार्यविशेषनियतसामर्थ्यं[7] साधनमुपादाय व्याप्रियन्ते। तच्चेत्प्रागपि व्यापारात् स्यात्तदर्थस्य परिस्पन्दस्यानर्थक्यं प्राप्तम्। अनिष्टं चैतत्। तस्मात् कर्तृप्रयाससाफल्यादसत्कार्यम्। परिणामाद्युपपत्तेरदोष[8] इति चेत्, स्यान्मतम्। कारणस्य परिणामव्यूहसंश्लेषव्यक्तिप्रचयलक्षणान्धर्मान् यस्मात्[9] कर्त्रादीनि कुर्वन्ति नानर्थकानि स्युः। सत्त्वं च[10] कार्यस्य न निरुध्यते। क एवं सति दोषः स्यादिति? उच्यते— न शक्यमेवं कल्पयितुम्। कस्मात्? मार्गान्तरानुपपत्तेः। परिणामो हि नामावस्थितस्य द्रव्यस्य[11] धर्मान्तरनिवृत्ति[12]र्धर्मान्तरप्रवृत्तिश्च(2)। तत्र सतो[13] धर्मान्तरस्य निरोधाभ्युपगमादस-

---

[1] A अभ्युपगम्यते   D उपगम्यते, sec.m. अभ्युपगम्यते

[2] A तद्धि for तत्

[3] P K D read गुणोद्वहनाद् instead of तृणानामुद्वहनाद्.

[4] A गन्धन   Chakravarti (58.13) reads ... मालती लता। गन्धेन ...

[5] A न तु for न

[6] P K D कुतश् for इतश्

[7] Raghavan (12.8) suggests कार्यविशेषे instead of कार्यविशेषा नियतसामर्थ्यं, which latter is the reading in Chakravarti (58.16).

[8] P K D read न दोष for अदोष.

[9] A अपि for यस्मात्

[10] P K D om. च

[11] P K D om. द्रव्यस्य

[12] A om. धर्मान्तरनिवृत्तिर्

[13] D स्वतो, sec.m. सतो

---

(1) वै॰ सू॰ 9.1

(2) अभि॰ को॰ भा॰ under 3.50 a : कथं च सांख्यानां परिणामः? न ह्यवस्थितस्य द्रव्यस्य धर्मान्तरनिवृत्तौ धर्मान्तरप्रादुर्भाव इति। (p. 509) Also see यो॰ भा॰ 3.13.

तश्चोत्पत्तिप्रतिज्ञाना[1]न्नेदमर्थान्तर[2]मारभ्यते। एवं व्यूहादयोऽप्युपसंहर्तव्याः। तस्मात् परिणामादिभिरभिभवात्[3] {च} कर्त्रादीनामर्थवत्त्वादसत्कार्यमिति[4]। तथा चोक्तम्—

जहद् धर्मान्तरं पूर्वमुपादत्ते यदा परम् ।
तत्त्वादप्रच्युतो धर्मी परिणामः स उच्यते ॥

इतश्च[5] न सत्कार्यम्? आरम्भोपरमयोराद्यन्ताविशेषप्रसङ्गात्[6]। यदि सत्कार्यं स्यात्, तेन यः क्रियार्थः साधनानामादौ परिस्पन्दः सोऽन्ते[7]ऽपि स्यात्। यो वाऽन्ते[8] विरामः स आदावपि स्यात्। कस्मात्? सदविशेषात्। न तु तदस्ति। तस्मादसत्कार्यम्[9]। इत[10]श्चासत्कार्यम्—उत्पत्तिधर्मस्याद्यन्तयोर[11]विशेषप्रसङ्गात्। यदि सत्कार्यं स्यात्, तेन यथा[12] निष्पन्नस्योत्पत्तिधर्मेणाभिसम्बन्धः तथाऽऽदावपि[13] स्यात्। यथैवादावभिसम्बन्धः[14] तथाऽन्तेऽपि स्यात्। दृष्टस्त्वभिसम्बन्धे नाभिसम्बन्धश्चाद्यन्तयोः। तस्मादसत्कार्यम्।

इत[15]श्चासत्कार्यम्। जन्मसच्छब्दयोर्विरोधात्। इह जन्मशब्दः प्रागभूतस्यार्थस्य[16] भावक्रम[17]माह। सच्छब्दस्तु क्रियान्तरहेतुत्वम्[18]। यदि[19] सतो जन्म स्यादैकार्थ्यमनयोः

---

1. K D °ज्ञानाच्च P °ज्ञानाश्च
2. P K D read मार्गान्तरम् for अर्थान्तरम्.
3. P K D °दिभिरभावश्च A अभिभवाच्च I follow Raghavan (12.9) in deleting च.
4. P K D om. इति तथा चोक्तम्... परिणामः स उच्यते ॥ (120.2-4)
5. P K D कुतश्च A तच्च
6. A अत्यन्ताविशेष° for आद्यन्ताविशेष°
7. A ते for अन्ते
8. P K D read वा योऽन्ते.
9. A °कार्यमिति
10. P K D कुतश्च A तच्च
11. A °धर्मस्यात्यन्तयोर्
12. A तथा तेन
13. A om. तथाऽऽदावपि
14. A यथैवाभिसम्बन्धः
15. P K D कुतश्च
16. A प्रागनुभूतस्या° Dkha. प्रादुर्भूतस्या°
17. A भावप्रक्रमम्
18. P K D हेतुत्वमाह in place of हेतुत्वम्
19. A यदि च for यदि

स्यात्। न त्वेत[1]दस्ति। तस्मादयुक्तं सज्जायत इति।

उच्यते—यदुक्तं (118.5) द्रव्यान्तरभूतस्यावयविनो निष्पत्तिप्रतिज्ञानान्[2] सन्निवेशविशेषमात्रत्वात् सत्कार्यमित्यत्र ब्रूमः—तदसिद्धिः, भेदेनाग्रहणात्। यदि तन्त्वादिभ्यो द्रव्यान्तरभूतस्यावयविनो निष्पत्तिः स्यात्, तेन यथा तन्तुकलापे पटस्तत्रैव वा[3] पटान्तरमाहितं भेदेनोपलभ्यते, तथैवोपलभ्येत[4]। न तूपलभ्यते। तस्मान्न द्रव्यान्तरम्। समवायादग्रहणमिति चेत्, स्यादेतत्। संयोगिनोर्द्रव्ययोः सत्याधाराधेयभावे भेदेन ग्रहणं भवति। समवायलक्षणा[5] तु प्राप्तिस्तन्तुपटयोः। तस्मान्नास्ति भेदेन ग्रहणमिति। तच्चानुपपन्नम्। कस्मात्? असिद्धत्वात्। सिद्धे सत्यर्थान्तरभावे[6]ऽवयविनस्तत्प्राप्तौ च समवाये सर्वमेतत्स्यात्। तत्त्वसिद्धमुभयम्। तस्मादयुक्तमेतत्। किञ्चान्यत्, दृष्टान्ताभावात्। महापरिमाणं[7] द्रव्यमन्यत्राहितं समवायाद् भेदेन नोपलभ्यत[8] इत्येतस्मिन्नर्थे[9] पर्यनुयुक्तस्य[10] कस्ते दृष्टान्तः? न चास्त्यनुदाहृतो वादः। व्याप्तेरग्रहण[11]मिति चेत्, स्यान्मतम्। अकार्यकारणभूतं द्रव्यं[12] सत्यपि सम्बन्धे न द्रव्यान्तरं व्यश्नुत इत्यतो भेदेन गृह्यते। तन्तुपटयोस्तु कार्यकारणभूतत्वाद् व्याप्तिः। तस्मान्नास्ति भेदेन ग्रहणमिति। एतदप्ययुक्तम्। कस्मात्? साध्यत्वात्। सत्यर्थान्तरभावेऽवयविद्रव्यान्तरवत् कार्यकारणभावः[13] साध्यः समवायश्च। अत इयं व्याप्तिः स्यात्। सा चाप्रसिद्धेत्यतो न सम्यगेतत्। वेमादिव[14]दिति चेत्, स्यादेतत्—यथा[15] सत्यर्थान्तरभावे वेमादयो[16]ऽवयविनः

---

[1] A ऐतद्

[2] P K D omit निष्पत्तिप्रतिज्ञानान्न ... द्रव्यान्तरभूतस्यावयविनो (121.2-4).

[3] P K D omit वा.

[4] A om. तथैवोपलभ्येत। न तूपलभ्यते Chakravarti (59.7) reads °वोपलभ्यते.

[5] A समावायलक्षणात्

[6] A अर्थाभावे for अर्थान्तरभावे

[7] A संहारपरिमाणं for महापरिमाणं

[8] Dkha. भेदेनोपलभ्यते

[9] A एतन्मतम् instead of एतस्मिन्नर्थे

[10] A अपर्यनुयुक्तस्य

[11] A व्याप्ते न ग्रहणम्

[12] P K D om. द्रव्यं

[13] A कर्मकारणभावः

[14] D वीमादिवत्, sec.m. वेमादिवत्

[15] P K D read तद्यथा instead of यथा.

[16] D वीमादयो, sec.m. वेमादयो

कारणम्, एवं तन्तवोऽपि (इति)। एत[1]दनुपपन्नम्। कस्मात्? अनभ्युपगमात्। करणं[2] वेमादयः[3] पटस्य[4], न कारणमित्ययमभ्युपगमो[5] नः[6]। तस्माद् विषमोऽयं दृष्टान्तः। किञ्चान्यत्। तद्वदव्याप्तिप्रसङ्गात्। वेमादिव[7]दर्थान्तरं पटात्तन्तव इत्येवं ब्रुवतस्तद्वदव्याप्तिप्रसङ्गः। किञ्चान्यत्। स्पर्शक्रियामूर्तिगुरुत्वान्तरवतस्तद्वति प्रतीघातात्। इह[8] स्पर्शान्तरवति स्पर्शान्तरवतः[9] प्रतीघातो दृष्टः। तद्यथा घटस्याश्मनि। स्पर्शान्तरवांश्च ते पटस्तन्तुभ्य इत्यतोऽस्य[10] तद्व्यापित्व[11]मयुक्तम्। एवं च क्रियादयो वक्तव्याः। तस्माद्युक्तमेतद् भेदेनाग्रहणा[12]न्नावयवी द्रव्यान्तरमिति[13]।

इतश्च[14] नावयवी द्रव्यान्तरम्। कृत्स्नैकदेशवृत्त्यनुपपत्तेः। स ह्यवयवेषु वर्तमानः कृत्स्नेषु वा[15] वर्तते, प्रत्यवयवं वा? किञ्चातः? तन्न तावत् कृत्स्नेषु वर्तते। कस्मात्[16]? एकदेशग्रहणे ग्रहणाभावप्रसङ्गात्[17]। यदनेकेषु वर्तते तस्य कृत्स्नाधारग्रहणे सति ग्रहणं[18] स्पष्टम्[19]। तद्यथा द्वित्वादीनाम्। एवं च सति[20] विषाणादिग्रहणे गोग्रहण(ाभाव)प्रसङ्गः[21]। किञ्च अवयवानवस्थाप्रसङ्गात्। स ह्यवयवान्

---

1. A एतदप्य्
2. A कारणं D करणं, sec.m. कदा
3. D वीमादयः, sec.m. वेमादयः
4. A om. पटस्य
5. Dkha. अभ्युपगमोऽयं
6. P K वः A न D वः, sec. m. नः
7. D वीमादिवद्, sec. m. वेमादिवद्
8. P K D read इति for इह.
9. P K D om. स्पर्शान्तरवतः Pandeya (50) reads स्पर्शान्तरवत्.
10. A shows a lacuna in place of भ्य इत्यतोऽस्य.
11. A तद्व्यापित्वम्
12. P K भेदानां ग्रहणान् D भेदानां ग्रहणान्, sec.m. भेदेनाग्रहणान्
13. A इत for इति
14. A om. इतश्च
15. A om. वा
16. A तस्माद्
17. A omits ग्रहणाभाव° ... कृत्स्नाधारगृहणे. Raghavan (15(1).1) suggests एकदेशाग्रहणे.
18. A (एकदेशग्रहणे) सत्यग्रहणं
19. A and Dkha. दृष्टम् for स्पष्टम्
20. Raghavan (15(1).1) suggests एवञ्चासति.
21. The context requires the emendation we have made, though all Mss read गोग्रहणप्रसङ्गः.

व्याप्नुवं[1]स्तद्व्यतिरेकेणावयवान्तराभावात् केन व्याप्नुयात्? अवयवान्तराभ्युपगमे चानवस्थाप्रसङ्गः[2]। कृत्स्नैकदेशवृत्तिप्रसङ्ग[3]श्च समानः। तस्मान्न सर्वेषु परिसमाप्यते। न[4] प्रत्येकम्, अनेकत्वप्रसङ्गात्[5]। अनेकाधारपरिसमाप्तं ह्यनेकं रूपादि दृष्ट[6]मिति। किञ्चान्यत्, शास्त्रहानेः। प्रत्यवयवं परिसमाप्तोऽवयवीत्येतदिच्छतो मूर्तिमताऽवयवेन समानदेशः[7] स्यात्। ततश्च यच्छास्त्रं "मूर्तिमतामसमानदेशत्वम्" इति, तस्य व्याघातः। अवयवपरिमाणं च प्राप्नोति महत्त्वादिपरिसमाप्तत्वात्[8]। एकद्रव्यं च[9] प्राप्नोति। ततश्च यच्छास्त्रं "द्रव्यमनेकद्रव्यमद्रव्यं वा"(1) (इति), तस्य हानिरेतावता चास्य वृत्ति[10]र्भवन्ती[11] भवेत्। सर्वथा च दोषः। तस्मान्नावयवी द्रव्यान्तरम्। अर्थान्तरावस्थानेऽर्थान्तरोत्पत्तिविनाशदर्शनादन्यत्व[12]मिति चेत्, स्यादेतत्। विद्यमानेषु[13] तन्तुषु पटो न भवति, संयोगलक्षणस्य कारणान्तरस्यानुत्पत्तेः। संयोगोत्तरकालं तु[14] भवति। कारणसामग्र्या[15] विद्यमानेष्वेव च तन्तुषु विनाशमुपयाति[16]। विभागादर्थान्तरावस्थाने[17] चार्थान्तरोत्पत्तिविनाशौ दृष्टौ। तद्यथा हिमवदवस्थाने दवाग्नेः[18]। तस्मादर्थान्तरं पटस्तन्तुभ्य इति। एतदप्ययुक्तम्। कस्मात्? साध्यत्वात्। साध्यं तावदेतत्—किमत्रार्थान्तरमुत्पद्यते विनश्यति वा? आहोस्वित्तन्तुष्वेव समवस्थानविशेषापेक्षस्य पटाभिधानस्य प्रवृत्तिनिवृत्ती

---

1. A अवयवात् प्राप्नुवंस्
2. A °वस्थाप्रसंगात्
3. A कृत्स्नैकवृत्तिदेशप्रसंगाच्
4. D तेन, sec.m. न
5. K अनेकप्रसङ्गात्
6. Chakravarti (60.5) reads रूपादिदृष्टम्.
7. A inserts न before समानदेशः.
8. A inserts न before महत्त्वादिसमाप्तत्वात्.
9. P K D read न च for च.
10. P K D एतावती वृत्तिर्
11. Wezler (114.8) regards भवन्ती as uncertain reading.
12. A अन्यथात्वम् for अन्यत्वम्
13. A द्विद्यामानेषु
14. A om. तु
15. P K D कारणसामग्र्याद्
16. A उपयाति
17. D °रावस्थोने, sec.m. °रावस्थाने
18. A दावाग्नेस्

---

(1) व्योम°, Pt. 1, p. 74; वै° सू° च° on वै° सू° 2.1.11

सेनावनवद् भवतः? तस्मादेतदपि नावयविनो[1] द्रव्यान्तरभावे लिङ्गम्। तत्पुरुषबहुव्रीहिद्वन्द्वसमासोपपत्तेरन्य इति चेत्[2], स्यान्मतम्। इहार्थान्तरत्वे सति तत्पुरुषो दृष्टः। तद्यथा राज्ञः पुरुषो राजपुरुष[3] इति। बहुव्रीहिश्च चित्रगुः शबलगुरिति[4]। द्वन्द्वश्च प्लक्षन्यग्रोधाविति। अस्ति चेहापि तत्पुरुषस्तन्तूनां पटः। बहुव्रीहिश्च दृढतन्तुः शुक्लतन्तुः[5]। द्वन्द्वश्च तन्तुपटाविति। तस्मादवयव्यर्थान्तरमिति[6]। एतच्चायुक्तम्[7]। कस्मात्? अनेकान्तात्[8]। अनन्यत्वेऽपि हि[9] तत्पुरुषो दृष्टः। तद्यथा सेनागजः काननवृक्ष इति। बहुव्रीहिश्च वीरपुरुषा[10] मत्तगजा सेना इति[11]। द्वन्द्वस्तु यदि स्यात्सत्यमेवार्थान्तर[12]मवयवी स्यात्। न तु कश्चित्पटावस्थायामेव[13] प्रयुङ्क्ते[14]—तन्तुपटावानयेति। तस्मान्मनोरथमात्रमेतत्। एतेन समाख्यासामर्थ्यभेदाः प्रत्युक्ताः। ते चापि चानर्थान्तरत्वे[15] सति सेनादिषु दृष्ट(ाः)[16]। तस्मान्नाऽवयवी द्रव्यान्तरम्। द्रव्यान्तरभूतस्यावयविनो निष्पत्तिप्रतिज्ञानान्न (तु) सन्निवेशविशेषमात्रत्वात्[17] सत्कार्यमित्येतदयुक्तम्।

यत्पुनरेतदुक्तम् (118.9) अनुपलब्धेरसत्कार्यमिति, अत्र ब्रूमः—एतदप्ययुक्तम्। कस्मात्? संशयकारणत्वात्। स(द)सद्विषयाऽनुपलब्धि[18]रित्येतस्मादेव हेतोस्सांशयिका वयम्। तामेव तु निश्चयार्थमवलम्बमानो न युक्तिमार्गमनुयाति।

---

1. P K D अप्यवयविनोः
2. P K D °द्वन्द्वसमासे in place of °द्वन्द्वसमासोपपत्तेरन्य इति चेत्
3. P K D om. राजपुरुष इति.
4. P K D om. इति.
5. A शुक्लं तन्तुः
6. P K D तस्माच्चावयवो
7. A एतदप्ययुक्तम्
8. A अनैकान्तात्
9. P K D om. हि
10. A दृष्टो वीरपुरुषा for वीरपुरुषा
11. D मत्तगजा सेना इति, sec.m. मत्तगजसेना इति Chakravarti (60.22) reads मत्तगजसेना.
12. P K एवावयवान्तरम् D अवयवान्तरम्, sec.m. अर्थान्तरम्
13. P K D read एव ...
14. P K D omit प्रयुङ्क्ते ... कार्यस्य समधिगमं (124.8-125.18).
15. A चानर्थानत्वे I follow Wezler (115.9)
16. A दृष्टस I follow Pandeya (51).
17. A निष्पत्तिप्रतिज्ञानानानुसन्निवेशविशेषमात्रत्वात्
18. A स च सद्विषया°

यत् पुनरेतदुक्तं (118.13) कारणान्तरानभिधानादिति, एतदप्यनुपपन्नम्। कस्मात्? अभिप्रायानवबोधात्। यो हि यथा कुण्डे बदरा[1]ण्यर्थान्तरभूतान्याहितानि[2] तथा कारणे कार्यमस्तीत्येतदाचष्टे, तं प्रत्ययमुपालम्भः स्यात्। वयं त्वनेकशक्तधर्मिणः सहकारिशक्त्यन्तरा(नु)गृहीतस्य[3] पूर्वस्याः शक्तेस्तिरोभावमुत्तरस्याश्चाविर्भावमुपादधानाः कारणमेव कार्यमित्यनुमन्यामहे। तयोस्तु शक्त्योर्युगपदग्रहणम्, इतरेतरप्रतिबन्धहेतुत्वात्। वस्त्रस्यायामविस्तारवत् कूर्माङ्गमिव (च) द्रष्टव्यम्। यथा वस्त्रस्योपसंहारप्रतिबन्धादायामविस्तारौ न ग्रहणविषयतां प्रतिपद्येते, सत्तां वा न जिहीतः कूर्मस्येवाङ्गानि, तथा तन्त्वादीनामपि भावानां कारणाभिमता कार्याभिमता चावस्था। क्रमेण (त्वाविस्तिरश्च भवन्ति)[4]। तन्निमित्तस्तद्ग्रहणाग्रहणविकल्पः। एतेन कारणाग्रहणं[5] प्रत्युक्तम् (118.14)।

यदप्युक्तं (119.2) प्रमाणान्तरनिवृत्तिप्रसङ्गादिति, सत्यमेतत्। यत्तूक्तं (119.3) क्रियागुणव्यपदेशासम्भवादनुमानाभाव[6] इति, तदनुपपन्नम्। कस्मात्? पृथक्त्वानभ्युपगमात्। कार्यकारणपृथक्त्ववादिनस्तत्क्रियागुणानां पृथक्त्वमनुमातुं युक्तमित्य(तस्तन्त्व)वस्थाने[7] पटक्रियागुणग्रहणादनुमानाभाव इत्ययमुपालम्भः सावकाशः स्यात्। अस्माकं तु कारणमात्रस्यैव संघातादाकारान्तरपरिग्रहाद् वा क्रियागुणानां प्रचितिर्व्यक्तिविशेषो भवतीति ब्रुवतामदोषः। व्यपदेशस्तु कार्यकारणपर्यायः। सोऽयुक्तः। कस्मात्? अनेकान्तात्। द्रव्यगुणत्वकर्मत्वादीनां क्रियागुणकार्यकारणभावोऽथ च सत्त्वमिष्यते भवद्भिरथ लिङ्गपर्यायः। न तर्हि वयं पर्यनुयोज्या व्यपदेशाभावादसत्कार्यमिति। किं कारणम्? प्रकरणात्। विप्रतिपत्तौ हि सत्यां लिङ्गतः प्रागुत्पत्तेः कार्यस्य समधिगमं करिष्याम[8] इति प्रकृतमेवैतत्। अनैकान्तिकत्वं च[9] समानम्, निष्पत्त्यनन्तरं द्रव्यस्यास्तित्वाभ्युपगमात्। "अगुणवतो द्रव्यस्य गुणारम्भात्[10] कर्मगुणा अगुणाः[11]"(1) इति वचनादुत्पन्नमात्रं

---

[1] A बदिराण्य् I follow Pandeya (51).

[2] A अहितानि I follow Pandeya (51).

[3] A शक्त्यन्तरागृहीतस्य I follow Pandeya (51).

[4] A क्रमेण वा स्थिरश्च भवन् I follow Wezler's emendation (116.2).

[5] A कारणग्रहणम् I follow Wezler's corrected reading (116.3).

[6] A °व्यपदेशसम्भवादनुमानभाव I follow Pandeya (51).

[7] A अतन्त्ववस्थाने I follow Pandeya (51).

[8] P K D read पूरयिष्यामः for करिष्यामः after a lacuna (cf.p. 124, fn. 14).

[9] P K D om. च

[10] P K D गुणारम्भः A गुणारम्भाः

[11] A अकर्मगुणा for अगुणाः

---

(1) वै॰ सू॰ 1.1.15-16, 7.1.12

द्रव्यं निष्क्रियं निर्गुणमवतिष्ठत इति वः पक्षः। न चास्य तथाभूतस्य लिङ्गमस्ति। अथ चास्तित्वं भवद्भिरभ्युपगम्यते। सिद्धेर्ग्रहणात्सद्भाव[1] इति चेन्न, सर्वविवादसिद्धिप्रसङ्गात्[2]। दृष्टान्तविरुद्धमर्थं प्रतिज्ञाय प्रतिषिध्यमानेन[3] सिद्धबुद्धिविषयता स्मर्तव्येत्येतस्यां[4] कल्पनायां सर्ववादसिद्धिप्रसङ्गः स्यात्। किञ्चान्यत्। प्रतिपक्षे[5] च[6] समानत्वात्। अस्मत्पक्षेऽपि तर्हि भगवत्पञ्चशिखादीनां प्रत्यक्षत्वात्सत्कार्य[7]मभ्युपगन्तव्यम्। तस्मान्न क्रियागुणव्यपदेशासम्भवादसत्कार्यम्।

यत्पुनरेतदुक्तं (119.9) कर्तृप्रयाससाफल्यादसत्कार्यमिति, अत्र ब्रूमः—एतदप्ययुक्तम्। कस्मात्?

असदकरणात् (का० 9/1)

यद्युभयपक्षप्रसिद्धस्यासतः क्रियायोगः स्यात्, अत एतद्युज्यते वक्तुम्—कार्ये सति कर्तुः प्रयासोऽनर्थक इति। तत्त्वसतः करण[8]मनुपपन्नम्। तस्मादयुक्तमेतत्। हेत्वनभिधानादसिद्धिरिति चेत्, स्यादेतत्। यथा[9] निष्पन्नत्वा[10]न्मध्वादीनां धारणसमर्थो घटो न क्रियत[11] इत्ययमपदिष्टो हेतुरस्माभिः, एवमित्थ[12] कार्यस्यासतः[13] करण[14] नोपपन्न[15]मिति नोक्तं भवता। तस्मादसिद्धिरिति। एतच्चानुपपन्नम्। कस्मात्? सत्यसति वा सम्बन्धे दोषप्रसङ्गात्। तद्धि क्रियमाणं सति वा सम्बन्धे कारकैः क्रियतेऽसति[16] वा?

---

[1] A ग्रहणासद्भाव

[2] A °सर्ववाद°

[3] P K D प्रतिविध्यमानेन A प्रतिपाद्यमान I follow Raghavan (15(1).2).

[4] A सिद्धबुद्धिविषयनामन्तव्यत्येतस्यां

[5] Raghavan (15(1).2) suggests प्रत्यक्षे instead of प्रतिपक्षे.

[6] P K D om. च

[7] D सत्कार्यवादम् Dkha. सत्कार्यमभ्युपगन्तव्य

[8] A कारणम्

[9] A om. यथा

[10] Raghavan (15(1).2) reads अनिष्पन्नत्वात्.

[11] A reads घटः क्रियत, thus omitting न.

[12] A एव इत्थं

[13] P K D कार्यस्य सतः Dkha. unclear, कार्यस्यासतः

[14] करणं seems a better reading, though all Mss read कारणं.

[15] Raghavan (15(1).2) suggests कारणं केनोपपन्नम्.

[16] Chakravarti (61.12) reads सति वा.

सम्बन्धश्चास्य भव[1]न्प्रवृत्तिकाले[2] वा कारकाणां[3] स्यान्निवृत्तिकाले[4] वा? किञ्चातः? तन्न तावत्प्रवृत्तिकाले[5] सम्बन्धो युक्तः। कस्मात्? अद्रव्यत्वात्। प्रवृत्तिकाले कर्त्रादीनां क्रियागुणव्यपदेशाभावादवस्तुभूतं शशविषाणस्थानीयं[6] वः कार्यम्; न चास्ति तथाभूतस्य वस्तुभूतेन सम्बन्धः। अथ[7]निवृत्तिकाले[8]ऽभिसम्बध्यते[9], यदुक्तं (109.7) सतो[10] निष्पन्नत्वात्क्रियानुत्पत्तिरिति, तस्य व्याघातः। अथ[11] मतमसत्यपि सम्बन्धे निष्पत्ति-[12] र्भवतीति तेन कारकव्यापारवैयर्थ्यप्रसङ्गः। प्रागपि च[13] कारकोपादानात्कार्यनिष्पत्तिप्रसङ्ग[14] इति। उक्तं च—

> असत्त्वान्नास्ति सम्बन्धः कारकैः सत्त्वसङ्गिभिः।
> असम्बन्धस्य चोत्पत्तिमिच्छतो न व्यवस्थितिः[15](1) ॥ इति[16]।

आह, ननु च मध्यमे काले कर्त्रादिभिः कार्यं क्रियते। कः पुनरसौ मध्यमः काल इति? आह—

> आरम्भाय प्रसृता यस्मिन्काले भवन्ति कर्तारः ।

---

1. A भवत् for भवन्
2. D प्रवृत्तिकारी, sec.m. प्रवृत्तिकाले
3. A कारणानां
4. A निष्पत्तिकाले D निवृत्तिकारी, sec.m. निवृत्तिकाले
5. D प्रवृत्तिकारी, sec.m. प्रवृत्तिकाले
6. P K D °भूतशशविषाण°
7. A सम्बन्धाथ in place of सम्बन्धः। अथ
8. A निष्पत्ति° for निवृत्ति°
9. A सम्बध्यात
10. D स्वतो, sec.m. सतो
11. A व्याघताथ for व्याघातः। अथ
12. A सम्बधनिष्पत्तिर्
13. A om. च
14. A omits कार्य in कार्यनिष्पत्ति°.
15. A मतिविभ्रमः instead of न व्यवस्थितिः
16. A om. इति

---

(1) See सा॰ त॰ कौ॰, का॰ 9, where Vācaspati remarks : यथाऽऽहुः सांख्यवृद्धाः.

कार्यस्यानिष्णातास्तं[1] मध्यमं कालमिच्छन्ति[2] ।।

यदा हेतवः प्रवृत्तारम्भा[3] भवन्त्युद्दिश्य कार्यं न च ताव[4]न्नैमित्तिकस्यात्मलाभः संवर्तते, स मध्यमः कालः। तस्मिन्क्रियते कारकैः कार्यमिति।

उच्यते—न, अवस्थान्तरानुपपत्तेः। प्राङ्निष्पत्तेरसत्ता, निष्पन्नस्य[5] सत्तेत्यवस्थाद्वयम्[6]। सदसद्रूपा चावस्था[7] नास्ति यो मध्यमः स्यात्। अतो न युक्तमेतदिति। किञ्चान्यत्। पूर्वदोषापरिहारात्[8]। उद्दिश्य कार्यं तस्यात्मनो लाभात्केन सह सम्बन्ध इत्यत्राप्ययं पर्यनुयोगो नैव निवर्तत इति। तस्माच्चित्रमपि वाक्यं प्रसार्य न किञ्चित्परिहृतं भवता। तस्माद्युक्तमेतत्[9] सत्यसति वा सम्बन्धे दोषप्रसङ्गादसन्न क्रियत इति।

यस्य पुनः सत्कार्यं तस्य दोषो नास्ति। कस्मात्?

उपादानग्रहणात् (का॰ 9/1'2')

उपादानमिति कारणं तन्त्वाद्याचक्ष्महे। तद्धि तस्य कारकैर्गृह्यते[10]ऽभिसम्बध्यत इत्यर्थः। तस्माच्च नार्थान्तरं[11] कार्यमित्यतः कारणेनाभिसम्बद्धानां[12] कारकाणां[13] कार्येणैव सम्बन्धो भवतीत्यदोषः।

आह—ननु च यस्यापि सत्कार्यं तस्योपादानादर्थान्तरं[14] तत्कार्यं स्यात्। कस्मात्?

---

[1] P कार्यस्य निस्मातास् K कार्यस्य निष्णातास् A कार्यस्यानिष्टात I follow Wezler (118.12). Pandeya (52) and Tripathi (196) emend it into कार्यस्यानिष्पादात्तं.

[2] P K D इच्छन्तीति

[3] P K D प्रवृत्ता in place of प्रवृत्तारम्भा

[4] A ताव for तावन्

[5] A adds च after निष्पन्नस्य.

[6] A अवस्थ्यद्वयम्

[7] P K D read च सत्ता for चावस्था.

[8] A पूर्वदोषानपहाराद्

[9] Chakravarti (62.2) reads तस्मादयुक्तमेतत्.

[10] A क्रियते for गृह्यते

[11] A तस्मादनर्थान्तरं

[12] P K D कारकेनाभिसम्बद्धानां A कारणेनाभिसम्बन्धाना

[13] Raghavan (15(1).2) suggests कारणानां.

[14] A उपादानादनन्तरं

कार्यार्थिभिरुपादानात्। यद्यदर्थमुपादीयते तत्त[1]स्मादर्थान्तरं तद्यथा वेमादिभ्यः पटस्तन्तवश्च पटा(र्थि)भि[2]रुपादीयन्ते[3]। तस्मात्तेभ्योऽप्यर्थान्तरं[4] पटः। एतेन सत्त्वं प्रत्युक्तम्। यद्यदर्थमुपादीयते तत्तस्मिन्नसत्, यथा वेमादिषु पट इति।

उच्यते—न, अवयविप्रतिषेधात्। प्रतिषिद्धस्तावदवयवी द्रव्यान्तरभूतः। तस्मादनुपपन्नार्थमेतत्।

किञ्चान्यत्।

सर्वसम्भवाऽभावात्। (का॰ 9/2')

उपादानसामान्या[5]द्वेमादिवदर्थान्तरं[6] पटस्तन्तुभ्य इति ब्रुवतोऽर्थान्तरत्वसामान्या[7]त्तन्तुवत्सर्वस्मात्कारणात्कार्यस्य सम्भवः[8] स्यात्। न त्वेवमस्ति। तस्मात्**सर्वसम्भवाभावा**दसम्यगेतत्।

किञ्चान्यत्, जातिभेदप्रसङ्गाद[9]र्थान्तरारम्भप्रसङ्गाच्च। उपादानसामान्याद्वेमादिव[10]दर्थान्तरं पटस्तन्तुभ्य इति ब्रुवतो यथा वेमादिभ्यो[11] भिन्नजातीयो भिन्नदेशश्च, तथा[12] तन्तुभ्यः पटः स्यात्। यथा चावस्थिते पटे वेमादयः पटान्तरं कुर्वन्ति, तथा ह्यवस्थिते पटे तन्तवोऽपि पटान्तरमारभेरन्। न चैतदिष्टम्। न तर्ह्युपादानसामान्याद्वेमादिवत्तन्तुभ्यः पटस्यार्थान्तरत्वम्।

यत्पुनरेतदुक्तं (129.2f.) यद्यदर्थमुपादीयते न तत् तत्रास्तीति, अत्र ब्रूमः— अयुक्तमेतत्। कस्मात्? आधाराधेयभावानभ्युपगमात्[13]। असकृदुक्तमस्माभिर्न तन्तुषु पटो नाम कश्चिदस्ति। किं तर्हि? तन्तव एव पटः (इति)। तत्तु सन्मार्गविद्वेषाद् भवता न गृह्यते। किञ्चान्यत्। अनेकान्तात्[14]। उपेत्य वा ब्रूमः—कथं तावत्तिलास्तै-

---

1. P K D omit तत्तस्माद् ... यद्यदर्थमुपादीयन्ते ...
2. A पदादिभिर् पटार्थिभिर् looks a more apposite reading.
3. A उपाधीयते I follow Pandeya (53) in emending as I do.
4. A अर्थ्यन्तरम्
5. Tripathi (198) reads उपादानत्वसामान्याद्.
6. D वीमादिवत्पदार्थान्तरं, sec.m. वेमादिवदर्थान्तरं
7. P K D ऽर्थान्तरसामान्यात्
8. A सद्भावः
9. A जातिप्रभेद॰
10. D वीमादिवत्, sec.m. वेमादिवत्
11. D वीमादिभ्यो, sec. m. वेमादिभ्यो
12. P K D read (॰देशश्च) तथाऽवस्थिते in place of तथा ... यथा चावस्थिते.
13. A आधाराधेयानगभ्युपमात्
14. A अनैकान्तात्

लार्थमुपादीयन्ते, भवति चात्र तैलम्। मृद्वीका[1] रसार्थमुपादीयते, भवति चास्यां रसः। गोधुक्च पयोऽर्थं[2] गामादत्ते[3], भवति च तस्यां[4] क्षीरम्। शालिकलापश्च तण्डुलार्थमुपादीयते, सन्ति चात्र तण्डुला [5]इत्यनैकान्तिको हेतुः।

आह—आवरणोपलब्धेरयुक्तम्। तिलादिष्वावरणं[6] प्रत्यक्षत उपलभ्यते, तत्प्रतिबन्धात्तैलादीनामग्रहणम्। व्यापारश्च[7] कर्तुस्तद्विगमार्थो[8] न तु कार्यस्यावरणमस्ति। तस्माद्विषमो दृष्टान्तः।

उच्यते—न, मार्गान्तरत्वात्[9]। यद्यत्रास्ति[10] न तत्त[11]दर्थमुपादीयत[12] इति पूर्वं भवताऽतिसृष्टम् (129.1f.)। इदानीं त्वागमविगमार्थं[13] सतो[14]ऽप्युपादानमिति ब्रुवतो मार्गान्त- रगमनं पूर्ववादत्यागोऽनैकान्तिकस्य चापरिहार इति[15]।

यत्पुनरेतदुक्तं (119.10) परिणामाद्युपपत्तेरदोष इति, तथा तदस्तु। यत्तूक्तं (119.13) मार्गान्तरानुपपत्तेरिति, अत्र ब्रूमः—एतदप्ययुक्तम्। कस्मात्? परिणामधर्मानवबोधात्। सतो धर्मान्तरस्य निरोधमसतश्चोत्पत्तिं परिणाममभिदधतो व्यक्तमयमुपालम्भः स्यात्। न त्वनया कुसृत्या[16] प्रतिष्ठामहे। किं तर्हि? साधनानुगृहीतस्य धर्मिणो धर्मान्तरस्याविर्भावः पूर्वस्य च तिरोभावः परिणामः। न चाविर्भावतिरोभावावुत्पत्तिनिरोधौ[17]।

---

[1] Chakravarti (62.21) reads मृत्तिका.

[2] A पयो for पयोऽर्थं

[3] A गामुपाधत्ते

[4] A चास्यां

[5] A इत्ययम्

[6] Chakvavarti (62.24) reads आरणं rather than आवरणं.

[7] P K D अग्रहणव्यापारश्च instead of अग्रहणम्। व्यापारश्च. Raghavan's emendation (12.10) agrees with A's reading, which we have adopted.

[8] P K तद्विरागार्थो A तद्विगमो D तद्विरागार्थो, sec.m. तद्विगमार्थो Raghavan's emendation (12.10) agrees with the reading (of the Ms) which we have adopted, although subsequently (15 (1).2) Raghavan suggests the reading विरामार्थः.

[9] A नामार्थान्तरत्वाद्

[10] A यत्र नास्ति for यत्रास्ति

[11] A तन्न for न तत्

[12] A उपाधीयते

[13] A अवगमविगमार्थ Raghavan (15(1).2) suggests आवरणविगमार्थं.

[14] D स्वतो, sec. m. सतो

[15] A om. इति

[16] A अनयानुसृत्या

[17] A °तिरोभावौ चोत्पत्तिनिरोधौ

व्यूहसंश्लेषव्यक्तिप्रचयास्तु किमसतो[1] धर्मा उत स्वय[2]मसन्त इति विचार्यम्। किञ्चातः? यदि[3] तावदसतो[4] धर्माः, तदा[5] कस्येति वाच्यम्। अथ स्वयमसन्तः पश्चाद् भवन्ति, तदप्ययुक्तम्। कस्मात्? अनर्थान्तरत्वात्[6]। सत्यर्थान्तरभावे प्रागसन्तः पश्चादुपलभ्यमानाः सत्कार्यवादं निराकुर्युः[7]। स चैषामर्थान्तरभावो न प्रसिद्धः। तस्मात्किमत्रोत्पन्नम्? ग्रहणाग्रहणविकल्पे चोक्तः परिहारः। किञ्चान्यत्। द्रव्यान्तरोत्पत्तिव्याघातात्[8]। उपेत्य वैषामुत्पत्तिं ब्रूमः— यदि हि परिणामव्यूहसंश्लेषव्यक्तिप्रचयमात्रं कार्यमिष्यते, यदुक्तं "द्रव्याणि द्रव्यान्तर[9]मारभन्ते"(1) इति, तस्य व्याघातः। कस्मात्? न ह्येते भावा द्रव्यान्तरम्। तस्माद् दिनकरकिरणप्रतापमूर्छितस्येव[10] दावाग्न्युपसर्पणदोषोऽनुतापायैव[11] भवतः प्रतिपत्तिः। एतेनारम्भोपरमोत्पत्त्य(ाद्यन्ता) विशेषप्रसङ्गो[12] जन्मसच्छब्द(विरोधश्च) प्रत्युक्तः[13] (120.5, 120.12)। कथम्? आत्मभूतं हि तन्तूनां[14] पटाख्यं व्यूहस्थानीय[15] सन्निवेशविशेषं यदा कारकाणि[16] स्वेन स्वेन व्यापारेणाविष्कुर्वन्ति, तदा क्रियते उत्पद्यते जायत[17] इत्येवमादिर्लोकस्य व्यवहारः प्रवर्तते।

---

1. P K किं सतो   D स्वतो, sec.m. सतो
2. P K स्वतो   D स्वतो, sec.m. स्वयम्
3. A तद्यदि for यदि
4. Raghavan (12.10) suggests किञ्चातः यदि तावत् सतः.
5. I follow Raghavan who suggests (15(1).2) तदा in place of यथा, which latter is the reading in all Mss. Tripathi (201) suggests तथा.
6. Dkha. अर्थान्तरवात्
7. A निराक्रुयुः
8. A द्रव्यान्तरोत्पत्तिव्यात्
9. A omits द्रव्यान्तरं ... न ह्येते भावा.
10. P D ॰मूर्च्छितस्यैव
11. P K D ॰दोषानुतापायैव   A दवाग्न्युपसर्पणं दोषोनुपघातायैव   I follow Pandeya (54).
12. P K D एतेनारम्भोपरमोत्पत्त्यविशेषप्रसो   A एतेनारम्भे प्रसङ्गो उत्पत्त्यविशेषप्रसङ्गो   Anticipated by Raghavan (15(1).2), Tripathi (202) suggests उपक्रम in place of उपरम.
13. P जन्मसच्छब्द प्रयुक्तः   A जन्मसशब्दश्च ...   I follow Wezler (121.18).
14. A om. तन्तूनां
15. A व्यहस्थानीयं
16. Chakravarti (63.14) reads यदाकारकाणि.
17. A जंतूनायत for जायेत

---

(1) वै॰ सू॰ 1.1.8

यदा तु कारकाणि शक्त्यन्तराविर्भावात्संस्थानान्तरेणौत्सुक्यवर्तिता[1]मवस्थामुपसंहरन्ति, तदा प्रागुपलब्धं संस्थानं विनाशशब्दवाच्यतां प्रतिपद्यते। परमार्थतस्तु न कस्यचिदुत्पादोऽस्ति[2] न विनाशः।

यत्पुनरेतदुक्तं (120.12f.) जन्मशब्दः प्रागभूतस्यार्थस्य भावोपक्रम[3]माहेति, तदपीच्छा– मात्रम्। कस्मात्[4]? विवादात्। सदसद्विषयं[5] जन्मेति विवादेऽनुषक्ते जन्मशब्दः[6] प्रागभूतस्य सद्भावमाचष्ट इति ब्रुवतोऽनुक्तसमम्। पुरुषादावदृष्टत्वादसिद्धिरिति चेत्, स्यादेतत्। यदि तर्हि क्रियत उत्पद्यते जायत इत्येषोऽर्थः सद्विषयः कल्प्यते[7], प्रधानपुरुषयोरपि तत्प्रसङ्गः सदविशेषा[8]दित्यतश्च विवादावस्थमेवैतत्प्रकरणमिति। एतच्चायुक्तम्। कस्मात्? संस्थानविषयत्वात्[9]। यदा भावः स्वतोऽनर्थान्तरभूतं संस्थानं भजते, तदैते[10] शब्दाः प्रवर्तन्त इत्युक्तम्। दृष्टं च लोके तद्यथा मुष्टिग्रन्थिकुण्डलानि करोति जनयत्युत्पादयति, अभिव्यक्तात्मसु च मू... लोदकादिषु[11] भवत्युत्पन्नं जातमिति। उभयपक्षप्रसिद्धे[12] तु शशविषाणादौ नैते शब्दाः प्रवर्तन्ते। तस्माद् भवत एवानिष्टप्रसङ्ग इति। उक्तं च—

यद्यसत्त्वं घटादीनामुत्पत्तौ हेतुरिष्यते ।
शशशृङ्गेऽपि तुल्यत्वादुत्पत्तिस्ते प्रसज्यते ॥

इति सिद्धं सत्कार्यम्।

---

1. Dkha. शक्त्यन्तराविर्भावात्मस्थाना° Raghavan (15(1).2) regards औत्सुक्य as corrupt.
2. A कस्यचिदोस्ति
3. A भावप्रक्रमम्
4. D तस्मात्, sec.m. कस्मात्
5. P K D read सद्विषयं for सदसद्विषयं.
6. A जन्मशब्दे D जर्मशब्दः, sec.m. जन्मशब्दः
7. P कल्पेत
8. P K सदसदविशेषाद् A सदसद्विशेषाद् D सदसदविशेषाद्, sec.m. सदविशेषाद्
9. P संस्थाविषयत्वात्।
10. A not clear
11. In P and K there is a gap with four dots after मू° followed by लोकादिषु. In K there is a lacuna with three dots, and in D there is a lacuna with three dots and two dashes. Wezler (122.12) regards his adopted reading च मू ... लोकादिषु as uncertain. D writes in the top margin that ख° पुस्तके त्रुटिर्नास्ति, and in the margin below that ख° पु° चमूलोकादिषु इत्येवं पाठः न तु मध्ये चमूपदान्तरं त्रुटिः।
12. A प्रसिद्धेस्

इतश्च सत्कार्यम्।

शक्तस्य शक्यकरणात् (का° 9/3)

शक्यमिदमस्य, शक्तश्चायमस्येत्ययं नियमः सतां दृष्टः। तद्यथा चक्षुषो रूपस्य च[1]। अस्ति चायं पटस्य वेमादीनां च[2] नियमः। तस्माच्च सत्कार्यम्। सहकारिवत्तन्नियम इति चेत्, स्यान्मतम्। यथाऽऽपो बीजाङ्कुरस्योत्पत्तौ[3] समर्था भवन्ति, न काष्ठादग्नेर्वा[4]। उभयं च[5] तत्तासु न विद्यते, बीजादपां[6] विच्छिन्नत्वात्। यथा च[7] सूर्यः सूर्यकान्तादग्निमुत्पादयितुं समर्थः, न चन्द्रकान्ताच्च पानीयम्। उभयं च[8] तत्तत्र न विद्यते। तथा च तन्त्वादीनां पटस्यैव[9] शक्तिनियमः स्यात्। न च पटस्य तन्तुषु सत्त्वं स्यादिति। एतच्चायुक्तम्। कस्मात्? साध्यत्वात्। अङ्कुरादयोऽपि कार्यमबादीनाम्। (अ)तः[10] साध्यम्[11]। किमप्स्व[12]ङ्कुरोऽस्त्यथ[13] नास्त्येव। तथा सूर्यकान्तेऽग्निः। तदर्थमेव चायं विवादोऽनुषक्तः[14]। यत्तूक्तम् (133.6) अपां विच्छिन्नत्वान्न तास्वङ्कुरो[15]ऽस्तीति तत्रापि यासामपां बीजानुप्रवेशादङ्कुरभावेन विपरिणामस्ताभ्य[16]स्तस्यान्यत्वं[17]

---

1. P K D om. च D रूपस्य, sec.m. रूपस्य च
2. P K D om. च
3. A बीजादङ्कुरस्योत्पत्तौ Chakravarti (64.4) reads °दङ्कुरस्योत्पत्नौ. Raghavan's (12.10) correction agrees with the reading (of the Mss) we have adopted.
4. A अग्नेरुत्पत्तौ समर्थो वा for अग्नेर्वा
5. A वोभयं for उभयं च
6. A अपा for अपां
7. A om. च
8. P K D om. च
9. A पटसौव Chakravarti (64.6) reads पटस्येव, which Raghavan (12.10) corrects into पटस्यैव—a reading which agrees with the reading (of the Mss) we have adopted. Subsequently (15(1).3) Raghavan also suggests पटस्यैष.
10. P K D read नातः in place of अतः.
11. A reads कार्यं नभस्साध्यं in place of कार्यमबादीनाम्। (अ)तः साध्यं, showing a lacuna between कार्यं and नभस्.
12. P K D om. अपस्व्
13. A अथ वा
14. A ऽनुक्तो for ऽनुषक्तः
15. P K °न्तत्वमङ्कुरो° for विच्छिन्नत्वान्न तास्वङ्कुरो
16. A स्याद्यस् for ताभ्यस्
17. A तस्यानन्यत्वं

साध्यम्। अतो न किञ्चिदेतत्। किञ्चान्यत्। रूपव्यवस्थानाच्च[1]। तद्यथा रूपविज्ञानोत्पत्तिहेतुत्वे[2] सति चक्षूरूपं[3] दृष्टमिति नेदानीं तत्सामान्याद् रूपमप्यरूपं[4] भवति। एवं[5] पटकारणत्वाद्वेमादयो न पट इति नेदानीं तन्तवोऽप्यपटः। तस्माद्युक्तमेतच्छक्तस्य[6] शक्यकरणात्सत्कार्यम् (इति(?))।

इतश्च सत्कार्यम्[7]।

कारणभावाच्च सत्कार्यम्[8] ॥ का० 9/4 ॥

इहासति कार्ये कारणभावो नास्ति, तद्यथा वन्ध्यायाः[9]। अस्ति चेह कारणभावस्तन्तुपटयोः[10]। तस्मात्सत्कार्यम्[11]। कारणान्तरात्कार्योत्पत्तिदर्शना[12]दन्यत्र तद्बुद्धिरिति चेत्, स्यान्मतम्। प्राक्कारणान्तरात्कार्यान्तरस्यासत उत्पत्तिमुपलभ्य पश्चात्कारणान्तरे कारणबुद्धिर्भवतीति। एतच्चायुक्तम्। कस्मात्? अनभ्युपगमात्। असतः कार्यस्योत्पत्तिरेव न सिद्धा[13], शशविषाणादिष्वसिद्धत्वात्[14]। कुतः पुनस्तन्निमित्ताकारबुद्धिः[15]? कारणभावादिति चेत्, स्यादेतत्। असत्त्वाविशेषेऽपि पटस्य कारणं समवाय्यसमवायिनिमित्तलक्षण[16]मस्ति। तस्मात्पट[17] उत्पद्यते[18], न शशविषाण[19]मिति। एतच्चायुक्तम्। कुतः?

---

1. A रूपवद् व्यवस्थानाच्
2. All the Mss read रूपं विज्ञानोत्पत्तिहेतुत्वे. I follow Raghavan (12.10), who anticipates Wezler (124.1). Raghavan however subsitutes हेतौ तु for हेतुत्वे and असति for the following सति.
3. P K D read न रूपं instead of चक्षूरूपं. A चक्षुरूपं Wezler (124.2) too adopts चक्षूरूपं.
4. D अपि रूप, sec.m. अप्यरूपं
5. P K D एव
6. P repeats छक्तस्य, and K adds शक्यस्य after एतच्छक्तस्य. D शक्तस्य, sec.m. शक्यस्य
7. P K D om. इतश्च सत्कार्यम्
8. A om. सत्कार्यम्
9. A वध्यायाः
10. K तत्वपटयोस् for तन्तुपटयोः
11. A om. सत् of सत्कार्यम्
12. A reads °कार्यांतरोत्पत्तिदर्शनाद्.
13. A तावदसिद्ध्य instead of न सिद्धा
14. A °विषाणादिषु सिद्धत्वात्
15. K °त्ताकारबुद्धेः A °त्ताकारणबुद्धिः
16. A om. समवाय्यसमवायिनिमित्तलक्षणम् D समवायासमवायिनिमित्त°, sec.m. समवाय्यसमवायिनिमित्त°
17. A omits तस्मात्पट ... पटस्य कारणमस्ति.
18. P K D read उच्यते for उत्पद्यते.
19. Chakravarti (64.23) and Pandeya (55) read शशविषाणस्य.

हेत्वभावात्। असत्त्वाविशेषेऽपि पटस्य कारणमस्ति न शशविषाणस्येत्यत्र[1] हेतुरनुक्तः। पुरुषवदिति चेत्, स्यादेतत्। यथा तुल्ये[2] सत्त्वे पटस्य कारणमस्ति न पुरुषस्य, एवमसत्त्वे पटस्य कारणमस्ति न शशविषाणस्येति। एतदप्ययुक्तम्। कस्मात्? उक्तत्वात्। संस्थानं कार्यम्। पटस्य[3] संस्थानं न पुरुषस्येत्युक्तं[4] प्राक् (132.9)। संस्थानवत्तद्विशेष इति चेत्, स्यान्मतम्। यथा सत्त्वाविशेषे पटः संस्थानं[5] न पुरुषः, एवमसत्त्वाविशेषे पटः कार्यं न शशविषाणमिति। एत[6]दप्ययुक्तम्। कस्मात्? सामान्यविशेषाभावात्[7]। सामान्यस्य हि विशेषपरिग्रहः संस्थानम्। न त्वयमस्ति चेतनाशक्तौ[8] विकल्पः। तस्मान्न पुरुषः संस्थानम्। असतस्तु निरात्मकत्वाद्विशेषो दुरुपपादः[9]। तदुपपत्तौ[10] वा सत्त्वप्रसङ्ग इति। आह च—

निरात्मकत्वादसतां सर्वेषामविशिष्टता ।
विशेषणं चेद् भिन्नं ते सत्त्वमभ्युपगम्यताम् ॥

तस्माद्युक्तमेतत्कारणभावाच्च सत्कार्यम् (का० 9)। एवं तावद्वैशेषिकमतेनासत्कार्यवादो न विमर्दसहः[11]। बौद्धपक्षे तु भूयान्दोषः।

कथं तर्हि[12] द्रव्यान्तरं पटो नेष्यते? "तन्तुष्वेव तथास्थेषु पट इत्यादिबुद्धयः" इत्येवमादिना न्यायेनावयविप्रतिषेधात्संयोगोऽपि न संयोगिभ्य[13]स्तेषामर्थान्तरमिष्टः। तत्रैतावती परिकल्पना स्यात्—य[14]दुत तन्तुसंयोगो वा पटः, संयोगकारणं[15] वा द्रव्यान्तरम्?

---

1. P K D omit अत्र ... कारणमस्ति न शशविषाणस्येति। ...(135.1-3).
2. All the Mss read तुल्यत्वे. I follow Wezler (124.17).
3. A परासा
4. P K D न पुरुषस्योक्तं A न पुरुष इत्युक्तं
5. A om. संस्थानं ... एवमसत्त्वाविशेषे पटः
6. A तद् for एतद्
7. A सामान्यविशेषभावात्
8. A चेतनशक्तौ
9. A दुरपसादस्
10. A तदुत्पत्तौ Chakravarti (64.28) reads तदुपपन्नौ. Raghavan's corrected reading (15(1).3) तदुपपत्तौ agrees with the reading (of the Mss) we have adopted.
11. A विमर्दक्षमः
12. A कथं तैर्हि
13. P K संयोगोपसंयोगिभ्यस् D संयोगोपसंयोगिभ्यस्, sec.m. संयोगोऽपि संयोगिभ्यस्
14. A om. यद्
15. P K संयोगकरणं

उभयं च तेषां नार्थान्तरम्। अथोत्पत्तिविनाशौ कस्यापीति मायाकारचेष्टितम्। तदपि चित्रतरोऽयमुपन्यासः। काणादानां[1] तु द्रव्यान्तरोत्पत्तिविनाशाभ्युपगमान्न तार्किकसदृशो विचारः। तस्मात्पारमर्ष एव पक्षो ज्यायान्। यथा चासत्कार्यं न संभवति तथा चशब्दात्[2] (का॰ 9) सदसत्कार्यमपि, परस्परविरोधात्। नैव सन्नासदित्येके[3]। एत[4]दप्यनुपपन्नम्। कस्मात्? सत्त्वे हेत्वभिधानात्[5]। (एवं) निश्चितः प्रागुत्पत्तेः कार्यस्य सद्भावः ॥ 9 ॥

प्रकृतमिदानीं वक्ष्यामः। किञ्च प्रकृतम्?

महदादि तच्च कार्यं[6] प्रकृतिविरूपं सरूपं[7] च। (का॰ 8)

इति वचनाद्वैरूप्यम्[8]।

आह[9]—प्राक्सारूप्यग्रहणम्, सुखप्रतिपत्तिहेतुत्वात्। अधिगतसारूप्यस्य हि सुखं वैरूप्यप्रतिपत्ति[10]र्भवतीति प्राक्सारूप्यग्रहणं कर्तव्यम्। यथा तन्त्रान्तरीयाणां "सदनित्यं द्रव्यवत्कार्यं कारणं[11] सामान्यविशेषवदिति द्रव्यगुणकर्मणामविशेषम्[12]"(1) उक्त्वा "द्रव्याणि द्रव्यान्तरमारभन्ते"(2) "गुणाश्च गुणान्तरम्"(3) इत्येवमादिर्विशेषो[13]ऽभिधीयते।

उच्यते—तदनुपपत्तिः। अविशेषात्। यथैवाधिगतसारूप्यस्य लघीयसी वैरूप्यप्रतिपत्तिरेवमधिगतवैरूप्यस्य लघीयसी सारूप्यप्रतिपत्तिः। कस्मात्? परस्परापेक्षत्वात्[14]। वैरूप्यापेक्षं हि सारूप्यम्, सारूप्यापेक्षं च वैरूप्यमिति।

---

1. P K D read कारणोपादानं instead of काणादानां.
2. A तथा शब्दात्, thus omitting च
3. P K D om. एके
4. A तद् for एतद्
5. A सत्त्वहेत्वभिधनात्
6. P K D om. कार्यं
7. A om. सरूपं
8. A K वचनाद् द्वैरूप्यम् P वचनाद् द्वैनूप्यं D वचनात् द्वैरूप्यम् I follow Chakravarti (65.16).
9. A आह च
10. P K D वैरूप्यस्य प्रतिपत्तिर्
11. All the Mss read कार्यकारणं. I follow Pandeya (55).
12. A अविशेषसामान्यम् for अविशेषम्
13. All the Mss read एवमादिविशेषो. I follow Pandeya (55).
14. A कस्मादपेक्ष्यत्वात्

---

(1) वै॰ सू॰ 1.1.7
(2) वै॰ सू॰ 1.1.8
(3) वै॰ सू॰ 1.1.9

आह—एवमपि वैरूप्यस्य प्रागभिधाने प्रयोजनवचनम्। द्वयो[1]रप्यविशेषेऽन्यतरस्य प्रागभिधाने नियमहेतुर्वक्तव्य इति।

उच्यते—न, वैरूप्यस्य प्रकरणानङ्गभावात्। विच्छिन्नं हि वैरूप्यमतस्तत्पूर्वमभिधाय प्रकरणाङ्गं सारूप्यं सुखमभिधातुमित्येवमर्थमाचार्येणैवं[2] क्रियते। कथं सारूप्यस्य प्रकरणाङ्गत्वमिति चेत्, त्रैगुण्याभिधानद्वारेण गुणलक्षणोपदेशात् तत्सिद्धौ चाविवेक्यादीनां[3] व्यक्तसिद्धेः, कारणगुणात्मकत्वाच्च कार्यस्य प्रधाने त्रैगुण्यादिप्रतिपत्तेः, कार्यकारणभावासन्देहाच्च प्रधानास्तित्वप्रसिद्ध्यपदेशा[4]त्तत्सिद्धौ च[5] भोग्यस्य[6] भोक्त्रपेक्षत्वात् पुरुषसिद्धेः, अधिगतभोक्तृभोग्यस्य च[7] तत्संयोगस्य[8] सुखप्रतिपाद्यत्वात्तादर्थ्याच्च तत्त्वभूतभावसर्गाणाम्[9]। तस्माद्युक्तमेतत्प्रकरणाङ्गत्वा[10]त्सारूप्यं पश्चान्निर्दिश्यते, तदसम्बन्धादितरत्प्रागिति।

आह—यदि तर्हि भवान्प्रा[11]ग्वैरूप्याभिधानं न्याय्यं[12] मन्यते, तद्वक्तव्यं किं पुनरिदं वैरूप्यमिति।

उच्यते[13]—

हेतुमदनित्यमव्यापि[14] सक्रियमनेकमाश्रितं लिङ्गम्।
सावयवं परतन्त्रं व्यक्तं[15] विपरीतमव्यक्तम्[16] ॥ का॰ 10॥

---

1. P K D om. अप्य्
2. P K D आचार्येणैव Raghavan's correction (15.3) agrees with the reading (of the Ms) we have adopted.
3. A omits चाविवेक्यादीनां ... तत्सिद्धौ.
4. D sec. m. प्रधानमस्ति प्रसिद्ध्यप॰
5. K om. च.
6. A भोग्यसा
7. P K D om. च
8. A तत्संयोगस्य च
9. A तत्त्वभावभूतसर्गाणां
10. A प्रकरणत्वात् for प्रकरणाङ्गत्वात्
11. A भावात् instead of भवान्प्राग्
12. P K D न्यायं
13. A om. उच्यते
14. D अस्यापि
15. A वक्तव्यम्
16. A om. विपरीतमव्यक्तम्

तत्र हेतुः कारणमित्यनर्थान्तरम्। तदस्यास्तीति **हेतुमत्**। नित्यं ध्रुवम्। न नित्य**मनित्यम्**। व्याप्नोतीति व्यापि। न **व्याप्यव्यापि**। असर्वगतमित्यर्थः। सह क्रियया **सक्रियम्**[1]। **अनेकं** भिन्नम्। **आश्रित**माधेयम्। **लिङ्गं** तल्लक्षणोपपन्नम्। अवयूयन्त इत्यवयवाः। पृथगुपलभ्यन्त इत्यर्थः। सहावयवैः **सावयवम्**। **परतन्त्र**मन्याधीनम्। एते हेतुमदादयः परतन्त्रान्ता निरपवादा व्यक्तस्यासाधारणाः प्रधानपुरुषाभ्यां धर्माः।

आह—हेतुमदित्यविशेषः, सर्वत्र सद्भावात्[2]। व्यक्ताव्यक्तपुरुषाणां हि सर्वेषां हेतुरस्तीति अविशेष एवायं पठितव्यः।

उच्यते—न, कारकपरिग्रहात्[3]। यद्यपि[4] व्यक्ताव्यक्तपुरुषाणामविशिष्टं हेतुमत्त्वम्, तथापि[5] विशिष्टस्य कारकस्य[6] हेतोः परिग्रहं करिष्यामः। स च व्यक्तस्यैव नान्यस्येति नायमविशेषो भविष्यति।

आह—तदनुपपत्तिः, विशेषानुपादानात्। हेतुरिति सामान्यशब्दोऽयम्। सामान्यशब्दश्च[7] नार्थप्रकरणशब्दान्तराभिसम्बन्धमन्तरेण विशेषेऽवतिष्ठत[8] इति विशेष उपादेयः स्यात्। स[9] तु नोपादीयते। तस्मात्ते अविशेष[10] एवायमिति[11]।

उच्यते—न, सर्वसम्भविनोऽभिधानस्य प्रकर्षार्थत्वात्। इह यः सर्वसम्भवी धर्म एकविषय उपादीयते, तस्मात्प्रकर्षो विज्ञायते। तद्यथा भोक्ता माणवक इत्युक्ते सर्वेषां भोक्तृत्वस्य सम्भवादेवं विज्ञायते प्रकर्षेणायं भोक्तेति, एवमिहापि सर्वसम्भवी[12]त्याहाचार्यो व्यक्तं **हेतुमदिति**। तेन[13] वयमस्मात्प्रकर्षं[14] विज्ञास्यामः। कश्च प्रकर्षः?

---

1. D सकिया सक्रियम्, sec.m. सक्रियम्
2. P K D सर्वत्रासम्भवात् Dkha. सर्वत्र सम्भवात्
3. A कारकप्रतिग्रहात्
4. A यत्रापि
5. A तत्रापि
6. D repeats the phrase कारकस्य हेतोः परिग्रहं करिष्यामः and then deletes the repeated one. Chakravarti (66.16) reads पुरुषस्य कारकस्य हेतोः instead of विशिष्टस्य कारकस्य हेतोः.
7. A सामान्यशब्दाच्
8. A ऽवतिष्ठन्त
9. A सा
10. Pandeya (56) and Tripathi (213) read अविशेषा.
11. A एव for एवायमिति
12. Wezler (127.25) emends it into सर्वसम्भविन्याह आचार्यो, which too seems plausible.
13. A and Dkha. ते D तेन, sec.m. ते
14. A अस्माकर्षं

कारकज्ञापकयोरुभयोरपि सम्भवे कारकस्यैव ग्रहणम्। अनित्यशब्दसम्बन्धा[1]द्वा। अथवाऽयमाचार्यो हेतुमदित्युक्त्वाऽनित्यमिति पठति। शब्दान्तराभिसम्बन्धाद् योऽनित्यसहचरो[2] हेतुस्तस्येह ग्रहणं गम्यते। कश्चानित्यसहचरो[3] हेतुः? कारकः।

आह—एवमप्यनुपपन्नमेतत्। कस्मात्? उभयत्र तत्सम्भवात्। उत्पाद्यव्यङ्ग्ययो[4]र्हि विनाशं[5] पटादिषु दृष्टत्वादव्यभिचारात्त[6]न्त्रान्तरीया मन्यन्ते। तस्य वा परिहारो वक्तव्यो न वा वक्तव्यो विशेषे स्थितिरस्तीति।

उच्यते—न, एकान्तवादप्रसङ्गात्। सर्वेण हि वादिनाऽवश्यं[7] किञ्चिन्नित्यम-[8]भ्युपगन्तव्यम्। अन्ततो[9] विनाशे[10]ऽपि न कश्चिदर्थः शब्दबुद्धिभ्यां न व्यज्यते[11]। तथा च[12] सत्येकान्तवादोऽयं स्यात्। स च युक्तिमद्भिर्नेष्यते। तथा च[13] संस्कृतमप्येवं कल्प्यमाने[14] विनाशि स्यात्। तस्मा[15]दुत्पाद्यव्यङ्ग्ययोर्विनाशं ब्रुवतोऽतिसाहसम्।

आह—अनित्यत्वानुपपत्तिः, सत्कार्यवादाभ्युपगमात्। यथैव[16] हि नासत उत्पत्तिरस्त्येवं सतोऽपि विनाशेन न भवितव्यम्। अथ सतो[17] विनाशोऽभ्युपगम्यते, तेन

---

[1] P K D अनित्यः शब्दः सम्बन्धाद् (वा)

[2] A अनित्यस्सहचरो

[3] Instead of कश्चानित्यसहचरो हेतुः P K D read तस्मान्नित्यसहचरो हेतुः कारकः, while Dkha. reads कस्मादनित्ये सहचरे हेतुः. Chakravarti (66.27) suggests तस्मान्न नित्यसहचरो ... . Raghavan (15(1).3) suggests तस्मादनित्य°.

[4] A उत्पादव्यंगयोर्

[5] P K D विनाशः

[6] Raghavan (15(1).3) suggests व्यभिचारात् in place of अव्यभिचारात्.

[7] A वादिनोऽवश्यं

[8] K कश्चिचन्नित्यम्

[9] Chakravarti (67.4) reads अन्यथा for अन्ततो.

[10] P विनाशो

[11] Chakravarti (67.5) reads न व्यज्येत. Raghavan (15(1).3) removes न but retains व्यज्येत.

[12] P K D om. च.

[13] P K D read तथ्यं for तथा च. Dkha. om. च

[14] P कल्पमाने

[15] A om. तस्माद्

[16] Tripathi (215) reads सर्वत्र instead of यथैव.

[17] P K D read सतोऽपि for सतो.

प्रलयकाले विनष्टानां तत्त्वादीनां[1] पश्चादसतामुत्पत्तिः सत्कार्यवादं[2] निराकुर्यात्। तस्मादनित्यं व्यक्त[3]मित्ययुक्तमिति[4]।

उच्यते—न, व्यक्त्यपगमप्रतिज्ञानात्[5]। सत्यमेव[6] वयं सतो विनाश[7]माचक्षाणाः सत्कार्यवादं[8] प्रत्याचक्षीमहि[9]। कारणाना[10]न्तु यः परस्परसंसर्गा[11]त्संस्थानविशेषपरिग्रहस्तस्य विरोधिशक्त्यन्तराविर्भावाद्[12] व्यक्तिस्तिरोधीयत इत्येतद् विनाशशब्देन विवक्षितम्। तथा च वार्षगणाः[13] पठन्ति—"तदेतत् त्रैलोक्यं[14] व्यक्तेरपैति, न सत्त्वात्। अपेतमप्यस्ति[15], विनाशप्रतिषेधात्[16]। संसर्गा[17]च्चास्य सौक्ष्म्यम्[18], सौक्ष्म्याच्चानुपलब्धिः। तस्माद् व्यक्त्यपगमो[19] विनाशः। स तु द्विविधः। आसर्गप्रलयात्तत्त्वानाम्, किञ्चित्कालावस्थाना[20]दितरेषाम्"(1)इति[21]।

---

1. D तत्त्वादीनां, sec.m. तन्त्वादीनां
2. A सत्कार्यवोदं
3. P युक्तम् for व्यक्तम्
4. P K D read अनित्यमेवेति in place of इति.
5. D व्यक्त्यपगप्रतिज्ञानात्, sec.m. व्यक्त्यपगमप्रतिज्ञानात्
6. P K D सदा for सत्यमेव
7. Chakravarti (67.12) reads सतोऽविनाशम्, which Raghavan (15(1).3) corrects into सतो विनाशम्. This latter agrees with the reading (of the Mss) adopted by us.
8. A सत्कार्यवाद
9. A प्रत्याचक्ष्माह D प्रत्याचखीमहि, sec.m. प्रत्याचक्षीमहि
10. Chakravarti (67.12) reads करणानां.
11. P K D परस्परं संसर्गात् for परस्परसंसर्गात्
12. A विरोधशक्त्यन्तरा°
13. A वार्षगणोः
14. A त्रैलोकां
15. A एस्ति for अस्ति
16. A विनाचप्रतिषेधात्
17. A असंसर्गाच्
18. A सौक्ष्माम्
19. A व्यक्त्यापगमो
20. P K D किंचित्कालान्तरावस्थानाद्
21. A अपि for इति

---

(1) Cf. यो॰ भा॰ 3.13; न्या॰ भा॰ 1.2.6; न्या॰ वा॰ 1.2.6

आह—अयुक्तमेतत्। कस्मात्? विप्रतिपत्तेः[1]। सर्वमेव क्षणिकं[2] बुद्धिबोध्यमाकाशनिरोधवर्जित[3]मिति शाक्यपुत्रीयाः प्रतिपन्नाः। तेषां प्रतिषेधो[4] वक्तव्यो न वा[5] वक्तव्यो[6] द्विविधमनित्यमिति।

उच्यते—न, हेत्वनुपगमात्। प्रतिक्षणमुच्छिद्यते त्रैलोक्यमित्यत्र लिङ्गमभियुक्ता अपि नोपलभामहे। तस्मान्नैतदस्माकं[7] बुद्धाववतिष्ठत इति।

आह—अन्ते क्षयदर्शनात्। इह यस्यान्ते क्षयस्तस्य क्षणिकत्वं दृष्टम्, तद्यथा प्रदीपज्वालाबुद्धिशब्दानाम्[8]। अस्ति चान्ते क्षयः संस्काराणाम्[9]। तस्मात् क्षणिकाः।

उच्यते—तदनुपपत्तिः, साध्यत्वात्। इह तु सिद्धेनातिदेशो[10] भवति। तद्यथा गवा[11] गवयस्य। न तु प्रदीपज्वालाबुद्धिशब्दानां क्षणिकत्वं प्रसिद्धम्। अतो न किञ्चिदेतत्।

आह—नैतदप्रसिद्धम्। कस्मात्? वृद्ध्यदर्शनात्[12]। यदि हि अविनष्टायां ज्वालायामिन्धनान्तरे[13] ज्वालान्तरमुत्पद्येत, वृद्धिः[14] स्यात्। न तु दृश्यते। तस्मादनवस्थिता प्रदीपज्वाला। किञ्च, आश्रयाभावात्। यदाश्रया ज्वालोत्पत्तिस्तदुत्पद्यमानैवासौ निरुणद्धीति न युक्तमस्या विनाऽऽश्रयेणावस्थातुम्। उपयुक्तेन्धनाया (अप्य)वस्थानप्रसङ्गात्[15]। किञ्च, आवरणोपनिपातेन[16] प्रभाभेदप्रसङ्गात्। ज्वालानामवस्थानमिच्छत उपरिष्टादावरणोपनिपातात्प्रभायास्तन्तोरिव[17]

---

1. A विप्रतिपत्तैः
2. A क्षणिकत्वं
3. A बुद्धिर्बोध्यसकाशनिरोधवर्जितम्
4. A प्रतिषेधा
5. P K D वा न
6. Tripathi (216) suggests वक्तव्यं instead.
7. A युक्तमस्माकं
8. A om. बुद्धि.
9. A संस्कारोणाम्
10. A सिद्धत्वेनातिदेशो
11. Tripathi (216–217) omits गवा.
12. Dkha. वृद्धावदर्शतात् वृष्ट्यावदर्शनात्
13. P K D इन्धनान्तराले
14. P K D वृद्धावपि Chakravarti (68.6) reads वृद्धिरपि.
15. P K D अव्यवस्थानप्रसंगात् A अवस्थानप्रसंगात् I follow Chakravarti (68.8).
16. P आवरणोपरिपाते K D आवरणोपनिपाते A आवरणैपनिपातेन
17. Dkha. तनोरिव for तन्तोरिव

द्वैधीकरणं स्यात्। अनिष्टं चैतत्। तस्मान्न दीपज्वालाना[1]मवस्थितिरस्तीति। एतेन शब्दोऽपि प्रत्युक्तः। कथम्? तस्यापि यदि विनाशो न स्यात्[2], द्रुतपवनाम्बुधाराभिघातात् प्रतिक्षणमपूर्वशब्दाविर्भावात् पूर्वशब्दाविनाशाच्च[3] वृद्धिः स्यात्। अदृष्टा चासौ। किञ्च, प्रत्यक्षत उपलब्धेः[4]। पाण्युपघातजो[5] हि शब्द उत्पत्तेरूर्ध्वं न भवतीति प्रत्यक्षसिद्धमिदम्। अभिव्यक्ते[6]रिति चेन्न, नियमादर्शनात्[7]। शब्दानां हि[8] वाच्यवक्तृभेदभिन्नानां कारणनियमो दृष्टः। न चैतदस्ति समानेन्द्रियग्राह्याणाम्। किञ्च, पृथक् श्रुतेः। अभिव्यक्तिकारणदेशाच्च[9] पृथक् श्रूयते शब्दः। न चैतदभिव्यक्तानां[10] घटादीनां दृष्टमिति क्षणिकाः[11]। बुद्धेस्तु[12] प्रागेवोक्ता[13] नाशहेतवः। तत्र यदुक्तं साध्यत्वात्प्रदीपज्वालाबुद्धिशब्दादीनां क्षणिकत्वस्य न संस्काराः क्षणिका इति, एतदयुक्तम्।

उच्यते—यदुक्तं (141.10) वृद्ध्यदर्शनादिति, अत्र ब्रूमः—अयुक्तमेतत्। कस्मात्? विशेषप्रतिपत्तेः। क्षणिक[14]मित्युक्तपरिमाणो[15]ऽयं कालनिर्देश आश्रीयते। वृद्ध्यभावादिभ्यश्च कदाचिद्विनाशमात्रं प्रतीयते। स तु विनाश[16] एकक्षण[17]मवस्थितानां ज्वालानां भवति न पुनः क्षणद्वयं त्रयं[18] वा पर्युषितानामित्यत्र हेतु(र्नोक्तः[19])। तस्माद्युक्तमप्येतदनुक्तम्।

---

1. A दीपे ज्वालानाम्
2. A विनाशस्स्याद्
3. P D अपूर्वशब्दाविर्भावात्
   पूर्वशब्दविनाशाच् K °शब्दविनाशाच्च A अपूर्वशब्दाविर्भावात्पूर्वशब्दा विर्भावादपूर्वशब्दविनाशाच्
   I follow Pandeya (57).
4. A उपलब्धौः
5. A प्रोण्युपघातजो
6. P K D अभिव्यक्तिर्
7. Pandeya (57) reads नियमदर्शनात्, apparently following Raghavan (12.11). Tripathi (218) follows Pandeya.
8. P K D om. हि
9. Pandeya (57) reads अभिव्यक्तिकरण°.
10. P अभिव्यङ्गानां K D अभिव्यंग्यानां
11. K क्षणिक
12. P K D इतिक्षणिकबुद्धेस्
13. A प्रागेव for प्रागेवोक्ता
14. A क्षणिकत्वम्
15. K अक्तपरिमाणो D अत्यक्तपरिमाणो
16. P K D om. विनाश
17. D क्षणमेकम्, sec.m. एकं क्षणम् In A there is a blank space between विनाश and मवस्थितानां in place of एकं क्षणम्.
18. P K D omit त्रयं ... न पुनः (क्षणद्वयमवस्थितस्य) (142.12-143.2).
19. A हेतु After हेतु there is a blank space in A instead of (र्नोक्तः). I follow Wezler (130.19) in adding it.

यत्पुनरेतदुक्तम् (141.11) इन्धनानवस्थानाज्ज्वालानवस्थानमित्यत्र ब्रूमः—एतदप्यनुपपन्नम्। (कस्मात्?) साध्यत्वात्। क्षणमवस्थितस्येन्धनस्य निरोधो[1] न पुनः (क्षणद्वयमवस्थितस्य) इत्येत[2]दप्रमाणकम्। आज्ञामात्रादगृहीतशिक्षाकः[3] कः[4] प्रतिपत्तुमुत्सहते?

यत्तूक्तम् (141.13f.) आवरणोपनिपातात्प्रभाभेदप्रसङ्ग इति, एतदप्ययुक्तम्। कस्मात्? उभयथाऽनुपपत्तेः। किं तावद् यस्य द्वैधीभावो दृष्टस्तदक्षणिकम्[5], आहोस्विद्यस्य न दृष्टस्तत्क्षणिकमिति? किञ्चातः? तद्यदि तावदेवमभ्युपगम्यते यस्य द्वैधीभावस्तदक्षणिकमिति, तन्तोरक्षणिकत्वप्रसङ्गः। अथ मतं यस्य द्वैधीकरणं न दृष्टं तत्क्षणिकमिति—यथा किमित्युदाहार्यम्[6]। कुतः? यस्मान्न ह्य[7]स्त्यनुदाहृतो[8] वादः। एतेन शब्दवृद्धिः प्रत्युक्ता। यत्पुनरेतदुक्तं (142.4) पाण्युपघातजशब्दानवस्थाना[9]दिति, तत्र भवतैवोक्तम्, व्यङ्ग्यत्वा[10]दिति। यत्तूक्तं (142.5) नियमादर्शना[11]न्न व्यङ्ग्यः शब्द इति, तदयुक्तम्। अनेकान्तात्[12]। यथा शुक्लकृष्णौ नियमतः शुक्लकृष्णशब्दाभ्यां प्रत्याय्येते, न[13] च तौ तयोर्न व्यङ्ग्यौ[14], एवं शब्दस्यापि वक्तृवाच्यादिनियमः[15] स्यात्, न चाव्यङ्ग्यः स्यात्। यदप्युक्तं (142.5) व्यङ्ग्यव्यञ्जकयोर्देशभेदानुपपत्तेर्न[16] व्यङ्ग्यः शब्द इति, तदप्ययुक्तम्। कस्मात्? चक्षुर्वत्तत्सिद्धेः[17]। तद्यथा चक्षुषो रूपस्य च देशभेदेऽपि

---

1. A विरोधः I follow Pandeya (58).
2. After न पुनः A shows a blank space instead of (क्षणद्वयमवस्थितस्य) इत्येत-.
3. P K D आज्ञामात्रा च गृहीतशिक्षाकः
4. A om. कः.
5. A अक्षणिकत्वम्
6. P K D किमत्रोदाहरणम्
7. P K D om. अस्ति
8. D अनुहृतो
9. A प्राण्युपघातशब्दानवस्थानाद्
10. A व्यङ्गत्वाद्
11. A नियमदर्शनान् Chakravarti (69.2) and Pandeya (58) read नियमदर्शनान् instead of नियमादर्शनान्. Raghavan's correction (15(1).4) agrees with the reading (of the Mss) adopted by us.
12. A अनैकान्तात्
13. P K D प्रत्यायेते न A प्रतायो तेन I follow Chakravarti (69.3), who anticipates Pandeya (58).
14. A व्यंगौ
15. P K D वक्तृवादिनियमः A वकृवाक्यादिनियमः I follow Raghavan (15(1).4).
16. A ने for न
17. P K D तदसिद्धेः

व्यङ्ग्यव्यञ्जकभावः, एवं[1] शब्दस्यापि स्यात्। तस्मान्न शब्दोऽपि क्षणिकः। बुद्धेस्तु स्वाधिकार एव क्षणिकत्वहेतुनिराकरणं[2] वक्ष्यामः। तत्र यदुक्तम् (141.6-7) अन्ते क्षयदर्शनात् प्रदीपज्वालाबुद्धिशब्दवत्क्षणिकाः संस्कारा इत्येतदयुक्तमिति।

आह—इतस्तर्हि प्रदीपादीना[3]मन्येषां च भावानां क्षणिकत्वम्। कुतः? अवस्थाने हेत्वभावात्[4]। नष्ट[5]श्चेदर्थोऽभ्युपगम्यते[6], ननु[7] प्राप्तमिदमुत्पन्नमात्रस्यास्य विनाशविघ्नो नास्तीति तावत्येव[8] विनाशेन[9] भवितव्यम्। अथासति प्रतिबन्धे न विनाशः स्यादिति[10] कौटस्थ्यं सर्वभावानां प्राप्तमिति।

उच्यते—न, कारणोपपत्तेः। अधिकारो हि सर्व(भावा)नां[11] संस्कारवशादुत्पत्तिः। तस्मात्तदवस्थान[12]मेव[13] तेषामलं स्थितये। सति विनश्वरत्वे संस्कारोपयोगे तु स्थित्यपभ्रंश इत्यतोऽस्ति कश्चित्कालमवस्थानं भावानाम्[14]। न च कौटस्थ्यप्रसङ्गः।

किञ्चान्यत्। सन्ततिविनाशप्रसङ्गात्। नंष्टु[15]श्चेदुत्पत्तिसमनन्तरं विनाश इष्यते, सन्ततिरप्यन्ते क्षयदर्शनान्नंष्ट्री[16]। तस्या अपि तथैव विनाशः प्राप्तः। ततश्च तडिद्विलसित-

---

[1] P एव

[2] P K D क्षणिकत्वहेतुरिति करणे

[3] A प्रदीपानाम्

[4] A हेत्यभावात्

[5] All the Mss read नष्टा. I follow Pandeya (58).

[6] P reads अनवस्थानहेत्वभाव and after four dots reads दृष्टादर्थोऽभ्यपगम्यते. K and D read अनवस्थानहेत्वभाव, and after three dots read ष्टा चेदर्थोऽभ्युपगम्यते.

[7] A तत् for ननु

[8] P K D omit तावत्येव ... विनाशः (स्यादिति).

[9] A विनोशेन

[10] A विनाशो स्वाति I follow Pandeya (58).

[11] All the Mss read सर्वभूतानां.

[12] P K read त .... द् in place of तस्मात्तदवस्थानम्. D त .... देव स्थानम्

[13] A om. एव ... कश्चित्कालमवस्थानं

[14] A भवानां

[15] A नष्टुश्

[16] A नष्ट्री

वत्क्षणदृष्टनष्टस्य[1] त्रैलोक्यस्याभावे[2] संसारोच्छेदप्रसङ्गः। तस्मादयुक्तं नंष्टु[3]रुत्पत्तिसमकालमेव विनाश इति। कारणानवस्थानान्न[4] दोष इति चेत्, स्यान्मतम्। अस्ति कारणं पूर्वोत्पन्नो भाव उत्तरस्योत्पत्तौ, स चाप्युत्तरस्य इत्येवं सन्ततेरनुच्छेदः। विरोधिभावान्तरसंसर्गा[5]त्तूभयतस्तथोत्पत्तेर्भ्रंश[6] इति। एतदप्ययुक्तम्। कस्मात्? पूर्वहेतुत्यागात्। प्रागुक्तं येन नंष्टव्य[7]मसौ मन्त्रौषधमंगलप्रयोगै[8]रपि क्षणादूर्ध्वं[9] नावतिष्ठते। साम्प्रतं तु नंष्ट्री संततिः कारणवशादवतिष्ठत इति सोऽयं पूर्वहेतुत्यागः। विनाशहेत्वभावात्क्षणिकत्वमिति चेत्, स्यादेतत्—नास्ति भावानां विनाशहेतोरुपलम्भ इति। अतः स्वाभाविकः प्रध्वंसः। तस्मादुत्पत्तिसमकाल[10]मसौ केन वार्यते (इति)? त[11]दप्ययुक्तम्। कस्मात्? अनभ्युपगमात्। को ह्येतदवमंस्यति[12] अहेतुको[13] विनाशः (इति)। किं तर्हि। प्रागेवोक्तं (144.8) (संस्कार)वशाद्[14] भावानां स्थितिः (तदवस्थितानां चापभ्रंशो)[15] विरोधिद्रव्यान्तरसंबन्धेनाध्यात्मिकादिना[16] भवतीति। विनाशस्य विनाशप्रसङ्गादयुक्तमिति चेत्, स्यादेतत्[17]। यदि तर्ह्यभावोऽपि हेतुमान्परिकल्प्यते, प्राप्तमस्यापि विनाशित्वम्[18]। अनिष्टं[19]

---

1. P K D क्षणदृष्टिनष्टस्य D strikes off an unclear word between क्षण and दृष्टि. Raghavan's corrected reading क्षणदृष्टनष्टस्य (15(1).4) agrees with the reading (of the Ms) we have adopted.
2. P K D त्रैलोक्यस्याभावः
3. A नष्टुस्
4. Both Pandeya (58) and Tripathi (223) read कारणावस्थानान्न.
5. A विरोधिभावान्तरसम्पर्कात्
6. A भ्रूंश
7. A नष्टाव्यम्
8. A असौषधमंगलप्रयोगैर्
9. A ऊर्ध्व
10. A उत्पत्तिसमयकालम्
11. P K D इदं for तद्
12. Wezler (132.18) emends it as एतदेव मंस्यति.
13. P K D leave blank space between को ह्ये and अहेतुको.
14. All the Mss read अर्थवशाद्. I follow Wezler (132.19).
15. There is a missing link after स्थितिः, which is supplied by Wezler (132.19). I follow him.
16. P K D have lacuna after तदव. Thus स्थितिस्तदव ... विरोधि°. But A reads स्थितिस्त ... मानं चापभ्रशो विरोधि°.
17. P K D omit स्यादेतत्.
18. A घटवद् विनाशित्वम्
19. A अनिष्ट

चैतत्। तस्मादहेतुको विनाश इति। एतद[1]प्ययुक्तम्। कस्मात्? व्यक्त्यपगमप्रतिज्ञानात्। भावविनाशवादिनं[2] प्रति सत्यमेवाय[3]मुपालम्भः स्यात्। व्यक्त्यपगमस्तु नो विनाशः[4]। स च[5] हेतुमत्त्वेन कथं विरोत्स्यत इति[6]? तस्मान्न विनाशहेत्वभावात्क्षणिकं संस्कृतमिति।

इतश्च न क्षणिकम्। कस्मात्? अग्रहणप्रसङ्गात्[7]। इहासतोऽग्रहणं दृष्टम्, तद्यथा द्वितीयस्य शिरसः। क्षणादूर्ध्वं च ते घटादयो न भवन्ति। तस्मात्तेषामप्यग्रहणप्रसङ्गः। तत्सदृशोत्पत्तेरदोष[8] इति चेत्, स्यादेतत्। उत्पत्तिसमकालं निरोधे[9]ऽपि घटस्यान्यस्य तादृशस्योत्पत्तिर्भवति, तन्निरोधोऽन्यस्येत्येवमविच्छेदेन ग्रहणं भवति, ज्वालानदीस्रोतोऽनुसन्धानवदिति। एतदप्ययुक्तम्। कुतः? कारणाभावात्। स्यादेतदेवं यदि तदानीं सदृशोत्पत्तौ कारणं स्यात्। न तु तदस्ति, प्रागेव निरोधात्। तस्मादसदेतत्। पूर्वोत्पन्नस्य कारणभावात्तत्सिद्धिरिति चेन्न, उपादानात् तन्निष्पत्तिप्रसिद्धेः। इहोपादानान्मृत्पिण्डकसंज्ञकाल्लोके घटनिष्पत्तिः प्रसिद्धा। न च तदानीमस्ति मृत्पिण्डः। किञ्च क्रमाऽनुपलब्धेः। इह शिविकादीना[10]मनुक्रमेण घटोत्पत्तिरुपलभ्यते। न चानुक्रमोऽस्ति। किञ्च कारकसामग्र्यभावात्[11]। इह कुम्भकारदण्डचक्रसूत्रोपलसामग्र्याद् घटनिष्पत्तिः प्रसिद्धा। न चास्त्येषां तत्र सम्भवः। किञ्च तदुत्पाद्यान्तरोत्पाद्यस्यानिष्पत्तेः[12]। इह घटाद् घटनिर्वृत्ति[13]र्न प्रसिद्धा लोके। न चाप्रसिद्धोऽस्ति दृष्टान्तः। बुद्धिशब्दवदिति चेत्, स्यादेतत्—यथा बुद्धिर्बुद्ध्यन्तरं सदृशं सूते शब्दश्च शब्दान्तरम्, एवं घटाद् घटनिष्पत्तिर्भवतीति। एतदप्यसत्। कस्मात्? (सिद्धत्वात्।) सिद्धं हि बुद्धेर्बुद्ध्यन्तरं शब्दाच्च शब्दान्तरं जायत इत्येतदप्यस्माकं प्रसिद्धम्। तस्मात्प्रलापमात्रमेतत्। तत्र यदुक्तं (146.5-6) सदृशोत्पत्तेः सोऽयमिति ग्रहणमविच्छिन्नं क्षणिकत्वेऽपि भावानामित्येतदयुक्तम्।

---

[1] P K D omit अपि.

[2] P K अभावविनाशिनं for भावविनाशवादिनं D अभावविनाशनं

[3] A corrects एव वायम् into एवायम्.

[4] A नाविनाशः for नो विनाशः

[5] P K D तु for च

[6] A shows a lacuna instead of विरोत्स्यत इति.

[7] P K D omit अग्रहणप्रसङ्गात्... असिद्धोऽस्यै विशे (146.5–147.20).

[8] A तत्सदृशौत्पत्तेर्

[9] A उत्पत्तिसमकालविरोधे I follow Pandeya (59).

[10] Wezler (133.13) proposes शिवकादिनानु°.

[11] A कारकसामर्थ्याग्राभावात् I follow Pandeya (59).

[12] A तदुपाधयानुरुपाधयस्यानिष्पत्तेः

[13] A घटे निर्वृतिर्

किञ्चान्यत्। कार्योत्पत्तिकाले कारणनिवृत्तेः। यदा न कारणमस्ति, न तदा कार्यमुत्पद्यते, द्वयोर्घटयोर्युगपदुपलब्धिप्रसङ्गात्। यदा तु कार्यमुत्पद्यते, तदा कारणं निरुद्ध[1]मिति निर्बीजः[2] प्रादुर्भावः प्राप्नोति। अनिष्टं चैतत्, सततोत्पत्तिप्रसङ्गात्। अनुत्पन्ने हेतुसामर्थ्याददोष इति चेत्, स्यादेतत्[3]। अनुत्पन्ने कार्ये कारणेन प्रयोजनम्, उत्पन्ने तद्व्यापारानर्थक्यात्। अस्ति चानुत्पन्ने कार्ये कारणम्। अतो न निर्बीजः प्रादुर्भाव इति। एतदप्ययुक्तम्। कस्मात्? अभावेऽपि तदुत्पत्तिप्रसङ्गात्। अङ्ग तावद् अणुशो विभज्यन्तामग्नौ वा क्षिप्यन्ताम्, तन्तवस्तदापि प्रसिद्धविनाशानामभूवन्निति शक्यमुपदेष्टुं यद्(ए)तेभ्यः पट उत्पद्यते। तस्माद् भ्रान्तिरियम्। युगपत् कार्यकारणयो-रुत्पत्तिनिरोधौ तुलानतोन्नतवदिति चेत्, स्यादेतत्। यथा नामोन्नामौ तुलान्त(यो[4]) यौंगपद्येन[5] भवत एवमुत्पत्तिविनाशौ कार्यकारणयोरिति। तदप्ययुक्तम्। कस्मात्? कार्यकारणभावाऽदर्शनात्। किमिदमुदके निमज्जद्भिः फेनमवलम्ब्यते? तुल्या तस्य[6] ह्येकस्यावनतिरवस्था तद् द्वितीयस्योन्नतये हेतुर्भवति। भवतः कारणविनाशः कार्योत्पत्तिश्च यौगपद्येन भवतः। न च तयोर्हेतुमद्भावः शक्यः कल्पयितुम्। तस्मादयुक्तमेतत्। विशेषग्रहणात् क्षणिकत्वसिद्धिरिति चेत्, स्यान्मतम्। यद्युत्पन्नमात्रोपरतिर्नास्ति भावानाम्, किंकृतः शरीरादीनां प्राणापानश्रम[7]रूपादिकृतोऽब्जाश्मप्रभृतीनां च शीतोष्णस्पर्शकृतो भेदः? घण्टादीनां चाशब्दकानां पश्चाच्छब्दवतां ग्रहणम्। तस्मादनिषिद्धः क्षणभङ्ग इत्येतच्चायुक्तम्। कस्मात्? उक्तत्वात्। उक्तम् (146.9) अत्रोत्तरं कारणाऽभावेऽनुत्पत्तिप्रसङ्गादिति। किञ्च संस्थानान्तराऽनुपलब्धेः[8]। न ह्यत्र पूर्वसंस्थानविपरीतं संस्थानान्तरं गृह्णीमहे। तस्मादविशिष्टास्त इत्येवमवगम्यताम्। विशेषग्रहणन्त्ववस्थान्तरानुग्रहः[9] शक्त्यन्तराविर्भावात्। उक्तं च—व्यक्तेर[10]पगमोऽभीष्टः पूर्वसंस्थानहानितः। तदभावादसिद्धोऽस्यै विशे ...[11] ॥ 10 ॥

[(आह[12]—......) नासहचरभावो दृष्टस्तमःप्रकाशवत्। तस्मादन्योन्यमिथुनत्वमनुपपन्नम्।

---

[1] A विरोधम् I follow Pandeya (59).

[2] A निबीजः I follow Pandeya (59).

[3] A स्यात् तद् for स्यादेतत्

[4] A तुलान्तर्यार्

[5] A योगपद्येन I follow Pandeya (59).

[6] I follow Wezler (134.5) in deleting तस्य.

[7] A प्राणापानाश्रम° I follow Pandeya (60).

[8] A स्थानांवरानुपपलब्धेर् I follow Pandeya (60).

[9] A अक्स्त्वंतरानुग्रहे

[10] A व्यक्तर् I follow Pandeya (60).

[11] A ends here. Tripathi (229, fn.1) however thinks that the blank should be filled in by the phrase विशेषस्य परिग्रहः. The text of the commentary (YD) upon kārikās 11 and 12, if there was any, is lost.

[12] In adding आह I follow Wezler (134.19). The text (आह ......) ... कथमिति। उच्यते (147.21–148.5) within [ ] is not found in any of the Mss. D introduces this text by: ख°पुस्तके एष अधिकोऽस्ति पाठः, and corrects नामाह चरभावो into नासहचर° in the margin on the left. I put the text within [ ] just because it is not found in any other Ms, *not* because it is unnecessary.

उच्यते—यत्तावदुक्तं गुणानां नानात्वाभावः[1] स्वभावव्यतिकरोपलम्भादित्यत्र ब्रूमः, यदि खल्विदमिष्यते[2] स्वभावव्यतिकरग्रहणाद् गुणानां नास्ति नानात्वमिति, किं प्राप्तम्। यद्येषां सङ्कीर्णः[3] स्वभाव उपलभ्येत[4], न स्यादेषां नानात्वम्। अस्ति चैषामसङ्कीर्णस्वभावोपलम्भः। कथमिति?

उच्यते—]

सत्त्वं लघु प्रकाशकमिष्ट[5]मुपष्टम्भकं चलं च रजः।
गुरु वरणकमेव तमः (का॰ 13/1-3)

एवशब्दः प्रत्येकं परिसमाप्यते। सत्त्वं लघु प्रकाशकमेवेष्टम्। यत् किञ्चित्कार्यकरणे **लघु प्रकाशं** च तत्सत्त्वरूपमिति प्रत्यवगन्तव्यम्। तत्र कार्यस्य तावदुद्गमनहेतु-[6] धर्मो लघुत्वम्, करणस्य वृत्तिपटुत्वहेतुः। प्रकाश[7]स्तु पृथिवीधर्मस्य च्छायालक्षणस्य तमसस्तिरस्कारेण द्रव्यान्तरप्रकाशनम्। करणस्यापि ग्रहणं सङ्कल्पाभिमानाध्यवसायविषयेषु यथास्वं प्रवर्तमानम्[8]। **उपष्टम्भकं चलमेव रजः।** यः कश्चिदुपष्टम्भश्चलता चोपलभ्यते तद्रजोरूपमित्यवगन्तव्यम्। तत्रोपष्टम्भः प्रयत्नः, चलता क्रिया। सा च द्विविधा, परिणामलक्षणा प्रस्पन्द[9]लक्षणा च। तत्र परिणामलक्षणया सहकारिभावान्तरानुगृहीतस्य धर्मिणः पूर्वधर्मात्प्रच्युतिः। प्रस्पन्दलक्षणा प्राणादयः कर्मेन्द्रियवृत्तय[10]श्च वचनाद्याः। बाह्यानां द्रव्याणा[11]मुत्पतननिपतनभ्रमणादीनि। **गुरुवरणकमेव तमः।** यत्किञ्चिद् गौरवं वरणं चोपलभ्यते तत्तमोरूपमिति प्रत्यवगन्तव्यम्। तत्र गुरुत्वं कार्यस्याधोगमनहेतु-[12] धर्मः, करणस्य वृत्तिमन्दता। वरणमपि कार्यगतं च द्रव्यान्तरतिरोधानम्। करणगता

---

[1] Dkha. नानात्वभावः I follow Wezler (134.21).

[2] Dkha. इदमुच्यते स्व इष्यते, sec.m. इदं इष्यते

[3] Dkha. एषामसंकीर्णः, sec.m. एषां संकीर्णः

[4] Dkha. स्वभावः प्र उपलभ्येत, sec.m. स्वभावः उपलभ्येत

[5] D प्रकाशकं, sec.m. प्रकाशकमिष्टम्

[6] D उद्गमहेतुः, sec.m. उद्गमनहेतुः Dkha. उद्गमनहेतुर्

[7] Dkha. प्रकाशकस् for प्रकाशस्

[8] D प्रवर्तनम्

[9] Chakravarti (70.17) reads प्रस्यन्द for प्रस्पन्द. He does so invariably.

[10] D कर्मेन्द्रियवृत्तैश्

[11] D वचनद्रव्याणाम्, sec. m द्रव्याणाम्

[12] Dkha. कार्यस्यानुमानहेतुर्

चाशुद्धिः प्रकाशप्रतिद्वन्द्वीभूता[1]। इत्येष सत्त्वादीनामव्यतिकरेण स्वभावोपलम्भो, यत[2] एषां नानात्वमवसीयते।

यत्पुनरेतदुक्तं स्त्रीक्षत्रमेघेषु[3] स्वभावव्यतिकरोपलम्भादेको गुणस्त्रिरूपः, सर्वे वा सर्वरूपा, रूपान्तरस्य वा सत[4] उत्पत्तिरिति, अत्र ब्रूमः—न, गुणभूतस्य भक्तित उपकारात्प्रधानरूपोपपत्तेः। इह गुणभूतस्य भक्तितः प्रधानोपकारित्वे सति भक्तितस्तद्रूपोपपत्ति[5]र्दृष्टा। तद्यथा क्षीरादेः। तद्धि[6] मुखादिषु दृष्टप्रतिलब्धप्रवृत्ति[7] पित्तस्य स्वेन रूपेणाङ्गभावं गच्छंस्तस्यो[8]पकारात्तिक्तं संपद्यते, न च तथा सदेव। सत्त्वमपि स्त्रैणं गुणभूतं[9] सपत्नीरजसः स्वेन रूपेणाङ्गभावं गच्छ[10]न्स्तस्योपकाराद् दुःखं संपद्यते। तमसो मोहः। एवं क्षात्रं रज आर्यदारलक्षणस्य[11] सत्त्वस्य दस्युलक्षणस्य च तमसः। एवं मेघ्यं तमः कार्षकस्य सत्त्वस्य[12] प्रोषितदयितायाश्च रजसः। तस्मान्नास्ति गुणानां स्वभावव्यतिकरः। किञ्चान्यत्। अगुणभूतानां स्वभावग्रहणात्। यदा चैतेऽङ्गभावमुपगच्छन्तो मध्यस्थास्तुल्यसंस्काराश्च प्रतिपद्यन्ते, तदा स्वरूपेणैव[13]। तस्मादसङ्कीर्णं गुणरूपम्।

आह—न, सन्देहात्। उभयथा हि रूपान्तरग्रहणं क्षीरादिषु दृष्टम्। ताद्रूप्यात्तैश्च विपरिणतानां गुणभावाच्च, यथोक्तम्। तत्र कथमिदमेकान्तेन निश्चीयते गुणभावात्सत्त्वादीनां रूपान्तरग्रहणं न पुनस्ताद्रूप्यादेवेति?

उच्यते—ग्रहणविकल्पोपलम्भात्। यदि स्त्रैणं सत्त्वं ताद्रूप्यादेव सपत्न्या {तेन}[14] गृह्यते, तेन भर्तुरपि तथा ग्रहणप्रसङ्गो मध्यस्थानां तुल्यसंस्काराणां च। अनिष्टं

---

[1] All the Mss read प्रतिद्वन्द्विभूता.

[2] D इत

[3] D सूत्रे क्षत्रमेघेषु

[4] Raghavan (15(1).4) and (following him), Wezler (135.17) read वासतः.

[5] All the Mss read तद्रूपापत्तिर्.

[6] D सद्धि, sec.m. तद्धि

[7] All the Mss read °प्रवृत्तिः.

[8] Wezler (135.21) reads गच्छत्तस्यो°.

[9] All the Mss read स्त्रैणगुणभूतं.

[10] Wezler (136.1) reads गच्छत्तस्यो°.

[11] Raghavan (15(1).4) suggests आर्यदारक (in the sense of आर्यपुत्र) or आर्योदार.

[12] P K कार्षिकसत्त्वस्य D कार्षकसत्त्वस्य Pandeya (60) proposes कार्षिके सत्त्वस्य. I follow Wezler (136.4).

[13] Wezler (136.7) thinks that some word(s) are missing after तदा and after स्वरूपेणैव.

[14] तेन, which is the reading in all Mss, looks here superfluous. Wezler (136.13) replaces it by दुःखेन.

चैतत्। तस्माद् भाक्तोऽयं (ग्रहण)विकल्पोपलम्भः[1]। किञ्चान्यत्। उत्तरकालं स्वरूपग्रहणान्निवृत्तानुशयाभिश्चैकार्थतामुपगताभिः सपत्नीभिः स्वेनैव रूपेण स्त्रैणस्य सत्त्वस्य ग्रहणमुपलभ्यते। स्वगृहसमवस्थितैश्चार्यदारैः क्षत्रियाणाम्। निष्पन्नशस्यैश्च कृषीवलैर्मेघानाम्। तस्माद् भाक्तोऽयं ग्रहणविकल्पोपलम्भः। तस्माद्युक्तमेतदन्योन्यजननवृत्तयो गुणाः, न च सङ्कीर्णस्वभावा इति।

यत्पुनरेतदुक्तमन्योन्यमिथुनत्वानुपपत्तिः सत्त्वस्येतरविरोधादित्यत्र[2] ब्रूमः—अस्ति चायं विरोधे गुणानां—

प्रदीपवच्चार्थतो वृत्तिः ॥ का॰ 13/4 ॥

किम्? उपपद्यत इति वाक्यशेषः। तद्यथा वर्तिज्योतिस्तैलानां परस्परविरोधेऽपि प्रदीपकरणैककार्यसाधनभावोपगतानां वृत्तय एकत्र संमूर्छिताः सहभावं प्रकृष्टमपि कालमनुभवन्ति, एवं सत्त्वरजस्तमसां सति विरोधे महदाद्येककार्यसाधनभावोपगतानां वृत्तय एकत्र मूर्छिताः सह भवन्तीति। युक्त्यभावादसिद्धिरिति चेत्, स्यान्मतम्—का पुनरत्र युक्तिर्येन विरोधिनामेककार्यता भवतीति? उच्यते—गुणप्रधानभावात्। गुणभूतो हि प्रतियोगी प्रधानभूतेन तदुपकारकत्वान्न विरुद्ध्यत इति संसर्गेण वर्तितुमुत्सहते। तुल्यबलयोस्तु द्वयोः सत्यमेव सहावस्थानस्य नास्ति सम्बन्धः। तथा च भगवान् वार्षगण्यः पठति "रूपातिशया वृत्त्यतिशयाश्च[3] विरुध्यन्ते। सामान्यानि त्वतिशयैः सह वर्तन्ते"(1)। तद्यथा जलाग्नी पचनीयस्वेदनीयेषु कार्येषु, छायातपौ च सूक्ष्मरूपप्रकाशने[4], शीतोष्णे च प्रजावस्थितौ[5]। एवं तत्सिद्धः प्रदीपवत्सत्त्वरजस्तमसां विरोधेऽपि सहभावः।

आह, यदुक्तं लघ्वादिभावस्वभावभेदाद् गुणनानात्वमित्यत्र ब्रूमः—

भिन्ना लक्षणभेदाश्चेन्मिथः सत्त्वादयो गुणाः।
तर्हि लक्षणयुक्तत्वा[6]त्षड्गुणाः प्राप्नुवन्ति ते ॥

यदि लघ्वादिलक्षणभेदात्सत्त्वादीनां नानात्वं मिथोऽभ्युपगम्यते, तेन लघुत्वप्रकाशत्वयोरपि भेदोऽस्ति (इति) गुणद्वयप्रसङ्गः। एवमुपस्तम्भचलताभ्यां गौरववरणाभ्यां[7] च द्वयं

---

[1] ग्रहणविकल्पोपलम्भः looks more consistent, though all the Mss read गुणविकल्पोलम्भः. See 149.17.

[2] All the Mss read सत्त्वस्योत्तरविरोधात्. I follow Pandeya (61).

[3] P रूपादिशयाद् वृत्त्यतिशयाश् KD रूपादिशयाद् वृत्त्यतिशयाच्

[4] P प्रकाशेन Raghavan (12.11) suggests °प्रकाशने, which is the reading in some Mss which we have followed.

[5] P K व्रजावस्थितौ D व्रजावस्थितौ, sec.m. प्रजास्थितौ I follow Raghavan (15(1).5).

[6] D तर्हि लक्षणयुक्तत्वात्, sec.m. भिन्नलक्षणयुक्तत्वात्

[7] D गौरववर्णाभ्यां, sec.m. गौरवावर्णाभ्यां

---

(1) Cf. यो॰ भा॰ 2.15, 3.13. Vācaspati in त॰ वैशा॰ (3.13) regards this as the opinion of (the Sāṁkhya teacher) Pañcaśikha.

द्वयमिति षड्गुणाः प्राप्नुवन्ति। अथ मतम्। लघुत्वप्रकाशत्वयो[1]रभेद इति, पृथगनभिधानं प्राप्तम्। तद्भेदे वा ग्रहणभेदमनिच्छतः प्राप्तो लघुत्वादिभेदेऽपि गुणाभेद[2]स्तथा चैको गुण इति प्राप्तम्। यत्पुनरेतदुक्तं (149.4-5) गुणभूतस्य भक्तित उपकारात्प्रधानरूपापत्तिरिति, (अत्र ब्रूमः—(?))

अङ्गभावं व्रजंत्सत्त्वं दुःखं सम्पद्यते यदि ।
त्रैरूप्यस्योपसंहारा[3]त्पूर्वदोषानिवर्तनम् ॥

यदि हि रजसोऽङ्गभावमुपगच्छत्सत्त्वमुपकारात्तद्रूपं भवति, तेन प्रतिज्ञातस्य[4] रूपान्तरस्योपसंहारात् त्रैरूप्यं गुणानामेकैकस्य प्राप्तं रूपान्तरस्य वा सत[5] उत्पत्तिः। तस्मात्पूर्वदोषापरिहारात्प्रतिज्ञामात्रमेवायं समाधिः[6]।

यदप्युक्तम् (149.11) अगुणभूतानां स्वभावग्रहणादिति (अत्र ब्रूमः—)

अङ्गभावानपेक्षं (तु) ग्रहणं[7] नास्त्यृषेरपि[8] ।

परमर्षेरपि गुणानां कार्यमेव प्रत्यक्षं न शक्तिमात्रत्वेना[9]वस्थानम्, असंवेद्यत्वात्। तत्र चाङ्गाङ्गिभावगमनमनिवार्यम्। तस्माद्दोषमनिच्छता गुणा एव वा परित्याज्याः[10], नास्ति वा सुदूरमपि गत्वा तत्संकरदोषपरिहारः।

उच्यते—यत्तावदुक्तं (150.22) लक्षणभेदाद् गुणनानात्ववादिनो लक्षणद्वययोगादेकैकस्य गुणषट्त्वप्रसङ्ग इति, तन्न[11]। कस्मात्? द्वयोर्गुणप्रधानभावानुपपत्तेः[12]। इहार्थान्तरस्यार्थान्तरेण गुणप्रधानभावो भवति। यथा स्त्रीक्षत्रमेघेषु[13]

---

[1] P and K °प्रकाशयोर्, D °प्रकाशयोर्, sec.m. °प्रकाशत्वयोर्

[2] All the Mss read गुणभेदस्.

[3] Consistency demands that we read त्रैरूप्यस्योप°, though all Mss read वैरूप्यस्योपसंहारात्.

[4] All the Mss read तेनाप्रतिज्ञातस्य. I follow Raghavan (15(1).5), who anticipates Pandeya (62).

[5] Raghavan (15(1).5) reads वाऽसतः. Tripathi (237) thinks likewise.

[6] Dkha. अयं न समाधिः

[7] All the Mss read ग्रहणम् and omit to add तु before it. I follow Pandeya (62) in inserting it.

[8] D reads नास्तित्रऋषेरपि. Chakravarti (72.22) treats the sentence as a prose passage.

[9] P K D read शक्तिमात्रेण. I follow the reading of Dkha.

[10] P K D एवापरित्यज्याः Dkha. एव वापरित्याज्या I follow Raghavan (15(1).5).

[11] P K D have no तन्न. In inserting it here, I follow Pandeya (62) and Tripathi (238), who are, in a way, anticipated by Raghavan (15(1).5). Wezler (138.20)) suggests तदयुक्तम्, which too is okay.

[12] All the Mss read गुणप्रधानभावानुपपत्तिः.

[13] D सूत्रे क्षत्रमेघेषु, sec.m. स्त्रीक्षत्र° Dkha. स्त्रीक्षत्र°

व्याख्यातम्। न च लघुत्वप्रकाशयोरुपस्तम्भचलनयो[1]र्गौरववरणयो[2]श्च मिथो गुणप्रधानभावोऽस्ति, तस्माद[3]नर्थान्तरं धर्मास्त[4] इति नास्ति षट्त्वप्रसङ्ग इति। किञ्च, अप्रसिद्धत्वात्। न ह्येतत्क्वचित्प्रसिद्धं यथा यावन्तो धर्मास्तावन्तो धर्मिण इति। न चाप्रसिद्धेन व्यवहारः। किञ्च पृथक्त्वैकान्तप्रसङ्गात्। लक्षणभेदान्नानात्वप्रतिज्ञस्य सर्वार्थानां स्वसामान्यलक्षणयोगात्स्वतोऽर्थान्तरमिति पृथक्त्वैकान्तप्रसङ्गः। अथैतदनिष्टम्, न तर्हि[5] वक्तव्यं लक्षणभेदाद् गुणानां षट्त्वमिति।

यत्पुनरेतदुक्तम् (151.5-6) अङ्गभूतस्य प्रधानरूपापत्तेः पूर्वदोषानिवृत्तिरिति, तदप्ययुक्तम्। कस्मात्? भक्त्यभिधानात्। असकृदभिहित[6]मस्माभिर्भाक्तोऽयं गुणानां ग्रहणविकल्प इति। न च भक्तिः परमार्थ इत्यस्थाने यत्नः।

यत्पुनरेतदुक्तम् (151.10) अगुणभूतानां सत्त्वादीनामृषेरप्यविषयत्वमिति, सत्यमेतत्। यत्तूक्तं (151.11f.) कार्यस्य विषयभूतत्वादङ्गाङ्गिभावगमनं गुणानां (.....) सकलं सत्कार्य[7]म पेक्षते। (.....) तथा स्त्रीक्षत्रमेघाः[8] प्रकृताः, तेष्वङ्गभावं (उप)गच्छन्त[9] इति विज्ञायत इति। सामान्यशब्दानां हि प्रकरणाद्विशेषेऽवस्थानं भवति। तद्यथा भोजनकाले सैन्धवमानयेत्युक्ते लवणे संप्रतिपत्तिर्नाश्वादिषु। तस्मात्प्रकरणमनपेक्ष्य महति तन्त्रे दोषाभिधानं बालवाक्यस्थानीयम्। एवं गुणलक्षणोपदेशात्सिद्धं त्रैगुण्यम् ॥ 13॥

आह—अविवेक्यादिरिदानीं गणः कथं प्रतिपत्तव्य इति?

उच्यते—

अविवेक्यादिः सिद्धस्त्रैगुण्यात् (का० 14/1)

यत्त्रिगुणं तद् "अविवेकि विषयः सामान्यमचेतनं प्रसवधर्मि" (का० 11) इति। कथमवगम्यत इति चेत्—

---

1. Wezler (138.23) proposes उपस्तम्भचलतायोर्, which is equally good.
2. D गौरववर्णयोश्
3. All the Mss read तद्. I follow Wezler (138.24).
4. K reads धर्मा for धर्मास्त.
5. Chakravarti (73.8) reads तर्हि वक्तव्यम्, omitting न before it.
6. P K D read अधीतम्. I follow Wezler (139. 7-8).
7. P K सकलसत्कार्यं
8. D सूत्रे क्षत्रमेघाः Dkha. स्त्रीक्षण॰ Cf 149.3
9. All the Mss read अगच्छत. D writes अपगच्छन्तु इति पाठः in the footnote.

तद्विपर्ययाऽभावात्। (का॰ 14/2)

यस्माद् गुणविपर्ययः क्षेत्रज्ञः, तत्र विषयत्वमचेतनत्वं प्रसवधर्मित्वं च न भवतीत्युपरिष्टा[1]त्प्रतिपादयिष्यामः। तस्मात्परिशेषतो व्यक्त[2] एतेषां धर्माणामविरोधः।

आह—"तथा प्रधानम्" इति प्रागुक्तं (का॰ 11) भवता। तदिदानीं कथं प्रतिपत्तव्यम्, प्रधानमपि त्रिगुणादियुक्तमिति?

उच्यते—

कारणगुणात्मकत्वात्कार्यस्याव्यक्तमपि सिद्धम्॥ का॰ 14/3-4॥

इह कारणगुणात्मकं कार्यं दृष्टम्। पटादिव्यक्ते च त्रैगुण्याद्युपलभ्यते। तस्मात्कारणमप्यस्य तथाजातीयकमिति शक्यमनुमातुम्। सिद्धान्तमात्रोपदर्शनमेतदाचार्यः करोति। न्यायं तु यथोक्तेषु प्रदेशेषूपपादयिष्यामः (द्र॰ का॰ 15)॥ 14॥

आह—कार्यधर्मस्य कारणोपलब्धौ[3] हेतुमदादिप्रसङ्गः, अविशेषात्। यदि कार्ये दृष्टस्य धर्मस्य कारणे सद्भावोऽभ्युपगम्यते, प्राप्तो हेतुमदादीनामपि धर्माणां कार्यदृष्टत्वात्प्रधाने प्रसङ्गः। अथ कार्योपलब्धौ तुल्यायां हेतुमदादयो नेष्यन्ते, न तर्हीतरेषामपि कारणावस्थितिरस्तीति।

उच्यते—न, स्वरूपविरोधित्वे तदपवादविज्ञानात्। **कारणगुणात्मकत्वात्कार्यस्येत्यनेन** लिङ्गेन हेतुमदादयोऽपि कारणे प्रसज्यन्ते। तेषां तु कार्यकारणरूपविरोधित्वादपवादो विज्ञायते। कथम्? यदि तावद्धेतुमदादयो व्यक्ते दृष्टत्वा[4]त्प्रधाने (प्रस)ज्यन्ते[5], कृतकत्वात्कार्यमेव तन्न[6] कारणमिति प्राप्तम्। अनित्यत्वाच्च स्वयमुच्छिद्यमानमननुग्राहकमव्यापित्वादिभिश्चानन्तविकारोत्पादनशक्तिहीनम्। अहेतुमदादयः प्रधानेऽभ्युपगमाद्व्यक्तेऽपि[7] प्राप्यन्ते तादृशाः। कारणासम्भवात्कार्यमेव तन्न[8] (कारणं) भवतीति प्राप्तम्। अविवेक्यादयस्तूभयत्रापि भवन्तो नेतरेतरस्वरूपविरोधिनः। तस्मात्कार्यकारणभावाभ्युपगमाद्धेतुमदाद्यपवादः, इतरेषां च कारणसद्भावः सिद्धः[9]।

---

[1] P K भवतीति पुरस्तात् D भवतीति पुरस्तात्, sec.m. भवतीत्युपरिष्टात्

[2] P व्यक्ते D ऽव्यक्ते sec.m. व्यक्ते

[3] P करणोपलब्धौ

[4] D sec.m. व्यक्तदृष्टत्वात्

[5] P व्यञ्जन्ते K D व्यज्यन्ते Chakravarti (74.9) reads व्यज्यन्ते. I follow Wezler (140.21).

[6] Chakravarti (74.9) reads तत्र.

[7] All the Mss read व्यक्तेरपि. I follow Wezler's suggestion (140.24).

[8] Chakravarti (74.11) reads तत्र instead of तन्न.

[9] In Tripathi's edition (243), the third Āhnika ends here. Āhnika 4 begins there (244) with the next paragraph यदुक्तम्—कारणगुणात्मकत्वात् ...

यदुक्तम्—

कारणगुणात्मकत्वात्कार्यस्याव्यक्तमपि सिद्धम् (का० 14)

इति, तदयुक्तम्। कस्मात्? व्यक्ताव्यक्तयोः कार्यकारणभावाप्रसिद्धेः। सिद्धे हि व्यक्ताव्यक्तयोः कार्यकारणत्वे[1] एतदेवं[2] स्यात्। तत्त्वसिद्धम्। तस्मादयुक्तमेतत्। विशेषानभिधानादुभयसाम्यमिति चेत्, स्यान्मतम्। यथा भवानाह व्यक्ताव्यक्तयोः कार्यकारणभावोऽप्रसिद्धः[3], एवं वयं वक्ष्यामः—तयोः कार्यकारणभावाप्रसिद्धिरप्यसिद्धा, न च क्वचिद्विशेषोऽस्ति। उभयसाम्यं भविष्यतीति। तच्चायुक्तम्। कस्मात्? सद्भावासिद्धेः। सत्यम्, अनभिधीयमाने विशेषे स्यादुभयसाम्यम्। अव्यक्तस्य तु सद्भाव एवासिद्ध इत्ययं विशेषः। तस्मादयुक्तमेतदपीति। कार्यस्य कारणपूर्वकत्वा[4]द्व्यक्तस्य च कार्यत्वादव्यक्तसद्भावे प्रतिपत्तिरिति चेत्, स्यादेतत्। कार्यं कारणपूर्वकं दृष्टम्। घटादिकार्यं चे(दं) व्यक्तम्[5], प्रमितत्वात्। तस्मादिदमपि कारणपूर्वकं भवितुमर्हति, यच्च तस्य कारणं तदव्यक्तमिति। तच्चानुपपन्नम्। कस्मात्? अनेकान्तात्। इहाकस्मिकी[6] च कार्यस्योत्पत्तिर्दृष्टा। तद्यथेन्द्रधनुषः। असतश्च भ्रान्तिमात्रात् तद्यथा मायास्वप्नेन्द्रजालमृगतृष्णिकाऽलातचक्रगन्धर्वनगराणाम्। सतश्च कारणात्, तद्यथा मृदादिभ्यो घटादीनाम्। कार्यं चे(दं)व्यक्तम्[7]। अतः संशयः किमिन्द्रधनुर्वदकस्मादस्य प्रादुर्भावोऽथ मायादिवदसतोऽथ कारणात्सतो घटवदिति?

---

[1] All the Mss read कारणत्वे. I follow Raghavan (15(1).5).

[2] All the Mss read एव. I follow Raghavan (15(1).5).

[3] D न सिद्धः

[4] Chakravarti (74.21) reads कार्यकारणपूर्वकत्वाद्. Raghavan's emendation (15(1).5) agrees with the reading (of the Mss) we have adopted.

[5] P K D चेदव्यक्तं Dkha. चेद् व्यक्तं I follow Raghavan (15(1).5) in reading as I do.

[6] D इहाकस्मिके

[7] P K D चेदव्यक्तम् D writes चेद् व्यक्तमिति च पाठः in the right margin. I follow Raghavan (15(1).6) in reading as I do.

उच्यते—नाकस्मिकमसत्पूर्वं व्यक्तम्। कस्मात्?

भेदानां परिमाणात् (का॰ 15/1)

यत्परिमितं तस्य सत उत्पत्तिर्दृष्टा। तद्यथा मूलाङ्कुरपर्णनालदण्डबुसतुषशूकपुष्पक्षीरतण्डुलकणानाम्। परिमिताश्च[1] महदहङ्कारेन्द्रियतन्मात्रमहाभूतलक्षणभेदाः। तस्मात्सत्कारणपूर्वकाः[2]। यदेषां कारणं[3] तदव्यक्तम्।

॥ इति युक्तिदीपिकायां सांख्यसप्ततिपद्धतौ तृतीयमाह्निकं[4]
प्रथमं च प्रकरणं समाप्तम्[5] ॥

---

1. P K परिमिता D परिमिता, sec.m. परिमिताश्च Dkha. परिमिताश्च
2. D सत्कारणपूर्वका, sec.m. तस्मात् कारणपूर्वका Dkha. तस्मात् कारणपूर्वका Chakravarti (75.3) reads तस्मात् कारणपूर्वकाः.
3. Dkha. करणं
4. D इति श्रीमदाचार्येश्वरकृष्णविरचितायां सांख्यसप्ततौ युक्तिदीपिकानाम्नि विवरणे तृतीयमाह्निकम्। 3।
5. D प्रथमं प्रकरणं च समाप्तम्। 1।, sec. m. प्रथमं च प्रकरणं समाप्तम्। 1।

चतुर्थमाह्निकम्

{आह—कस्मादस्त्यव्यक्तम्[1]?} असद्भेदानामपि परिमाणदर्शनाद् अनेकान्त इति चेत्, स्यान्मतम्। अस्ति हि मायास्वप्नेन्द्रजालानुविधायिनामपि भेदानां परिमाणमिति तस्मादनैकान्तिको हेतुरिति।

तच्च नैवम्। कस्मात्? (अनियमात्।)[2] न हि तेषां नियमोऽस्ति, एतावद्भिरेवोत्पत्तव्यं नान्यैरिति। महदादयस्तु प्रलयकालतिरोभूतास्तावन्त एवोत्पद्यन्ते। तस्मान्नानेकान्तः[3]।

आह—परिमाणानवस्थानम्, कालद्वयानुपलब्धेः। सत्यम्, साम्प्रते काले महदादयो युक्तपरिमाणाः, प्रत्यक्षानुमानोपलब्धेः। अतीतानागतयोस्तु कालयोर्नास्ति प्रसिद्धिः। तस्मादयुक्तमेतत्।

उच्यते—न, विपर्यये प्रमाणानुपलब्धेः। इदानीमेतावन्तो भेदा इत्येतच्छक्यमनुमातुम्। अतीतानागतयोस्तु कालयोर्नास्ति[4] प्रसिद्धिः। तस्मान्न भेदानवस्थाप्रसङ्गः।

आह—भेदाभेदानवस्थानात्[5]। महदादीनां ये भेदा देवमनुष्यतिर्यञ्चो घटादयश्च, तेषामशक्यं परिमाणं परिच्छेत्तुम्। सामान्येऽन्तर्भावाद् युक्त[6]मिति चेत्, स्यान्मतम्। अस्ति शरीराणां महाभूतसामान्यं घटादीनां च पृथिवीसामान्यम्, तत्परिमाणादेतेऽपि परिमिता इति। तदयुक्तम्। कस्मात्? अभावात्। न हि वः सामान्यं द्रव्यादर्थान्तरभूतमस्ति, सारूप्यमात्रे सामान्यपरिकल्पनात्।

---

1. In P the Āhnika begins with ओं आह. D begins thus : अथ सांख्यसप्ततिपद्धतौ युक्तिदीपिकानाम्नि विवरणे द्वितीयं प्रकरणं प्रारभ्यते तत्रेदम् चतुर्थमाह्निकम्। आह (D चतुर्थप्रथममाह्निकम्, sec. m. चतुर्थमाह्निकम्). Continuity with Āhnika 3 warrants deletion of the phrase आह—कस्मादस्त्यव्यक्तम्?
2. I follow Wezler (143.5) in inserting अनियमात्, which is not found in any of the Mss.
3. P नेकान्तः KD नानेकान्ताः Raghavan (15(1).6), who anticipates Tripathi (247), suggests तस्मान्नानैकान्तः. I follow Wezler (143.7).
4. Tripathi (247) adds विपर्ययस्य after °नास्ति.
5. D भेदाभेदा°, sec. m. भेदभेदा°
6. All the Mss read अयुक्तम्. Our reading agrees with Wezler's emendation (143.16).

उच्यते—न, तत्त्वान्तरानुपपत्तेः। तत्त्वाभेदेन[1] परिमिता भेदा इत्येतद्विवक्षितम्, यथोक्तमस्माभिः। उक्तं च यद्यस्ति तत्त्वान्तरम्, उच्यताम्। यत्पुनरेतदुक्तं (157.5f.) सामान्यस्यार्थान्तरभूतस्य भवत्पक्षेऽनुपपत्तिरिति, सत्यमेतत्। तथाविधेनापि तु तेन संव्यवहारो न प्रतिषिध्यत इति वक्ष्यामः (185.5f.)। तस्मात्सिद्धं भेदानां परिमाणादस्त्यव्यक्तम्।

किञ्चान्यत्।

समन्वयात् (का॰ 15/2')

इह येन भेदानां समनुगतिस्तस्य सत्त्वं दृष्टम्। तद्यथा मृदा घटादीनाम्। अस्ति चेयं सुखदुःखमोहैः शब्दादीनां समनुगतिः। तस्मात्तेऽपि सन्ति। ये च सुखादयोऽस्तमितविशेषास्तदव्यक्तम्। तस्मादस्त्यव्यक्तम्।

आह—न, असिद्धत्वात्। सुखादिभिः शब्दादयोऽनुगम्यन्त इत्येतदप्रसिद्धम्। केन कारणेन प्रतिपत्तव्यमिति?

उच्यते—तद्बुद्धिनिमित्तत्वात्। इह शब्दस्पर्शरूपरसगन्धानां सन्निधाने स्वसंस्कारविशेषयोगात्सुखदुःखमोहाकाराः प्राणिनां बुद्धय उत्पद्यन्ते। यच्च यादृशीं बुद्धिमुत्पादयति तत्तेनान्वितम्[2]। तद्यथा चन्दनादिभिः शकलादयः। तस्मान्नासिद्धिः समन्वयस्येति।

आह—असिद्ध एवायं समन्वयः। कस्मात्? विलक्षणकार्योत्पत्तिदर्शनात्[3]। न ह्ययं नियमः, कारणसदृशमेव कार्यमुत्पद्यते। किं तर्हि, विलक्षणं अग्निधूमशब्दादि। कथम्? न ह्यग्निस्तृणादिस्वभावकोऽग्निस्वभावको वा धूमः। न च भेरीदण्डादिस्वभावः शब्दः। तस्मात्सुखाद्यनुगताः शब्दादय इतीच्छामात्रम्।

उच्यते—न, विशेषितत्वात्। सुखादिस्वरूपाः शब्दादयः, तत्सन्निधाने सुखाद्याकारप्रत्ययोत्पत्तिरित्येतदादित एवास्माभिर्विशेषितम्। तस्मान्न भिन्नजातीयास्त इति। यत्तु खल्विदमुच्यतेऽग्न्यादीनां विलक्षणानामुत्पत्तिदर्शनात्प्रधानभेदानामतज्जातीयप्रसङ्ग इति, तदयुक्तम्। कस्मात्? अभिप्रायानवबोधात्[4]। नैव ब्रूमो यो यस्य विकारः स तज्जातीयक इति। किं तर्हि, यो यज्जातीयकः स तस्य विकार इति। तस्मादयुक्तमेतत्।

---

[1] All the Mss read तत्त्वभेदेन. I follow Raghavan (15(1).6), who is followed by Wezler (143.20) in turn.

[2] D तेनान्यत्वम् Dkha. तेनान्वितम्

[3] D विलक्षणकार्योत्पत्तिदर्शनात्, sec. m. विलक्षणोत्पत्तिकार्यदर्शनात्

[4] Dkha. °नवबोधनाद्

किञ्चान्यत्। उदाहरणाप्रसिद्धेः[1]। न चैतदुदाहरणं प्रसिद्धम्, अग्न्यादयः स्वकारणजातिं नानुविदधतीति। कस्मात्? बलवीर्यानुविधानात्। तद्यथा अग्नेर्धूमस्य च त्वक्चन्दननलिकादिस्निग्धतानुवृत्ते[2]स्तैक्ष्ण्याद्यनुवृत्ते[3]श्च। भेरीविकारः शब्दो, न तु यथा भेरीरूपमवस्थितम्, प्रदीपेनेव तु दण्डाभिघातेन व्यज्यत इति साध्यमेतत्। न चैकैको रूपादीनां द्रव्याकारः, समुदायधर्मत्वात्। तस्मान्न भेरीविकारः शब्दः। तत्र यदुक्तं (158.16) विलक्षणकार्योत्पत्तिदर्शनादसिद्धोऽन्वय इत्येतदयुक्तम्। तस्माद्युक्तमेतत् समन्वयादस्त्यव्यक्तमिति।

किञ्चान्यत्।

शक्तितः प्रवृत्तेश्च। (का० 15/2')

इह यावती काचिल्लोके प्रवृत्तिरुपलभ्यते सा सर्वा शक्तितः। तद्यथा कुम्भकारस्य दण्डादिसाधनविन्यासलक्षणायाश्च शक्तेः सन्निधानाद् घटकरणे प्रवृत्तिरस्ति। व्यक्तस्य चेयं कार्यत्वात्तद्भावेन[4] प्रवृत्तिरि[5]त्यतस्तस्यापि शक्त्या भवितव्यम्। याऽसौ शक्तिस्तदव्यक्तम्। तस्मादस्त्यव्यक्तमिति[6]।

आह—प्राक्प्रवृत्तेः शक्त्यभावः, प्रवृत्त्यनुपलब्धेः। यदि शक्तिपूर्विका प्रवृत्तिरिति मन्यध्वम्, तेन यावत्प्रवृत्तिर्नोपलभ्यते तावच्छक्तिर्नास्तीत्येतदापन्नम्। कस्मात्? सत्यां शक्तौ कार्याभावे[7] स्वरूपाभावप्रसङ्गात्। यदि खल्वपि विद्यमाना शक्तिः केनचित्प्रतिबन्धेन कार्यं नोत्पादयेत्, शक्तिरशक्तेत्येतदापन्नम्। तस्मा[8]त्सहकारिभावान्तरसन्निधानात्प्रवृत्तिसमकालमेवार्थानां शक्तय उत्पद्यन्ते। ताश्च तावदेव प्रध्वंसन्ते। तत्र यदुक्तं (159.9-10) प्राक्प्रवृत्तेः शक्तिदर्शनाद्व्यक्तस्यापि निष्पादिका शक्तिरस्तीत्येतदयुक्तम्।

---

1. P K D उदाहरणप्रसिद्धेः   Dkha. उदाहरणासिद्धेः   This Dkha. reading is corrected by D into उदाहरणाप्रसिद्धेः. Raghavan too (12.11, 15((1).6) suggests the correction उदाहरणाप्रसिद्धेः, and anticipates Pandeya (64) and Tripathi (251).
2. In the right margin D reads दिग्धानुवृत्तेः इति पाठः। दिग्धः मांसेति प्रसिद्धः गन्धः।
3. All the Mss read तैक्ष्णाद्यनुवृत्तेश्. I follow Chakravarti (77.17).
4. Tripathi (252) suggests तद्भावने in place of तद्भावेन.
5. K D प्रवृत्ति for प्रवृत्तिरिति
6. Chakravarti (77.25) omits तस्मादस्त्यव्यक्तमिति.
7. P K D शक्त्यां कार्यभावे   Dkha. शक्तौ कार्याभावे
8. D तस्मात्, sec. m. कस्मात्

किञ्चान्यत्, भेदाभेदकल्पनानुपपत्तेः। इह प्रधानमेव वा शक्तिः स्यात्, प्रधानाद्वा भिन्ना? किञ्चातः? तद्यदि तावत्प्रधानमेव शक्तिस्तेन कार्य[1]भेदाच्छक्तिभेदोऽवयसीयत इति शक्तिभेदात्प्रधाननानात्वप्रसङ्गः। प्रधानैकत्वाद्वा तदव्यतिरिक्तानां शक्तीनामेकत्वप्रसङ्गः। ततश्च कार्यनानात्वाभावः। अथ मा भूदयं दोष इति प्रधानादर्थान्तरभावः शक्तीनामभ्युपगम्यते, तेन भिन्नानां शक्तीनां प्रवृत्तितः सिद्धौ प्रधानसिद्धिर्नास्तीत्येतदापन्नम्।

किञ्चान्यत्। स्वरूपानभिधानं[2] च। प्रधानस्य शक्तिमात्रादप्यर्थान्तरत्वमभ्युपगम्य रूपमीदृक्प्रधानं स्वावस्थायामिति[3] (अभिधानीयम्)[4]। तच्चाशक्यमभिधातुम्। तस्माद् भेदाभेदकल्पनानुपपत्तेरकल्पनीया शक्तिरिति।

उच्यते—यदुक्तं (159.14) प्राक्प्रवृत्तेः शक्त्यभावः प्रवृत्त्यनुपलब्धेरिति, अत्र ब्रूमः—न, अप्रसिद्धत्वात्। {कारणं शक्तिः, कार्यं प्रवृत्तिः[5]।} न च कार्यानुपलब्धौ कारणाभाव[6] इत्येतल्लोके प्रसिद्धम्। यत्पुनरुक्तं (159.16) कार्यानिष्पत्तौ[7] शक्तेः स्वरूपहान[8]मिति, अत्र ब्रूमः—न, प्रदीपदृष्टान्तात्। तद्यथा प्रदीपस्य घटादिप्रकाशनशक्तिरस्ति। अथ च कुड्याद्यावरणसामर्थ्यान्न घटादीन्प्रकाशयितुं शक्नोति। न च शक्यते वक्तुं प्रदीपस्य प्रकाशनशक्तिरशक्तेति। एवमन्येषामपि भावानां प्राक्प्रवृत्तेरपि शक्तिः स्यात्। न च प्रवृत्त्यदर्शना[9]दस्याः स्वरूपहानं[10] स्यात्। यत्तूक्तं (159.17-18) सहकारिभावान्तरसन्निधानात्प्रवृत्तिसमकालमेवार्थानां शक्तिप्रादुर्भाव इति, अत्र ब्रूमः—तदप्रसिद्धिः, शक्त्यपेक्षत्वात्। इह सर्वः कर्ता स्वगतां शक्तिमपेक्ष्य तद्योग्यतया सहकारिभावान्तरमुपादत्ते। सा चेत्प्राक्प्रवृत्तेर्न स्यात्, साधनानां विषयस्वभावानवधारणादनुपादानप्रसङ्गः। अनिष्टं चैतत्। तस्मात्प्रा[11]क्प्रवृत्तेः शक्तिः। यत्पुनरेतदुक्तं (159.18)

---

1. P कार्ये भेदाच् for कार्यभेदाच्
2. All the Mss read स्वरूपाभिधानं. I follow Tripathi (253), who anticipates Wezler (145.19).
3. Tripathi (253) reads °अभ्युपगम्यते प्रधानं स्वावस्थायामिति, thus omitting रूपमीदृक्.
4. In inserting अभिधानीयम्, I follow Wezler (145.21).
5. Wezler (145.24–146.1) deletes कारणं शक्तिः, कार्यं प्रवृत्तिः. I follow him.
6. P K D कार्याभाव Dkha. कारणाभाव Raghavan's suggested reading (15(1).6) agrees with the one we have adopted. Tripathi (254) too suggests कारणाभाव.
7. P K D कार्यनिष्पत्तौ Dkha. कायानिष्पत्तौ I follow Raghavan (12.12, 15(1).6).
8. D स्वरूपहानिर्, sec. m. स्वरूपहानम्
9. P K न न प्रवृत्तिदर्शनाद् D न प्रवृत्तिदर्शनात्, sec. m. न न प्रवृत्तिदर्शनात् In the right margin D reads न च प्रवृत्त्यदर्शनात् अस्याः स्वरूपहानं स्यात्— इति च पाठः. Raghavan also (12.12, 15(1).6) gives the emendation प्रवृत्त्यदर्शनात्.
10. D स्वरूपहानं, sec. m. अस्याः स्वरूपहानं
11. D तस्मात् का, sec. m. तस्मात्प्राक्

तावदेव प्रध्वंस[1] इति, अत्र ब्रूमः—न, कार्यनिष्ठादर्शनात्। यदि प्रवृत्तिसमकालमेव प्रध्वंसः[2] स्यात् कार्यनिष्ठैव न स्यात्, तन्निमित्तत्वात् कार्यस्य। अस्ति त्वसौ। तस्मान्न प्रवृत्तिसमकालमेव शक्तिप्रध्वंसः। सदृशसन्तानोत्पत्त्या[3] कार्यनिष्ठेति चेन्न, विनाशकालोत्पत्त्यसम्भवात्[4]। अथापि स्यात्। एकस्यां शक्तौ क्षणसाध्य[5]मंशमवसाय विनष्टाया[6]मन्यत्तत्सदृशं शक्त्यन्तरमुत्पद्यते, तस्मिन्विनष्टेऽन्यदित्येवं शक्तिसन्तानात्कार्यनिष्ठा भवतीति। एतदप्ययुक्तम्। कस्मात्? विनाशकालोत्पत्त्यसम्भवात्। को ह्यत्र हेतुर्येन विनाशसमकालमन्यच्छक्तिरूपं कार्यमवसाययति, न पुनः प्राक्तनमेवावस्थितमिति?

किञ्चान्यत्। कौटस्थ्यदोषपरिहारात्। क्षणोत्तरकालावस्थाने[7] च भावानां यो दोष उपात्तः कौटस्थ्यप्रसङ्ग इति, तस्य परिहार उक्तः। तस्मान्नास्ति शक्तीनां प्रवृत्तिकाले विनाशः। प्रवृत्त्युत्तरकालमपि नास्ति। कस्मात्? पुनः प्रवृत्तिदर्शनात्। शक्त्यन्तरोत्पत्तौ प्रवृत्त्यन्तरसद्भाव इति चेत्, न, हेत्वभावात्। को ह्यत्र निर्बन्धः तस्यां विनष्टायामन्या प्रवृत्त्यन्तरहेतुर्भवति नैव पुनः सैवेति[8]? कृतार्थत्वादिति चेत्, न, अनभ्युपगमात्। न ह्येकघटार्था शक्तिरभ्युपगम्यते। तत्र येनैव हेतुना एकं घटमवसाय न विनश्यति, तेनैव यावन्ति कर्त्तव्यानीति। तस्मात्त्रिषु कालेषु शक्तयोऽवतिष्ठन्ते।

यत्पुनरेतदुक्तं (160.1) भेदाभेदकल्पनानुपपत्तिरिति, अत्र ब्रूमः—अस्तु प्रधानादभिन्ना शक्तिः। न तस्य नानात्वं शक्त्येकत्वं वा प्रसज्यते। कस्मात्? संख्याव्यवहारस्य बुद्ध्यपेक्षत्वाद्, बुद्धिनिमित्तस्य चासत्कारेण प्रधानशक्तिस्वभावात्। इहायं संख्याव्यवहारो बुद्ध्यपेक्षः। कथम्? यदभिन्नां बुद्धिमुत्पादयति तदेकम्। प्रधानावस्थायां च शक्तयोऽस्तमितविशेषत्वादभिन्नां बुद्धिमुत्पादयन्ति। तस्मादेकम्। तत्प्रवृत्तिकाले विशेषावग्रहेण भेदं प्रतिपद्यते[9], देवशक्तिर्मनुष्यशक्तिरित्यादि। तस्मान्नासा[10]मेकत्वम्। अतो न भेदाभेद-

---

[1] D प्रध्वंस, sec. m. प्रध्वंसन्ते

[2] Dkha. शक्तप्रध्वंसः

[3] P K सदृशसन्धानो° D सदृशसन्धानो°, sec. m. सदृशसन्तानो° Raghavan's (15(1).6) reading °सन्तानोत्पत्त्या° agrees with what we have selected.

[4] P K विनाशसमकालो° D विगा(?) शसमकालो°, sec. m. विनाशसमकालो° Dkha. विनाशकालो°

[5] Dkha. लक्षणसाध्यम्

[6] D विनष्टायाम्, sec. m. विनिष्ठायाम्

[7] D °लावसाने for °लावस्थाने

[8] All the Mss read सैव सेति. I follow Pandeya (66).

[9] D प्रतिपद्यते, sec. m. प्रतिपद्यन्ते

[10] Chakravarti (79.12), followed by Tripathi (257), reads तस्मात् तासाम्.

कल्पनानुपपत्ति[1]रिति । व्यक्ते दर्शना[2]च्छक्तीनामव्यक्तेऽप्रतिपत्ति[3]रिति चेत्, स्यादेतत् । व्यक्ते शक्तिप्रवृत्ती[4] दृष्टे न चाव्यक्ते क्वचिदित्यतो[5] व्यक्तमेवैतस्माद्धेतोः सिद्ध्यति, नाव्यक्तमिति । एतच्चायुक्तम् । कस्मात्? सामान्यतोदृष्टा[6]त्सिद्धेः । यथैव हि देवदत्ताधारया क्रियया तस्य देशान्तरप्राप्तिमुपलभ्यात्यन्तादृष्टं[7] ज्योतिषां देशान्तरप्राप्तेर्गमनमनुमीयते, एवं प्रवृत्तेः शक्तिनियमितत्वाद् व्यक्तस्य च प्रवृत्तिभूतत्वादवश्यमत्यन्तादृष्टा शक्तिरभ्युपगन्तव्येति सिद्धं शक्तितः प्रवृत्तेरस्त्यव्यक्तम् ।

किञ्चान्यत् ।

कारणकार्यविभागात् (का० 15/3)

कारणं च कार्यं च कारणकार्ये तयोर्विभागः **कारणकार्यविभागः** । इदं कारणमिदं कार्यमिति बुद्ध्या द्विधावस्थापनं विभागो यः स **कारणकार्यविभागः** । तदवस्थितभावपूर्वकं[8] दृष्टम्, तद्यथा शयनासनरथशरणादिः[9] । अस्ति चायं व्यक्तस्य कारणकार्यविभागः[10] । तस्मादिदमप्यवस्थितभावपूर्वकम् । योऽसाववस्थितो भावस्तदव्यक्तम्[11] ।

आह, तदनुपलब्धेरयुक्तम् । न हि शयनादीनां कारणकार्यविभागः कश्चिदुपलभ्यते । तस्मादयुक्तमेतत् ।

उच्यते—न, कार्यकारणयोरुपकारकोपकार्यपर्यायत्वात् । (न हि)[12] कारणं[13] कार्यमिति निर्वर्त्यनिर्वर्तकभावोऽभिप्रेतः । किं तर्हि? उपकारकोपकार्यभावः । स चास्ति शयनादीनां व्यक्तस्य च । अतो न प्रमादाभिधानमेतत् ।

---

1. D ऽनुपपत्तिर्, sec.m. अनुपपत्तेर्
2. D व्यक्ते दर्शनाच्, sec. m. व्यक्तदर्शनाच् Dkha. व्यक्तदर्शनाच्
3. P K D अव्यक्ते प्रतिपत्तिर् Dkha. अव्यक्तप्रतिपत्तिर् I follow Tripathi (257) and Wezler (147.15).
4. D शक्तिप्रवृत्ते, sec. m. शक्तिप्रवृत्ती
5. All the Mss read क्वचिदन्यतो.
6. All the Mss read सामान्यतोदृष्टान्तात्. I follow Chakravarti (79.15).
7. Chakravarti (79.16) reads °न्तादृष्टानां.
8. Chakravarti (79.21) reads °भागपूर्वकं.
9. All the Mss read °रथचरणादिः.
10. D कार्यकारण°, sec. m. कारणकार्य°
11. D तदव्यक्तम्, sec. m. तस्मादस्ति अव्यक्तम्
12. I follow Wezler (147.32-33) in adding न हि.
13. P करणं for कारणं

आह, कः पुनर्व्यक्तस्य परस्परकार्यकारणभाव[1] इति?

उच्यते—गुणानां तावत्सत्त्वरजस्तमसां प्रकाशप्रवृत्तिनियमलक्षणैर्धर्मैरितरेतरोपकारेण यथा प्रवृत्तिर्भवति, तथा "प्रीत्यप्रीतिविषादात्मकाः" (का॰ 12) इत्येतस्मिन्सूत्रे व्याख्यातम्। तथा शब्दादीनां पृथिव्यादिषु परस्परार्थमेकाधारत्वम्। श्रोत्रादीनामितरेतरार्जनरक्षणसंस्काराः। करणस्य कार्यात्स्थानसाधनप्रख्यापना(नि)[2]। कार्यस्य करणाद् वृत्तिक्षतभङ्गसंरोहणसंपोषणपरिपालनानि[3]। पृथिव्यादीनां धृतिसंग्रहपक्तिव्यूहा[4]वकाशदानैर्गवादिभावो(1), देवमानुषतिरश्चां यथर्तुविधानेज्यापोषणाभ्यवहारसंव्यवहारैरितरेतराधीनत्वम्[5], वर्णानां स्वधर्मप्रवृत्तिविषयभावः। अन्यच्च लोकाद्यथासंभवं द्रष्टव्यम्[6]।

आह—तदनुपपत्तिः, क्रमयौगपद्यासम्भवात्। योऽयं गुणानां प्रकाशप्रवृत्तिनियमैरितरेतरोपकारोऽभ्युपगम्यते, स खलु क्रमेण वा स्याद् युगपद्वा? किञ्चातः? तन्न तावत्क्रमेण संभवति। कस्मात्? एकस्य निरपेक्षस्य प्रवृत्तावितरयोरपि तत्प्रसङ्गात्। यदि तावत्सत्त्वं पूर्वं गुणान्तरनिरपेक्षं स्वशक्तित एव प्रकाशते तयो[7]रुपकारकमित्याश्रीयेत[8], तेन यथा सत्त्वमेवमितरावप्युपकारनिरपेक्षौ स्वकार्यं करिष्यत इत्युपकारानर्थक्यम्। अथ मा भूदयं दोष इत्यतो यौगपद्यमाश्रीयते। तदप्यनुपपन्नम्। कस्मात्? (सह)भूताना[9]मनुपकारकत्वाद् गोविषाणवत्।

किञ्चान्यत्। सदसद्विकल्पानुपपत्तेः। इह सत्त्वं प्रकाशमानं रजस्तमसोर्विद्यमानं वा प्रकाशमाविष्कुर्यात्, अविद्यमानं वा? किञ्चातः? तद्यदि तावद्विद्यमानमभिव्यनक्ति,

---

1. All the Mss read परस्परस्य कार्यकारणभाव. I follow Chakravarti (79.28).
2. All the Mss read °प्रख्यापनादि.
3. All the Mss read वृद्धिक्षतभङ्गसरोहणसंशोषणपरिपालनानि. Chakravarti (80.3) reads क्षणभङ्ग° for क्षतभङ्ग°.
4. P वृत्तिसंग्रहपन्थिव्यूहा° K D वृत्तिसंग्रहपक्तिव्यूहा° We replace वृत्ति by धृति for the sake of consistency. Raghavan (15(1).6) suggests वृत्ति-संग्रह-पक्ति.
5. P °संव्यवहारैतितरेतराध्ययनं D संव्यवहारैरितरेतराधीनं Chakravarti (80.5) reads पोषणाभ्यवहारं संव्यवहारेतरेतराध्ययनं. I follow Wezler (148.12).
6. All the Mss read द्रष्टव्यः. I follow Chakravarti (80.6).
7. P प्रकाशे ते तयोर् K प्रकाशेत Dkha. प्रकाशेतरयोर्
8. P K आश्रीयते D आश्रीयते, sec.m. आश्रीयेत
9. All the Mss read महाभूतानाम्. I follow Chakravarti (80.13).

---

(1) See न्या॰ सू॰ 3.1.26

तेन सर्वेषामेकस्वाभाव्याद् (एक)गुणत्वप्रसङ्गः[1]। किञ्च सत्त्ववच्चेतरयोः स्वातन्त्र्यप्रसङ्गः। यथा सत्त्वस्य प्रकाशशक्तिरस्तीत्यतस्तद् गुणान्तरनिरपेक्षं प्रकाशते, तद्वदितरावपीति दोषः[2]। अथवाऽविद्यमाना[3] प्रकाशशक्तिः सत्त्वसम्बन्धाद्रजस्तमसोरुपजायते। तेन यदुक्तं (160.19) प्राक्प्रवृत्तेरवतिष्ठन्ते[4] शक्तय इति, तद् हीनम्[5]। ततश्च सत्कार्यवादव्याघातः। किञ्चान्यत्[6]। अनेकान्तात्। न ह्ययमेकान्तः परस्परोपकारिणामवस्थितभावपूर्वकत्वमिति। तथा हि सत्त्वादयः परस्परोपकारिणो न चावस्थितभावपूर्वकाः। तेन यदुक्तं (162.8) कारणकार्यविभागाद्[7] भेदानामव्यक्तमस्ति (इति) एतदयुक्तम्।

उच्यते—यदुक्तम् (163.9) उपकाराभावः क्रमयौगपद्यासम्भवादिति, अस्तु युगपदुपकारः। यत्तूक्तं (163.15) सहभूताना[8]मनुपकारकत्वं गोविषाणादिवदिति, अत्र ब्रूमः—न, अन्यथानुपपत्तेः। न हि गोविषाणयोः सहभूतत्वादुपकारानुपपत्तिः। किं तर्हि। एककार्याभावात्। येषां तु कार्यमेकम्, सहभावे तु तेषामुपकारो न प्रतिषिध्यते, तद्यथा पृथिव्यादीनां धृतिसंग्रहपक्तिव्यूहावकाशदानैः[9] शरीरस्थितौ। क्रमभाविनोरपि[10] खुरविषाणयोर्नास्ति परस्परोपकारः। तस्मान्न सहभावासहभावावुपकारानुपकारहेतू। किञ्च, दृष्टत्वात्। दृष्टः खलु भोगेनोर्ध्वगमने वाय्वोरर्धचण्डादीनां[11](?) युगपदुपकारः[12]। {न च कश्चिद्दोषः।} तथा गुणानामपि स्यात्। संयोगनिमित्त इति चेत्, साध्यम्, किमर्थान्तरभूतमुत प्राप्तिमात्रं संयोग

---

[1] All the Mss read: गुणत्वप्रसंगः. I follow Raghavan (15(1).7).

[2] All the Mss read अदोषः. I follow Wezler (149.9).

[3] D अथवा विद्यमाना, sec.m. अथवाऽविद्यमाना Chakravarti (80.18) reads अथवा विद्यमाना. Raghavan too (12.12) corrects it into (अथवा)ऽविद्यमाना.

[4] P एव तिष्ठन्ते

[5] Chakravarti (80.19) reads तदहीनम्.

[6] All the Mss read किं चायम्.

[7] D कारणकार्यभागाद्, sec. m. कारणकार्यविभागाद्

[8] D सहभूतानाम्, sec.m. महाभूतानाम्

[9] All the Mss read °शक्तिव्यूहा°

[10] P K °स्थितोक्रम° Chakravarti (80.27) reads शरीरस्थितयोः क्रम°.

[11] P K D भोगेनोर्ध्वगमने वाटवोरर्धाचण्डादीनां. The text of P seems corrupt here. Chakravarti (81.1) reads वेगेनोर्ध्वगमने वाऽधः अर्धचन्द्रादीनां. Wezler (149.23-24) reads ... खलु भोगेनोर्ध्वगमने वाय्वोरर्धचन्दादीनां (युगपदुपकारः) and regards the phrase as uncertain.

[12] P युगदुपकारः

इति[1]। यत्पुनरेतदुक्तं (163.16) सदसद्विकल्पानुपपत्तेरिति, अत्र ब्रूमः, अयुक्त[2]मेतत्। कस्मात्? पङ्ग्वन्धवत्तदुपकारे दोषानुपपत्तेः। तद्यथा पङ्ग्वन्धयोरितरेतरसम्बन्धा(च्च)[3] विद्यमानयोर्दृग्गतिशक्त्योरन्योन्यात्मनि व्यक्तिर्न चाविद्यमानयोरथ चैककार्यसिद्धिः[4]। यथा च पृथिव्यादीनां परस्परोपकारित्वं शक्तयोरभिव्यज्यते, न परशक्त्या[5], एवं गुणानामपीति।

यत्पुनरेतदुक्तम् (164.5) अनेकान्तादिति, तदयुक्तम्। कस्मात्? शास्त्रानवबोधात्। इहास्माकं कार्यकारणयोः (अर्थान्तरत्वान)भ्युपगमाद्[6] गुणानामवस्थान्तरमेवावस्थान्तरापेक्षं[7] कार्यकारणशब्दवाच्यतां लभते। तत्र ये ताव[8]त्प्रधानावस्थानुभाविनो गुणास्तेषां शक्तिमात्ररूपत्वादनिर्देश्यप्रकाशादिस्वभावानां नास्ति तन्निबन्धन उपकारः। यदा वैषम्यमापद्यन्ते तदाऽनिवारितप्रकाशादिरूपास्तन्निमित्तमुपकारं[9] प्रतिपद्यन्ते। तस्माद् व्यक्तानामुपकाराभ्युपगमादवस्थितभावपूर्वकत्वं न विरुध्यत इति शास्त्रमनवगम्यैवमुच्यतेऽनैकान्तिकोऽयं हेतुः (इति)। प्रधानावस्थायामुपकारानभ्युपगमादुत्तरकालमपि तत्प्रसङ्ग इति चेत्, स्यान्मतम्—यदि गुणानामाद्ये प्रकोपे स्वसामर्थ्यादेव पूर्वस्मा[10]त्प्रच्युतिस्तेनोत्तरकालमपि तद्वदेव भविष्यति। अथ प्रधानावस्थायामपि चोपकारः, न तर्हि अनैकांन्तिको हेतु[11]रि ति। तच्च नैवम्। कस्मात्? अग्निवत्स्वशक्तिनिमित्तत्वात्। तद्यथा सूक्ष्मोऽग्निः सूक्ष्मं प्रकाशं स्वयमेव करोति, घटादिप्रकाशने तु तैलवर्त्याद्यपेक्षते। तद्वद् गुणानामाद्यः प्रकोपः स्वशक्तितः, महदाद्यपेक्षस्तूपकारतः। तस्माद्युक्तमेतत्—कारणकार्यविभागाद[12]स्त्यव्यक्तमिति।

---

[1] Wezler (149.26) adds साध्यम् after इति.

[2] D अव्यक्तम् Dkha. अयुक्तम्

[3] All the Mss read इतरेतरसम्बन्धान्न.

[4] D चैककार्ययोः सिद्धिः, sec. m. चैककार्यसिद्धिः

[5] All the Mss read परशक्तय. Raghavan (15(1).7) suggests परं शक्तयः. I follow Pandeya (67).

[6] P K अर्थानभ्युपगमाद् D अर्थाभ्युपगमाद्, sec. m. अर्थानभ्युपगमाद् I follow Wezler (150.1-2).

[7] All the Mss read एवावस्थान्तरानपेक्षं. I follow Raghavan (15(1).7).

[8] D तत्रैतावत् for तत्र ये तावत्

[9] Chakravarti (81.11) reads तदा निवारित° Raghavan (15(1).7) suggests °निर्धारितप्रकाशादि°.

[10] P पूर्वं स्मात् Chakravarti (81.14) reads पूर्वं स्यात्.

[11] All the Mss read न तर्हि नानैकान्तिको. I follow Wezler (150.11-12). Meaning the same thing, Raghavan (15(1).7) proposes a different reading, namely (चोपकारः) तर्हि, and deletes न before तर्हि.

[12] D कार्यकारणविभागाद्, sec. m. कारणकार्यविभागाद्

किञ्चान्यत् ।

अविभागाद्वैश्वरूप्यस्य ॥ का० 15/4॥

इह यद्विश्वरूपं तस्याविभागो दृष्टः। तद्यथा सालादीनां[1] जलभूमी[2](1)। विश्वरूपाश्च[3] महदादयः। तस्मादेषामप्यविभागेन भवितव्यम्। योऽसावविभागस्तदव्यक्तम्। तस्मादस्त्यव्यक्तम्। [सालादीनां[4] जलभूम्योरविभागत्वेनाप्रसिद्धत्वाद् (अ)युक्त[5]मिति चेन्न। तन्न। तत्पूर्व(क)त्वात्[6]। यो हि तत्पूर्वकस्त(दनु)भा[7]व्यसौ दृष्टस्तद्यथा कपालपूर्वको घटः कपालावस्थानुभावी। जलभूमिपूर्वकाश्च सालाः। तस्मात्तेऽपि तदवस्थानुभाविनः। यथा च सालादयस्तथा विशेषतन्मात्राङ्कारमहतामुत्तरोत्तरपदार्थपूर्व(कत्वात्)[8] तदवस्थानुभावः सिद्धः। सामान्यतोदृष्टादनुमाना[9]न्महतश्चाऽव्यक्तावस्थानुभावः।

तत्पूर्वकत्वासिद्धेरयुक्तमिति चेत्, स्यान्मतम्। प्राक्प्रधानमसिद्धं साधयिष्यामीति भवता वैश्वरूप्यस्याविभागादिति हेतोः[10] सालादिदृष्टान्त उपात्तः। ततः सालादीनामविभागोऽसिद्ध[11] इति तत्पूर्वकमुपात्तम्। यावत्तावदप्यसिद्धं स भ(वान्)[12] स्वप्नसोपानपरम्प–

---

[1] D first writes and then deletes the following portion : सालादीनां जलभूमेर्विश्वरूपाच्च महदादयः तस्मादेषामप्यविभागेन भवितव्यम् योऽसावविभागस्तदव्यक्तम् तस्मादस्त्यव्यक्तम् (166.3-4) आह किं पुनस्तद्वैश्वरूप्यं को वा विश्वरूप इति उच्यते वैश्वरूप्यमिति विशिष्टमवस्थानमाचक्ष्महे अस्तमितविशेषत्वमविभाग इति विशेषस्य सामान्यपूर्वकत्वादिति योऽर्थस्तदुक्तं भवति अविभागाद्वैश्वरूप्यस्येति (170.12-14).

[2] D जलभूमेर्, sec. m. जलभूमे

[3] D विश्वरूपाच्च, sec. m. विश्वरूपाश्च

[4] The portion within [ ], which occupies 166.5–170.11, is omitted in P, K and D. D introduces this portion by reading निम्नलिखितोऽयं भागः खण्पुस्तकात् पूरितः. Though opinion may be divided as to its genuineness, I have included it, giving it the benefit of doubt. It may therefore be considered as part of the text.

[5] Dkha. युक्तम्

[6] Dkha. तत्पूर्वत्वात्

[7] Dkha. तनुभव्य्—which reading D corrects into तदनुभाव्य्, I follow D's emendation.

[8] D °पूर्वत्

[9] Dkha. अनुमाना(त्)

[10] Dkha. हेतुः

[11] Dkha. अविभागो सिद्ध

[12] Dkha. सभावात्—which reading D corrects into सभवान्. I follow D's emendation, slightly correcting it.

---

(1) यो० भा० 3.14 : यत्रोक्तम्—जलभूम्योः पारिणामिकं रसादिवैश्वरूप्यं स्थावरेषु दृष्टम्...

रयाऽऽकाशमारूढोऽपि धरणिस्थित एव। तस्मादसिद्धं प्रधानमिति। एतच्चायुक्तम्। कस्मात्? वृद्धिदर्शनात्। कारणान्वयिनी हि सालादीनां वृद्धिरुपलभ्यते। तां दृष्ट्वा गृह्णीमहे नूनं भौमाश्चौदकाश्चावयवाः कारणावयवसहकारिणां परि(माणं)[1] प्रतिपद्यन्ते, तथैषां वृद्धिर्भवतीति। किञ्चान्यत्। तदनुविधानाच्च। दृश्यते खल्वपि दृढदुर्बलत्वस्नेहरौक्ष्याणां[2] जलभूमिगतानां सालादिभिरनुविधानम्, न चाप्रकृतेरनुविधानं दृष्टम्। अतोऽपि मन्यामहे तत्पूर्वकाः[3] सालादयः।

पृथग्ग्रहणादयुक्तमिति चेत्, स्यादेतत्। जलभूम्योः सालादीनां पृथग्ग्रहणं दृष्टम्, न च तत् प्रकृतिविकार(यो[4])रस्तीति। एतदयुक्तम्। कस्मात्? साध्यत्वात्। ये जलभूम्योरवयवाः सालादिभावमापद्यन्ते, तेभ्यस्तेषां पृथग्ग्रहणं साध्यम्। अतो न किञ्चित् (एतत्)[5]।

अत्यन्तविनाशादविभा(गा)नुपपत्ति[6]रिति चेत्, स्यात् (एतत्)। इयं पुनरबुद्धिमतामाशङ्का। यदिदं जलभूम्यवस्था(नुभावित्वं)[7] सालादीनां पुनः पुनरपि (अग्रहीष्महि)[8]... तदमृष्यमाणानां यथा सालादयः[9] स्वकारणविभागविनाशिनोऽस[10]दिति भूतप्रत्यक्षाभावाद् भूतस्मृतेर्विरोधप्रत्यक्षत्वाच्चे[11](1)त्येवमादिभिरपि[12] हेतुभिर्नारभ्यकारणावस्थानुभाविन[13] इति। तदप्ययुक्तम्। कस्मात्? प्रतिषेधात्। असतो हि जन्म प्राग्विस्तरेण निषिद्धं सतश्च तस्य व्यक्त्यपगमा[14]दन्यो विनाशः स्यात्। पुनरुक्तभयान्न किञ्चिदभिधीयते। {तेन[15]} तेनेतरः प्रत्युक्तो योऽपि हि मन्यते प्रागुत्पत्तेः कार्यस्यासत्त्वात्

---

[1] Dkha. परिणामं

[2] Dkha. °स्नेहरूरोक्ष्याणां—which reading D corrects into °स्नेहरोक्ष्याणां.

[3] Dkha. तत्पूर्वकः

[4] Dkha. प्रकृतिविकारो—which reading D corrects into प्रकृतिविकारयोः. I follow D's emendation

[5] Dkha. स्यात् I follow Wezler (151.18).

[6] Dkha. अविभागादनुपपत्तिर्—which reading D corrects into अविभागानुपपत्तिर्. I follow D's emendation.

[7] Dkha. °अवस्थाभावितुं—which reading D corrects into अवस्थानुभावित्वं. I follow D's emendation.

[8] Dkha. अग्रीष्महि—which reading D corrects into अगीष्महि. I follow Wezler (15.21).

[9] Wezler (151.1-22) regards यथा सालादयः as uncertain reading.

[10] Dkha. °विभागविनाशिनः सद् It is here emended.

[11] Dkha. प्रत्यङ्वाच्—which reading D corrects into प्रत्यक्षत्वाच्. I follow D's emendation.

[12] Dkha. °आदिभिरिपि—which reading D corrects into आदिभिरपि. I follow D's emendation.

[13] Dkha. नारभिकारणावस्थानुभाविन I follow Wezler (151.24).

[14] Dkha. तस्य कं (?) वक्त्रपगमाद्—which reading D corrects into तस्य व्यक्त्यपगमाद् I follow D's emendation.

[15] I follow Wezler (152.1) in deleting तेन.

---

(1) वै० सू० 9.6

प्रकृता[1]वविभागोऽनुपपन्न इति तेनापि "असदकरणात्" (का॰ 9) इति (एतत्)[2] प्रकरणमपेक्ष्यम्।

देशाङ्गस्वभावविभागानुपपत्तेरयुक्तमिति चेत्, अथापि स्यात्। विश्वरूप्यस्या[3]विभागाभ्यनुज्ञानाद्विभागोऽप्यनुज्ञात[4] एवेति शक्यमनुमातुम्। स च (वि)भागो[5] व्यक्तस्य {देशविभागाद्वा स्यात्} इक्षु(क्षोदरसवद्)[6] देशविभागाद्वा स्यात्, (... अङ्गविभागाद्वा स्यात्[7],) भोजनान्तररसवत् स्वभावभेदाद्वा स्यात्। किञ्चातः। तद्यदि तावद्देशविभागात्कार्यकारणनाना(त्व)प्रसङ्गो[8] गवाश्ववत्, अथाङ्गविभागात्[9]... प्रधाननानात्वप्रसङ्ग (अङ्गानां) आत्मावयवत्वप्रसंङ्ग[10]श्च, अथ स्वभावभेदात्तथाऽपि कार्यकारणनानात्वप्रसङ्गः शीतोष्णवत्। एतावांश्च विभागविकल्पः स्यात्। सर्वथा च दोष इति तस्मादसदेतद्[11] इति। तच्चानुपपन्नम्। कस्मात्? विशेषितत्वात्[12]। पूर्वमेवास्माभिर्विशेषितं यथैकमेव नो वस्तु नि(वृत्त)-[13]विशेषमविभाग इत्युच्यते समुपजातविशेषं विभाग इति। कस्मात्? विभागविशेषयोरर्थभेदात्। एवं च सति देशाङ्गाविभागयोः[14] कः प्रसङ्गः, स्वभावभेदोऽपि नास्ति त्रैगुण्याद्यविशेषात्[15]। शक्तिभेदादिति चेन्न, अनेकान्तात्[16]। अस्ति हि सेनवनदेः संस्थानस्य संस्थानिभ्यः शक्तिभेदो, न च नानात्वम्।

---

1. Dkha. प्राकृताव्
2. Dkha. एत्
3. Dkha. वैश्वरूपस्य
4. Dkha. अनुज्ञातः —which reading D corrects into अनुज्ञात.
5. Dkha. चाविभागो—which reading D corrects into च विभागो. I follow D's emendation.
6. Dkha. इक्षूदरसवे— which reading D corrects into इक्षुक्षोदरसवत्. I follow D's emendation.
7. In adding अङ्गविभागाद्वा स्यात्, I follow Wezler (152.7).
8. Dkha. कार्यकारणनानाप्रसङ्गो I follow Wezler (152.9).
9. Dkha. अथाङ्गविभागा
10. Dkha. अंशानां नात्मावयवत्वप्रसङ्गश् (not clear). D corrects Dkha.'s reading into अंशानामात्मावयवप्रसङ्गश्, and again corrects into अंशनान सात्मावयवत्वप्रसङ्गश्.
11. Dkha. एतम्(द्) D apparently suggests the reading एतद्.
12. Dkha. विशेषत्वात्— which reading D corrects into विशेषितत्वात्. I follow D's emendation.
13. Dkha. निर्लितविशेषम्
14. Dkha. देशांशविभागयोः
15. Dkha. त्रैगुणादि विशेषात्—which reading D corrects into त्रैगुण्याद्यविशेषात्. I follow D's emendation.
16. Dkha. अनेकात्— which reading D corrects into अनेकान्तात्. I follow D's emendation.

अनेककारणपूर्वकेषु[1] (अन्वय)परिमाणादिदर्शना[2]दसिद्धिरिति चेत्, स्यान्मतम्। अनेककारणपूर्वकेष्वविगर्भकादिष्वन्वयपरिमाणावुपलब्धा[3]वनेकर्तृकेषु शयनाद्यङ्गेषु कार्यकारणविभागः। तस्मादनेकान्तादसाधनं परिमाणादय इति। एतच्चायुक्तम्। कस्मात्? हेत्वन्तरतस्तत्सिद्धेः। स्यादेतत्। यदि न तस्यैकत्वमत एव साध्यते। किं तर्हि। अभिन्नबुद्धिनिमित्तत्वात्। उपेत्य वा सर्वेषां तद्धेतुत्वादविगर्भकादीनां अन्वयपरिमाणसम्भवे[4] परस्परोपकारो नास्ति शयनाद्यङ्गानां चैकस्मिन्नविभागः। सर्ववीतसम्भवे हि कारणत्वम्। भिन्नजातीयनिवृत्त्यर्थोप्ययमेकशब्दो दृश्यते (न)[5] वस्त्वन्तरनिवृत्त्यर्थो ब्राह्मण एको वर्णः शालय एकं सस्यमिति।

अपक्षधर्मत्वात्प्रधानासिद्धिरिति चेत्। स्यान्मतम्। परि(माणा)दयो[6] व्यक्तेर्दृष्टत्वात्तद्ध(र्मो) न चान्यधर्मो[7]ऽन्यसिद्धये समर्थः। कस्मात्[8]? काकस्य काशब्दादपि[9] प्रधानास्तित्वप्रसङ्गात्। तस्मात्परिमाणादिभिः प्रधानस्येति। (तच्च)[10] नैवम्। कस्मात्? पृथक्त्वानभ्युपगमात्। कार्यकारणपृथक्त्ववादिनो हि कार्यधर्माः कारणासम्बन्धिन[11] इति कृत्वा युक्तमभिधातुं स्यात्। न त्वेतन्मतमस्माकम्। तस्मात् सुविकल्प(:)[12] प्रतिषेधोऽयं किं च स्वपक्षतत्प्रतिपक्षसिद्धेः[13]। इदं तावदयं सर्वशास्त्रपरीक्षाकारः (प्र)ष्टव्यो[14]ऽथ भवतो[15]ऽग्निरत्र धूमादुष्णः[16] सर्वोऽत्राग्निरित्यस्मिन्प्रयोगे कथं धूमाग्न्योरग्निस्पर्शयोश्च

---

1. Dkha. °पूर्वकेषु अर्भकादिषु D inserts after °पूर्वकेषु the following words : पूर्वकेष्वपरिमाणादिदर्शनादसिद्धिरिति चेत् स्यान्मतं अनेककारणपूर्वकेष्वविगर्भकादिषु. I accept the inserted words.
2. Dkha. सम्भवो—which reading is corrected by D into सम्भवे. I follow D's emendation.
3. Dkha. अन्वयपरिमाणानुपलब्धौ—which reading is corrected by D into °परिमाणौ उपलब्धौ. I follow D's emendation.
4. D अपरिमाणादिदर्शनाद् (see fn. 1 above)
5. Dkha. तेन—which reading is corrected by D into न. I follow D's emendation.
6. Dkha. परिणामादयो
7. Dkha. तद्धर्मानन्यधर्मो—which reading is corrected by D into तद्धर्म न चान्यधर्मो.
8. Dkha. कस्मात् काशार्दात् (?)—which reading is corrected by D into कस्मात् simply. I follow D's emendation.
9. Dkha. काशर्दाद्
10. Dkha. ततश्च—which reading is corrected by D into तच्च. I follow D's emendation.
11. Dkha. कारणासम्बन्धिनम्—which reading is corrected by D into कारणासम्बन्धिनः. I follow D's emendation.
12. Dkha. सुविकल्पम् D encircles the anusvāra sign.
13. Dkha. स्वपक्षप्रतिपक्ष°—which reading is corrected by D into स्वपक्षतत्प्रतिपक्ष°. I follow D's emendation.
14. Dkha. पृष्टव्यः
15. Dkha. भवतु—which reading is corrected by D into भवतो. I follow D's emendation.
16. Dkha. उष्ण

लिङ्गलिङ्गिभावः[1]। गमकत्वादित्याह। न हि नो गुणगुणित्वेन[2] धर्मव्यवस्था। किं तर्हि। साध्यत्वापेक्षया साध्यो लिङ्गी, साधनं लिङ्गमित्युच्यते। लिङ्गत्वं गमकत्वे स्वपक्षेऽभ्युपगच्छतः[3] परपक्षे कया युक्त्या न लिङ्गगम(को)[4]ऽन्वयः।

असाधारणत्वात् प्रधानस्वरूपस्यानुमानादप्रसिद्धिरिति चेन्न, अनभ्युपगमात्। यत्र विप्रतिपत्तिस्तत्प्रत्यक्षत्वाविषयत्वेऽनुमानस्य गोचर इत्ययमभ्युपगमो नः। तस्मादेतदप्यबाधकम्। किञ्चान्यत्। अत्यन्ताग्रहणप्रसङ्गात्। अतीन्द्रियस्य धर्मिणः स्वरूपं प्रत्यक्षस्याविषयः। तत्रानुमानमपि प्रतिषेध(तो)[5]ऽत्यन्ताग्रहणं प्राप्तं प्रमान्तराभावात्। दृष्टं च लोके डित्थादीनां गत्यादिभिरनुमानं डित्थोऽयं व्यक्तमागच्छति[6] (इति)। आह च—

तदेवैतच्छिरोग्रीवं तौ बाहू परिघोपमौ।
तदेव चास्य विक्रान्तं नायमन्यो धनञ्जयात्(1)॥

तस्मादसाधारणविषयमानं नास्तीति लोकतर्कविरुद्धमेतत्। (...)।]

आह—किं पुनस्तद्वैश्वरूप्यम्, को वा विश्वरूप इति?

उच्यते—वैश्वरूप्यमिति विशिष्टमवस्थानमाचक्ष्महे, अस्तमितविशेषत्वमविभाग इति। विशेषस्य सामान्यपूर्वकत्वादिति योऽर्थस्तदुक्तं भवति **अविभागाद्वैश्वरूप्यस्येति**। एवमेतैः पञ्चभिर्वीतैर्व्यक्तस्य कारणमस्त्यव्यक्तमिति सिद्धम्।

आह—विप्रतिषेधप्रसङ्गः, कारणान्तरप्रतिषेधावचनात्। यथा भवानाह, प्रधानं जगदुत्पत्तिसमर्थं कारणमस्ति, एवं तन्त्रान्तरीयाः परमाणुपुरुषेश्वरकर्मदैवस्वभावकालयदृच्छाऽभावान्कारणत्वेनाभिदधति। तेषां च प्रतिषेधो नोच्यत इत्यतो विप्रतिषेधः प्राप्नोति। किं प्रधानमेव कारणं आहोस्विदेतान्येव (अथ)वोभयमिति? अन्वयदर्शनात्तदनुपपत्तिरिति चेत्, स्यान्मतम्—प्रधानान्वय एव पृथिव्यादिषु सुखादिलक्षण उपलभ्यते।

---

[1] Dkha. लिङ्गं लिङ्गिभावो—which reading is corrected by D into लिङ्गलिङ्गिभावो. I follow D's emendation.

[2] Dkha. गुणगणितेन— which reading is corrected by D into गुणगुणित्वेन. I follow D's emendation.

[3] Dkha. ऽभ्यु(प)गच्छतः

[4] Dkha. लिङ्गगमके—which reading is corrected by D into ॰गमको. I follow D's emendation.

[5] Dkha. प्रतिषेधो—which reading is corrected by D into प्रतिषेधतः. I follow D's emendation.

[6] After आगच्छति Dkha. writes and deletes तदेवैतच्छिरोग्रीव.

---

(1) महाभारत 4. 36. 31

यच्च येनान्वितं[1] तस्यासौ विकार इति युक्तमेतत्प्रागपदिष्टम् (158.24)। तस्मात्प्रधानविकार एव व्यक्तमिति। तच्चानुपपन्नम्। कस्मात्? अनेकान्वयस(द्भा)वात्[2]। परमाण्वन्वयोऽपि हि व्यक्त[3] उपलभ्यते, रूपादिसत्त्वात्। पुरुषान्वयः करणस्य संवेदकत्वात्। ईश्वरान्वयः शक्तिविशेषयुक्तानामुपलब्धेः। कर्मदैवान्वयः जगद्वैचित्र्योपलम्भात्(1)। स्वभावान्वयो द्रव्यान्तरसंसर्गेऽपि भावानां तस्मादप्रच्युतेः। कालान्वयो युगाद्यनुविधानात्। यदृच्छान्वयो नियमाभावात्। अभावान्वयो गवादीनां परस्परात्मस्वदर्शनात्[4]। इतरेतराणि प्रत्युक्तानि। कारणान्तरपूर्वकत्वे[5]ऽपि खलु व्यक्तस्य शक्याः[6] परिमाणादयः पूर्वमेव कल्पयितुम्। तस्मादयुक्त[7]मन्वयादिभ्यः[8] कारणमस्त्यव्यक्तमिति।

उच्यते—यत्तावदुक्तं (170.16) परमाणूनामप्रतिषेधाद् विप्रतिषेधप्रसङ्ग[9] इति, अत्र ब्रूमः—तदनुपपत्ति[10]रस्तित्वानभ्युपगमात्[11]। अस्तित्वे हि परमाणूनामभ्युपगम्यमाने सति सत्यमेवं स्यादियमाशङ्का, किं परमाणुपूर्वकमिदं विश्व[12]मथ प्रधानपूर्वकमिति? न तु तेषां सद्भावो निश्चितः। तस्मादयुक्तमेतत्। यत्तु खल्विदमुच्यते पृथिव्यादिषु रूपाद्युपलम्भादन्वयदर्शना[13]दणूनां सद्भावः प्रधानवदेव कल्पयितव्य इति, एतदपि चानुपपन्नम्। कस्मात्? अन्यथापि तदुपपत्तेः। तन्मात्रपूर्वकत्वेऽपि हि पृथिव्यादीनां कल्प्यमाने रूपादिसत्त्वादतो न युक्तमेतत्। सुखादीनामात्मगुणत्वेनाभ्युपगमात्प्रधानेऽपि

---

1. D यच्चेथेनान्वितं, sec. m. यच्च येनान्वितं
2. All the Mss read अनेकान्वयसम्भवात्. Consistency of usage (see below 171.13, 172.11 etc.) requires the emendation we make.
3. D व्यक्त, sec. m. व्यक्ते
4. D आत्मस्वदर्शनाद्, sec. m. आत्मस्यादर्शनाद्(?)
5. D कारकान्तर°, sec. m. कारणान्तर°
6. P शक्त्याः for शक्याः
7. Dkha. पूरितम्
8. D अयुक्तमन्वयादिभ्यः, sec. m. अयुक्तमेतत् अन्वयादिभ्यः
9. D अप्रतिषेधा .... विप्रतिषेधप्रसङ्ग, sec.m. अप्रतिषेधाद् विप्रतिषेधप्रसङ्ग
10. D अनुपपत्तिः, sec. m. अनुपपत्तेः
11. D अस्तित्वानभ्युपगमात्, sec. m. अस्तित्वाभ्युपगमात्
12. D विश्वम्, sec. m. विश्वपदम्
13. All the Mss read अन्वयस्पर्शनाद्. I follow Pandeya (69).

---

(1) Cf. अभि॰ को॰ 4.1 (p. 567)

तत्प्रसङ्ग इति चेत्, अथापि[1] स्यात्। यथा तन्मात्राणां रूपादिमत्त्वं कल्प्यते तत्पूर्वकत्वं च पृथिव्यादीनां दृश्यमपि तेषु रूपादिसत्त्वलिङ्गेन[2] परमाणुभ्यो निष्कृष्यते, एवमस्माभिः सुखादीनामात्मगुणत्वाभ्युपगमात्तद्बुद्धिनिमित्तत्वे पृथिव्यादीनां प्रधानपूर्वत्वाक्षेपः करिष्यत इति। एतच्चानुपपन्नम्। कस्मात्? आत्मगुणत्वप्रतिषेधात्। "तस्माच्च विपर्यासात्" (का॰ 19) इत्यत्र सुखादीनामात्मगुणत्वप्रतिषेधं[3] करिष्यामः। तस्मादसम्यगेतत्।

आह, यदि पुनस्तन्मात्राणामेव परमाणुत्वमभ्युपगम्यते, क एवं सति दोषः स्यात्?

उच्यते—न शक्यमेवं भवितुम्। किं कारणम्? वृद्धिमत्यस्तन्मात्रलक्षणाः प्रकृतयोऽस्माभिरभ्युपगम्यन्ते। कस्मात्? स्वकार्याद्धि प्रथीयसी प्रकृतिर्भवतीति च नः समयः[4]। महान्ति च पृथिव्यादीनि महाभूतानि। तस्मात्तेषां तदतिरिक्तया प्रकृत्या[5] भवितव्यम्। परिच्छिन्नदेशाश्च परमाणवः। तस्मान्न तन्मात्राभ्युपगमात्तेषामभ्युपगमः। उपेत्य वा तदसम्भवः, कृतकत्वात्। अस्तु[6] वा परमाणूनां सद्भावस्तथापि तेभ्यो जगदुत्पत्तेरसम्भवं ब्रूमः। किं कारणम्? कृतकत्वात्। अकृतकेन हि जगत्कारणेन युक्तं भवितुम्। कृतकाश्च परमाणवः। तस्मात्सत्यपि सद्भावे न तेषां जगत्कारणत्वमुपपद्यते। हेत्वनुपदेशादयुक्तमिति चेत्, अथापि स्यात्। किं पुनरत्र कारणं येनाकृतकं जगत्कारणमिष्यत इति? उच्यते—तस्यैव कारणत्वप्रसङ्गात्। यद्धि तत्परमाणूनां कारणम्, तदेव जगत्कारणत्वेन युक्तं कल्पयितुं स्यात्, न तन्निष्पादिताः परमाणवः। कृतकत्वासिद्धेरयुक्तमिति चेत्, स्यान्मतम्—यदि परमाणूनां कृतकत्वं प्रसिद्धम्, अत एतद्युज्यते[7] वक्तुममुष्माद्धेतोरकारणं परमाणव इति। तत्त्वसिद्धम्। तस्मान्न किञ्चिदेतत् (इति)। उच्यते—परिच्छिन्नदेशत्वात्। इह यत्परिच्छिन्नदेशं तत्कृतकं दृष्टम्, तद्यथा घटः। परिच्छिन्नदेशा[8]श्च (परमाणवः)। तस्मात् {परमाणवः}[9] कृतकाः।

किञ्चान्यत्, रूपादिमत्त्वात्। इह यद्रूपादिमत्तत्कृतकं दृष्टम्। तद्यथा घटः। रूपादिमन्तश्च परमाणवः। तस्मात्कृतकाः।

---

[1] D sec. m. अन्यथापि

[2] D रूपादिमत्त्वलिङ्गेन, sec. m. रूपादिमत्त्वल्लिङ्गित्वेन

[3] D °गुणत्वप्रतिषेधे (?), sec. m. °गुणत्वप्रतिषेधं

[4] Chakravarti (83.2) reads नः संशयः. Raghavan (15(1).7) corrects it into न संशयः.

[5] All the Mss read पृथिव्या. I follow Raghavan (15(1).7).

[6] Tripathi (270) omits अस्तु वा ... किं कारणम्? कृतकत्वात्.

[7] Tripathi (270) reads तद् युज्यते for एतद्युज्यते.

[8] All the Mss read परिच्छिन्नदेशस्. I follow Tripathi (271) and Wezler (155.32-33) in reading परिच्छिन्नदेशाश्च परमाणवः.

[9] In deleting परमाणवः before कृतकाः, I follow Tripathi (271) and Wezler (155.33).

किञ्चान्यत्, औष्ण्ययोगात्। यदौष्ण्ययुक्तं[1] तत्कृतकम्। तद्यथा प्रदीपः, तद्वन्तश्चाग्नेयाः परमाणवः। तस्मात्कृतकाः।

किञ्च वेगवत्त्वात्। इह यद्वेगवत्तत्कृतकम्। तद्यथा इषुः {वेगवान्}, तद्वन्तो वायवीयाः परमाणवः। तस्मात्कृतकाः।

किञ्च स्नेहद्रवत्वयोगात्। इह यत्स्नेहद्रवत्वयुक्तं तत्कृतकम्। यथा केदारादिष्वापः। इत्थं चाप्याः परमाणवः। तस्मात्कृतकाः।

किञ्चाधेयत्वात्। इह यदन्यस्मिन्नाधीयते तत्कृतकम्। तद्यथा बदरम्[2]। आधीयन्ते च परमाणवः पृथिव्याम्। तस्मात्कृतकाः।

किञ्च अर्थान्तराधारत्वात्। इह यदर्थान्तरस्याधारत्वं प्रतिपद्यते, तत्कृतकम्। तद्यथा घटः। अर्थान्तरस्य च द्व्यणुकादेराधारत्वमणवः प्रतिपद्यन्ते। तस्मात्कृतकाः।

किञ्च प्राप्तिव्यवधानात्। इह ययोर्मध्ये अन्तरा द्रव्यमवस्थितं प्राप्तेर्व्यवधायकं भवति, तौ कृतकौ। तद्यथा द्व्यङ्गुली। तथा चाणू द्वावन्तराण्वन्तरम[3]वस्थितं ययोः[4] प्राप्तेर्व्यवधायकम्, तौ कृतकौ। तस्मात्तावपि कृतकौ।

किञ्च द्रव्यान्तरारम्भकत्वात्। इह यद् द्रव्यान्तरारम्भकं तत्कृतकं वः(1)। तद्यथा तन्तुः। द्रव्यारम्भकाश्च[5] परमाणवः। तस्मात्कृतकाः।

किञ्च प्रत्यक्षत्वात्। इह यत्प्रत्यक्षं तत्कृतकं दृष्टम्। तद्यथा घटः। प्रत्यक्षाश्च योगिनां परमाणवः। तस्मात् कृतकाः[6]। अत एवाकृतकत्व[7]मिति चेत्, स्यान्मतम्। यत एव योगिनां प्रत्यक्षाः परमाणवस्तत एवाकृतकाः[8]। किं कारणम्? अस्मदादिप्रत्यक्षं

---

1. P K औष्ण्यमुक्तम् K always adds इह before औष्ण्य°. D औष्ण्यमुक्तम्, sec. m. औष्ण्ययुक्तम् Chakravarti (83.16) reads यदौष्म्ययुक्तं.
2. P बधरम् K बधरम् D not clear, sec. m. बदरम् Chakravarti (83.fn.1) reads this as वाधरं in the footnote, but omits it in the text.
3. D अन्तरावन्तरम्, sec. m. अन्तराण्वन्तरम्
4. P यो यः D ययोः, sec. m. तयोः Raghavan (15(1).7) suggests यो ययोः (प्राप्तेः).
5. Chakravarti (83.28) reads द्रव्यान्तरारम्भकाश्च.
6. P K तत्कृतकाः D तत्कृतकाः, sec. m. तस्मात्कृतकाः
7. All the Mss read एव कृतकत्वम्. I follow Raghavan (15(1).7), who anticipates Tripathi (272) and Wezler (156.18).
8. Here too all the Mss read एव कृतकाः, and here again I follow Raghavan (15(1).7), who anticipates Tripathi (272) and Wezler (156.19).

---

(1) Cf. वै॰ सू॰ 1.1. 8

घटादि हि कृतकं दृष्टमिति कृत्वा। एतदप्यनुपपन्नम्। कस्मात्? शरीराकृतकत्वप्रसङ्गात्[1]। शरीरमपि हि योगिनां प्रत्यक्षम्, कामं तदप्यकृतकमस्तु[2]। अथ नैतदेवम्, तर्हि नाकृतकाः परमाणवः। प्रधानादिषु प्रसङ्ग इति चेन्न, अनभ्युपगमात्। श्रीकपिलब्राह्मणैरपि[3] प्रधानपुरुषावप्रत्यक्षाविति नः शास्त्रम्। तस्माद्यत्किञ्चिदेतत्। सत्तादिवदिति चेत्, स्यान्मतम्। यथा सत्तागुणत्वरूपत्वादीनां[4] सति प्रत्यक्षत्वेऽकृतकत्वम्, एवं परमाणूनां भविष्यतीति। तदप्ययुक्तम्। कस्मात्? साध्यत्वात्। परमाण्वकृतकत्ववत्सत्तादीनां सद्भावोऽसिद्धः। तस्माच्छशविषाणा[5]त्पुरुषविषाणसिद्धिवदग्राह्यमेतत्। सौक्ष्म्यादणूनां कृतकत्वाप्रसङ्ग इति चेत्, स्यान्मतम्—न हि परमाणुभ्यः सूक्ष्मतरमन्यद् भावान्तरमस्ति यदेषामारम्भकं स्यात्। परा खल्वेषा काष्ठा सौक्ष्म्यस्य यत्परमाणवः। तस्मादेषां कृतकत्वमनुपपन्नमिति। एतच्चायुक्तम्। कस्मात्? पाकजेष्वतिप्रसङ्गात्[6]। सौक्ष्म्यादकृतकत्वमिच्छतः पार्थिवेषु तु परमाणुष्वग्निसंयोगाच्छ्यामतामपमृद्य ये पाकजा आधीयन्ते, तेषामकृतकत्वप्रसङ्गः। तेऽपि परमाणवः सूक्ष्माः। यत्तु खल्वतिसौक्ष्म्यात्प्रधानपुरुषयोरकृतकत्वं दृष्टम्, तत्सति विभुत्वे। न च यथा प्रधानपुरुषावेवमणवोऽपि विश्वं व्यश्नुवते[7]। तस्मात्सति सौक्ष्म्ये पाकजवदेषां कृतकत्व[8]मनिवार्यम्। येषां तु कार्यद्रव्यं पच्यत[9] इति पक्षः, तेषामयमनुपालम्भ इत्यतः परमाणुसमवेतं कर्मोदाहार्यम्। तद्धि[10] सूक्ष्ममतीन्द्रियं कृतकं चेति सिद्धं कृतकाः परमाणवः। कृतकत्वाच्चैषामनित्यता[11]'प्यनुपातिनीति[12] कृत्वाऽन्तरालप्रलयमहाप्रलयेषु प्रध्वंसात्परमाणूनां "कारणाभावात्कार्याभावः"(1) इति स्वशास्त्रसिद्धादनुमानाज्जगदुच्छित्तिदोषप्रसङ्गः। तथा

---

1. P K शरीकृतकत्व° D शरीरकृतकत्व°, sec.m. शरीराकृतकत्व° Raghavan's emended reading (15(1).7) agrees with the one we have adopted.
2. P अकृतकस्तु
3. Raghavan (15(1).7) suggests श्रीकपिलब्रह्मणोरपि, and says that Brahman here refers to Hiraṇyagarbha.
4. D सत्ता गुणत्व°
5. D च्छशविषाणात्, sec. m. च्छशविषाणवत्
6. D अतिप्रसंगात्, sec. m. अप्रसंगात्
7. Chakravarti (84.17) reads व्यश्नुवन्ते.
8. D कृतकत्वम्, sec. m. अकृतकत्वम्
9. P पश्यत
10. D तद्धि, sec. m. बुद्धि
11. D अन्यताप्य्, sec. m. अनित्यताप्य्
12. P अनपातिनीति

---

(1) वै॰ सू॰ 1.2.1

भोगिनामुपचितस्य स्वकर्मणोऽनुपभोगात्कृतस्य विप्रणाश:[1]। अनिष्टं चैतत्। तस्मान्न जगत्कारणं परमाणवः। याऽपि खल्वियमाशङ्का पुरुषाज्जगदुत्पत्तिर्भविष्यतीति, साऽप्ययुक्ता। कस्मात्? प्रतिषेधात्। "तस्माच्च विपर्यासात्" (का॰ 19) इत्यत्र पुरुषस्याकर्तृत्वमुपपादयिष्यामः। चैतन्याविशेषादीश्वरस्यापि स एव विधिः कारणत्वप्रतिषेधे बोद्धव्यः।

आह—अस्त्येवमीश्वर इति पाशुपतवैशेषिकाः। कस्मात्? कार्यविशेषस्यातिशयबुद्धिपूर्वकत्वात्। इह कार्यविशेषः प्रासादविमानादिरतिशयबुद्धिपूर्वको दृष्टः। अस्ति चायं महाभूतेन्द्रियभुवनविन्यासादिलक्षणः कार्यविशेषः। तस्मादनेनाप्यतिशयबुद्धिपूर्वकेण भवितव्यम्। यत्पूर्वकोऽयं स ईश्वरः। तस्मादस्तीश्वर इति। किञ्चान्यत्, चेतनाचेतनयोरभिसम्बन्धस्य चेतनकृतत्वात्। इह चेतनाचेतनयोरभिसम्बन्धश्चेतनकृतो दृष्टः, तद्यथा गोशकटयोः। अस्ति चायं चेतनाचेतनयोः शरीरशरीरिणोरभिसम्बन्धः। तस्मादनेनापि चेतनकृतेन भवितव्यम्। यत्कृतोऽयं स ईश्वरः। तस्मादस्तीश्वरः कारणम्।

उच्यते—यत्तावदुक्तं कार्यविशेषस्यातिशयबुद्धिपूर्वकत्वादीश्वरसद्भावसिद्धिरिति, अत्र ब्रूमः—न, साध्यत्वात्। अस्मदादिबुद्धिपूर्वकाः प्रासादादयोऽतिशयबुद्धिपूर्वका वेति साध्यमेतत्। तस्मादनुत्तरम्।

किञ्च प्राक्प्रधानप्रवृत्तेर्बुद्ध्यसम्भवात्कारणान्तरप्रतिषेधात् प्रधानादयं बुद्धिपूर्वकं कार्यविशेषं कुर्वीत, प्राक्च प्रधानविपरिणामाद् बुद्धिरेव नास्तीत्यनुपपन्न[2]मेतत्। शक्तिमत्त्वात्स्वत इति चेत्, स्यात्पुनरेतत्। सर्वशक्तिप्रचित ईश्वरः। तस्य प्रागपि प्रधानविपरिणामात्स्वत एवेच्छायोगाद् बुद्धिसद्भावो न[3] प्रतिषिध्यत इति। एतदप्यनुपपन्नम्। कस्मात्? दृष्टान्ताभावात्। बुद्धिः स्वत एवेत्यत्र पर्यनुयुक्तस्य क[4]स्ते दृष्टान्तः? तस्मादसदेतत्। शक्तिविशेषाददोष इति चेत्, अथापि स्यात्—नान्येषां बुद्धिमतामीश्वरतुल्या शक्तिः। अत एषां प्रधाना[5]च्छरीरव्यूहसमकालमात्मादिसन्निकर्षाद्वा बुद्धय उत्पद्यन्त {इति}, ईश्वरस्य तु स्वत इति। एतदप्यनुपपन्नम्। कस्मात्? सर्ववादसिद्धिप्रसङ्गात्। दृष्टान्तविरुद्धमर्थमादाय[6] प्रतिबध्यमानेन शक्तिविशेषः स्मर्तव्य इत्येतस्यां कल्पनायां सर्ववादसिद्धिप्रसङ्गः स्यात्। तस्माद् ग्रहमात्रमेतत्[7]। एवं स्वत ईश्वरस्य बुद्धिसम्भवो

---

1. K विप्रनाश:
2. P K D उपपन्नम् Dkha. अनुपपन्नम्
3. D बुद्धिसद्भावो न, sec. m. बुद्धिसद्भावेन
4. P पर्यनुयुक्तकस्
5. Chakravarti (85.15) reads प्राधान्यात्.
6. D अर्थमादाय, sec. m. अर्थं प्रतिज्ञाय
7. Chakravarti (85.19) reads तस्मादूहमात्र°.

न चेद् भवेत्, युक्तमुच्यते प्राक्प्रधानप्रवृत्तेर्बुद्ध्यसम्भवान्न बुद्धिमत्पूर्वकोऽयं कार्यविशेषः (इति)।

किञ्च फलानुपपत्तेः। दृष्टमदृष्टं वा फलमुद्दिश्य बुद्धिमन्तः कार्यविशेषान्प्रासादविमानादीनारभमाणा दृश्यन्ते। अनुपहतश्चायमैश्वर्यात्।

किञ्च प्रयोजकानुपपत्तेः। अन्येन खलु प्रयुक्ता बुद्धिमन्तः कार्यविशेषमारभमाणा दृश्यन्ते। तच्चानुपपन्नमीश्वरस्य, तद्विशिष्टानुपपत्तेः।

किञ्च अनेकान्तात्। न च सर्वः कार्यविशेषो बुद्धिपूर्वकः, वृक्षादीनां तद्व्यतिरेकेणोत्पत्तेः। सर्वस्येश्वरबुद्धिपूर्वकत्वाभ्युपगमे दृष्टान्ताभावः। न चास्त्यनुदाहृतो वादः। तस्मादनेकान्तान्न बुद्धिमत्पूर्वकं व्यक्तम्।

किञ्च दुःखोत्तरत्वात्। बुद्धिपूर्वक[1]श्चेदयं[2] कार्यविशेषः स्यात्, कर्तुर्दुःखोत्तरविधाने प्रयोजनं नास्ति। शक्तिमांश्चायमिति सुखोत्तरमेव विदध्यात्। दुःखोत्तरश्चायम्। तस्मान्न बुद्धिपूर्वकः कार्यविशेषः।

किञ्च दुःखोपायत्वात्। बुद्धिपूर्वकश्चेदयं कार्यविशेषः स्यात्, धर्मार्थकाममोक्षप्राप्तयः सुखोपायाः स्युः। दुःखोपायाश्च (ते)। तस्मादबुद्धिपूर्वकः। धर्माधर्मनिमित्तत्वाददोष इति चेत्, स्यान्मतम्। यद्यपीश्वरपूर्वकोऽयं कार्यविशेषः, तथाप्यादिसर्गे सुखोत्तराणामस्मादुत्पन्नानां[3] प्राणिनां धर्माधर्मपरिग्रहाद् हीनमध्यमोत्कृष्टवयोजातिस्वभावादियोगो भवति। ततश्च नापराधोऽय[4]मीश्वरस्येति। एतदप्ययुक्तम्। कस्मात्? अधर्मोत्पत्तिहेत्वभावात्[5]। ईश्वरश्चेद्धर्माधर्मयोरुत्पत्तावीष्टे, धर्ममेव प्राणिनां सुखहेतुत्वादुत्पादयेत्, नाधर्मम्, प्रयोजनाभावात्। अथ मतम्, स्वाभाविकी धर्माधर्मयोः स्वकारणादुत्पत्तिः, यदुक्तं सर्वमीश्वरबुद्धिपूर्वकं व्यक्तमिति तु तस्य व्याघातः। तस्मादीश्वरो न कारणम्। यत्पुनरेतदुक्तं चेतनाचेतनयोरभिसम्बन्धस्य चेतनकृतत्वादीश्वरस्य सद्भाव इति, अत्र ब्रूमः—अयुक्तमेतत्। कस्मात्? साध्यत्वात्। योऽयं चेतनाचेतनयोर्गोशकटयोरभिसम्बन्धः, स केन चेतनेन कृतः? यदि चैत्रेण[6], तस्य कार्यकारणसंघातत्वादचैतन्यम्[7]। अथ चैत्रशब्दवाच्यस्य पिण्ड-

---

[1] D बुद्धिपूर्वकश्, sec.m. बुद्धिमत्पूर्वकश् Dkha. बुद्धिमत्पूर्वकश्

[2] All the Mss read चेदस्य. We insert अयं for the sake of consistency.

[3] All the Mss read अस्मदुत्पन्नां.

[4] Dkha. reads अपराधोऽयम्, thus omitting न before it.

[5] Dkha. °हेतुभावाद्

[6] Chakravarti (86.10) reads यद्वैचित्र्येण for यदि चैत्रेण.

[7] All the Mss read °आचेतन्यम्. I agree with Wezler (158.31) in emending it.

स्योपद्रष्टा क्षेत्रज्ञस्तत्कृत इष्यते, तदयुक्तम्, साध्यत्वात्। न हि पुरुषकर्तृत्वमस्मत्पक्षे प्रसिद्धम्। उभयपक्षप्रसिद्धेन व्यवहारः।

किञ्चान्यत्, अनवस्थाप्रसङ्गात्। चेतनाचेतनयोरभिसम्बन्धस्य चेतनकृतत्वं ब्रुवतः प्राप्तमीश्वरकार्यकरणयो[1]रभिसम्बन्धस्य चेतनकृतत्वम्। तथा चानवस्थाप्रसङ्गः। अथ मा भूदयं दोष इति स्वाभाविक ईश्वरस्य कार्यकरणयोरभिसम्बन्ध इष्यते, न तर्ह्यैकान्तिको हेतुः। तयोरपि चैतन्या[2]ददोष इति चेत्, स्यात्पुनरेतत्—ईश्वरस्य यत्कार्यकरणम्, तदपि चेतनमीश्वरोऽपि। तस्मात्सम्बन्धे न[3] प्रत्युदाहरणमुपपद्यत इति। एतदयुक्तम्। कस्मात्? असम्बन्धप्रसङ्गात्। चैतन्याविशेषादात्मन[4] आत्मान्तरेणाभिसम्बन्धो नास्ति। एवमीश्वरकार्यकरणयो[5]रपि न स्यात्। अनिष्टं चैतत्। किञ्च विपर्ययप्रसङ्गात्[6]। उभयचैतन्यप्रतिज्ञस्य[7] यथेश्वरस्य करणं बुद्ध्यादयः, एवमीश्वरोऽपि बुद्ध्यादीनां करणं स्यात्। कस्मात्? अविशेषात्। अथैतदनिष्टम्, न तर्ह्युभयोश्चैतन्यम्। कार्यकरण-[8]वत्ताऽनभ्युपगमाददोष इति चेत्, (स्यादेतत्)। व्यापी(1) निरवयवोऽनन्तशक्तिः(2) सूक्ष्मेभ्यः सूक्ष्मतमो महद्भ्यो महत्तमो(3)ऽधिकरणधर्माऽनादि[9](4)रित्येवमनन्तलक्षणमीश्वरपदार्थं तद्विदो व्याचक्षते। तस्य कुतः कार्यकरणमवलम्ब्येदमध्यारोपितमिति? एतदप्यनुपपन्नम्। कस्मात्? अनुमानविरोधात्। इत्थं चेदीश्वरः, यदिदमनुमानं कार्यविशेषस्यातिशयबुद्धिपूर्वकत्वात् {च} चेतनाचेतनयोरभिसम्बन्धस्य चेतनकृतत्वादिति, तद्व्याहन्यते। कस्मात्? न ह्ये[10]तावदीदृशार्थेन सहैतद् दृष्टमिति। उपेत्य वा, मूर्तिपरिग्रहव्याघातात्। यद्येकान्तेनैवंरूप ईश्वरः, क्षित्यादिमूर्तिपरिग्रहो व्याहन्यते[11]।

---

1. All the Mss read °कार्यकारणयोर्. I follow G. Chemparathy's emendation in his article "The Testimony of the Yuktidīpikā concerning the Īśvara doctrine of the Pāśupatas and Vaiśeṣikas", *WZSKO*, vol. 9 (1965), p. 140, fn. 74.
2. All the Mss read आचेतन्याद्. I agree with Tripathi (280) and Wezler (159.1).
3. D सम्बन्धे न, sec. m. सम्बन्धो न Chakravarti (86.17) and Pandeya (71) read तस्मात्सम्बन्धेन.
4. D आत्मन, sec.m. चैतन्याविशेषात् आत्मन
5. All the Mss read कार्यकारणयोर्. I follow Wezler (159.5).
6. All the Mss read अविपर्ययप्रसंगात्.
7. D °चैतन्यप्रतिज्ञस्य, sec. m. °चैतन्याप्रतिज्ञस्य
8. All the Mss read कार्यकारण° I agree with Wezler's suggested reading (159.8).
9. Wezler (159.11) regards ऽधिकरणधर्माऽनादिर् as uncertain reading.
10. D नह्य, sec. m. न तर्हि
11. P K व्याहन्येत D व्याहन्येत, sec. m. व्याहन्यते Dkha. व्यहन्यते

---

(1) Cf. श्वेता॰ उप॰ 3.11, 6.11

(2) Cf. मैत्रा॰ उप॰ 7.2

(3). Cf. कठ॰ उप॰ 2.20

(4). Cf. मैत्रा॰ उप॰ 7.2

किञ्चान्यत्, श्रुतेः। श्रुतिरपि चास्य मूर्तिमाचष्टे "कृत्तिवासाः पिनाकहस्तो विततधन्वा[1] नीलशिखण्डी"(1)इत्यादि। तदभ्युपगमात्स्वपक्षहानिरिति चेत्, स्यान्मतम्। यदि तर्हि श्रुतिवचनान्मूर्तिमानीश्वरः परिगृह्यते, तेन सिद्धमस्यास्तित्वम्। कस्मात्? न ह्यसतो मूर्तिमत्त्वमुपपद्यत इति कृत्वा। एतदप्ययुक्तम्। (कस्मात्?) अभिप्रायानवबोधात्। न ह्येकान्तेन वयं भगवतः[2] शक्तिविशेषं प्रत्याचक्ष्महे, माहात्म्यशरीरादिपरिग्रहात्। यथा {तु} भवतोच्यते प्रधानपुरुषव्यतिरिक्तस्तयोः प्रयोक्ता नास्तीत्ययमस्मदभिप्रायः, तस्मादेतस्य बाधकम्। अतो न प्रधानपुरुषयोरभिसम्बन्धोऽन्यकृतः।

किञ्चान्यत्, अशक्यत्वात्। कुर्वाणः खल्वप्ययमभिसम्बन्धं शरीरमात्रेण वा[3] शरीरिणः कुर्यात्, शरीरकारणेन[4] वा? किञ्चातः? तन्न तावच्छरीरमात्रेण करोति। कस्मात्[5]? अनपेक्षस्य शरीरोत्पत्तौ निमित्ताभावात्। न शरीरकारणेन[6], विभुत्वात्। परिच्छिन्नयोर्गोशकटयोरभिसम्बन्धोऽन्यकृतः, विभू च प्रधानपुरुषौ।

किञ्च, पारार्थ्यात्। गोशकटयोरभिसम्बन्धः परार्थो दृष्टः। न तु प्रधानपुरुषयोरभिसम्बन्धः परार्थ इति। ईश्वरार्थ इति चेन्न, उक्तत्वात्। दृष्टादृष्टार्थ ईश्वरस्यानुपपन्न इत्यादावेवोक्तमेतत्[7] (176.3)। {एवं तावत्पाशुपतानामीश्वरपरिग्रहे दोषः।}[8]

{वैशेषिकाणां चायं दोषः।}[9] किञ्च, द्रव्यादिपदार्थान्तरभावाभावपरिकल्पनानुपपत्ते[10]श्च। तैरीश्वरो द्रव्यगुणकर्मसामान्यविशेषसमवायभूतो वा परिकल्प्यमानः परिकल्प्यते, पदार्थान्तरभूतो वा? किञ्चातः? तन्न तावद् द्रव्यादिभूतः। कस्मात्? द्विविधं हि द्रव्यम्, अनेकद्रव्यमद्रव्यं च(2)। तत्र नानेकद्रव्यमीश्वरः, कृतकत्वादिदोषप्रसङ्गात्। नाद्रव्यम्,

---

[1] P and Chakravarti (87.1) read अविततधन्वा. Raghavan's corrected reading (15(1).8) agrees with what we have adopted.

[2] Dkha. वयं शक्तिविशेषवन्तः

[3] D encircles वा.

[4] Raghavan (15(1).8) reads °करणेन.

[5] Dkha. reads तस्मात् for कस्मात्.

[6] Raghavan (15(1).8) suggests °करणेन.

[7] D एत् for एतत्

[8] I follow Wezler (160.2) in deleting the line एवं तावत्पाशु°... दोषः.

[9] Wezler deletes this line too (160.2), and I follow him.

[10] All the Mss read अनुपपत्तिश्(च).

---

(1) Cf. तै॰ स॰ 1.8.6.2

(2) Cf. वै॰ सू॰ च॰ 2.1.11

परिसंख्यानात्। पृथिव्यादीनि मनःपर्यन्तानि नवैव द्रव्याणीति[1] वः सिद्धान्तः। इतिकरणस्य परिसमाप्त्यर्थत्वात्।

किञ्च, गुणकर्मानिर्देशात्[2]। सति चास्य द्रव्यत्वे वैशेषिकगुणनिर्देश आचार्येण कृतः स्यात्। कारणान्तरप्रयोगसमर्थस्य च कर्म निर्दिष्टं स्यात्। न तु तथा। तस्मान्न द्रव्यगुणादयः। आश्रयपरतन्त्रा हि गुणादयः पदार्थाः[3]। एवं न द्रव्यादिभूतो नापि पदार्थान्तरभूतः। पदार्थत्वे हि सति द्रव्यादिवल्लक्षणमुक्तमभविष्यदाचार्येण। न तूक्तम्[4]। तस्मात्सूत्रकारमते नास्तीश्वरः। लिङ्गादिति[5] चेत्, स्यान्मतम्—"संज्ञाकर्मत्वमस्मद्विशिष्टानां लिङ्गम्"(1)। "प्रत्यक्षपूर्वकत्वाद्वा संज्ञाकर्मणः"(2) इत्येतस्माल्लिङ्गादीश्वरपरिग्रह आचार्यस्य सिद्ध इति। तदप्ययुक्तम्। कस्मात्? अभिप्रेताऽसिद्धेः। सत्यमनेन लिङ्गेनास्मदादिभ्यो विशिष्टशक्तेः कस्यचिदेव माहात्म्यशरीरस्यान्यस्य वा प्रतिपत्तिः स्यात्। संज्ञामात्रं तु। यथा भवद्भिः सर्वकारणानां सृष्ट्युपसंहारप्रवृत्तिहेतुरेकः स्वतन्त्र इष्यते, तथा नास्माल्लिङ्गा[6]त्प्रतिपत्तिः। किञ्चान्यत्। प्रागनुपदेशेऽकौशलप्रसङ्गात्[7]। ईश्वरपरतन्त्रे चेदणूनां प्रवृत्तिनिवृत्ती स्याताम्, तमेव प्रागुपदिशेद् धर्मवत्(3)। प्रधानपदार्थस्य वा प्रागनुपदेशादकुशलः सूत्रकार इत्येतदापद्यते[8]। न चैतदिष्ट[9]मुभयम्।

किञ्चान्यत्, असंकीर्तनात्। शास्त्रप्रदेशे चायमीश्वरो न कस्मिंश्चिदप्याचार्येण संकीर्तितः। न चास्य वध्वा इव श्वशुरनामसंकीर्तने दोषोपपत्तिः स्यात्। दोषसंविभागा-

---

[1] Reference here is to the वै० सू० 1.1.4 : पृथिव्यापस्तेजो वायुराकाशं कालो दिगात्मा मन इति द्रव्याणि.

[2] P and K गुणकर्मनिर्देशात्

[3] It should be पदार्थाः rather than परार्थाः, which latter is what all the Mss read.

[4] P K तु नोक्तं D तु नोक्तं, sec. m. नौ तूक्तम्

[5] Chakravarti (87.24) reads लिङ्गादीति.

[6] All the Mss read चास्माल्. I follow G. Chemparathy's emendation in op.cit., p. 145, fn. 103a. (Cf. p. 177, fn. 3.)

[7] P कौशल° प्रागुपदेशे Raghavan too reads (15(1).8) अकौशल(प्रसंगात्), but before that he replaces प्रागनुपदेशे by प्रागुपदेशे.

[8] D आपद्यते, sec. m. आपद्येत

[9] All the Mss read अनिष्टं. I follow Chakravarti (88. 2).

---

(1) Cf. वै० सू० 2.1.18

(2) Cf. वै० सू० 2.1.19

(3) Cf. वै० सू० 1.1.1

र्थमिदमाचार्यस्याऽनिष्टमध्यारोप्यते[1], न तु मतमस्यैतत्। {एवं काणादानामीश्वरोऽस्तीति पाशुपतोपज्ञमेतत्[2]।} तस्मादीश्वरोऽप्यकारणम्।

कर्माणुभिर्व्याख्यातम्। कथम्? यथा कृतकत्वान्न जगत्कारणमणवः, एवं कर्मापि न शरीरनिमित्तम्। तस्मात्तदप्यकारणम्। इतरेतरनिमित्तत्वाददोष इति चेत्, स्यान्मतम्—यथाऽन्तरेण शरीरं कर्म नोत्पद्यमानं दृष्टमेवमन्तरेण कर्म शरीरस्यापि कारणान्तरमशक्यं कल्पयितुमिति परस्परनिमित्तत्वान्नास्य परिवर्तनस्य[3] पूर्वकोटिः प्रज्ञायते[4]। तस्मान्नास्त्यनयोः कारणान्तरमिति। एतच्चायुक्तम्। कस्मात्? अनवस्थानानामवस्थानपूर्वकत्वदर्शनात्। तद्यथा शुक्रशोणिताच्छरीरं शरीराच्छुक्रशोणितमित्यस्य परिवर्तस्य पूर्वकोटिरदृष्टा[5], प्रतिज्ञायते चाऽयोनिजत्वमीश्वरशरीराणामादिसर्गे {च}[6]। तथा च बीजाङ्कुरादयोऽङ्कुरादिभ्यो बीजमित्यनवस्था, भवति चात्रादिसर्गे परमाणुमात्रादपि बीजप्रादुर्भावः। तथा शरीरकर्मणो[7]रनवस्थेदानीमपि चादिसर्गे चाधिकारमात्रवशाच्छरीरोत्पत्तिः स्यात्। साधारणविग्रहत्वप्रसङ्ग इति चेत्, स्यादेतत्। यद्यधिकारनिमित्ता शरीरोत्पत्तिरादिसर्गेऽभ्युपगम्यते, प्राप्तमेकेन शरीरेण सर्वपुरुषाणामभिसम्बन्धो नियमहेत्वभावात्। ततश्च शरीरान्तरानर्थक्यम्। तेनैव सर्वेषामुपभोगसामर्थ्या[8]दिति। एतदनुपपन्नम्। कस्मात्? प्रत्यक्षविरोधात्। सत्यमेतदनुमानतः। प्रत्यक्षतस्तु शरीराणि प्रतिपुरुषम्। तस्मान्नायं प्रसङ्गः। अपवर्गनियमप्रसङ्ग इति चेत्, स्यान्मतम्। यद्यधिकारमात्रवशाच्छरीरोत्पत्तिः परमर्षेरेवापवर्गसाधनं शरीरादुत्पद्येतेति[9]। उच्यते—न तस्यैव, किं तर्हि सर्वेषाम्। गुणानां प्राधान्यात्तन्निमित्तानि शरीराण्यादिसर्गे सांसिद्धिकान्युत्पद्यन्ते। तत्र यस्य सत्त्वप्रधानं कार्यकरणं स परमर्षिः। यस्य सत्त्वरजोबहुलं[10] स माहात्म्यशरीरः। एवं गुणसम्पर्काद् गुणप्रधानाप्रधानभावेन यावत्स्थावरशरीरप्रादुर्भाव इत्यतो नास्ति गुणानां

---

[1] D अध्यरोप्यते, sec. m. अध्यारोप्यते

[2] Wezler (160.29-30) regards एवं काणादीनाम् ...पाशपतोपज्ञमेतत् as uncertain, and even favours its deletion. I too agree with him.

[3] P परिवर्तस्य

[4] D प्रज्ञायते, sec. m. प्रतिज्ञायते

[5] Raghavan (15(1).8) reads पूर्वकोटिर्दृष्टा.

[6] All the Mss read च after आदिसर्गे.

[7] D शरीरकर्मणोर्, sec. m. शरीरशरीरकर्मणोर्

[8] D उपचाभोग°, sec. m. उपभोग°

[9] Tripathi (288) suggests शरीराद्युत्पद्येत.

[10] P K सत्त्वं रजोबहुलं D सत्त्वं रजोबहुलं, sec. m. सत्त्वरजोबहुलं

शरीरविनियोगपक्षपातः। तस्माद्युक्तमेतत्कृतकत्वान्न कर्म जगत्कारणमिति। एतेन दैवं[1] व्याख्यातम्। तदपि हि कर्मणामेव प्राप्तपरिपाकाणामभिधानम्। अर्थान्तरमेवेति चेत्, साध्यम्। तस्माद[2]प्यकल्पनीयमिति। (...।)

यदप्युक्तं कालाज्जगदुत्पत्तिर्भविष्यतीति, तदनुपपन्नम्। कस्मात्? कारणपरिस्पन्दस्यैव[3] तदभिधानसन्निवेशात्। न हि नः कालो नाम कश्चिदस्ति, किं तर्हि क्रियमाणक्रियाणामेवादित्यगतिगोदोहघण्टास्तनितादीनां[4] विशिष्टावधिसरूपप्रत्ययनिमित्तत्वम्। परापरादिलिङ्गसद्भावा(1)त्प्रतिपत्तिरिति चेन्न, अकृतकेषु तदनुपपत्तेः। यदेव कृतकं तत्रैव परमपरमित्यादिः प्रत्ययो दृष्टः। स यदि क्रियाव्यतिरिक्तनिमित्तः स्यादविशेषान्नित्यानित्येषु स्यात्। क्वचित्सामर्थ्याद् पाकजव[5]ददोष इति चेत्, स्यान्मतम्। यथाऽग्निसंयोगः पाकजहेतुः, तथा चाविशेषेऽपि पृथिव्यामेव पाकजोत्पत्तिनिमित्तं[6] भवति, नाकाशादिषु। एवं कालोऽपि परापरादिहेतुरथ चानित्ये[7]ष्वेव स्यान्न नित्येष्विति। तच्चायुक्तम्। कस्मात्? विशेषोपपत्तेः। रूपादिविक्रियाहेतुरग्निस्तद्युक्तं यदसौ तद्वति द्रव्ये पाकजानादद्यात्[8], (ना)तद्वत्याकाशादौ[9]।

कालस्तु सम्बन्धमात्रोपकारी, न विक्रियाहेतुः। तस्मादसदेतत्[10]। एवं यदि क्रियाभ्योऽनन्यः[11] काल इष्यते, कारणपरिस्पन्दस्य जगत्कारणत्वम्। अथान्यत्, साध्यम्[12]।

---

1. All the Mss read चैवं instead of दैवं. I here follow Raghavan (15(1).8).
2. D तस्माद्, sec. m. तस्मात्तद्
3. Wezler (161.25) proposes करणपरिस्पन्द॰.
4. P reads ॰घटास्तनिता॰. Chakravarti (88.29) reads घन in place of घटा in P.
5. All the Mss read अपाकजवद्. I follow Wezler (161.31).
6. Chakravarti (89.5) reads निमित्तत्वम्.
7. D अथ च अथ च अनित्येष्व्, sec.m. अथ चानित्येष्व्
8. Chakravarti (89.7) reads पाकजानादध्यात्.
9. P K read तद्वत्याकाशादौ D तद्वति, sec. m. न तद्वति Chakravarti (89.7) suggests न? before तद्वत्या॰. Raghavan (12.2) emends it into अतद्वत्याकाशादौ. I follow Pandeya's emendation (74).
10. Dkha. असत्यमेतत्
11. Chakravarti (89.8) reads क्रियाभ्योऽन्यः. Raghavan's correction (15(1).8) here agrees with the reading adopted by us.
12. In construing the sentence एवं यदि ... साध्यम् as I do, I follow Raghavan (15(1).8).

---

(1) Cf. वै॰ सू॰ 2.2.6

यदृच्छाऽपि न कारणं कर्मवत्, कार्यकारणभावात्। कार्यकारणभूतं हीदं व्यक्तमिति प्राग्व्याख्यातम् (162.11-12)। स च कार्यकारणभावः प्रेक्षापूर्वकृतानां शयनादीनामुपलब्धौ यादृच्छिकेषु चानुपलब्धौ न तस्या लिङ्गमिति शक्यं वक्तुम्।

अभावोऽप्यकारणम्, परिमाणादिदर्शनात्। न हि तत उत्पन्नानां परिमाणमुपपद्यत इत्यतो नाप्यन्वयः। सात्मकनिरात्मकयोरत्यन्तजातिभेदात्। नापि शक्तिस्तदभावात्। नोपकारो[1]ऽनवस्थानात्। न[2] विभागो, निरात्मकत्वात्। तस्मान्न परमाणुपुरुषेश्वरकर्मदैवकालस्वभावयदृच्छाऽभावेभ्यो व्यक्तमुत्पद्यते[3]। न चेदेभ्यः, परिशेषतः प्रधानस्यैवास्तित्वलिङ्गमिदम्। तस्माद्युक्तमेतद् भेदानां परिमाणादिभ्यः —

कारणमस्त्यव्यक्तम् (का॰ 16/1)॥

इति ॥ 15 ॥

आह, एवमप्यस्य व्यक्तहेतुत्वमनुपपन्नम्, एकत्वात्। बहूनां कार्यारम्भो दृष्टस्तन्त्वादीनाम्। एकं प्रधानम्। तस्मान्न तदारम्भशक्तियुक्तमिति।

उच्यते—यद्यपि गुणानां प्रधानलक्षणमवस्थान्तरमभिन्नबुद्धिनिमित्तत्वादेकम्, (एवम्)[4] अपि कार्यकाले किञ्चिद्वैषम्योपजनितव्यपदेश्यरूपाभिरितरेतरोपकारिणीभिः शक्तिभिः समुदायत्वमापद्यते। तस्मादिदानीम् —

प्रवर्तते त्रिगुणतः समुदयाच्च। (का॰ 16/2)

प्रवर्तत इत्यनेनोत्पत्तिमाचष्टे। **त्रिगुणत**[5] इत्यव्यपदेश्यरूपाणां प्रधानाप्रधानभावेन गुणशक्तीनां वैषम्याद्व्यपदेश्यरूपान्तरमाह। यत्रैतच्छक्यते वक्तुं त्रयः सत्त्वादय इति, तदवस्थानं[6] कार्यारम्भकमिति। **समुदया**[7]दित्यनेन परस्परापेक्षाणामारम्भशक्तिमवद्योतयति। एतदुक्तं भवति—कार्यकाले गुणाः परित्यक्तपूर्वावस्था भेदं प्रतिलभ्य परस्परोपकारेण संहन्यन्ते। संहताश्च व्यक्त[8]मुत्पादयन्ति। तस्मान्नाऽवस्थान्तरस्याभिन्नबुद्धिनिमित्तत्वा[9]त्प्रधानैकत्वदोषः। गुणभेदान्नैकस्य कार्यारम्भ इति।

---

1. D नो उपकारो, sec. m. नोपकारो
2. Tripathi (291) adds च offer न.
3. D उपपद्यते
4. I follow Wezler (162.20) in inserting एवम्, which is not found in any Ms.
5. D त्रिगुणशक्तीनां, sec. m. त्रिगुणत इत्यवपदेश्यरूपाणां प्रधानाप्रधानभावेन गुणशक्तीनां
6. All the Mss read तदवस्थानं.
7. D समुदायाद् Pandeya (74) reads समुदयादित्येन.
8. D व्यक्तिम् Dkha. व्यक्तम्
9. D निमित्तत्वात्वात्, sec. m. निमित्तत्वात्

आह, निष्क्रियत्वात्तर्हि प्रकृतेः कार्यारम्भोऽनुपपन्नः। क्रिया(वत्त्वाभ्यु)पगमे[1] वा व्यक्तवैधर्म्यविरोध इति।

उच्यते—न, क्रियावैधर्म्यभेदात्। द्विविधा हि क्रिया प्रस्पन्द[2]लक्षणा परिणामलक्षणा च। तत्र प्रस्पन्दः प्रधानस्य सौक्ष्म्यात्प्रतिषिध्यते।

परिणामतः[3] (का॰ 16/3')

तु तत्कार्यमारभते इति।

आह—ननु च परिणामोऽपि सौक्ष्म्यात्प्रधानस्य नोपपद्यते। कस्मात्? न हि सौक्ष्म्यात्सूक्ष्मस्याकाशादेर्विपरिणामो दृष्ट इति।

उच्यते—संस्कारस्य सौक्ष्म्येऽपि परिणामोऽभ्युपगन्तव्यः[4]। तस्माद् युक्तः सूक्ष्मः परिणामीति[5]।

आह, कः पुनरयं परिणामो नाम?

उच्यते—

जहद्धर्मान्तरं[6] पूर्वमुपादत्ते यदा परम्।
तत्त्वादप्रच्युतो धर्मी परिणामः स उच्यते ॥ इति।

यदा शक्त्यन्तरानुग्रहात्पूर्वधर्मं[7] तिरोभाव्य स्वरूपादप्रच्युतो धर्मी धर्मान्तरेणाविर्भवति, तदवस्थानमस्माकं परिणाम इत्युच्यते।

आह, नैतदभिधानमात्रं दृष्टान्तमन्तरेण प्रतिपद्यामहे। तस्माद्यथा किमिति वक्तव्यम्।

उच्यते—यथा पालाशं[8] पलाशा[9]दप्रच्युतं निमित्तान्तरस्यातपादेरनुग्रहाच्छ्यामतां तिरोभाव्य पीततां व्रजति, तथेदं द्रष्टव्यम्।

---

1. All the Mss read क्रियात्वानभ्युपगमे. Wezler (162.32-33) suggests निष्क्रियत्वानभ्युपगमे.
2. Chakravarti (90.7) reads प्रस्यन्द for प्रस्पन्द. He does so invariably.
3. All the Mss read परिणामस्. Chakravarti (90.8) reads परिणामस्तु तत्कार्यम्, and Tripathi (293) परिणामतस्तु तत्कार्यम्, adding परिणामतः before it also. I follow Pandeya (75).
4. D विपरिणामोऽभ्युपगन्तव्यः, sec. m. विपरिणामो दृष्ट इत्युच्यते, संस्कारस्य सौक्ष्म्येऽपि परिणामोऽभ्युपगन्तव्यः
5. All the Mss read तस्मादयुक्तः सूक्ष्मपरिणामीति. I follow Chakravarti (90.10-11).
6. Dkha. जगद्धर्मेत्यशुद्धः पाठः
7. All the Mss read पूर्वधर्मी. I follow Raghavan (12.12, 15(1).8).
8. Wezler (163.19) reads पलाशं, which too is correct, if taken to mean a leaf or petal.
9. Raghavan (15(1).8) reads पलाशत्वाद् (अप्रच्युतं).

आह—न, अन्यथोत्पत्तेरप्रतिषेधात्। कथं पुनरेतदवगम्यते पालाशं[1] स्वरूपादप्रच्युतं धर्मान्तरस्य परित्यागमुपादानं च करोति, न पुनरन्यथा चान्यथा चोत्पद्यत इति?

उच्यते—क्षणभङ्गप्रतिषेधात्। प्रागेव क्षणभङ्गे निर्दिष्टं[2](146.9) विनष्टानां[3] भावानां पुनरुत्पत्तौ नास्ति कारणम्। तदभावे चोत्पत्तिरयुक्तेति।

आह—धर्मधर्मिणोरनन्यत्वाभ्युपगमाद्ध[4]र्मोत्पत्तिविनाशे धर्म्युत्पत्तिविनाशप्रसङ्गः(1)। न हि वो धर्मेभ्योऽन्यो धर्मी। तत्र यदि धर्मस्य निवृत्तिरभ्युपगम्यते, धर्मिणोऽपि निवृत्तिरनन्यत्वात्प्राप्ता, धर्मोत्पत्तौ तदुत्पत्तेः[5]। तत्र यदुक्तं (183.15) धर्मोत्पत्ति(विनाशे)[6] धर्मिस्वरूपावस्थानमित्येतदयुक्तम्।

उच्यते—न, सेनादिवद्व्यवस्थानोपपत्तेः। तद्यथा सेनाङ्गेभ्योऽनन्यत्वं सेनायाः। न च सेनाङ्गविनाशे[7] सेनाविनाशः। तद्यथा[8] तन्तुभ्यो नान्यः पटः, बौद्धानां संयोगावयविप्रतिषेधात्। न च पटविनाशे तन्तुविनाशः। तत्र यदुक्तं (184.6f.) धर्मविनाशे धर्मिविनाश[9] इत्येतदयुक्तम्।

आह, एवमप्ययुक्तमेतत्[10]। कस्मात्? सामान्यविशेषयोर्धर्मिस्वरूपपरिकल्पनानुपपत्तेः। इह रूपादिसामान्यं वा धर्मिरूपत्वेन परिकल्प्यमानं परिकल्प्येत, रूपादिविशेषो वा? किञ्चातः? तन्न तावद्रूपादिसामान्यं धर्मिस्वरूपमिति शक्यं कल्पयितुम्। कस्मात्? असम्भवात्। यदि तावत्पृथिवीसामान्यं घटादिर्विशेष[11]स्तेन पृथिव्यपि तन्मात्रापेक्षया

---

1. Here too Wezler (163.22) reads पलाशं.
2. All the Mss read क्षणभङ्गनिर्दिष्टं. Chakravarti (90.20) reads (प्रागेव) च क्षणभङ्गनिर्दिष्टं. Pandeya (75) reads (प्रागेव) क्षणभङ्गनिर्दिष्टं. I follow Tripathi (295).
3. D not clear, sec. m. विनष्टानां
4. D अनन्यत्वा°, sec. m. अन्यत्वा°
5. All the Mss read तदुत्पत्तिः. I agree with Wezler's correction.
6. All the Mss read धर्मोत्पत्तिविरोधे. I follow Wezler's correction (163.31). Raghavan (15(1).8) suggests °निरोधे, which too seems plausible.
7. All the Mss read सेनाङ्गेभ्यो विनाशे. Chakravarti (90.26) reads सेनाङ्गेभ्यो विना. Pandeya (75), followed by Tripathi (295), reads सेनाङ्गानां विनाशे. I follow Wezler (164.2).
8. K D तथ for तद्यथा
9. Chakravarti (90.28), Pandeya (75) and Tripathi (296) read धर्मिविनाशे धर्मविनाश(:).
10. All the Mss read तत् for एतत्.
11. P घटादिविशेषस्

---

(1) Reference here is to a certain Buddhist view. For that cf. अभि॰ को॰ भा॰ under 3.50 (p. 509).

विशेषः। यावत्प्रधानमिति नास्ति सामान्यम्। तदभावाद्[1] धर्मिस्वरूपाभावः। अथ विशेषा घटादयस्तेषां विशेषान्तरेण सहावस्थानाद्धर्मिस्वरूपानवस्थानम्[2]। ततश्च यदुक्तं (183.14f.) स्वरूपादप्रच्युतो धर्मी धर्मान्तरं विजहाति, धर्मान्तरमुपादत्त इति तद्व्याहन्यत इति।

उच्यते—यदुक्तं (184.14) रूपादिसामान्यविशेषयोर्धर्मिस्वरूपपरिकल्पनानुपपत्तिरिति, अस्तु सामान्यम्। य[3]त्तूक्तं (185.2) सामान्यं सामान्यान्तरापेक्षं विशेषत्वमिति (अत्र ब्रूमः—) न, प्रत्ययानिवृत्तौ[4] सामान्यभावावस्थिते[5]स्ततश्च धर्मिस्वरूपसिद्धेः। यावत्पृथिवीत्ययं प्रत्ययो न निवर्तते, तावत्पृथिवी सामान्यं घटादिर्विशेषः, (द्रव्यत्वं) चासौ[6], धर्मान्तरपरिवर्तेषु तदाकारप्रत्ययोत्पत्तितः स्वरूपावस्थानसिद्धेर्धर्मा घटादयः। यदा तु पृथिवीप्रत्ययनिवृत्तिस्तदा तन्मात्राणां सामान्यभावो द्रव्यत्वं च विशेषो धर्म इति यावत्प्रधानम्। तस्य तु सामान्यान्तरानुपपत्तेः कौटस्थ्यमेव। यत्र सर्वविशेषाभावस्तत्प्रधानम्। यदि तु पृथिव्यादीनां नित्यमव्यावृत्तं स्यात्सामान्यरूपम्, एवं सति कौटस्थ्यमेषां प्राप्तम्। तस्मान्न धर्मिस्वरूपाभावः। शक्तेर्वा सामान्यभावाऽभ्युपगमात्। अथवा सुखदुःखमोहशक्तय एवेह महदादिना विशेषान्तेन लिङ्गेन परिणामं प्रतिपद्यन्ते। तासां च सततं सामान्यप्रत्ययनिमित्तत्वात्स्वरूपादप्रच्युतेर्द्रव्यत्वं[7] लिङ्गस्य (च) धर्मत्वम्। अप्रसिद्धेरयुक्तमिति चेत्, न, उक्तत्वात्। प्रागुक्तमेत[8]त्सुखादिपूर्वकमिदं विश्वमिति।

आह, एवमपि वैश्वरूप्यानुपपत्तिः, कारणाविशेषात्[9]। यदि सुखादिशक्तय एव परिणामिन्यः, यदिदं ब्रह्मादि स्थावरान्तं वैश्वरूप्यं तन्नोपपद्यते। कस्मात्? न

---

1. D तदभाद्, sec. m. तदभावाद्
2. All the Mss read धर्मिस्वरूपानवस्थानात्.
3. D सामान्यं, सामान्यं यत्, sec. m. सामान्यं, यत्
4. All the Mss read प्रत्ययनिवृत्तौ.
5. All the Mss read सामान्याभावावस्तितेस्. I follow Raghavan (15(1).9).
6. All the Mss read द्रष्टव्यं चासौ. Leaving some dots after द्रष्टव्यं Chakravarti (91.12) reads ... सौ. Our reading here is adopted in consonance with the next sentence.
7. P अप्रच्युते तदद्रव्यत्वं
8. K एत् for एतत्
9. Chakravarti (91.21) reads कारणविशेषात्.

ह्यभिन्नं कार्यमुत्पद्यत इति।

उच्यते—शक्तिश्च[1] परिणामिनी[2], भवति तेन वैश्वरूप्यम्। कथम्?

सलिलवत्प्रतिप्रतिगुणाश्रयविशेषात्[3] ॥ का॰ 16/3'-4 ॥

यथाऽन्तरिक्षादविशिष्टस्याम्भसः प्रच्युतिराश्रयाणां[4] गोभुजङ्गमोष्ट्रादीनां विशेषात्क्षीरमूत्रविषादिवैश्वरूप्यं प्रतिपद्यते[5]। तथा[6] गुणशक्तयोऽविशिष्टाः[7] परस्पराश्रयविशेषाद् ब्रह्मादिस्तम्बान्तं जात्याकृतिवाग्बुद्धिस्वभावाहारविहाररूपं वैश्वरूप्यं प्रतिपद्यन्ते। तस्मात्सिद्धमेतत् प्रकृतिरेव सर्वभावानां प्रसवित्री। न च कश्चिद्दोष इति ॥ 16 ॥

॥ युक्तिदीपिकायां सांख्यसप्ततिपद्धतौ चतुर्थमाह्निकम् ॥

---

[1] Wezler (164.36) reads शक्तितश्च, but without indicating that he has made any emendation here.

[2] K D read विपरिणामिनी.

[3] Dkha. सलिलवत्प्रतिगुणा॰

[4] All the Mss read ॰राश्रयणं.

[5] All the Mss read चोपपद्यते. I follow Charkravarti (91.25).

[6] Chakravarti omits the portion तथा गुणशक्तयो ... वैश्वरूप्यं प्रतिपद्यन्ते.

[7] Pandeya (76) reads विशिष्टाः ... .

पञ्चममाह्निकम्

आह—समधिगतं प्रधानम्। पुरुष इदानीं कार्यकारणव्यतिरिक्तोऽस्तीत्येतत्प्रतिपाद्यम्। कुतः संशय इति चेत्, अनुपलभ्यमानस्योभयथा दृष्टत्वादित्युक्तम् (95.10f.)। किञ्चान्यत्। आचार्यविप्रतिपत्तेः। विज्ञानस्कन्धव्यतिरिक्तो नास्ति कश्चिदर्थ इति शाक्यपुत्रीयाः प्रतिपन्नाः। कस्मात्? सर्वप्रमाणानुपलब्धेः। इह यदस्ति तत् प्रत्यक्षादिना प्रमाणेनोपलभ्यते, तद्यथा रूपादि। ततश्च ताव[1]दयमात्मा न प्रत्यक्षत उपलभ्यते। कस्मात्? अशब्दादिलक्षणत्वात्। नान्तःप्रत्यक्षतः। कस्मात्? त्रिगुणादिविपरीतस्य तदविषयत्वात्। न पूर्ववच्छेषवद्भ्याम्, कार्यकारणानुपपत्तेः। न च सामान्यतोदृष्टात्[2], धर्मसामान्याभावात्[3]। नाप्तवचनात्[4], अनभ्युपगमात्। न हि बौद्धानां श्रुतिस्मृतिपुराणेतिहासाः[5] प्रमाणम्। यश्चैषामागमः स एवमाह—

आत्मैव ह्यात्मनो नास्ति विपरीतेन कल्प्यते ।
नैवेह सत्त्वमात्माऽस्ति धर्मास्त्वेते सहेतुकाः ॥
द्वादशैव भवाङ्गानि[6] स्कन्धायतनधातवः ।
विचिन्त्य सर्वाण्येतानि पुद्गलो नोपलभ्यते[7](1) ॥
शून्यमाध्यात्मिकं पश्य[8] शून्यं पश्य बहिर्गतम् ।
न दृश्यते सोऽपि कश्चिद्यो भावयति शून्यताम्(2) ॥

---

[1] D ततश्च तावद्, sec.m. तच्च तावत्
[2] D सामान्यतो दृष्टाद् (appearing as separate words)
[3] D धर्मसामान्यभावात्, sec.m. धर्मसामान्याभावात्
[4] Dkha. नाप्यवचनाद्
[5] D °स्मृतिपुराणेतिहासाः, sec.m. °स्मृतिप्रमाणेतिहासाः
[6] All the Mss read तवाङ्गानि. We restore here the original as it occurs in अभि॰ को॰ भा॰. Cf. below fn. (1)
[7] D पुद्गलेनोपलभ्यते, sec.m. पुद्गलो नोपलभ्यते
[8] P K read विद्धि. D विद्धि, sec.m. पश्य Dkha. पश्य

---

(1) अभि॰ को॰ भा॰, Pt. 4, Kośasthāna 8, p.1203

(2) In his commentary प्रसन्नपदा (मू॰ मा॰ का॰ 18.3, p.148) Candrakīrti quotes this śloka with a couple of alterations : तथोक्तं भगवता—
शून्यमाध्यात्मिकं पश्य पश्य शून्यं बहिर्गतम्।
न विद्यते सोऽपि कश्चिद्यो भावयति शून्यताम्॥
Cf. also अभि॰ को॰ भा॰, Pt. 4, Kośasthāna 8, p. 1203

पुनरप्याह “अस्ति[1] कर्मास्ति विपाकः, कारकस्तु नोपलभ्यते य इमांश्च स्कन्धान्निक्षिपति[2]। अन्यांश्च प्रतिसन्दधाति, अन्यत्र धर्मसंकेतात्।”(1) तस्मात्सर्वप्रमाणानुपलब्धेर्नास्त्यात्मेति।

उच्यते—यत्तावदुक्तं (187.6-8) प्रत्यक्षतः पूर्ववच्छेषवद्भ्यां चात्मनोऽनुपलब्धि[3]रिति, सत्यमेतत्। यत्तूक्तं (187.8) सामान्यतोदृष्टा[4]दनुपलब्धिरात्मसामान्याऽनुपपत्तेरिति, तदयुक्तम्। कस्मात्?

संघातपरार्थत्वात् (का॰ 17/1)

इह **संघाताः परार्था** दृष्टाः[5]। तद्यथा शयनासनरथशरणादयः[6]। अस्ति चायं शरीरलक्षणः **संघातः**। तस्मादनेनापि परार्थेन भवितव्यम्। योऽसौ परः, स पुरुषः[7]। तस्मादस्ति पुरुषः।

आह, (न,)[8] संघातार्थत्वोपलब्धेः। शयनादयो हि सत्यपि परार्थत्वे संघातार्थाः। यदि च तैरतिदेशः कार्यकरणसंघातस्य[9] क्रियते, प्राप्तमस्य तद्वत्संघातार्थत्वम्। एवं पुरुषविपरीतार्थसिद्धिप्रसङ्गः[10]। अथैतदनिष्टम्, न तर्हि चक्षुरादयः परार्थाः।

उच्यते—न शक्यमेतदापादयितुम्। कस्मात्? असंहतत्वसिद्धौ वादप्रवृत्तेः। सिद्धे सत्यसंहतत्वे पुरुषस्यायं वादः प्रवृत्तः। तस्मान्न पारार्थ्य[11]मनेन बाध्यते। कथमवगम्यत इति चेत्, प्रत्यक्षतोऽनुपलब्धेः। सति हि संघातत्वे देवदत्तादिवदयं पुरुषः प्रत्यक्षत एवोपलभ्येत[12]। तथा च सति संशयाभावात्प्रवृत्तिरेवास्य वादस्य न स्यात्। तस्मादयुक्तं संहतार्थाः शयनादिवच्चक्षुरादयः।

---

1. D अस्ति, sec.m. न अस्ति Dkha. नास्ति
2. All the Mss read इमान्सर्वान्धर्मानाक्षिपति. We follow the original. Cf. fn. (1) below.
3. P चात्मनोनापलब्धिर (?) D चात्मननोपलब्धिर्, sec.m. चात्मनोनुपलब्धिर् Chakravarti (93.3) and Pandeya (77) read चात्मनो नोपलब्धिर्.
4. D सामान्यतो दृष्टाद्
5. D परार्थादृष्टाः
6. D °रथचरणादयः, sec.m. °रथशरणादयः
7. D परः पुरुषः, sec.m. परः स पुरुषः
8. In inserting न, I agree with Wezler (168.8).
9. All the Mss read कार्यकारण°. I follow Chakravarti (93.12).
10. All the Mss read पुरुषविपरीतोऽर्थसिद्धि°. I follow Pandeya (77).
11. D परमार्थम्, sec.m. पारार्थ्यम्
12. D उपलभ्येत, sec.m. उप लभ्यते Chakravarti (93.17) reads एवोपलभ्यते.

---

(1) अस्ति कर्म, अस्ति विपाकः, कारकस्तु नोपलभ्यते। य इमांश्च स्कन्धान्निक्षिपति, अन्यांश्च स्कन्धान् प्रतिसन्दधात्यन्यत्र धर्मसंकेतात्। — अभि॰ को॰ भा॰, op. cit, p. 1208. Also see त॰ सं॰ प॰ on śloka 503.

आह, (न,) परस्परोपकारित्वात्पारतन्त्र्यासिद्धिः[1]। इह क्षेत्रोदकसूर्यादयः सस्यादीनामुपकारकाः। तथा कार्यकरणसंघात[2]श्च यथोक्तम्। तस्मादयुक्तमेतेषां पारतन्त्र्यमिति।

उच्यते—न, शयनादिवत्ततोऽन्येनार्थवत्त्वात्। तद्यथा शयनाद्यङ्गानां सति परस्परोपकारित्वे ततोऽन्येनार्थवत्त्वा[3]त्तदभावे चार्थानर्थक्यम्[4]। एवं[5] चक्षुरादीनां सति परस्परोपकारित्वे ततोऽन्येनार्थवत्त्वं भवितुमर्हति। तदभावे चार्थानर्थक्यम् {इति}।

एवं कारणान्तरप्रतिषेधात्प्रकृतेः पुरुषार्थोऽयं व्यक्तभावेन विपरिणाम इति स्थितम्। तत्रेदानीं विप्रतिपत्तिराचार्याणाम्। केचिदाहुः प्रधानादनिर्देश्यस्वरूपं तत्त्वान्तरमुत्पद्यते, ततो महानिति। पतञ्जलिपञ्चाधिकरणवार्षगणानां तु प्रधानान्महानुत्पद्यत इति। तदन्येषां पुराणेतिहासप्रणेतॄणां महतोऽहङ्कार[1] (उत्पद्यते। पतञ्जलेस्तु नैवाहङ्कारो) विद्यत[2] इति पक्षः, महतोऽस्मिप्रत्ययकर्तृत्वाभ्युपगमात्। अहङ्कारात्पञ्च तन्मात्राणीति सर्वे। महतः षडविशेषाः सृज्यन्ते पञ्च तन्मात्राण्यहङ्काराश्चेति विन्ध्यवासिमतम्। तथा अहङ्कारादिन्द्रियाणीति सर्वे। भौतिकानीन्द्रियाणीति पञ्चाधिकरणमतम्। एकरूपाणि तन्मात्राणीत्यन्ये, एकोत्तराणीति वार्षगण्यः। इन्द्रियाणि संस्कारविशेषयोगात्परिगृहीतरूपाणीति केचित्, परिच्छिन्नपरिमाणानीत्यपरे, विभूनीति विन्ध्यवासिमतम्। अधिकरणमपि केचित्त्रयोदशविधमाहुः, एकादशकमिति विन्ध्यवासी। तथाऽन्येषां महति सर्वार्थोपलब्धिः, मनसि[3] विन्ध्यवासिनः। सङ्कल्पाभिमानाध्यवसायनानात्वमन्येषाम्, एकत्वं विन्ध्यवासिनः। तथा करणं निर्लिखितस्वरूपं शून्यग्रामनदीकल्पम्। प्राकृतवैकृतिकानि तु ज्ञानानि प्रेरकाङ्गसंगृहीतानि प्रधानादागच्छन्ति[4] चेति पञ्चाधिकरणः[5], न तु तथेत्यन्ये। करणानां[6] महती स्वभावातिवृत्तिः प्रधानात्, स्वल्पा च स्वत इति वार्षगण्यः, सर्वा स्वत इति पतञ्जलिः, सर्वा परत इति पञ्चाधिकरणः। बुद्धिः क्षणिकेति (एके)[7], कालान्तरावस्थायिनीत्यपरे। एवमनेकनिश्चयेष्वाचार्येषु ये ताव[8]त्प्रधानमहतोरन्तराले तत्त्वान्तरमिच्छन्ति, तत्प्रतिक्षेपायाचार्यः स्वमतमुपन्यस्यति।

---

[1] All the Mss read ऽहङ्कारो.

[2] I follow Wezler (187.6-7) in inserting (उत्पद्यते ... हङ्कारो) (विद्यते). This is indeed in line with the view ascribed by YD to Patañjali in its gloss on kārikā 3 (59.9). Raghavan (15(2).1) suggests the reading महतोऽहङ्कारो न भिद्यते (इति पक्षः).

[3] D महसि, sec. m. मनसि

[4] Chakravarti (108.14) reads प्रधानादगच्छन्ति. Perhaps it is a printing error.

[5] D पञ्चाकिरणि, sec.m. पन्चाकिरणः

[6] All the Mss read कारणानां. I follow Chakravarti (108.15).

[7] I follow Wezler (187.20) in reading एके in place of च, which latter is the reading in all Mss.

[8] D reads एतावत् instead of ये तावत्.

प्रकृतेर्महान् (का॰ 22/1')

प्रकृतेर्महानुत्पद्यते । महान्बुद्धिर्मति[1]र्ब्रह्मा पूर्तिः[2] ख्यातिरीश्वरो विखर इति पर्यायाः । स तु देशमहत्त्वात्कालमहत्त्वाच्च महान् । सर्वोत्पाद्येभ्यो महापरिमाणयुक्तत्वान्महान्[3] ।

अन्यस्य तु पक्षे नैवाहङ्कारो विद्यत इति प्रतिषेधविवक्षयेदमाह—

ततोऽहङ्कारः (का॰ 22/1'2')

तस्मान्महतोऽहङ्कार उत्पद्यते ।

यः पुनराह (213.6), महतः षडविशेषाः सृज्यन्ते पञ्चतन्मात्राण्यहङ्कारश्चेति, तन्निरासार्थमाह—

तस्माद् गणश्च षोडशकः । (का॰ 22/2')

तस्मादहङ्कारात्षोडशको गण उत्पद्यते, पञ्च तन्मात्राण्येकादशेन्द्रियाणि च । अनेनैव च भौतिकेन्द्रियवादी प्रतिक्षिप्तो बोद्धव्यः ।

तस्मादपि षोडशकात् पञ्चभ्यः पञ्च भूतानि ॥ का॰ 22/3-4 ॥

तस्मादपि षोडशकाद् गणाद् यः **पञ्च**को गणस्ततः **पञ्च** महा**भूता**न्युत्पद्यन्ते । पूर्वपदलोपेनात्र महाभूतानीति वक्तव्ये **भूतानी**त्युच्यते । भूतसंज्ञा हि तन्मात्राणां न पृथिव्यादीनाम् । अत्र तु सांख्याचार्याणामविप्रतिपत्तिः । भूतकौटस्थ्यवादिन[4]स्तु मीमांसका आर्हताश्च । तत्प्रतिक्षेपेणेदमुच्यत इति ॥ 22 ॥

आह, उक्तं प्रधानाद् बुद्धिरुत्पद्यत इति । तत्र वक्तव्यं किंलक्षणा पुनर्बुद्धिरिति ।

उच्यते—

अध्यवसायो बुद्धिः (का॰ 23/1)

कोऽयमध्यवसायः? गौरेवायम्, पुरुष एवायमिति यः प्रत्ययो निश्चयोऽर्थग्रहणं सोऽध्यवसायः ।

अत्र क्षणिकवादी आह—यद्यर्थग्रहणं बुद्धिः, अनित्या । कस्मात्? हेत्वपेक्षणात् । अर्थग्रहणं हीन्द्रियादिविषयसन्निधानमावरणाद्यभावं चापेक्षते, न च नित्यस्य कारणापेक्षोपपद्यते । तस्मादनित्या बुद्धिः । अभिव्यक्तेरदोष इति चेत्, स्यादेतत् । नेन्द्रिय[5]सन्निधानादिभिरर्थग्रहणं

---

1. Chakravarti (108.22) reads धृतिः for मतिः.
2. K D पूतिः for पूर्तिः
3. Wezler (187.fn.8) rectifies महापरिमाणयुक्तत्वात् as महत्तरपरिमाण॰, which too is plausible.
4. D unclear, sec.m. भूतकौटस्थ्य वादिनस् (appearing as separate words)
5. Chakravarti (109.18) reads इति चेत् स्यात् तत्रेन्द्रि॰.

जन्यते। किं तर्हि। अभिव्यज्यत इति। तच्च नैवम्, द्विधा दोषात्। सा ह्यभिव्यक्तिः स्वरूपलाभो वा स्यात्, ग्रहणप्रतिबन्धव्युदासो वा। किञ्चातः? तद्यदि तावत्स्वरूपलाभः (न)[1] क्रियते, अर्थग्रहणमिति प्राप्तम्। (अथ) ग्रहणप्रतिबन्धस्यान्धकारस्य[2] व्युदासः। तदप्ययुक्तम्, विप्रतिषेधात्। ग्रहणं च स्यात्तत्प्रतिबन्धश्चेति विप्रतिषिद्धम्। किञ्च, भेदात्। व्यङ्ग्यं हि घटादि चन्द्रार्कौषधिमणिरत्नप्रदीपभेदान् {न}[3] भिद्यते। अस्ति बुद्धीनामर्थभेदाद् भेदः। वृत्तिभेदाददोषो मृद्वदिति चेत्, स्यान्मतम्—यथा मृद्द्रव्यस्य घटादिसंस्थानवृत्तिभेदेऽप्यभेदः, एवं बुद्धेरिति। तदप्ययुक्तम्, अनन्यत्वात्। यदा बुद्धिरनन्या वृत्तिभ्यः, प्राप्तस्तद्भेदे बुद्धिभेदः। किञ्च, दृष्टान्तासिद्धेः। साध्यं चैतत्—किं तदेव मृद्द्रव्यं घटादिवृत्तिभेदमनुभवति, आहोस्वित्प्रत्ययान्तरवशादन्यच्चान्यच्चोत्पद्यत इति? अवयवभेदाच्चोपेत्य वाऽनुवृत्तिं ब्रूमः, न हि तदेकं मृद्द्रव्यम्। किं तर्हि बहवो मृत्परमाणवोऽनेकदेशावच्छिन्नवृत्तय इति। किञ्चान्यत्। वृत्तिविभक्तिग्रहणात्[4]। तद्धि मृद्द्रव्यं संस्थानमनपेक्ष्यापि[5] गृह्यते, न त्वर्थग्रहणमनपेक्ष्य बुद्धेर्ग्रहणमस्ति। तस्माद्विषमो दृष्टान्तः। परिणामाददोष इति चेत्, स्यान्मतम्। सत्त्वादीनामङ्गाङ्गिभावनियमात्तेन तेनार्थग्रहणात्मना विपरिणामो वृत्तिरिति। एतच्चायुक्तम्, उभयकल्पने दोषप्रसङ्गात्। यदि धर्मान्तरोपादानपरित्यागौ व्यक्त्यव्यक्ती[6], दत्तोत्तर एष पक्षः। अथ नाशोत्पादौ, तेन धर्मधर्मिणोरनन्यत्वाद्धर्माणां नाशोत्पादाद् बुद्धेरपि नाशोत्पादप्रसङ्गः। तदनभ्युपगमे वाऽन्यत्वमिति दोषः। आह च—

नष्टोत्पन्नमनन्यत्वादनित्यं नित्यमेव वा[7] ।
नष्टोत्पन्नाऽविनष्टानां नित्यं नो नास्ति[8] चैकदा[9] ॥

यदप्युक्तं (215.12) सत्त्वादीनामङ्गाङ्गिभावनियमादिति, तदयुक्तम्। अतएवानित्यत्वसिद्धेः। तुल्यानां गुणप्रधानभावानुपपत्तेः। सत्त्वादीनामङ्गाङ्गिभावाभ्युपगमाद् वृद्धिक्षयावभ्युपगन्तव्यौ। ततश्च बुद्धिरनित्येति प्राप्तम्, तेभ्योऽनन्यत्वात्। अथ मतं तदवस्थाप्यसौ नित्येति, न तर्हि सत्त्वाद्यात्मभूता बुद्धिरिति प्राप्तम्। ततश्च कार्यकारणयोरविवेक[10] इत्यस्य विरोधः। तस्मादनित्या बुद्धिरिति।

---

[1] Following Wezler (188.27) I add न, while all the Mss omit it.

[2] All the Mss read अर्थग्रहणप्रति°. I follow Wezler (188.27).

[3] Agreeing with Wezler (188.30), I delete न.

[4] P K D निवृत्तिविभक्ति° Dkha. वृत्तिविभक्ति.

[5] All the Mss read संस्थानमपेक्ष्यापि. I follow Raghavan (12.14), who anticipates Tripathi (359).

[6] Chakravarti (110.6) reads व्यक्तव्यक्ती.

[7] Wezler (189.11) regards नष्टोत्पन्नम ... नित्यमेव वा as uncertain reading.

[8] D नष्टोत्पन्ना विनष्टानां नित्यं नो नास्ति, sec.m. नष्टोत्पन्ना विनष्टजं नित्यं नानाऽस्ति।

[9] Raghavan (12.14) suggests नास्ति चैकता.

[10] D अविवेका

उच्यते—यत्तावदुक्तं (214.21) हेत्वपेक्षणादनित्या बुद्धिरिति, तदयुक्तम्। कस्मात्? सिद्धसाधनात्। कस्यात्र विप्रतिपत्तिरनित्या वा बुद्धिः स्यान्नित्या वेति? किं तर्हि? "हेतुमदनित्यं व्यक्तम्" (का॰ 10) इति वचनादनित्यैव। तस्मादिष्टमेवैतत्संगृहीतम्। अत एव क्षणिकत्वमिति चेत्, अथापि स्यात्। हेत्वपेक्षा हि संस्कृतत्वम्। संस्कृतं च क्षणिकम्, तद्यथा प्रदीप इति। तस्मादनित्ये सत्यपि विशेषानभिधाने क्षणिकत्वमेवानेन हेतुना बुद्धेः प्रतिपाद्यत इति। (तदयुक्तम्।)[1] कस्मात्? उत्तरवचनविरोधप्रसङ्गात्। एवमपि यदुत्तरं क्षणिकत्वप्रसिद्ध्यर्थं[2] मुच्यते प्रत्यर्थग्रहणान्यत्वादनित्येत्यादि (214.21), तस्यानर्थक्यम्। तस्मात् पूर्वोत्तरविरुद्धत्वात्सकलमेवेदं प्रकरणं नाध्ययनम्, न प्रख्यानमर्हति[3]। परेषां त्वभिनिविष्टा बुद्धिरत्रेत्यसङ्गतार्थोत्तरापवाददोषमनपेक्ष्यापि प्रत्येकम[4]प्येतदसाधनम्, वृत्तिविषयत्वात्। स्वकारणपरिनिष्पन्नाया हि बुद्धे[5]र्व्यापारोऽर्थग्रहणसंज्ञक इन्द्रियादिसन्निधानापेक्षो, न बुद्धिः। तदनन्यत्वात्प्रसङ्गानिवृत्ति[6]रिति चेत्, अथ मतम्। वृत्तिवृत्तिमतोरनन्यत्वादित्थमपि[7] कल्पयित्वाऽयं प्रसङ्गो[8] न निवर्तते। तथा चोक्तम्—"स्वालक्षण्यं वृत्तिस्त्रयस्य" (का॰ 29) इति। तदप्यबाधकम्। कस्मात्? उपचारात्। सत्यमनन्या वृत्तिर्वृत्तिमतो[9] भेदेनाग्रहणात्। तथाप्युपरतव्यापारस्यापि परश्वादेर्वृत्तिमतः[10] स्वरूपं नोपरमतीति भेदमुपचर्य व्यवहारो[11] नानाकार्यविषयः प्रवर्तते। अत एवाऽन्यत्वप्रसङ्ग[12] इति चेत्, स्यादेतत्। यतो वृत्त्युपरमे वृत्तिमतोऽनुपरमः कार्यनानात्वं च, अत एवान्यत्वमपि स्यादिति। तदयुक्तम्, अनेकान्तात्[13]। तद्यथा सेनापंक्तिसेनाकुण्डलाद्युपरमे न[14] तत्सन्निवेशिनामुपरमः कार्यभेदश्च, न चान्यत्वम्, एवं वृत्तितद्वतोरपि च स्यात्। तस्माद्युक्तमेतत्, हेत्वपेक्षणस्य वृत्तिविषयत्वान्न बुद्धे(र्नि)त्यत्वमिति[15]। एतेन व्यक्तिविकल्पः प्रत्युक्तः, सोऽपि वृत्तिविषय इति कृत्वा।

---

[1] Following Wezler (189.25-26), I add तदयुक्तम्. Tripathi (361) adds (न,), which comes to the same.

[2] P reads उत्तरक्षणिक॰ K D उत्तरत्रक्षणिक॰ I follow Pandeya (93).

[3] P प्रत्याख्यानमहति for प्रख्यानमर्हति॰ K प्रत्याख्यनम्

[4] I follow Wezler (189.30-31) in regarding प्रत्येकमपि as uncertain.

[5] D परिनिष्पन्नाया बुद्धेर्, sec.m. परिनिष्पन्नाया हि बुद्धेर्

[6] All the Mss read प्रसङ्गनिवित्तिर्. Tripathi (362) reads (न) प्रसङ्गनिवृत्तिर, which comes to the same as our emended reading.

[7] Chakravarti (110.26) reads वृत्तिवृत्तिमतोरनन्यत्वादित्य .... मपि.

[8] Tripathi (362) omits ऽयं प्रसङ्गो.

[9] P वृत्तिवृत्तिमतोर् for वृत्तिर्वृत्तिमती Raghavan's emendation (15(2).2) agrees with the reading (of the Mss) adopted by us.

[10] Chakravarti (110.29) reads परस्यादेर्वृत्ति॰.

[11] D उपचर्यव्यवहारो, sec.m. उपचर्य व्यवहारो (appearing as separate words)

[12] All the Mss read एवाऽन्यत्वाप्रसङ्गः. I follow Pandeya (93).

[13] All the Mss read एकान्तात्. I follow Raghavan's emendation (12.14).

[14] Chakravarti (111.3) reads ॰कुण्डलाद्युपरमेण (तत्सन्नि॰).

[15] All the Mss read अनित्यत्वम्. Consistency, however, warrants नित्यत्वम्.

य[1]दप्युक्तम् (215.5) इन्द्रियादिभेदे भेदादिति, तदप्यनेनैव प्रत्युक्तम्[2]। वृत्तिभेदोऽत्र न (वृत्तिमद्)भेद[3] इति। (... ।)[4] किञ्चानेकान्तात्। यथोदकादिभेदात्प्रतिबिम्बभेदो न च व्यङ्ग्यत्व[5]मेवमन्यत्रापि स्यात्। द्रव्यान्तरोत्पत्तेरदोष इति चेत्, स्यान्मतम्। उदकस्याननसंयोगाद् द्रव्यान्तरमेव प्रतिबिम्बलक्षणमुत्पद्यते, न तु मुखं भिद्यत इति। असदेतत्। कस्मात्? उभयोः कारणत्वेन कल्पनानुपपत्तेः। न हि मुखं निमित्तं शक्यं वक्तुम्, विप्रकृष्टत्वान्नाबादयो[6] मुखापगमेऽप्युपलब्धिप्रसङ्गात् पाकजवत्।

यत्पुनरेतदुक्तं (215.5-6) वृत्तिभेदाददोषो मृद्वदिति, तथा तदस्तु। यत्तूक्तम् (215.7-8) अनन्यत्वाद् दृष्टान्ताऽसिद्धश्चेति—वृत्त्यनन्यत्वमिदानीमेव प्रत्युक्तम्। क्षणभङ्गप्रतिषेधे चोक्तं न पृथिव्यादीनामन्यथा चान्यथा[7] चोत्पत्तिः।

यत्पुनरेतदुक्तं (215.9) नैकं मृद्द्रव्य[8]मिति, तत्र बुद्धिः प्रमाणम्। यदेकबुद्धिनिमित्तं तदेकम्। तत्र यदि मृदोऽनेकत्वेन प्रयोजनं बुद्धिरुपलभ्यते .... वयमिति[9]।

यत्पुनरेतदुक्तं (215.11) मृद्द्रव्यस्य संस्थानव्यतिरेकेण स्वभावोऽवधार्यते न तु बुद्धेरर्थग्रहणमन्तरेण स्वरूपग्रहणमिति, तदयुक्तम्। (स्व)भाव[10]स्यारूपत्वात्। उपेत्य वा —

यथा बाह्याद्यवस्थासु व्याकारा चित्तसन्ततिः।
विद्यते बीजमात्रा वस्तथा धीरिति गृह्यताम्॥

यथा बाह्यार्थाकारवती चित्तसन्ततिः[11], अथ च सुप्तमूर्च्छितविरोधसमापन्नानामर्थरूपादृते बीजमात्राऽस्तीत्युपगम्यते, सा चिति कापि[12] वाऽवस्थेति वचनान्न च गृह्यते, तथा बुद्धिरपीति कस्मान्न परिकल्प्यते?

---

[1] All the Mss read तद्. I follow Raghavan's emendation (15(2).2).

[2] All the Mss read अनेनैवोक्तम्.

[3] All the Mss simply read भेद. I follow Wezler (190.9) in adding वृत्तिमद्.

[4] Something seems to be missing here.

[5] All the Mss read चाव्यंग्यत्वम्.

[6] P not clear. Chakravarti (111.10) reads नादादयो. Tripathi (365, fn. 1) suggests the reading नासादीनां. Raghavan (152.2) suggests नोदकादयः.

[7] Tripathi (365) omits चान्यथा.

[8] D पृथिव्यम्

[9] There seems to be something missing here. I follow Wezler (190.22) in regarding .... वयमिति as uncertain reading.

[10] All the Mss read अभावस्य. I follow Wezler (190.25) hesitatingly.

[11] All the Mss read बाह्यार्थाकारवच्. I follow Wezler (190.28) in reading बाह्यार्थाकारवती चित्त°.

[12] Wezler (190.29) suggests साचित्तिकापि.

यत्पुनरेतदुक्तं (215.13) यदि धर्मान्तरोपादानपरित्यागौ व्यक्त्यव्यक्ती[1], दत्तोत्तर एष पक्ष इति, तदितरत्र तुल्यम्। अस्माभिरपि तर्ह्यसत्कार्यप्रत्याख्याने दत्तोत्तर एष पक्षो व्यक्तिर्न क्रियत इति। नाशोत्पादौ तु अनिष्टावेवेति न परिहारं प्रत्यादरः क्रियते।

यदप्युक्तं (215.16) नष्टादुत्पन्नाच्चानष्टमनुत्पन्नं[2] चान्यन्नास्तीति[3], तदयुक्तम्। अनभ्युपगमात्। नाशोत्पादौ कः प्रतिजानीते यं प्रत्येतदर्थवत्स्यात्? किञ्च त्वत्पक्षप्राप्तेः। भवत एव नष्टोत्पन्नेभ्यः स्कन्धेभ्यो[4] नान्या सन्ततिरथ च नास्ति दोषः। कयाऽपि युक्त्या स्यादेतदन्यैवासाविति, ततश्चैका सन्ततिरिति हीनम्।

यदप्युक्तं (215.19) गुणवृद्धिक्षयेऽनित्यत्व[5]मिति, तदनुपपन्नम्। कस्मात्? रूपान्तराप्यायनात्। सत्त्वं हि प्रकर्षमनुभवद्रजस्तमसी च न्यूनतां धर्मादिरूपं[6] बुद्धेराप्याययन्ति, नार्थान्तरं कुर्वन्ति नो खल्वप्यभावम्। एवं रजस्तमो वा प्रकर्षमनुभवत्सत्त्वं च न्यूनतामधर्मादिरूपं[7] बुद्धेराप्याययन्ति, नार्थान्तरं कुर्वन्ति नाभावम्। एवं गुणवृद्धिक्षयेऽपि[8] रूपान्तराप्यायनान्नास्ति क्षयो बुद्धेः। तत्र यदुक्तं (203.20) हेत्वपेक्षणादनित्या बुद्धिरित्येतदयुक्तम्।

यत्पुनरेतदुक्तं (216.6f.) प्रत्यर्थग्रहणान्यत्वा[9]त्प्रतिक्षणं दीपादितैलधारासु शब्दभेदाच्च क्षणिकेति, अत्र ब्रूमः—ग्रहणान्यत्वे चोक्तं वृत्तिभेदो न वृत्तिमद्भेद (इति)। किञ्चान्यत्। भिन्नार्थग्रहणैकत्वात्। उपेत्य वा ब्रूमः—यदि प्रत्यर्थ[10]मन्यदन्यद् ग्रहणं कल्प्यते, विकल्पबाधसमुच्चयसंशयद्वित्वातिशयनिवारणेषु, तथा कल्माषं शबलं चित्रमित्यनेकार्थरूप[11]मेकं ग्रहणं न[12] स्यात्। दृष्टं तत्। तस्मान्नायं क्षणिकत्वे हेतुः। एवमवस्थितमिदम्—अध्यवसायो बुद्धिर्न च क्षणिकेति। बुद्धेस्तु त्रिगुणात्मकत्वात्तस्य तस्य गुणस्य प्रकर्षे तत्तद्रूपान्तरमुत्पद्यत इति।

आह, कस्य गुणस्य प्रकर्षे बुद्धेः किंलक्षणं रूपान्तरमुपजायत इति?

उच्यते—

---

1. Chakravarti (111.22) reads व्यक्तव्यक्ती.
2. D reads उत्पन्नं.
3. Chakravarti (111.25) reads चान्यत्रास्तीति.
4. All the Mss read स्कन्देभ्यो. I follow Chakravarti (111.27).
5. D reads नित्यत्वम् for ऽनित्यत्वम्.
6. Chakravarti (112.1) reads धर्मादिरूपां.
7. All the Mss read न्यूनताधर्मादि°. I follow Raghavan (152.2).
8. Chakravarti (112.3) reads °क्षयोऽपि.
9. P K प्रत्यक्षग्रहणान्यत्वात् D प्रत्यक्षग्रहणान्यत्वा Given the context it should be प्रत्यर्थग्रहणान्यत्वात्.
10. Chakravarti (112.7) reads प्रत्ययम् for प्रत्यर्थम्.
11. Wezler (191.21) regards अनेकार्थरूपम् as uncertain.
12. Chakravarti (112.8) omits न.

धर्मो ज्ञानं विराग ऐश्वर्यम् ।

सात्त्विकमेतद् रूपम् (का॰ 23/2-3)

अत्र **त्वेतद्रूपमिति** सत्यपि धर्मादिभेदे बुद्धिरित्यभेदविवक्षाविषय एकवचननिर्देशः क्रियते । एतदुक्तं भवति—यदा रजस्तमसी वश[1]मापाद्य बुद्धिगतं सत्त्वमुत्कृष्टं भवति तदा **धर्मो ज्ञानं विराग ऐश्वर्यमित्येतद्रूपं** भवति । तत्र श्रुतिस्मृतिविहितानां कर्मणामनुष्ठानाद् बुद्ध्यवस्थः[2] सत्त्वावयव आशयभूतो धर्म इत्युच्यते । स तु द्विविधः । ब्रह्मादिस्थानेष्वभिप्रेतशरीरेन्द्रियविषयोपभोगनिर्वर्तको[3] ज्ञानाद्यङ्गभूतश्च प्रथमः । अग्निहोत्रहवनादिक्रियानुष्ठानसाधनो यमनियमसाधनः (च) इतरः । तत्राहिंसा सत्यमस्तेयमकल्कता ब्रह्मचर्यमिति पञ्च यमाः(1) । अक्रोधो गुरुशुश्रूषा शौचमाहारलाघवमप्रमाद इति पञ्च नियमाः[4](2) । एतेषामविलोपेनानुष्ठानाद्यतेरेवंविधोत्तरणे सत्त्वधर्म आशयतां प्रतिपद्यते, यो ज्ञानादीनां[5] रूपाणामाप्यायनं करोति । एतदभ्युदयनिःश्रेयसयोः सोपानभूतं प्रथमं पर्व[6], यत्रायमवस्थितो[7] यतिरितरेषां पर्वणामनुष्ठाने योग्यो भवति ।

ज्ञानं द्विविधम्—शब्दाद्युपलब्धिलक्षणं गुणपुरुषान्तरोपलब्धिलक्षणं च । तत्र शब्दाद्युपलब्धिलक्षणं प्रत्यक्षानुमानागमरूपम्[8] । गुणपुरुषान्तरोपलब्धिलक्षणं च द्विविधम्—अपूर्वमभ्यासजं च[9] । तयोरपूर्वम्— "ऊहः शब्दोऽध्ययनम्" (का॰ 51) इति सिद्धिकाण्डानुपतितानि प्रमाणानि[10] । अभ्यासजं पुनः वैराग्यपर्वावजयपृष्ठलब्धं[11] शान्तममलं ध्रुवं सकलभवाभवप्रतिपक्षभूतम् । यदाचार्यो वक्ष्यति—

एवं तत्त्वाभ्यासान्नास्मि न मे नाहमित्यपरिशेषम् ।
अविपर्ययाद्विशुद्धं केवलमुत्पद्यते ज्ञानम् ।। (का॰ 64) इति ।

विरागस्तु रागप्रतिपक्षभूतो ज्ञानाभ्यासोपजनितो बुद्धेः प्रसादः । तस्य तु यतमानव्यतिरेकैकेन्द्रियवशीकारलक्षणा[12]श्च तस्रोऽवस्था भवन्ति । तत्रेन्द्रियाणां विषयाभिलाषलक्षणकषायपाचनं प्रति

---

1. D वश्यम् for वशम्
2. D बुद्ध्यवस्था
3. All the Mss read भोगनिवर्तको. I follow Raghavan (15(2).2).
4. D has अक्रोधो ... अप्रमाद as a verse, and adding three dots after अप्रमाद, starts a new line with इति.
5. Chakravarti (112.20) reads योऽज्ञाना॰.
6. D पथ, sec.m. पर्व
7. D not clear, sec.m. अवस्थितो
8. D प्रक्षानुमाना॰, sec.m. प्रत्यक्षानुमाना॰
9. D writes and erases च.
10. Chakravarti (113.2) omits प्रमाणानि.
11. P वैराग्यपू (?)र्वावजयपृष्ठ॰ Chakravarti (113.2-3) reads वैराग्यपर्वावजयपुष्ट॰.
12. P K ॰केन्द्रियवशीकारवशीकारलक्षणाश् D यतमनव्यतिरेक एकेन्द्रिय वशीकारवशीकारलक्षणम्, sec.m. यतमान॰ Dkha. यतमानेन्द्रियवशीकारलक्षणाश्

---

(1) Cf. यो॰ सू॰ 2.20 : अहिंसासत्यास्तेयब्रह्मचर्यापरिग्रहा यमाः.

(2) Cf. यो॰ सू॰ 2.32 : शौचसन्तोषतपःस्वाध्यायेश्वरप्रणिधानानि नियमाः. It is clear that the author of YD differs with योगसूत्र, wholly or partly, both with regard to यम and नियम.

यः प्रयत्न उत्साहः, सा यतमानसंज्ञा। यतमानको ह्ययमस्मिन्पर्वण्यवस्थितो यतिर्भवति। यदा तु केषाञ्चिदिन्द्रियाणां परिपक्वम्, सा व्यतिरेकसंज्ञा। व्यतिरिच्यन्ते हि तदा यतेरिन्द्रियाणि परिपक्वाण्यपरिपक्वेभ्यो विशिष्टतराणि भवन्तीत्यर्थः। विपरिपक्वसर्वेन्द्रियस्तु[1] सङ्कल्पमात्रावस्थितकषायो यदा भवति, तदैकेन्द्रियसंज्ञा। निवृत्तसर्वेन्द्रियविषयेच्छस्य यतेरेकमेव मनोलक्षणमिन्द्रियं तदा परिपक्वं[2] भवति। सङ्कल्पमात्रावस्थितस्यापि परिपाको[3] वशीकारसंज्ञा। सङ्कल्पमूलोच्छिन्नविषयमृगतृष्णो ह्ययं[4] यति[5]रिन्द्रियाणामन्तःकरणस्य च प्रवृत्तिनिवृत्त्योरीष्टे। एकाग्र एकारामोऽविद्यापर्वणोऽतिक्रान्तः परस्य ब्रह्मणः प्रत्यनन्तरो भवति। तदेवं चतुरवस्थं[6] वैराग्यपर्व विज्ञाय तदनुष्ठानाय[7] यतिः प्रयतेत। तस्योपायो दृष्टानुश्रविकविषयप्रत्याख्याने य उपदिष्टो (का॰ 1-2) यश्च तुष्टिषु वक्ष्यमाणः (का॰ 50) तमेकीकृत्योत्तरोत्तरां तत्त्वभूमिं विज्ञानस्य विषयीकुर्वन्पूर्वस्यां तत्त्वभूमौ मध्यस्थः स्यात्। ऐश्वर्यमप्रतीघातलक्षणम्। त[8]त्पुनरष्टविधं अणिमा महिमा लघिमा गरिमा प्राप्तिः प्राकाम्यमीशित्वं वशित्वं[9] यत्रकामावसायित्वमिति। तत्रा[10]णिमा[11] महिमा लघिमा गरिमेति भूतवैशेषिकम्। बुद्धेस्तु प्राप्त्यादि। एवमेतच्चतुर्विधं महतः सात्त्विकं रूप[12]मिति।

आह, अथ गुणान्तररूपं किम्[13]?

उच्यते—

तामसमस्माद् विपर्यस्तम्॥ का॰ 23/4॥

एतद्, अस्माद्धर्मादेः सत्त्वरूपाद्विपर्यस्तं तामसं तमःप्रकर्षोपजनितमित्यर्थः। अत्र शास्त्र[14]-

---

[1] D encircles वि of विपरिपक्व°.

[2] P K तदाऽपरिपक्वं D reads तदा अपरिपक्वं. I follow Chakravarti (113.13).

[3] K D परिपाको Dkha. मात्रस्यापि परिपाको

[4] Dkha. हृदयम्

[5] D इति for यतिर्

[6] Chakravarti (113.16) reads चतुष्टयावस्थं.

[7] P K तदनुष्ठाय

[8] All the Mss read यत्.

[9] D वशित्वं पि (not very clear), sec.m. वशित्वं

[10] P K अत्रा° for तत्रा°

[11] Chakravarti (113.20) omits तत्राणिमा ... रूपमिति.

[12] D om. रूपम्

[13] D reads किंम्.

[14] D not clear, sec. m. शास्त्र°

चोदितानुष्ठानादाशयनिष्पन्न[1]सत्त्वावयवो धर्म इत्युक्तम्। शास्त्रचोदितस्य[2] नित्यस्य[3] कर्मणोऽननुष्ठानाद्[4] बुद्ध्यवस्थस्तमोऽवयव आशयतां प्रतिपन्नोऽधर्मः[5]। स चापि द्विविधः—अनिष्टशरीरेन्द्रियविषयोपभोगनिर्वर्तकः[6], ख्यातिवारकश्च। यथा च ज्ञानं द्विविधं शब्दाद्युपलब्धिलक्षणं गुणपुरुषान्तरोपलब्धिलक्षणं च, एवमज्ञानमपि विपर्ययेण वाच्यम्। यथा च चतुरवस्थं वैराग्यम्, तथाऽयतमानादिक[7]श्चतुरवस्थो रागः। यथा चाष्टगुणमैश्वर्यमणिमादि, तथाष्टगुणमनैश्वर्यमेवमेतत्तामसं महतो रूपम्। यच्चैतदधर्मादिनिमित्तभूतमुत्कृष्टं तमोरूपम्, तद्रजसा सहाविरोधा[8]देकतामिवापन्नमशुद्धिरित्याचार्यैः पठ्यते। सत्त्वरूपं तु प्रकाश इति। अनयोश्चाभिधानाद्यः पञ्चाधिकरणपक्षः प्राकृतवैकृतानां ज्ञानानां प्रधानव[9]च्छुष्कनदीस्थानीयान्तःकरणे बाह्ये च प्रेरकज्ञानांशककृत[10] उपनिपातः, तथा सात्त्विकस्थित्यात्मककृतमप्रत्ययस्यावस्थान[11]मिति तत्प्रतिक्षिप्तं भवति। किं कारणम्? यस्मादशुद्धिरेव प्रकाशमलमतिप्रवृत्त[12] निवर्तयितु[13] प्रकर्षापन्नाऽन्याभूता[14] च प्रवर्तयितुमिति[15]। एवमष्टरूपा बुद्धिर्व्याख्याता। यस्त्वसावनन्तरमुक्तो[16]ऽहङ्कारस्तं व्याख्यास्यामः ॥ 23 ॥

आह—यद्येवम्, तस्मादिदमेव तावदुच्यतां किमस्याहङ्कारस्य लक्षणमिति?

उच्यते—

---

[1] Tripathi (374) reads °निष्पन्नः (सत्त्वा°).

[2] D not clear, sec.m. शास्त्रचोदितस्य

[3] P adds च after नित्यस्य(?).

[4] In P, after कर्मणोऽन two wrong (?) letters are found and then follows नुष्ठाना°. Pandeya's edition (96), followed by Tripathi's (374), has च before कर्मणोऽननुष्ठानाद्, while Chakravarti (113. 23-24) reads च कर्मणोऽनुष्ठानाद्. Raghavan (12.14) suggests (कर्मणो-)अननुष्ठानाम्.

[5] P प्रतिपन्नो धर्मः D encircles the अवग्रह of ऽधर्मः.

[6] P निवर्तकः D निवर्तकः, sec.m. निर्वर्तकः Raghavan (12.14) also suggests (भोग)निर्वर्तकः.

[7] P and D read तथा यतमाना°. I follow Raghavan (15(2).3).

[8] P महाविरोधा° I follow Raghavan (12.14).

[9] Wezler (193.20) proposes प्रधानाच् instead of प्रधानवच्, which latter is the reading in all Mss.

[10] Wezler (193.21-22) regards प्रेरकज्ञानांश ... स्थित्यात्मककृतम् as uncertain.

[11] Dkha. सात्त्विकमित्यात्मकृतमप्रत्ययस्थावस्थानम्

[12] D प्रकाशमन मतिप्रवृत्तं, sec.m. प्रकाशमलमतिप्रवृत्तं

[13] Dkha. यस्मादशुद्धिरेव मलमतिप्रवर्तनिवर्त(यितुं)

[14] D प्रकर्षापन्नान्याभूता, sec.m. °आपन्नान्यग्भूता Dkha. (प्रकर्षापन्ना)न्यग्भूता Wezler (193.24) regards प्रकर्षापन्नाऽन्याभूता as uncertain. Tripathi (375) proposes प्रकर्षमापन्ना अन्यभूता.

[15] Dkha. प्रवर्तयितुर्

[16] D अनन्तर्मुक्तो

अभिमानोऽहङ्कारः (का० 24/1)

कर्तुः स्वात्मप्रत्यवमर्शात्मको योऽयमहमिति प्रत्यय उत्पद्यते, स खल्वहङ्कारः । महतस्तत्त्वान्तरम् । कस्मात्? तस्य सर्वविषयाध्यवसायरूपत्वात्, अस्य तु[1] स्वात्मप्रत्यवमर्शात्[2] । न त्वर्थान्तरम् । कस्मात्? प्रकृतिविकारयोरनन्यत्वाभ्युपगमात् । न हि नः प्रकृतेरर्थान्तरभूतो विकार इति प्राग्विस्तरेण प्रतिपादितम् (117.10ff.) । स च मूर्तिप्रत्ययाभ्यां महतः स्थूलतरः । कस्मात्? अविभागात् । विभागानिष्पत्तेः[3], कालादिवत् । त्रिगुणस्य च महतो विकारत्वादसावपि त्रिगुणः । कस्मात्? प्रकृतिरूपस्य[4] विकारे दृष्टत्वात्, तन्तुपटवत् । तद्भावसन्निविष्टास्तु[5] ये सत्त्वादयस्त[6] आचार्यैर्वैकारिकतैजसभूतादिशब्देनाख्यायन्ते । तथा च शास्त्रमाह "एतस्माद्धि महत आत्मन इमे त्रय[7] आत्मानः सृज्यन्ते वैकारिकतैजसभूतादयोऽहङ्कारलक्षणाः । अहमित्येवैषां सामान्यलक्षणं[8] भवति । गुणप्रवृत्तौ च पुनर्विशेषलक्षणम्"[9] इति ।

आह, का पुनर्गुणप्रवृत्तिर्यस्यामस्मिप्रत्ययैकरूपस्याहङ्कारस्य विशेषप्रतिपत्तिर्भवतीति?

उच्यते— योऽयं

तस्माद् द्विविधः प्रवर्तते सर्गः । (का० 24/2)

द्विविध इन्द्रियलक्षणस्तन्मात्रलक्षणश्च, सा गुणप्रवृत्तिरित्युच्यते । कस्मात्? तत्कार्यत्वात् । गुणप्रवृत्तिकार्यो हि सर्गः । दृश्यते {स} च[10] खलु लोके कार्ये कारण[11]मुपचर्यमाणम्[12] । तद्यथा शालीन्भुङ्क्त इति ।

आह, प्रागुक्तम् (214.9) अहङ्कारात्षोडशको गण उत्पद्यते । इदानीं[13] पुनरुच्यते "तस्माद् द्विविधः प्रवर्तते सर्गः" (का० 24) । तदिदं पूर्वोत्तरव्याघातादयुक्तमिति ।

---

1. D च for तु
2. Wezler (194.5) suggests the emendation °प्रत्यवमर्शरूपत्वात्, which too is plausible.
3. All the Mss read विभागनिष्पत्तेः.
4. D प्रकृतिरूपस्य, sec.m. प्रकृतिविरूपस्य
5. D तद्भाद°, sec.m. तद्भान° Dkha. तद्धातुसन्निविष्टास्तु
6. Dkha. reads तत्त्वादयस् for सत्त्वादयस्. Chakravarti (114.16) reads सत्तादयः. Raghavan's emendation (12.14) agrees with the reading (of the Mss) we have adopted.
7. Dkha. इमे तु ये for इमे त्रय
8. D सामान्यलक्षणं, sec.m. सामान्यं लक्षणं
9. Dkha. पुनरविशेषग्रहणम्
10. All the Mss read सर्गो दृश्यते। स च... I follow Raghavan (12.14) in deleting स and in reading as I do.
11. D कार्ये कारणम्, sec.m. कारणे कार्यं Chakravarti (114.23) reads कार्यकारणम्.
12. D °माणम्, sec.m. °माणः
13. In D there is a lacuna before इदानीं.

उच्यते—न, सामान्येन विवक्षितत्वात्। अभेदविवक्षायां हि कृत्वा कार्यकारणलक्षणमेवमस्माभिरुपदिष्टं[1] द्विविधः सर्ग इति। भेदविवक्षायां पुनः—

ऐन्द्रिय एकादशक[2]स्तान्मात्रः[3] पञ्चकश्चैव ॥ का॰ 24/3-4 ॥

इन्द्रियाणामयम**ैन्द्रियः**। एकादश परिमाणमस्य **एकादशकः**। एवं तन्मात्रेषु वक्तव्यम्। तन्मात्राणां शब्दस्पर्शादीनामयं **तान्मात्रः** सर्गः। पञ्चकश्च पञ्च परिमाणम[4]स्येति(1) **पञ्चकः**। अस्य तु षोडशकस्य विकारस्य संज्ञालक्षणप्रयोजनान्युत्तरत्र वक्ष्यति (का॰ 25 इत्यादि)। एषा गुणप्रवृत्तिर्व्याख्याता, यस्यामस्मिप्रत्ययस्य विशेषग्रहणं भवति—शब्देऽहं स्पर्शेऽहं रूपेऽहं रसेऽहं गन्धेऽहमिति(2)।

आह, अहङ्कारे सत्त्वादीनां संज्ञान्तरावचनम्, आनर्थक्यात्। यदिदमहङ्कारे सत्त्वादीनां संज्ञान्तरमारभ्यते वैकारिकस्तैजसो भूतादिरिति, तन्न वक्तव्यम्। कस्मात्? आनर्थक्यात्। न हि तत्त्वान्तरसन्निवेशिनां सत्त्वादीनां संज्ञान्तराभिधाने किञ्चित्प्रयोजनमस्ति {इति}, संज्ञाभूयस्त्वात्। अथायं निर्बन्धस्तत्त्वान्त(रे)[5], संज्ञान्तरं[6] वक्तव्यम्। एवं सति[7] तत्त्वभूयस्त्वात् संज्ञाभूयस्त्वं प्राप्नोति। प्रयोजनाभिधानं वा विशिष्टयत्नानामनाकस्मिकत्वात्। अथवा प्रयोजनं वक्तव्यम्—एवमर्थमहङ्कारे संज्ञान्तराभिधानमिति। कस्मात्? न हि विशिष्टयत्नानामाकस्मिकत्वमुपपद्यत इति।

उच्यते—न, कार्यविशेषहेतुत्वात्। महदादिलक्षणानां हि गुणानामनेकरूप[8]स्तत्त्वारम्भ इति {हि} न संज्ञान्तर[9]मारभ्यते। अहङ्कारस्तु सत्त्वतमोबहुलयोरिन्द्रियतन्मात्रपर्वणोः प्रकृतिः। तदर्थमाचार्याणां यत्नविशेषः। धर्मादिविशेषाभ्युपगमान्महति प्रसङ्ग इति चेन्न, विशेषितत्वात्। तत्त्वान्तरारम्भ इति विशेषितम्, न तु धर्मादयस्तत्त्वान्तरम्। अतो न महति प्रसङ्गः।

---

1. Chakravarti (115.1) reads °रुपदिष्टो.
2. The commentator Bhaṭṭotpala (on बृहत्संहिता, Adhyāya 1, p. 7) reads ऐन्द्रियमेकादशकम्.
3. All the Mss read तन्मात्रः. The gloss that follows should show that it should be तान्मात्रः पञ्चकश्चैव. Pandeya (97, fn.4) too thinks the same way. Chakravarti (15.2) reads तान्मात्रपञ्चकश्चैव.
4. D पञ्चकश्च परिमाणम्, sec.m. पञ्चकश्च पञ्चपरिमाणम्
5. All the Mss read तत्त्वान्तरं. I follow Wezler (195.12).
6. Pandeya (97) omits संज्ञान्तरं ... तत्त्वभूयस्त्वात्, which is found in all Mss.
7. D एवं मति, sec.m. एवं सति   Dkha एवं सति
8. Raghavan (12.14) suggests एकरूपः.
9. Dkha. reads इत्यतो न संज्ञान्तरम्.

---

(1) पा॰ सू॰ 5.1.57

(2) अहं शब्दे अहं स्पर्शे अहं रूपे अहं रसे।
अहं गन्धे अहं स्वामी धनवानहमीश्वरः ॥
तत्त्वसमाससूत्रवृत्ति in सांख्यसंग्रह, p. 76.1; माठरवृत्ति, का॰ 24.

विशेषानभिधानादयुक्तमिति चेत्, स्यादेतत्। कः पुनरत्र विशेषो येन धर्मादि न तत्त्वान्तरम्, तत्त्वान्तरं तु श्रोत्रादीति? एतच्च नैवम्। कुतः? वृत्तिमात्रे तदुपचारात्। वृत्तिमात्रे हि महतो धर्माद्युपचारः। तथा च तन्त्रान्तरेऽप्युक्तं "प्रकाशवृत्तिर्धर्मः" इति। वृत्तिनिष्पादितस्तु संस्थानविशेषो वृत्तिमतस्तत्त्वान्तरमित्यनयोर्विशेषः। तस्माद्युक्तमेतत् कार्यविशेषहेतुत्वमिति ॥ 24 ॥

आह—यद्येवमिदम्, तर्हि वक्तव्यममुष्य[1]कार्यविशेषस्यैवं संज्ञकादहङ्कारात्प्रवृत्तिरिति। उच्यते—

सात्त्विक एकादशकः प्रवर्तते वैकृतादहङ्कारात्। (का० 25/1-2)

सर्ग इत्यनुवर्तते। एकादशेन्द्रियाणि सत्त्वबहुलानि **वैकृतादहङ्कारात्प्रवर्तन्ते** निष्पद्यन्त इत्यर्थः। एकादशाभिधानादेव चेन्द्रियप्रतीतिः, पूर्वसूत्रे तत्सामानाधिकरण्यात्[2]। अतो न पुनरिन्द्रियग्रहणम्।

आह, तन्मात्रसर्गः पुनः किंगुणः, कस्माच्चाहङ्कारा[3]त्प्रवर्तत इति?

उच्यते—

भूतादेस्तान्मात्रः स तामसः (का० 25/3-4')

भूतादेर्भूतादिसंज्ञकात्तमःप्रधानात्तान्मात्रः सर्गः। तान्मात्रस्तु तमोबहुलो भूतादिसंज्ञकादहङ्कारात्प्रवर्तते। तत्र पुनस्तन्मात्रग्रहणात्संख्या शस्यत[4] इति नोच्यते।

आह, प्रकृतिविशेषनिर्देशानर्थक्यम्। प्रागुक्तं (222.7f.) सत्त्वादीनामहङ्कारावस्थितानां वैकारिकाद्याः संज्ञा उच्यन्ते (इति)[5]। तद्यदि सत्त्वं वैकारिकशब्देनोच्यते वैकारिकाच्चैन्द्रिय[6] एकादशकः सर्गः प्रवर्तत इत्युक्ते गम्यत एतत् सात्त्विकोऽसौ, भूतादेस्तान्मात्र इत्युक्ते गम्यत एतत् तामस इति। कस्मात्? न ह्यस्ति सम्भवो यत्सत्त्वात्तमोबहुलः सर्गः स्यात्तमसश्च सत्त्वबहुल इति।

उच्यते—न, अप्रसिद्धत्वज्ञापनात्। यस्यैवार्थस्य (अप्रसिद्धिस्तस्य)[7] ज्ञापनार्थमेवमिह क्रियते। कथं गम्यते, सत्त्वं वैकारिकशब्देनोच्यते, तमो भूतादिशब्देन, रजस्तैजसशब्देन? अप्रसिद्धार्था हि तान्त्रिकी परिभाषेयमनिर्णीता न गम्यत इति।

---

1. D तर्हि वक्तव्यमवश्यममुष्य
2. P सामानाधिकारण्यात्
3. D चाहंकारः
4. D संख्यां शंस्यत, sec.m. संख्या शंस्यत Dkha. reads शश्यत, which reading is corrected by D into शस्यत.
5. D वैकार्यकाद्याः Chakravarti (116.11) reads वैकारिकाद्याः सज्ञाः। उच्यते, तद् यदि...
6. All the Mss read वैकारिकाणि. I follow Wezler (196.10). Raghavan (15(2).3) suggests वैकारिकाणि चेन्द्रियाणि। ऐन्द्रिय ...
7. In adding अप्रसिद्धिस्तस्य, I follow Wezler (196.14f.). Tripathi's emendation (382–383) अस्यैवार्थस्य अप्रसिद्धस्य ज्ञापनार्थमेवमिह ... comes to the same.

आह, तैजससंज्ञाऽऽनर्थक्यमिति ।

उच्यते—न,

तैजसादुभयम् ॥ का॰ 25/4' ॥

उभयत्र तत्सामर्थ्यात् । स्यादेतदेवं यद्यस्य कार्यसामर्थ्यमेव न स्यात् । अस्मात्तु तैजसादु[1]भयमप्येतत्तन्मात्रेन्द्रियसंज्ञकं प्रवर्तत इत्यनुवर्तते । कथम्? यदा हि वैकारिकोऽहङ्कार इन्द्रियभावेन प्रवर्तते तदा निष्क्रियत्वात्तैजसं प्रवर्तकत्वेनाकांक्षति, भूतादि[2]भेदकत्वेन । कस्मात्? तेनैव तद्भेदात्[3] । तद्यथाऽग्निरग्नौ प्रक्षिप्तोऽग्निरेव भवति, आपो वाऽप्सु प्रक्षिप्ता आप एव भवन्ति, एवं सत्त्वमेव सत्त्वे न भेदं[4] जनयति, गुणान्तरसंसर्गमपेक्षते[5] । भूतादिलक्षणस्य तु तमसः संसर्गाद् भिद्यमानं तैजसेन च रजसा क्रियात्मकेनानुगृहीतमेकादशेन्द्रियभावमापद्यते[6] । तथा भूतादिलक्षणं तमोऽहङ्कारात्तन्मात्रभावेन प्रवर्तमानं प्रवृत्त्यर्थं तैजसमाकांक्षति, वैकारिकं भेदकत्वेन[7] । कस्मात्? तेनैव तस्य भेदा[8]दिति योज्यम् । शास्त्रं चैवमाह–"तदेतस्मिन्वैकारिके स्रक्ष्यमाण एष भूतादिस्तैजसेनोपष्टब्ध एतं वैकारिकमभिधावति । तथैव तस्मिन्भूतादौ स्रक्ष्यमाण एष वैकारिकस्तैजसेनोपष्टब्ध[9] एतं भूतादिमभिभवति[10]" इति । अनेन न्यायेन तैजसादुभयनिष्पत्तिरिति व्याख्यातोऽहङ्कारः ॥ 25 ॥

आह—प्रागपदिष्ट[11] ऐन्द्रिय "एकादशकः प्रवर्तते वैकृतादहङ्कारात्" (का॰ 25) इति । तत्सामान्याभिधानान्न प्रतिपद्यामहे । तस्माद्वक्तव्यं कानीन्द्रियाणि भवतोऽभिप्रेतानि?

उच्यते—द्विविधानीन्द्रियाणि, बुद्धीन्द्रियाणि कर्मेन्द्रियाणि च । तत्र—

---

1. D अस्मात्तैज॰, sec.m. अस्मात्तु तैज॰
2. K D भूतादिं instead of भूतादि
3. P तेनैव तदभेदाद् KD तेनैवैतदभेदाद् I follow Raghavan (15(2).3), who anticipates Pandeya (98).
4. All the Mss read सत्त्वेन (भेदं). I follow Raghavan (15(2).3). Pandeya (98) reads सत्त्वे तु भेदं ... Tripathi (383) reads सत्त्वे तु न भेदं ...
5. Tripathi (384) reads गुणान्तरमपेक्षते.
6. P K D read अपेक्षते for आपद्यते. Dkha. आपद्यते
7. All the Mss read भेदत्वेन. I follow Raghavan (15(2).3).
8. P K तस्याभेदात् D तेनैवैतस्य भेदात् Tripathi (384) suggests तस्याभेदाद्. I follow Chakravarti (116.26).
9. I follow Wezler (197.2) in substituting वैकारिकः for भूतादिः, which latter is the reading in all Mss.
10. D अभिभवति, sec.m. अभिधावति
11. Dkha. प्रागुपदिष्ट

बुद्धीन्द्रियाणि कर्णत्वक्चक्षूरसननासिकाख्यानि । (का॰ 26/1-2)

कर्णौ त्वक्चक्षुषी च रसनं च नासिका च कर्णत्वक्चक्षूरसननासिकाः । आख्यानमाख्या प्रत्यायनमित्यर्थः । एतैः शब्दैराख्या येषां तानीमानि **कर्णत्वक्चक्षूरसननासिकाख्यानि** । अधिष्ठानभेदाद् द्विवचनेन विग्रहः क्रियते । एतानि बुद्धीन्द्रियाणि प्रत्यवगन्तव्यानि । बुद्धेरिन्द्रियाणि **बुद्धीन्द्रियाणि** ।

(आह,) किं पुनरेतानि बुद्धेरिति?

उच्यते—शब्दादिविषयप्रतिपत्तौ द्वारम् । कस्मात्? अबहिर्वृत्तित्वात्[1] । अन्तःकरणस्य नास्ति बहिर्वृत्तिरित्यतो[2] नालमेतत्साक्षाच्छब्दादीनर्थान्प्रतिपत्तुम् । तस्माच्छ्रोत्रादिलक्षणं साक्षाद् बाह्यविषयप्रकाशनसमर्थं करणान्तर[3]मपेक्षते । तत्प्रणालिकया(1) तस्या[4] विषयग्रहणम् । तस्माद्युक्तमुक्तं बुद्धेर्बाह्यविषयप्रतिपत्तौ द्वारभूतत्वाद्[5] बुद्धीन्द्रियाणीति ।

आह, कर्मेन्द्रियाणि पुनः कानीति?
(उच्यते—)

वाक्पाणिपादपायूपस्थाः कर्मेन्द्रियाण्याहुः ॥ का॰ 26/3-4 ॥

वाक्च पाणी च पादौ च पायुश्चोपस्थश्च **वाक्पाणिपादपायूपस्थाः** । एतानि **कर्मेन्द्रियाण्याहुरा**चक्षते । कर्मार्थानीन्द्रियाणि[6] कर्मेन्द्रियाणि । किं पुनः कर्म? वचनादि वक्ष्यमाणम् । एतद्धि कुर्वन्तीति कर्मेन्द्रियाणि ।

आह, कथमेतदुपलभ्यतेऽधिष्ठानादर्थान्तरभूतानीन्द्रियाणि, न पुनरधिष्ठानमात्रमिति?

उच्यते—अधिष्ठानादिन्द्रियपृथक्त्वम्, शक्तिविशेषोपलम्भात् । यथा शरीरासम्भविनो विषयव्यवसायलक्षणस्य शक्तिविशेषस्योपलम्भादर्थान्तरं बुद्धि[7]रनुमीयते, एवमधिष्ठानासम्भविनो विषयग्रहणलक्षणस्य शक्तिविशेषस्योपलम्भादर्थान्तरमिन्द्रियमिति ।

आह—न, असम्भवासिद्धेः । अधिष्ठानमात्रस्य विषयग्रहणं न सम्भवति, अर्थान्तरस्य

---

1. Tripathi (386) adds बुद्धेः after अबहिर्वृत्तित्वात्. I think this would have been necessary only if the phrase अन्तःकरणस्य नास्ति बहिर्वृत्तिरित्यतो had not followed.
2. D इति त्यतो, sec.m. इत्यतो
3. करणान्तरम् seems to be a better reading than कारणान्तरम्, which latter reading occurs in all Mss.
4. Chakravarti (117.17) and Pandeya (99) read तस्य.
5. D द्वारभूताद्, sec.m. द्वारभूतत्वाद्
6. Chakravarti (117.17) omits कर्मार्थानीन्द्रियाणि ...कुर्वन्तीति कर्मेन्द्रियाणि.
7. P K read अर्थान्तरबुद्धिर्. Raghavan's suggestion (12.14) agrees with the reading (of the Mss) we have adopted.

---

(1) Cf. यो॰ भा॰ 1.7

च सम्भवति इत्येतदुभयमपि चाप्रसिद्धमिति ।

उच्यते—नैतदप्रसिद्धम् । तुल्यजातीयेषु तदनुपपत्तेः । यस्माद् भौतिकेष्वन्येषु घटादिषु विषयग्रहणसामर्थ्यं[1] नोपलभ्यते भौतिकं च श्रवणबिलाद्यधिष्ठानम्, अतो मन्यामहे तस्यापि विषयग्रहणसामर्थ्यासम्भवः । (...)[2] अहङ्कारविकारत्वा[3]त्तत्सामर्थ्याप्रतिषेधा[4]न्नेन्द्रियाणां नस्तत्प्रतिषेधोऽनुमातव्य इति । एतच्चायुक्तम् । कस्मात्? शक्तिभेदानुपपत्तेः[5] । वैकारिकं[6] सत्त्वमाहङ्कारिकं प्रकाशरूपम्, तच्छक्तिविशेषादिन्द्रियाणि न[7] उत्पद्यन्ते[8] । भूतादिलक्षणस्य[9] तमसः सामर्थ्यात् तन्मात्राणि । परस्य पृथिव्यादीना[10]मेकरूपत्वात् । तस्मादयमसमः समाधिरिति । एतेन भौतिकत्वं प्रत्युक्तम् ।

आह, भवतु[11] तावदिदमभौतिकत्वं इन्द्रियाणाम् । इदं तु कथमवगम्यते बहूनीन्द्रियाणि, न पुनरेकमेवेन्द्रियं मनोवत्सर्वार्थ[12]मनेकाधिष्ठानं स्यादिति[13]?

उच्यते—न, युगपत्प्रवृत्त्यप्रवृत्तिप्रसङ्गात् । यद्येकमेवेन्द्रियं मनोवत्सर्वार्थ[14]मनेकाधिष्ठानं स्याद्, एकविषयप्रतिपत्तौ वा सर्वविषयप्रतिपत्तिः (...) । दृष्टस्तु[15] ग्रहणभेदः । तस्मान्नैकमिन्द्रियमिति । भौतिकैरनुग्रहोपघातदर्शनादिन्द्रियाणां भौतिकत्वमिति चेत्, स्यान्मतम् । इह भौतिकानां

---

1. P K omit र्थ्यं नोपलभ्यते ... विषय ग्रहणसाम, while D adds this portion in the right margin. Tripathi (387) omits विषयग्रहणसामर्थ्यं नोपलभ्यते ... मन्यामहे तस्यापि.
2. Some part of the text seems to be missing here. But there is no indication of this in the Mss.
3. P K आहंकारविकारवत्- D अहंकारविकारवत् Tripathi (387) suggests अहङ्कारविकाराणां. I follow Wezler (198.7).
4. Raghavan (15(2).3) suggests सामर्थ्यप्रतिषेधात्.
5. All the Mss read शक्तिभेदापत्तेः.
6. K वै ...कारिकं Raghavan (12.14) suggests the addition of उच्यते before वैकारिकं.
7. न here is in the sense of नः, 'for us'.
8. P उत्पद्यते
9. D भूतलादि° (with ल encircled), sec.m. भूतादि
10. Chakravarti (118.7) reads परस्परपृथिव्यादीनाम्. Raghavan (12.14) suggests (तन्मात्राणि), परस्परम्; पृथिव्यादी°. Wezler, while rectifying परस्य as तस्य (cf. p. 198, fn.6) regards (198.11) परस्य as uncertain.
11. P K D omit भवतु ... इदं तु. This portion occurs in Dkha. (cf. 228, fn.8).
12. D सवार्थम्
13. D अनेकाधिष्ठानमिति, sec.m: अनेकाधिष्ठानं स्यादिति
14. D reads सवार्थम्
15. Dkha. ख° पुस्तके दृष्टस्तु° इत्यस्मात्सूत्रादनन्तरं यथा घटादीनामित्यारभ्य मन्तव्य इत्यन्तः पाठो मौलः न तु पर्यायरूप (:) (cf. p. 227, fn.1).

घटादीनां भौतिकैर्मृद्दण्डचक्रसूत्रोदकमुद्गरादिभि[1]रनुग्रहोपघातो दृष्टः। यदि च भौतिकानीन्द्रियाणि न[2] स्युः, नैषां भौतिकैरञ्जनादिभिरनुग्रहः क्रियते, उपघातश्च रजःप्रभृतिभिरिति। एतच्चायुक्तम्। कस्मात्? अनेकान्तात्। तद्यथा भौतिकैर्वदनादिभि[3]रन्तःकरणस्य ग्रहणधारणस्मृतिलक्षणोऽनुग्रहः क्रियते, उपघातश्चोपलादिभिः। न चास्य भौतिकत्वम्। एवमिन्द्रियस्यापि स्यात्। वैशेषिकगुणव्यञ्जकत्वाद्विकारप्रतीतिरिति चेत्, अथ मतम्। पृथिव्यादिवैशेषिको गन्धो घ्राणेनाभिव्यज्यते। औदको रसो रसनेन च। आग्नेयं रूपं वीक्षणेन[4]। वायवीयः[5] स्पर्शस्त्वचा। आकाशीयः शब्दः श्रोत्रेण। येन च यस्य वैशेषिकगुणाभिव्यक्तिस्तस्य तद्विकारत्वं दृष्टम्। तद्यथा प्रदीपस्य रूपाभिव्यञ्जकत्वे सति तैजसत्व[6]मिति। एतच्चानुपपन्नम्। कस्मात्? अनिष्टप्रसङ्गात्। वैशेषिकगुणव्यञ्जकानां तद्विकारत्व[7]मिच्छतः प्राप्तमपां गन्धाभिव्यक्तिहेतुत्वात् पार्थिवत्वम्। अथैतदनिष्टम्, न तर्ह्यैकान्तिको हेतुरिति। तत्र यदुक्तं (228.7) वैशेषिकगुणाभिव्यञ्जकत्वाद् भौतिकानीन्द्रियाणीति, एतदयुक्तम्[8] ॥ 26 ॥

आह, एकादशेन्द्रियाणि अहङ्कारादुत्पद्यन्त इति प्रागपदिष्टम् (224.8)। इदानीं बुद्धीन्द्रियकर्मेन्द्रियाणि दशापदिश्यन्ते। तदिदं पदार्थन्यूनमिति[9]।

उच्यते—स्यादेतदेवं यद्येतावदिन्द्रियपर्व स्यात्। किं तर्हीति—

---

1. P मृद्दण्डाचक्र°
2. Chakravarti (118.14) omits न. Raghavan suggests (15(2).3) insertion of न after भौतिकानीन्द्रियाणि, which agrees with the reading (of the Mss) we have adopted.
3. D वदनादिभिर्, sec.m. वचनादिभिर्
4. D वीक्षणेन, sec.m. ह्रीक्षणेन
5. Chakravarti (118.19) reads वायवीयस्पर्शः.
6. D तैजसम्, sec.m. तैजसत्वम्
7. P K तद्विकारित्वम् D तद्विकारत्वम्, sec.m. तद्विकारित्वम् Dhha. तद्विकारत्वम्
8. After एतदयुक्तं D adds the following passage which is given in the bottom margin but above a Dkha. reading :
आह भवतु तावदिदमभौतिकत्वमिन्द्रियाणाम् इदं तु कथमवगम्यते बहून्येतानि न पुनरेकमेवेन्द्रियं मनोवत्सर्वार्थमनेनाधिष्ठानं स्यादिति, उच्यते न युगपत्प्रतिपत्त्यप्रतिप्रसंगात् यद्येकमेवेन्द्रियं मनोवत्सर्वार्थमनेकार्थाधिष्ठानं स्यादेकविषयप्रतिपत्तौ वा सर्वविषयप्रतिपत्तिर्दृष्टस्तु ग्रहणभेदस्तस्मान्नैकमिन्द्रियमिति। इति ख° पुस्तकस्थः पाठोऽधिको दृश्यते।
9. Tripathi (390) reads पदार्थान्यूनत्वमिति.

सङ्कल्पकमत्र[1] मनः (का॰ 27/1)

अत्रेन्द्रियपर्वणि मनो भवद्भिः प्रत्यवगन्तव्यम्। तत्र **सङ्कल्पक**मिति लक्षणमाचक्ष्महे। सङ्कल्पोऽभिलाष इच्छा तृष्णेत्याद्यनर्थान्तरम्। सङ्कल्पयतीति सङ्कल्पकम्[2]। एतन्मनसो लक्षणम्। तस्मादस्य प्रत्यक्षतोऽनुपलभ्यमानस्यास्तित्वमवसीयते। कस्मात्? व्यस्तसमस्तानामिन्द्रियान्तराणां तदसम्भवात्। अपोह्य हि मनः सङ्कल्पं व्यस्तानामिन्द्रियान्तराणां भवान्परिकल्पयेत्, समस्तानां वा? किञ्चातः? तन्न तावद्व्यस्तानामिन्द्रियाणां सङ्कल्पो भवति। किं कारणम्? अनियतविषयत्वात्। नियतो[3] हि श्रोत्रादीनां शब्दादिर्विषयः। अनियतविषय[4]श्च सङ्कल्पः। किञ्च त्रिकालविषयत्वात्। वर्तमानविषया श्रोत्रादिवृत्तिः, त्रिकालविषयश्च सङ्कल्पः। तस्मान्न व्यस्तानां नापि समस्तानाम्। बधिरादिषु तदभावप्रसङ्गात्। यदि समस्तेन्द्रियवृत्तिः सङ्कल्पः (अन्यतरवैकल्ये तदभावः(?))[5] स्यात्। प्राणादिवदिति चेत्, स्यान्मतम्। यथा समस्तेन्द्रियवृत्तिः प्राणादयो[6] न चान्यतरवैकल्ये तदभावः, एवं समस्तेन्द्रियवृत्तिः सङ्कल्पः स्यान्न चान्यतरवैकल्ये तदभावः स्यादिति। एतच्चानुपपन्नम्, विशेषितत्वात्। निर्विषया प्राणादिवृत्तिः, शब्दादिविषयस्तु सङ्कल्प इति विशेषितम्। तस्माद् व्यस्तसमस्तानामिन्द्रियाणां सङ्कल्पानुपपत्तेर्मनसो लिङ्गमेतदस्तित्व इति सिद्धम्।

आह, तदवधारणीयम्, इन्द्रियद्वैविध्यात्। द्विप्रकाराणि[7] हीन्द्रियाणि पुरस्तादुपदिष्टानि (225.17)। तत्र मनोऽप्यवधारणीयं किं बुद्धीन्द्रियम्, अथ कर्मेन्द्रियमिति?

उच्यते—

तच्चेन्द्रियमुभयथा समाख्यातम्। (का॰ 27/2)

---

[1] Bhaṭṭotpala on बृहत्संहिता (Adhyāya 1, p. 7) also accepts this reading, but incorrectly attributes the kārikās as quoted by him to Kapila.
Vācaspati reads—
उभयात्मकमत्र मनः सङ्कल्पकमिन्द्रियञ्च साधर्म्यात्।
गुणपरिणामविशेषान्नानात्वं बाह्यभेदाश्च॥
Māṭhara reads ग्राह्यभेदाच्च in place of बाह्यभेदाच्च.

[2] P सकल्पकं

[3] D नियतो, sec.m. अनियतो

[4] D अनियत॰ D encircles the initial अ of अनियत.

[5] In inserting अन्यतरवैकल्ये तदभावः, I agree with Wezler (199.23-24). The plausibility of this insertion seems to follow from the lines that follow.

[6] Tripathi (392) reads प्राणादिः.

[7] Chakravarti (119.15) reads द्विप्रकारकाणि.

ह्यर्थे चः पठितः । तद्धीन्द्रिय[1]मुभयथेत्यर्थः । मनो न केवलं बुद्धीन्द्रियमपि तु कर्मेन्द्रियमपि । नियमहेत्वभावादयुक्तमिति चेत्, स्यात्पुनरेतत्—कोऽत्र नियमहेतुः यदिन्द्रियत्वाविशेषे मनस एवोभयप्रचारत्वमभ्युपगम्यते, नान्येषामिति?

उच्यते—

अन्तस्त्रिकालविषयं तस्मादुभयप्रचारं तत् ॥ का॰ 27/3-4 ॥

त्रिकालविषयत्वात्[2]। इह यस्यान्तस्त्रिषु च कालेषु करणस्य वृत्तिस्तदुभयप्रचारम्, तद्यथा बुद्धिः । साक्षाद्[3] विषयाऽनभिसन्धानादतीतानागतवर्तमानविषयत्वाच्च मनोऽन्तस्त्रिकालविषयम् । तस्मादुभयप्रचारं तदिति सिद्धम् ॥ 27 ॥

॥ इति[4] युक्तिदीपिकायां सांख्यसप्ततिपद्धतौ[5] षष्ठमाह्निकम् ॥

---

1. D तद्धीन्द्रियं, sec.m. तद्बुद्धीन्द्रियं कर्मेन्द्रियं Dkha. तद्बुद्धीन्द्रियं D corrects the Dkha. reading into तद्बुद्धीन्द्रियं कर्मेन्द्रियम्.
2. Wezler (200.10) deletes this phrase.
3. D साक्षाद्, sec.m. साक्षादपि
4. P om. इति
5. P सांसप्ततिपद्धतौ

सप्तममाह्निकम्

समधिगतं करणपर्व। तस्येदानीं व्यस्तसमस्तवृत्तयो वक्तव्याः। सति चोभयाभिधाने व्यस्तवृत्तिरेव तावदुच्यते, न समस्तवृत्तिः। किं कारणम्? प्रकरणशेषभूतत्वात्। श्रोत्रादीनां हि सद्भावप्रकरणमिदमनुक्रान्तम्। स चैषां सद्भावः शक्तिविशेषोपलम्भादित्युक्तम्[1]। इदानीमसौ शक्तिविशेषोऽस्माकं व्यस्तवृत्तिरित्युच्यते। तस्मात्तदनुक्रमणं करिष्यामः।

आह—यद्येवम्, तस्मादुच्यतां कस्य[2] करणस्य कस्मिन्नर्थे वृत्तिः, किंलक्षणा[3] वेति?

उच्यते—यदुक्तं कस्य[4] कस्मिन्नर्थे वृत्तिरित्यत्र ब्रूमः—

रूपादिषु(1) पञ्चानामालोचनमात्रमिष्यते वृत्तिः। (का॰ 28/1-2)

रूपादिषु शब्दस्पर्शरूपरसगन्धेषु स्वभेदभिन्नेषु **पञ्चानां** श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणानां श्रवणस्पर्शनदर्शनरसनघ्राणलक्षणो व्यापारो वृत्तिरित्युच्यते। तत्र करणनिर्देशे श्रोत्रेन्द्रियस्य प्राक्पाठात्तद्विषयनिर्देशातिलङ्घने प्रयोजनं नास्तीति कृत्वा शब्दादिषु पञ्चानामित्येव पठितव्यम्। प्राक्तनस्तु प्रमादपाठः।

यत्पुनरेतदुक्तं (231.6) किंलक्षणेत्यत्र[5] ब्रूमः—**आलोचनमात्रमिष्यते**। आलोचनं ग्रहण[6]मत्यनर्थान्तरम्[7]। मात्रशब्दो विशेषनिवृत्त्यर्थः। तद्यथा भैक्षमात्र[8]मस्मिन्ग्रामे लभ्यत इत्युक्ते नान्यो विशेष इति ज्ञायते, छन्दोमात्रमधीते माणवक इत्युक्ते नान्यदधीत इति। एवमालोचनमात्रमिन्द्रियाणामिष्यते[9] वृत्तिरित्युक्ते नान्यो विशेष इति गम्यते। तेन किं सिद्धं भवति? यदुक्तमन्यैराचार्यैः "सामान्यज्ञानमिन्द्रियाणां विशेषज्ञानं बुद्धेः" इति, तत्प्रतिषिद्धं भवति।

आह, कः पुनरस्मिन्दर्शने दोषो यत एतत्प्रतिषिध्यत इति?

---

1. All the Mss read शक्तिविशेषोपालम्भाद्. D सद्भावः शक्तिविशेषो॰, sec.m. सद्भावयुक्तिविशेषो॰ I follow Tripathi (394), who anticipates Wezler (201.5).
2. P K D read तस्य for कस्य. Dkha. कस्य
3. P किंलक्षण D किं लक्षणा
4. P K read तस्य. D तस्य, sec.m. कस्य
5. Tripathi (395) reads तत्र for अत्र.
6. D आलोचनग्रहणम्, sec.m. आलोचनं ग्रहणम्
7. D अर्थान्तरं
8. D भक्ष्यमात्रम्
9. Dkha. मन्यते D deletes मन्यते of Dkha.

---

(1) सा॰ त॰ कौ॰ reads शब्दादिषु instead of रूपादिषु. माठरवृत्ति, however, prefers, like YD, रूपादिषु.

उच्यते—सामान्यविशेषयोरितरेतरापेक्षत्वे सत्येकस्मिन्नविरोधादन्यतरपरिकल्पनानर्थक्यम्। यदि खल्विन्द्रियस्य सामान्यज्ञानं स्या[1]त्तेन विशेषापेक्षं सामान्यं सामान्यापेक्षश्च विशेष इति यत्र सामान्यज्ञानं तत्र विशेषज्ञानमपि न प्रतिषिध्यत इत्युभयमपीन्द्रियस्य स्यात्। ततश्चान्तःकरणपरिकल्पनानर्थक्यम्[2]। विशेषवतो वाऽन्तःकरणस्य कः सामान्येन विरोध इत्युभयस्यापि तत्र सम्भवादिन्द्रियानर्थक्यम्। तस्मादप्रत्ययमिन्द्रियमिति। किञ्च स्वविषयातिप्रसङ्गात्[3]। इन्द्रियस्य चेत्प्रत्ययः स्यात्, यथा प्रत्ययवतोऽन्तःकरणस्याऽनियतविषयत्वम्, एवमस्यापि स्यात्। न तु तदस्ति। तस्मादप्रत्ययमिन्द्रियमिति। किञ्च कालातिवृत्तिप्रसङ्गात्[4]। इन्द्रियस्य चेत्प्रत्ययः स्यात्, यथा प्रत्ययवतो[5]ऽन्तःकरणस्य त्रिकालविषयत्वम्, एवमस्यापि स्यात्। न तु तदस्ति। तस्मादप्रत्ययमिन्द्रियमिति। किञ्चान्यत्, स्मृत्यदर्शनात्[6]। इन्द्रियस्य चेत्प्रत्ययः स्यात्, यथा प्रत्ययवतोऽन्तःकरणस्य (स्मृति)रूपोपपत्तिः[7], एवमत्रापि स्यात्। न तु तदस्ति। तस्मादप्रत्ययमिन्द्रियं सिद्धम्[8]।

आह, भवतु तावदप्रत्ययमिन्द्रियम्। तत्तु ग्रहणरूपं न तु प्रकाशकं प्रदीपवदित्यत्र को हेतुरिति?

उच्यते—न, करणान्तरप्रसङ्गात्[9]। यदि प्रदीपवदिन्द्रियं प्रकाशकं स्यात्, तेन यथा तत्प्रकाशितेषु घटादिष्वर्थेषु करणान्तरमार्गणम्[10], एवमत्रापि स्यात्। न चैतदिष्टम्। अतो न प्रदीपवदिन्द्रियं प्रकाशकमिति। अन्तःकरणसद्भावादयुक्तमिति चेत्, स्यान्मतम्। अस्ति करणान्तर[11] बुद्धिलक्षणं यदिन्द्रियेण प्रदीपवत्प्रकाशितमर्थं गृह्णाति। तस्मात्परवादानुवादोऽयं क्रियते[12], न प्रतिषेध इति[13]। तच्च नैवम्। कस्मात्? प्रदीपेन्द्रिययोरन्य-

---

[1] P K न स्यात् D parenthesizes न of न स्यात्.

[2] Chakravarti (122. 2) reads परिकल्पनाऽऽनर्थकम्.

[3] P K omit किञ्च स्वविषयातिप्रसङ्गात्. D, on the other hand, adds this phrase in the right margin.

[4] D adds किं च कालाति ... तस्मादप्रत्ययमिन्द्रियमिति in the bottom margin.

[5] After प्रत्ययवतो D goes back to ऽन्तःकरणस्याऽनियतविषयत्वम्, and after it repeats the same words and reads प्रत्ययतो in the repeated words instead of प्रत्ययवतो.

[6] D स्मृतिदर्शनात्

[7] All the Mss read ऽन्तःकरणस्यादिरूपोपपत्तिः. I follow Wezler (202.15) in substituting स्मृति for आदि.

[8] D सिद्धमिति for सिद्धम्

[9] All the Mss read कारणान्तर°. I follow Raghavan (15(2).3).

[10] D कारणान्तर°

[11] D कारणं for करणान्तरं

[12] D °वादो क्रियते, sec.m. °वादोऽयं क्रियते।

[13] D प्रतिषेधयति

तरानुपादानप्रसङ्गात्। इन्द्रियमपि प्रकाशकम्, प्रदीपोऽपि। तत्रान्यतरस्यानुपादानं प्रसक्तम्। कस्मात्? न ह्येकार्थकारिणोर्युगपत्करणे[1] सामर्थ्यमस्तीति। किञ्चान्यत्। अन्तःकरणहानेः। इन्द्रियेण प्रदीपव[2]त्प्रकाशितान्बाह्यानर्थान्साक्षादन्तःकरणं गृह्णातीति वदतोऽन्तःकरणमेव हीयते। तस्मादयुक्तमन्तःकरणस्य ग्रहणसामर्थ्यम्। पुरुषस्येति चेन्न, करणानर्थक्यप्रसङ्गात्। साक्षाद्विषयग्रहणसमर्थं पुरुषमिच्छतः करणानर्थक्यं प्रसज्यते। तस्माद्युक्तमेतद् ग्राहकमिन्द्रियं न तु प्रदीपवत्प्रकाशकमिति।

आह, भवतु तावद् ग्रहणमात्रमिन्द्रियवृत्तिप्रत्यया। ग्रहणप्रत्ययप्रकाशानामिदानीं को भेदः?

उच्यते—विषयसम्पर्कात्ताद्रूप्यापत्तिरिन्द्रियवृत्तिर्ग्रहणम्[3]। तथा विषयेन्द्रियवृत्त्यनुकारेण निश्चयो गौरयं शुक्लो धावतीत्येवमादिः प्रत्ययः। तथा विषयसम्पर्कापगमे श्रोत्रादिवृत्तेः ताद्रूप्यापगमो (इति) वर्तमानकालता ग्रहणस्य[4]। अनुभवात्तु संस्काराधानं तत्पूर्विका च स्मृतिरिति त्रिकालविषयता[5] प्रत्ययस्येत्यय[6]मनयोर्विशेषः। बाह्यस्तु प्रकाशो न विषयरूपापन्नः। संस्कारात्तु घटादीनां व्यवधानरूपं पार्थिवं छायालक्षणं धर्ममपहत्य[7] व्यञ्जकत्वाय कल्पते, चक्षुषो[8]ऽनुग्रहाय। उभयोर्वा चक्षुर्विषययोरित्यपरे। तस्मादुपपन्नमेतत् प्रकाशकं प्रदीपादि, ग्राहकं श्रोत्रादि, व्यवसायकमन्तःकरणमिति।

{आह[9], अथ कर्मेन्द्रियाणां का वृत्तिरिति? उच्यते[10]—}

नैयायिकास्त्वेवमाहुः—"घ्राणरसनचक्षुस्त्वक्श्रोत्राणीन्द्रियाणि[11] भूतेभ्यः[12]" (1)(इति)। भूतेभ्य

---

1. P K कारिणो Raghavan's correction (15(2).3) agrees with the reading (of the Ms) adopted by us.
2. D इन्द्रिये प्रदीपवत्, sec.m. इन्द्रियेण प्रदीपवत्
3. All the Mss read इन्द्रियवृत्तिग्रहणम्. I follow Raghavan (15(2).3).
4. Raghavan (15(2).3) reads ताद्रूप्यागमः। वर्तमानकालता ...
5. P K D read त्रिकालविषया. Dkha. त्रिकालविषयता Raghavan too (15(2).3) suggests त्रिकालविषयता and anticipates Tripathi (400).
6. D प्रत्ययस्य त्रेयम्
7. Pandeya (103) reads °अपहृत्य.
8. D चक्षुषोर्
9. P K D omit आह. Dkha. आह, which is deleted by D. I follow D. Raghavan (15(2).4) suggests deletion of अथ ... वृत्तिरिति? उच्यते. I follow him. The concerned portion is clearly a repetition of a line after the succeeding para, where alone it is relevant (cf. 234.13).
10. D उते, sec.m. उच्यते
11. D घ्राणरसनचक्षुत्वक्श्रोत्रा°
12. D om. भूतेभ्यः

---

(1) Cf. न्या॰ सू॰ 1.1.12

इत्यनेन स्वविषयोपलब्धिलक्षणत्वं हीन्द्रियाणां भूतप्रकृतित्वे सति निर्वहति[1], नान्यथा। (भू)तानि[2] पुनरिन्द्रियकारणानि। पृथिव्यप्तेजो वायुराकाशमिति भूतानि। एभ्यः पञ्चभ्यो यथासंख्यं घ्राणरसनचक्षुस्त्वक्श्रोत्राणि पञ्चेन्द्रियाणि भवन्ति। भूतप्रकृतित्वमिति भूतस्वभावं व्याख्यायमानं पञ्चस्वपि सम्भवति। भूतकारणत्वं त्वन्येषु चतुर्षु तथैव। श्रोत्रे तु कथञ्चित् कर्णशष्कुल्यवच्छिन्न[3]नभोभागाभिप्रायेण व्यवहारतः[4] समर्थनीयम्। एवं भौतिकानीन्द्रियाणि स्वस्वविषयमधिगन्तमुत्सहन्त इति[5] तल्लक्षणत्वमेषां सिध्यतीत्यतो भूतेभ्य इत्युक्तम्। एतत्तु सांख्याचार्याणां नेष्टम्। एवं हि सांख्यवृद्धा आहुः— "आहङ्कारिकाणीन्द्रियाणि अर्थं साधयितुमर्हन्ति नान्यथा" (इति)। तथा हि कारकं कारकत्वादेव प्राप्यकारि भवति। भौतिकानि चेन्द्रियाणि[6] कथं प्राप्यकारीणि दूरवर्तिनि विषये भवेयुः? आहङ्कारिकाणां तु तेषां व्यापकत्वाद् विषयाकारपरिणामात्मिका वृत्तिर्वृत्तिमतोऽनन्या सती सम्भवत्येवेति सुवचं प्राप्यकारित्वम्। अपि च महदणुग्रहण[7]माहङ्कारिकत्वे तेषां कल्पते, न भौतिकत्वे। भौतिकत्वे हि यत्परिमाणं करणं[8] तत्परिमाणं ग्राह्यं[9] गृह्णीयात् (इति)(2)।

आह, अथ कर्मेन्द्रियाणां का वृत्तिरिति?

उच्यते—

वचनादानविहरणोत्सर्गानन्दाश्च पञ्चानाम् ॥ का० 28/3-4 ॥

वाक्पाणिपादपायूपस्थानां तु **वचनादानविहरणोत्सर्गानन्दलक्षणा** यथाक्रमं वृत्तयः प्रत्यवगन्तव्याः। तत्रोच्यतेऽनेनेति(3) वचनम्। तस्माद्य एवार्थप्रत्यायनसमर्थो वर्णसमुदायः पदवाक्यश्लोकग्रन्थलक्षणः स वागिन्द्रियस्यार्थो नान्यः। आदीयतेऽनेनेत्यादानम्[10]। आङभि-

---

1. P reads निर्धहति. Chakravarti (123.3) reads नि ... हति.
2. All the Mss read तानि. I follow Wezler (203.17), even though he is a little uncertain absent his emendation.
3. Chakravarti (123.7) reads °शष्कुल्यावच्छिन्न°.
4. D व्यवहारता
5. D om. इति
6. D भौतिकानीन्द्रियाणि, sec.m. भौतिकानि चेन्द्रियाणि
7. All the Mss read महदनुग्रहणम्.
8. Wezler (203.31) substitutes ग्रहणं in place of करणं, which latter is the reading in all Mss. Wezler's emendation also seems plausible.
9. D writes and erases करण before ग्राह्य.
10. D आधानम् for आदानम्

---

(1) Cf. न्या० सू० 1.1.13

(2) (1) Cf. न्यायमञ्जरी, Pt. 2, Āhnika 8, p. 270, 8-14

(3) Cf. पा० सू० 3.3.117

विध्यर्थे[1](1) प्रयुज्यते। ततश्च यदेव प्रक्षालनपरिमार्जनोपस्पर्शनाध्ययनप्रहरणशिल्पव्यायामादि कृत्स्नं ग्रहणं स[2] इन्द्रियार्थो नान्यः। {एवमुत्कृष्टः सर्ग उत्सर्ग[3]} विशिष्टं हरणं विहरणम्। अतश्च यदेव समविषमनिम्नोन्नतचङ्क्रमणपरिवर्तननाट्यव्यायामादिः, स इन्द्रियार्थो नान्यः। एवमुत्कृष्टः सर्ग उत्सर्गः। अतश्च य एवाशितपीतविपरिणामस्य[4] सम्यक्स्रोतोमार्गानुसारिणो विसर्गः, स इन्द्रियार्थो नान्यः। एवमभिव्याप्यानन्दनमानन्दः[5]। ततश्च य एवासाधारणप्रीतिनयनाभिनिष्पत्तिलक्षणः[6], स इन्द्रियार्थो नान्यः। इत्थ[7]मुपसर्गप्रयोगेणार्थविशेषस्य कर्मेन्द्रियवृत्तित्वेन परिग्रहाच्छरीरप्रदेशान्तरासाधारणक्रियाविशेषसम्पूजितानि[8] सन्ति कर्मेन्द्रियाणीति निर्दिष्टा श्रोत्रादिवृत्तिः (...) ॥ 28 ॥

आह, प्रागन्तःकरणवृत्तिनिर्देशः, सर्गक्रमानुगमात्। पूर्वं बुद्ध्यहङ्कारमनसां वृत्तिनिर्देशः कर्तव्यः। किं कारणम्? एवं हि सर्गक्रमोऽनुगतो भवति। क्रमभेदे वा प्रयोजनं वक्तव्यमिति।

उच्यते—न, इन्द्रियवृत्तिपूर्वकत्वात्। अन्तःकरणस्य हि इन्द्रियवृत्तिपूर्वकः प्रत्ययः। तथा च वक्ष्यति—

दृष्टे तथाऽप्यदृष्टे त्रयस्य[9] तत्पूर्विका वृत्तिः। (का॰ 30)

इति। तस्मात्सर्गक्रमेण विना[10] तन्निर्देशः प्रागाचार्येण क्रियत इति।

आह—तदसम्भवः, शास्त्रे प्रागभिमानाभिधानात्। शास्त्रं[11] ह्येवमाह—"का नु भोः

---

1. D अभिध्यर्थे, sec.m. अभिविध्यर्थे
2. Chakravarti (123.20) omits स.
3. The line within { } seems to be a repetition of a sentence which comes later (cf. 235.4) and where alone it is relevant. So it needs to be deleted here.
4. Chakravarti (123.23) reads यत्र वा शितपीत-विपरिणामस्य वा य एवाऽशितपीत°. Raghavan (15(2).4) proposes (°वा) अशितपीत°, as do the readings (of the Mss) accepted by us.
5. Wezler (204.14) emends अभिव्याप्यानन्दनं (which is the reading in all Mss) into अपि व्याप्य नन्दनम्.
6. D इवासाधारणप्रीतिनयनाभि° Chakravarti (123.24) reads °प्रीतिर्नयना°. Raghavan (15(2).4) suggests °प्रीतिः तनया°.
7. P K D omit इत्थम् ... श्रोत्रादिवृत्तिः. The text beginning with इत्थम् is supplied by D. D writes ख° पुस्तकात्पूरितोऽयं भागः after श्रोत्रादिवृत्तिः.
8. Dkha. reads च्छरीरप्रदेशान्तरासाधणक्रियाविशेषसंपूजितानि. D corrects °साधण° into °साधारण°. I follow D. Wezler (204.17) emends °सम्पूजितानि° into °सम्पूर्णानि°.
9. D ऽत्र यस्य
10. Dkha. सर्गक्रममतिलंघ्य
11. Dkha. शास्त्रे for शास्त्रं

---

(1) Cf. पा॰ सू॰ 2.1.13

संज्ञा मातुरुदरेऽवस्थितं कुमारं प्रत्यभिनिविशत[1] इति? अस्मीत्येषा माहात्मी संविदिति। तथा कार्यकरणव्यूहसमकालं[2] माहात्म्यशरीरोऽस्मीति प्रतिबुद्ध्यते। प्रवृत्ताश्चैव ह्यव्यक्ता[3] भवन्त्यस्मीत्यस्मितामात्राः" (इति)[4]। प्रमाणं च शास्त्रम्। तस्मात्प्रागन्तःकरणनिर्देशः कर्तव्यः।

उच्यते—(न,)[5] तन्निमित्तत्वेन[6] विवक्षितत्वात्। सत्यमेतत्, कार्यकरणव्यूहनिष्पत्तिसमकालम[7]स्मीत्येषा माहात्मी संवित् प्रत्युपधीयते[8]। शब्दादिविषयस्त्वन्तःकरणप्रत्ययः श्रोत्रादिनिमित्त इत्येतत्पूर्वशब्देन विवक्षितम्। न च निमित्तमतिक्रम्य नैमित्तिकाभिधानं न्याय्यम्[9]। अथवा नैव वयमिद[10] प्रष्टव्या[11] यथा प्रागन्तःकरणवृत्तिनिर्देशः कर्तव्य इति। किं कारणम्? यस्मात्—

स्वालक्षण्यं वृत्तिस्त्रयस्य[12] (का॰ 29/1-2')

स्वलक्षणमेव[13] स्वालक्षण्यम्। स्वार्थे तद्धितवृत्तिः "(आन्यभाव्यं)[14] तु कालशब्दव्यवायात्[15]"(1) इति। यथा बुद्ध्यहङ्कारमनसां[16] हि सौक्ष्म्यान्न शक्यं स्वरूपमभिधातुमित्यतो वृत्तिरेव लक्षणभावेनोपदिश्यते[17], श्रोत्रादीनामपि च सौक्ष्म्याल्लक्षणमपदेष्टुमशक्यमिति वृत्तिरेवोच्यते, न लक्षणम्। तदेव चैषां लक्षणं भवति। यच्छब्दालोचनसमर्थं तच्छ्रोत्रम्। एवमितरेष्वपि वक्तव्यम्। बुद्ध्यहङ्कारमनसां च लक्षणमध्यवसायाद्युक्तम्।

---

[1] P प्रत्यभिनिर्विशत D प्रत्यभिनिवेशत, sec.m. प्रत्यभिनिविशत

[2] All the Mss read कार्यकारण॰

[3] Wezler (204.29) emends the phrase चैव ह्यवक्ता into चाभिव्यक्ता without being fully convinced about it.

[4] I follow Wezler (205.1) in adding इति.

[5] I follow Wezler (205.3) in adding न.

[6] All the Mss read तन्निमित्तार्थेन. I follow Wezler (205.3).

[7] All the Mss read कार्यकारण॰.

[8] D प्रत्युपदीयते

[9] P K read न्यायम्.

[10] P नैवेदं, sec.m. नैव वयमिदं

[11] D प्रष्टव्यः

[12] D वृत्तित्रयस्य

[13] D स्वलणम्, sec.m. स्वलक्षणम्

[14] P K अन्यभावस D अन्याभावस् I follow Tripathi (406), who anticipates Wezler (205.10). Tripathi, however, also adds यथा before आन्यभाव्यं.

[15] D ॰व्यवसायाद्

[16] D ॰मनांसि, sec.m. ॰मनसां

[17] Chakravarti (124.16) omits यथा ... लक्षणभावेनोपदिश्यते.

---

(1) 'अइउण्' सूत्रे वा॰ 11; म॰ भा॰ 1.1.1 'अइउण्' शिवसूत्र.

तदेव वृत्तित्वेनाचक्षाणः श्रोत्रादीनामेव (शब्दाद्यालोचनं)[1] लक्षणं चाप्याचक्षाणो वृत्तिवृत्तिमतोरनन्यत्वं[2] ज्ञापयति। अन्यथा[3] तु यथा व्यवसायादि लक्षणम्, एवं रूपादिषु पञ्चानामालोचनमात्रं लक्षणमित्युच्यते, न तु वृत्तिरिति। श्रोत्रादिवद् बुद्ध्यादीनामपि व्यवसायादयो वृत्तिरित्युच्यते, न तु लक्षणम्। तस्मादन्यथा निर्देशो ज्ञापकं वृत्तिवृत्तिमतोरनन्यत्वस्येति[4] व्याख्याता करणवृत्तिः।

सैषा भवत्यसामान्या। (का॰ 29/2')

सेति पूर्वकृतां[5] वृत्तिमभिसम्बध्नाति। एषेति सर्वनाम्ना प्रत्याकृष्टां तामेव प्रत्यक्षं प्रतिनिर्दिशति। **भवतीति** वक्ष्यमाणेन धर्मान्तरेणास्यास्तद्वत्ताऽनुभावित्वं ख्यापयति। **असामान्येति** धर्ममाचष्टे। सामान्या साधारणेत्यर्थः। न सामान्याऽसामान्या। प्रतिकरणं नियतेत्युक्तं भवति। या हीयमनुक्रान्ता करणपर्वणोऽध्यवसायादिका[6] वृत्तिरियं व्यस्तानां करणानां प्रतिस्वं नियता। ततश्चैषां बुद्ध्यादीनां कार्यविशेषनिमित्तभावसंसूचितस्य स्वरूपस्यासङ्करः सिद्धः।

आह—सामान्यविशेषयोरितरेतरापेक्षत्वादसामान्याभिधानेन[7] सामान्यस्याप्यभिधानादध्यवसायादिका करणानामसामान्या वृत्तिरित्युक्तेऽर्थादापन्नमेषां सामान्याऽपि वृत्तिरस्तीति। तस्मादसावपि वक्तव्येति।

उच्यते—

सामान्यकरणवृत्तिः प्राणाद्या वायवः पञ्च ॥ का॰ 29/3-4 ॥

सामान्या चासौ करणवृत्तिः (च) **सामान्यकरणवृत्तिः**। प्राण आद्यो[8] येषां ते **प्राणाद्याः**, प्राणापानसमानोदानव्यानाः **पञ्च** (वायवः) समस्तकरणवृत्तिः प्रत्यवगन्तव्येति।

---

1. All the Mss read चाभिदधानं. Raghavan (15(2).4) suggests (च) अभिदधानः. I follow Wezler's emendation (205.17).
2. D वृत्तिमतोऽनन्यत्वं
3. D has an unclear letter before अन्यथा.
4. All the Mss read अन्यत्वस्येति. I follow Raghavan (15(2).4), who anticipates Tripathi (407) and Wezler (205.22).
5. K D read पूर्वप्रकृतां.
6. P shows करणपर्वणोऽध्यवसायादिका वृत्तिरियं व्यस्तानां in the left margin. Chakravarti (124.27) reads करणपर्वणे. Raghavan (15(2).4) suggests करणपर्वणि. Wezler (205.28) regards करणपर्वणो as uncertain.
7. K D ॰दसामान्याभिधाने
8. D प्राणश्चाद्यो

तैः सर्वैः सहितः[1] प्राण[2] इति वेदान्तेष्वपि ।

आह, अयुक्तमेतत् । कस्मात्? धर्मिणो धर्म्यन्तरवृत्तिभावानुपपत्तेः । वृत्तिरित्ययं शब्दो व्यापारमाचष्टे । न च धर्म्यन्तरं[3] धर्म्यन्तरस्य व्यापारो भवितुमर्हतीति ।

उच्यते—न, कार्ये[4] कारणोपचारात् । सत्यमेतत्, धर्मी[5] धर्म्यन्तरस्य वृत्तित्वेनाशक्यः परिकल्पयितुम् । किं तु सामान्यकरणवृत्त्या प्रेर्यमाणो वायुस्तत्प्रवणत्वात्तत्कार्यतां प्रतिपद्यते । तत्र प्राणादिकार्ये वायौ प्राणोपचारं कृत्वैवमुच्यते—**प्राणाद्या वायवः पञ्च** (इति) । तत्प्रेरणाऽसिद्धेरयुक्तमिति चेत्, स्यादेतत् । कथमेतदवगम्यतेऽर्थान्तरप्रेरितस्य वायोरियं क्रिया भवति, न[6] पुनः स्वतन्त्रस्येति? उच्यते—न स्वतः, तद्व्यतिरिक्तत्वानुपपत्तेः[7] । इहेयमकस्माद् भिन्ना[8] क्रिया वायोः स्वतो वा स्यात्, करणवृत्तिव्यतिरिक्ताद्वा? किञ्चातः? तन्न तावत्स्वत उपपद्यते । कस्मात्? सर्वत्र प्रसङ्गात् । स्वाभाविके हि वायोर्दिक्संचारे[9]ऽभ्युपगम्यमाने सर्वत्र तत्सम्भवः स्यात् । ततश्च तिर्यक्पातादिवृत्तिर्हन्येत । न चान्यतः । कस्मात्? अदर्शनात् । न हि पृथिव्यादीनां वायुप्रेरणसामर्थ्यं क्वचिदुपलब्धम् । भस्त्रादिषु दृष्टमिति चेन्न, अन्यनिमित्तत्वात् । अत्रापि चैत्रव्यापार उपलभ्यत इत्यवश्यमन्यन्निमित्तमुपलभ्यत इत्यभ्युपगन्तव्यम् । आत्मेति चेन्न, क्रियाप्रतिषेधात् । उपपादितमेतत्पूर्वम् (204.8) आत्मा निष्क्रिय इति । न च निष्क्रियस्य प्रेरणमुपपद्यते । न च निर्निमित्ता[10], स्वभावभेदानामनाकस्मिकत्वात् । तस्माद्यत्तन्निमित्त[11] सा समस्तकरणवृत्तिः । स चायं वायुरेक एव स्थानसंचारविशेषा[12]न्नानाख्यो भवति, यथैको देवदत्तः पाचको लावक इति क्वचित् । तदयुक्तम् । कस्मात्? युगपत्परस्परातिशयविरोधात् । पूर्वस्मात्पूर्वस्मादुत्तर उत्तरो वायुर्बलीयानिति ह्यभ्युपगमः । तदेतदेकस्यैकस्मिन्काले नोपपद्यते । तस्मादुपपन्न प्राणाद्या वायवः पञ्च ।

---

[1] D सहिता

[2] Raghavan (15(2).4) emends it as प्राणी.

[3] Pandeya (105) reads धर्मान्तरं, and so does Chakravarti (125.8) before him.

[4] D reads कार्येण but puts ण in parentheses.

[5] Chakravarti (125.9) reads धर्मोऽयं धर्म्यन्तरस्य.

[6] Chakravarti (125.13) reads त पुनः.

[7] D तद्व्यतिरिक्तानुपपत्तेः

[8] Instead of अकस्माद् भिन्ना, Wezler (206.18) reads अनेकभिन्ना, which too seems plausible.

[9] D वायोर्दिक्संचारे, sec.m. वायोर्भिन्नदिक्संचारे

[10] D निर्निमित्तः

[11] Chakravarti (125.21-22) reads तस्मात् यत्र निमित्तं.

[12] D °संचारविशेषः

किं पुनरेषां प्राणादीनां लक्षणमिति?

उच्यते—द्विविधाः प्राणादयः। अन्तर्वृत्तयो बहिर्वृत्तयश्च। तत्र मुखनासिकाभ्यां प्रगमनात्प्रणतेश्च प्राणः। योऽयं मुखनासिकाभ्यां संचरति, सोऽन्तर्वृत्ति[1]र्वायुः प्राण इत्यभिधीयते। या काचित्प्रणति[2]र्नाम भूतेषु तद्यथा प्रणतेयं[3] सेना, प्रणतोऽयं वृक्षः, प्रणतोऽयं धर्मे, प्रणतोऽयमर्थे, प्रणतोऽयं कामे, प्रणतोऽयं विद्यायाम्, तद्विपरीतेषु वा बाह्यप्राणवृत्तिरेषा। प्राणविषय[4] एवैष[5] भवति। स खल्वयमत्राभिव्यक्तो भवति तद्यथा महता वा दुःखेनाभिप्लुतस्य, महता वा बन्धुना वियुक्तस्य, सहितस्य[6] वा सौरभेयस्य, निपानावतीर्णस्य वा महिषस्य।

अवगते[7]रपक्रमणाच्चापानः। योऽयं रसं धातून् शुक्रं मूत्रं पुरीषं[8] वातार्तवगर्भांश्चाकर्षन्नधोगच्छन्नयमन्तर्वृत्ति[9]र्वायुरपान इत्यभिधीयते। यच्चापि किञ्चिदपक्रमणं नाम भूतेषु तद्यथा अपक्रान्तोऽयं धर्मादिभ्यस्तद्विपरीतेभ्यो वेति, बाह्या खल्वपानवृत्तिरेषा। अपानविषय एवैष भवति। बलवत्तरश्चायं प्राणाद्वायोः। कस्मात्? एष[10] ह्येतं प्राणमूर्ध्वं वर्तमानमर्वा[11]गेव सन्नियच्छति, अर्वा[12]गेव सन्निरुणद्धि। (स चैषो)[13]ऽत्राभिव्यक्तो भवति। तद्यथोपकूपमुपश्वभ्रं वा परिवर्तमान(स्याऽपक्रान्तिः (?)) शतपदीं[14] लङ्घयतः।

हृद्यवस्थानात्सहभावाच्च समानः[15]। यस्त्वयं प्राणापानयोर्मध्ये हृद्यवतिष्ठते[16] स[17]

---

1. P सान्तोर्वृत्तिर् D सन्तोर्वृत्तिर्, sec.m. सोऽन्तर्वृत्तिर्
2. Chakravarti (125.29) reads प्रणति.
3. Chakravarti (126.1) reads प्रणतोऽयं.
4. All the Mss read प्राणिविषय. I follow Raghavan (15(2).4).
5. All the Mss read एवैषा.
6. Tripathi (413) suggests सुहितस्य.
7. D वावगतेः
8. P पुरीरीषां
9. Tripathi (413) reads अन्तर्वर्ती.
10. All the Mss read एषा. I follow Wezler (207.12).
11. D अर्वाग्, sec.m. अवाग्
12. D अर्वाग्, sec.m. अवाग्
13. All the Mss read एषो. I follow Wezler (207.13).
14. P K read परिवर्तमानस्या ... शतपदीं. D परिवर्तमानस्याहं शतपदीं Tripathi's emendation (414, fn.1) (परिवर्तमान)स्याथवा. also sounds plausible. I follow Wezler (207.14) in adding ऽपक्रान्तिः
15. D च समानः, sec.m. च स समानः
16. Chakravarti (126.12) reads सहाव° for हृद्यव°.
17. D om. स

समानो वायुरन्तर्वृत्तिः। यश्चापि कश्चित्सहभावो नाम भूतेषु द्वन्द्वारामता[1], तद्यथा सह दास्ये, सह यक्ष्ये, सह तपश्चरिष्यामि, सह भार्यापुत्रैर्बन्धुभिः सुहृद्भिश्च वर्तिष्य इति, बाह्या समानवृत्तिरेषा। समानविषय एवैष भवति। बलवत्तरः खल्वयं प्राणापानाभ्याम्। एष ह्येतौ प्राणापानौ ऊर्ध्वमवाक्[2] च वर्तमानौ मध्य एव सन्नियच्छति, मध्य एव सन्निरुणद्धि। स चैषोऽत्राभिव्यक्तो भवति। तद्यथा स्नुतसारस्य[3] वा सारमेयस्य, अनडुहो वोढभारस्य, घर्माभितप्ताया वा एडकाया[4] अर्धार्धकायं शकशकेति। प्राणान्ते सर्वप्राणिनां प्राणापाना[5]वुत्सृज्योर्ध्वमधश्च मुक्तयोक्त्रौ[6] हयाविव विषमं संचारयन् शरीरं स[7] परास्यति।

मूर्धारोहणादात्मोत्कर्षणाच्चोदानः[8]। यस्त्वयं प्राणापानसमानानां स्थानान्यतिक्रम्य रसं धातूंश्चादाय मूर्धानमारोहति, ततश्च प्रतिहतो निवृत्तः स्थानकरणानुप्रदानविशेषाद्वर्णपदवाक्यश्लोकग्रन्थलक्षणस्य शब्दस्याभिव्यक्तिनिमित्तं भवति, अयमन्तर्वृत्ति[9]र्वायुरुदान इत्युच्यते। यश्चापि कश्चिदात्मोत्कर्षो नाम भूतेषु तद्यथा हीनादस्मि श्रेयान्, सदृशेन वा सदृशः, सदृशादस्मि श्रेयान्, श्रेयसा वा सदृशः[10], श्रेयसो वा श्रेयान्[11], एतस्मिंस्तथा रूपाभिमानो वा प्राप्तविद्यस्य[12], तद्यथा बह्वन्तरविशेषा[13]दल्पान्तरविशेषोऽस्मि, अगुणवतो वा गुणवानस्मीति बाह्योदानवृत्ति[14]रेषा। उदानविषय एवैष[15] भवति। बलवत्तरः खल्वयं पूर्वेभ्यः। कथम्? एष ह्येतान्प्राणादीनूर्ध्वमवाङ्[16]मध्ये च वर्तमानानूर्ध्वमेवोन्नयति, ऊर्ध्वमेवोत्कर्षति। स चैषोऽत्राभिव्यक्तो भवति शीतोदकेन वा पर्युक्षितस्य प्रासमसिं[17] विकोशं चोद्यत[18]मभिपश्यतः।

---

[1] D द्वन्द्वारामतः Wezler (207.18) deletes द्वन्द्वारामता.

[2] D अर्वाक्, sec.m. अवाक्

[3] Wezler (207.23-24) regards the portion स्नुतसारस्य ... शकशकेति as uncertain.

[4] D वा ईडकाया

[5] Chakravarti (126.18) reads प्राणपानौ.

[6] Chakravarti (126.19) reads मुक्तयुक्तौ.

[7] D om. स

[8] Dkha. मूर्धारोहणात्सकर्षणाच्चोदानः

[9] P अन्तवृत्तिर्

[10] D वासदृशः

[11] D वाश्रेयान्

[12] P प्राप्तविद्यस्तु D प्राप्तविद्यस्व, sec.m. प्राप्तविद्यस्य

[13] D °विशेषस्य

[14] D बाह्य उदानवृत्तिर्

[15] D एवैतद्

[16] D अर्वाङ्

[17] Chakravarti (126.29) reads प्राप्तमसिं.

[18] D चोदितम्

शरीरव्याप्तेरत्यन्ताऽविनाभावाच्च व्यानः। यस्त्वयमालोमनखाच्छरीरं व्याप्य रसादीनां धातूनां पृथिव्यादीनां व्यूहं मर्मणां च प्रस्पन्दनं प्राणादीनां च स्थितिं करोति, सोऽन्तर्वृत्तिर्व्यानः। यश्चापि कश्चिदत्यन्ताऽविनाभावो[1] नाम भूतेषु तद्यथा पतिव्रता भर्तारं मृतमप्यनुगच्छति भवान्तरेऽप्ययमेव भर्ता स्यात् तथा धर्मादिभिस्तद्विपरीतैश्चेति (बाह्या व्यानवृत्तिरेषा)[2]। व्यानविषय एवैष भवति[3]। बलवत्तमश्चायं सर्वेभ्यः। कथम्? अनेन हि व्याप्ते शरीरदण्डकं तद्वशीकृतानां प्राणादीनां समा स्थितिर्भवति। स एषोऽन्तकाले प्राणभृतामविनाभावेन[4] वर्तमानोऽभिव्यज्यते तद्यथा हा तर्हि पादौ हेमौ[5] शीतीभूतौ गुल्फे जङ्घे ऊरू[6] कटिरुदरमुरःकण्ठेऽस्य घुरुघुरो[7] वर्तते हू इत्येवैषो बाह्यो व्यान इति। एवमेते प्राणाद्याः स्थानकार्यविशेषसूचिताः पञ्च वायवो व्याख्याताः[8]। तेषां प्रेरिका सामान्यकरणवृत्तिः। एषा च तन्त्रान्तरेषु प्रयत्न इत्युच्यते। स च धर्मादिसंस्कारभावनावशादनुपरतो जीवनम्। आह च—

वृत्ति[9]रन्तः समस्तानां करणानां प्रदीपवत् ।
अप्रकाशा[10] क्रियारूपा जीवनं कायधारिका ॥
सा यावदनिरुद्धा तु हन्ति वायुं रजोऽधिका[11]।
धर्माद्यनावृत्तिवशात्ता[12]वज्जीवति मानवः ॥

अत्र च सामान्यकरणवृत्तिग्रहणसामर्थ्यात्प्राणाद्याः पञ्च वायवः। बुद्धीन्द्रियाणि षष्ठम्। कर्मेन्द्रियाणि सप्तमम्। पूरष्टमम्। पूरित्यहङ्कारावस्थासंविदमधिकुरुते। यस्मा[13]दाह तत्र—

---

[1] D अत्यविनाभावो, sec.m. अत्यन्ताविनाभावो

[2] I follow Wezler (208.14) in adding बाह्या व्यानवृत्तिरेषा in place of बाह्यो, which latter is the reading in all Mss.

[3] P प्रभवति

[4] D प्राणभृतामविनाभावेन, sec.m. प्राणभृतां विना भावेन

[5] Wezler suggests the emendation हा इमौ, which too seems plausble.

[6] Chakravarti (127.8) reads जानू for ऊरू.

[7] All the Mss read खुरघुरो. I follow Chakravarti (127.8).

[8] Chakravarti (127.9) reads व्याख्याता.

[9] D first treats the following ślokas as prose, which is corrected into verses after deleting the former.

[10] Wezler (208.24) regards अप्रकाशा as uncertain.

[11] D रजोदिका

[12] D धर्मादिना वृत्तिवशात् Wezler (208.26) regards अनावृत्ति as uncertain reading.

[13] D तस्माद् for यस्माद्

संविदहङ्कारगता[1] कार्यं करणं[2] (च) पूरयति यस्मात् ।
तस्मात्पूरि[3]त्युक्ता प्रत्यवभासाऽष्टमं भोक्तुः ॥

सा चाहङ्कारगता संविद् बुद्धिगतैव पुरुषेणोपलभ्यते । यस्मा[4]द्वक्ष्यति—

एते[5] प्रदीपकल्पाः परस्परविलक्षणा गुणविशेषाः ।
कृत्स्नं पुरुषस्यार्थं प्रकाश्य बुद्धौ[6] प्रयच्छन्ति ॥ (का॰ 36)
सर्वं प्रत्युपभोगं यस्मात्पुरुषस्य साधयति बुद्धिः । (का॰ 37)

तस्मात्सैव पू[7]रिति ।

शास्त्रं चैवमाह—"प्राणापानसमानोदानव्यानाः पञ्च वायवः । षष्ठं मनः । सप्तमी[8] पूः, अष्टमी[9] वाक्" (इति)। वाग्ग्रहणेन कर्मेन्द्रियपर्वणो ग्रहणम्, मनोग्रहणेन बुद्धीन्द्रियपर्वणः । तदेतत्प्राणाष्टकं[10] वैकारिकं गुणशरीरस्य[11] परिद्रष्टुः क्षेत्रज्ञस्य शरीरमाददानस्य नित्यं स्तम्भस्थानीयं प्रत्यङ्गं भवति, अच्छेद्यमभेद्यमदाह्यमविनाश्यमविकम्प्यम्[12] । अनित्यानि पुनर्भौतिकानि बाह्यानि शरीराणि कुशमृत्तिकास्थानीयानि उपचीयन्ते चेति ।

आह, कुतः पुनरियं प्राणादिवृत्तिः प्रवर्तत इति?

उच्यते—सा कर्मयोनिभ्यः । महतः प्रच्युतं हि रजो विकृतम्, अण्डस्थानीयाः पञ्च कर्मयोनयो भवन्ति—धृतिः श्रद्धा सुखा विविदिषा अविविदिषेति । आह च—

प्रच्युतो महतो यस्तु न प्राप्तो ज्ञानलक्षणम् ।
व्यापारो ज्ञान[13]योनित्वात्सा योनिः कुक्कुटाण्डवत् ॥

---

[1] I prefer Wezler's reading (209.2) अहङ्कारगता instead of अहंकारगतं, which latter is the reading in all Mss.

[2] All the Mss read कारणं.

[3] D पूरयत्य् (उक्ता), sec.m. पूरित्य्

[4] D °पलभ्यते न यस्माद्, sec.m. °पलभ्यते यस्माद्

[5] D एते, sec.m. ते ते

[6] D प्रकाशबुद्धौ

[7] D treats तस्मात्सैव पूः as the beginning of a verse which remains incomplete.

[8] D सप्तमे

[9] D अष्टमे

[10] All the Mss read प्राणाष्टमं. Tripathi (419) suggests प्राणाद्यष्टकं. I follow Chakravarti (127. 25).

[11] K D गुणशरीरमस्य

[12] D अविकल्प्यम्, sec.m. अविकम्प्यम्

[13] Tripathi (420) reads व्यापारोऽज्ञानं°.

तासां लक्षणविषयसतत्त्वगुणसमन्वया भवन्ति। तत्र लक्षणं तावत्—व्यवसायादप्रच्यवनं धृतिः। फलमनभिसन्धाय शास्त्रोक्तेषु कार्येष्ववश्यकर्तव्यताबीजभावः[1] श्रद्धा। दृष्टानुश्रविकफलाभिलाषद्वारको[2] हि बुद्धेराभोगः सुखा। वेत्तुमिच्छा विविदिषा। तन्निवृत्तिरविविदिषा। तत्र यदाऽयं जन्तुः शुभाशुभेषु कार्येषु वृत्त्यनुसारी जिज्ञासुरजिज्ञासुर्वा शरीरं परित्यजति, तामेव कर्मयोनिमुपपद्यते। तस्यामुपपन्नस्तामेव भावयति। एतत्तावल्लक्षणसतत्त्वम्। आह च—

वाचि(1) कर्मणि[3] सङ्कल्पे प्रतिज्ञां योऽनुरक्षति[4] ।
तन्निष्ठस्तत्प्रतिज्ञश्च[5] धृतेरेतद्धि लक्षणम् ॥
अनसूया ब्रह्मचर्यं यजनं याजनं तपः ।
दानं प्रतिग्रहः शौचं श्रद्धाया लक्षणं स्मृतम् ॥
सुखार्थी यस्तु[6] सेवेत[7] विद्यां कर्म तपांसि वा ।
प्रायश्चित्तपरो नित्यं सुखायां स तु वर्तते ॥
द्वित्वैकत्वपृथक्त्वं नित्यं चेतनमचेतनं सूक्ष्मम् ।
सत्कार्यमसत्कार्यं विविदिषितव्यं[8] विविदिषायाः ॥
विषपीतसुप्तमत्तवद्[9]विविदिषा ध्यानिनां सदा योनिः।
कार्यकरणक्षयकरी प्राकृतिकगतिः[10] समाख्याता ॥

विषयसतत्त्वं पुनः सर्वविषयिणी धृतिः। आश्रमविषयिणी श्रद्धा। दृष्टानुश्रविकविषयिणी सुखा। व्यक्तविषयिणी विविदिषा। अव्यक्तविषयिण्यविविदिषा। गुणसमन्वयस्तु रजस्तमोबहुला धृतिः। सत्त्वरजोबहुला श्रद्धा। सत्त्वतमोबहुला सुखा। रजोबहुला विविदिषा। तमोबहुलाऽविविदिषेति। उक्तं च—

---

1. D °कर्तव्यता वीजभावः
2. D °आभिलाषधारको
3. D वाच्यकर्मणि
4. All the Mss read न रक्षति. Raghavan (15(2).5) offers the correction यो हि रक्षति or योऽभिरक्षति. Tripathi (421) reads नु रक्षति. I prefer Wezler's correction (210.1).
5. K तत्प्रतिज्ञास् for तत्प्रतिज्ञश्
6. D सुखार्थं(?) यस्(तु), sec.m. सुखार्थी यस् (तु)
7. K सेवते Chakravarti (128.15) reads सेवते.
8. D विविदिषितं Chakravarti (128.18) reads विविदिषन्तव्यंः.
9. D विपरीतसुप्तं
10. All the Mss read प्राकृतिका गतिः. I follow Wezler's emendation (210.14).

---

(1) The ślokas that follow here are quoted, with some variation of reading, in तत्त्वसमाससूत्रवृत्ति under the sūtra पञ्चकर्मयोनयः, p. 82.

लक्षणविषयसतत्त्वं त्रैगुण्यसमन्वयं च पञ्चानाम् ।
योनीनां यो विद्याद् यतिवृषभं तं त्वहं मन्ये ॥

इत्युक्ताः प्राणादयो योनयश्च । एतद् द्वयमधिगम्य सम्यङ्मार्गानुगमनं[1] कुर्यात् । रजस्तमोधर्मादिसाधनभावविनिवृत्तितस्तु[2] । अत्र प्राणानामन्तर्वृत्तिरनुपाधिकत्वादनिवर्त्या । बहिर्वृत्तिस्तु मार्गामार्गविषयतया प्रयोक्तव्या । कथमित्युच्यते—प्राणविषया तावत्प्रणतिर्धर्मादि[3]विषय एवावरोद्धव्या[4] । ततो ह्यस्य सत्त्ववृद्धिः, सत्त्ववृद्धेश्चोत्तरोत्तरबुद्धिरूपाधिगमः । अपानविषयं[5] त्वपक्रमणमधर्मादिविषय[6] एवावरोद्धव्यम्[7] । एवं ह्यस्य ख्याति[8]विषयावारकस्य[9] तमसो निर्ह्रासः । ततश्चोत्तरोत्तरबुद्धिरूपाधिगमः[10] । तथा समानविषयं साहचर्यं सत्त्वधर्मानुगुणं कुर्यात् । यस्माच्छास्त्रमाह "सत्त्वारामः सत्त्वमिथुनश्च सदा स्यात्" इति । आत्मोत्कर्षं तूदानविषयमविद्यापर्वणोऽन्त्यं रूपं विवर्ज्य तत्प्रतिपक्षैर्निवर्तयेत्[11] । अत्यन्ताविनाभावं च[12] व्यानविषयं[13] ज्ञानविषय एव भावयेत् । योनीनां चतसृणां धर्मबीजता[14]मेवादद्यात्[15] । अविविदिषामप्यनिष्टफलहेतुषु भावयेत् । सोऽयं धर्मादिषु प्रवणस्तत्प्रतिपक्षापक्रान्तः सत्त्वारामो विनिवृत्ताभिमानो ज्ञाननिष्ठः सविशुद्धयोनिरचिरेण परं ब्रह्मोपपद्यत[16] इति । आह च—

बाह्यां प्राणविवृत्तिं सम्यङ्मार्गे बुधः प्रतिष्ठाप्य ।
विनिवृत्तविखरकलुषो ध्रुवममृतं स्थानमभ्येति ॥
पञ्चानां योनीनां धर्मादिनिमित्ततां[17] च संस्थाप्य[18]
परिपक्वमित्यधस्तान्न पुन[19]स्तद्भावितो गच्छेत् ॥

इति व्याख्याता व्यस्तसमस्ता करणानां वृत्तिः ॥ 29 ॥

---

[1] D सम्यक् मार्गानुगमनं

[2] Chakravarti (129.2) reads °विनिवृत्तिस्त्वत्र.

[3] Chakravarti (129.3) reads प्रणतिधर्मादि°.

[4] All the Mss read एवापरोद्धव्या. I follow Chakravarti (129.4).

[5] All the Mss read अपानविषयस्.

[6] All the Mss read धर्मादिविषय. I follow Wezler's correction (210.27).

[7] All the Mss read एवापरोद्धव्यम्. I follow Chakravarti (129.5).

[8] Raghavan (15(2).5) emends ख्याति as अख्याति.

[9] All the Mss read °विषयाकारकस्य. Tripathi (423) suggests विषयावकारकस्य. I follow Wezler (210.28).

[10] Tripathi (423) omits ततश्चो ... ऽधिगमः.

[11] P (प्रतिपक्षैः) निर्वर्तयेत् Chakravarti (129.8-9) reads प्रतिपक्षे निवर्तयेत्.

[12] After च D writes and erases ज्ञानविषय एव.

[13] Dkha. ध्यानविषयं

[14] All the Mss read धर्मताबीजताम्. Chakravarti (129.10) reads धर्मतां बीजताम्.

[15] D एवादध्यात्

[16] Dkha. (ब्रह्म) उपसंपद्यत

[17] D धर्मादिनिमित्तं तां, sec.m. धर्मादिनिमित्ततां

[18] In the footnote D writes संस्थाप्येत्यतः परं ख° पुस्तकस्याभावः.

[19] D अधस्तात्पुनस्, sec.m. अधस्तान्न पुनस्

आह—येयमेकैकस्मिन् रूपादावर्थे[1] करणचतुष्टयस्य वृत्तिः सा किं[2] युपगत्, आहोस्वित् क्रमेणेति? कुतः संशय इति चेत्, उभयथा दृष्टत्वात्। इहैकार्थविषयाणां युगपदपि वृत्तिर्दृष्टा। तद्यथा चन्द्रमण्डले चक्षुषां मनसो वा। क्रमशश्च तद्यथा घटे मधूदकपयसाम्। एकार्थविषयं च करणचतुष्टयम्। अतो नः[3] संशयः, किं चक्षुर्मनोवद्युगपदस्य वृत्तिः, आहोस्विन्मध्वादिवत्क्रमेणेति?

उच्यते—यथादर्शनमपि तावदुच्यताम्। किमत्र युक्तं भवान् मन्यते? स चेत्सम्यगुपदेक्ष्यसि को निर्बन्धस्तदेव प्रतिपद्यामह[4] इति। यद्येवम्, तस्मादिदमस्मद्दर्शनम्—

युगपच्चतुष्टयस्य तु वृत्तिः (का॰ 30/1-2')

तुशब्दोऽवधारणार्थः। युगपदेवेत्यर्थः। बुद्ध्यहङ्कारमनसां[5] हि बुद्धीन्द्रियाणां च समानदेशत्वम्। तत्र न[6] शक्यत एतद्वक्तुम्, सति शक्तिसद्भावे विषयसम्बन्धे च कस्यचित्तत्र वृत्तिः कस्यचिन्नेति।

किञ्चान्यत्। मेघस्तनितादिषु क्रमानुपलब्धेः। यदि हि क्रमेण श्रोत्रादीनामन्तःकरणस्य च बाह्येऽर्थे वृत्तिः स्यात्, अपि तर्हि मेघस्तनितकृष्णसर्पालोचनादिष्व[7]प्युपलभ्येत क्रमः। न तूपलभ्यते। तस्माद्युगपदेव बाह्येऽर्थे चतुष्टयवृत्तिरिति।

उच्यते—यदुक्तं (243.9) श्रोत्रादीनामन्तःकरणस्य चाभिन्नकालं वृत्तिरित्यत्र ब्रूमः—अयुक्तमेतत्। किं कारणम्? यस्मादस्माकम्—

क्रमशश्च तस्य निर्दिष्टा। (का॰ 30/2')

तस्येति चतुष्टयमभिसम्बध्यते[8]। चशब्दोऽवधारणार्थः। क्रमश एवेत्यर्थः। क्रमश एव हि बाह्यान्तःकरणवृत्त्योरेकार्थोपनिपातः[9]। यत्तूक्तं (243.11) समानदेशानां शक्तिसम्बन्धसद्भावे वृत्त्यभावानुपपत्तिरित्यत्र ब्रूमः—चक्षुरादिवदेतत्स्यात्। तद्यथा चक्षुस्त्वचोः समानदेशत्वे

---

[1] Chakravarti (129.18) reads रूपादावास्ते instead of रूपादावर्थे.

[2] D unclear, sec.m. किं

[3] D न, sec.m. नः

[4] D मन्यामहे, sec.m. प्रतिपद्यामहे

[5] D °मनांसि, sec.m. °मनसां.

[6] Chakravarti (129.28) reads तन्न शक्यत instead of तत्र न शक्यत.

[7] D कृष्णसर्पादिष्वापि, sec.m. कृष्णसर्पालोचनादिष्वपि

[8] Pandeya (109) reads अपिसम्बध्यते.

[9] P not clear. Pandeya (109) reads °रेकार्थनिपातः. Chakravarti (130.7–8) reads °रेकार्थे उपनिपातः.

शक्तिविषयसम्बन्धोपपत्तौ रजोधूमातपाधिगतः[1] स्पर्श एवोपलभ्यते, न रूपम्, एवमिहापि स्यात्। तस्मात्—

दृष्टे तथाऽप्यदृष्टे[2] (का॰ 30/3)

क्रमश एव चतुष्टयस्य वृत्तिः। अदृष्टग्रहणेन पुनरत्रातीतानागतव्यवहितविषयग्रहणम्। तत्रातीतं द्विविधम्, दृष्टविषयमदृष्टविषयं च। अत्रापि दृष्टविषयं प्रत्यभिज्ञानमित्यभिप्रेतम्, अदृष्टविषयं[3] स्मृतिः। सा तु लिङ्गागमाभ्यामकस्माद्वा भवति। तथा च वृषगणवीरेणा[4]प्युक्तं भवति "अनिमित्तो[5]ऽप्येवमवस्थितस्य ज्ञानस्य वृत्तिः प्रत्ययः प्रादुस्तिरश्च (भवति) वृत्त्यर्थे न भवत्यनिमित्तोऽपीत्यनागतव्यवहितविषयज्ञानं तु लिङ्गागमाभ्याम्" (इति)। आह च—

विषयेन्द्रियसंयोगात्प्रत्यक्षज्ञानमुच्यते।
तदेवातीन्द्रियं जातं पुनर्भावनया स्मृतिः॥
तदेव भावनापेक्षज्ञानं कालान्तरे पुनः।
तत्रैव सेन्द्रियं जातं प्रत्यभिज्ञानमुच्यते॥

तत्र दृष्टे क्रमं प्रति नास्ति सन्देहः। यत्पुनरेतदुक्तं (245.13) दृष्टे मेघस्तनितकृष्णसर्पालोचनादौ[6] क्रमानुपलब्धेर्युगपच्चतुष्टयस्य वृत्तिरित्यत्र ब्रूमः—एतदप्ययुक्तम्। किं कारणम्? यस्मात्—

त्रयस्य तत्पूर्विका वृत्तिः ॥ का॰ 30/4 ॥

न तावद् बुद्ध्यहङ्कारमनसां साक्षाद् बाह्यार्थग्रहणसामर्थ्य[7]मस्ति, अन्तःकरणानुपपत्तिप्रसङ्गात्, श्रोत्रादिवैयर्थ्यप्रसङ्गात्, द्वारिद्वारभावव्याघातप्रसङ्गाच्च। तस्मात्पूर्वं श्रोत्रादीनामर्थसम्बन्धोऽस्ति। मेघस्तनितादावप्यवश्यमेतदभ्युपगन्तव्यम्। पश्चात्तु तद्वृत्त्युपनिपातादन्तःकरणस्येत्यस्ति क्रमोऽत्रापि। तत्र यदुक्तं (245.13) मेघस्तनितादिषु क्रमाऽननुगते[8]र्युगपच्चतुष्टयस्य वृत्तिरित्येतदयुक्तम्[9]।

---

1. D not clear, sec.m. अधिगतः Pandeya (109) reads °पादिगतः.
2. D apparently unclear, sec.m. अदृष्टे
3. Chakravarti (130.13) reads अदृष्टविषया. Tripathi (427) also suggests अदृष्टविषया.
4. D वृषिगणवीरेणा°
5. P K show a lacuna in place of अनिमित्तोऽप्य् ... अनिमित्तोऽपीत्. This portion, while it is omitted in D, is written in its bottom margin as coming from ग॰ पु॰.
6. D कृष्णसर्पालोचनादौ, sec.m. कृष्णसर्पाद्यालोचनादौ
7. D ब्राह्यार्थे ग्रहण°
8. P कमाननुगते
9. Chakravarti (130.25) reads तन्न युक्तम्.

अन्यैस्त्वन्यथाऽन्वयो दर्शितः। तद्यथा **चतुष्टयस्येति** मनोऽहङ्कारबुद्धीनामन्तःकरणानां बाह्येनैकेन करणेन श्रोत्रेण वा चक्षुषा वा सह चतुष्टयस्येत्यर्थः। अस्य[1] **दृष्टे** वर्तमाने **युगपद्वृत्तिः पूर्वाचार्यैर्निर्दिष्टा**[2]। आचार्येण तु क्रमेणेत्यर्थः। **अदृष्टेऽतीतादावपि क्रमशश्च**[3] क्रमेणैव, यतस्त्रयस्यान्तःकरणस्य **तत्पूर्विका** बाह्येन्द्रियपूर्विका **वृत्तिः**। {यदा} यथाऽनुभवस्तथा संस्कारः, यथा च संस्कारस्तथा स्मृति(1)रित्येवं वृत्तिर्बाह्येन्द्रियपूर्विकेति ॥ 30 ॥

आह, किं पुनरेषां करणानां स्वविषयनियमेन वृत्तिर्भवति, आहोस्विद्व्यतिकरेणेति? उच्यते—ननु च प्रागेव—

रूपादिषु पञ्चानामालोचनमात्रमिष्यते वृत्तिः। (का॰ 28)

इति चोक्त्वाऽऽचार्येणान्तेऽपदिष्टं[4] "सैषा भवत्यसामान्या" (का॰ 29) इति। तत्रैवं गते भवतः संशयः कुतः {इत्युच्यते}।

(आह,)[5] सत्यमेवैतत्। तथापि जायते संशयः। कुतः? करणान्तरेण स्वविषयोपलब्धौ करणान्तरौत्सुक्यदर्शनात्। इह करणान्तरेण चक्षुषाऽऽम्रदाडिमादिरूपोपलब्धौ[6] सत्यां करणान्तरस्य जिह्वालक्षणस्यौत्सुक्यं प्रवृत्तिश्चोपलब्धा। तद्यदि स्वविषयनियतानीन्द्रियाणि, नैषां करणान्तरविषयोपलम्भा[7]त्तत्साहचर्यापेक्षः स्वविषयग्रहणभावः स्यात्। अस्ति च। तस्मादुपपन्नः संशयस्तत्रेदानीं[8] भवतः का प्रतिपत्तिरिति?

उच्यते—अत्रापि नास्तीन्द्रियाणां स्वविषयग्रहणव्यतिकरः। किं तर्हि—

स्वां स्वां प्रतिपद्यन्ते परस्पराकूतहेतुकीं[9] वृत्तिम् ।
पुरुषार्थ एव हेतुर्न केनचित् कार्यते करणम् ॥ का॰ 31 ॥

यस्य करणस्य या वृत्तिर[10]पदिष्टा[11] तद्यथा श्रोत्रस्य शब्दग्रहणम्, चक्षुषो रूपग्रहणमित्यादि, तामेव **प्रतिपद्यन्ते** स्वविषयजिघृक्षयाऽवलम्बन्त इत्यर्थः। परस्परस्याकूतं परस्पराकूतम्। आकूतमभिप्रायोऽभिसन्धिरित्यर्थः। परस्पराकूतं हेतुः प्रतिपत्तेरस्याः सेयं(2) **परस्पराकूतहे-**

---

[1] D adds in the right margin अस्य दृष्टे ... क्रमेणेत्यर्थः.

[2] Chakravarti (130.29) reads निर्दिष्टाः.

[3] K D read क्रमश्च.

[4] Raghavan (15(2).5) proposes उपदिष्टम्.

[5] All the Mss omit आह, which we think should be added here.

[6] D च चक्षुषा म्रदातिमादिरूपोपलब्धौ, sec.m. चक्षुषाम्रदाडिमादिरूपोपलब्धौ Chakravarti (131.7-8) reads चक्षुषा मुदा हिमादि(दाडिमादि ?).

[7] D करणान्तर°, sec.m. कारणान्तर°

[8] Tripathi (431) omits इदानीं.

[9] Chakravarti (131.13) reads °हेतुकां.

[10] Chakravarti (131.15) reads यथावृत्तिर°.

[11] D उपदिष्टा, sec.m. अपदिष्टा

---

(1) Cf. यो॰ भा॰ 4.9, where it is said: यथाऽनुभवास्तथा संस्काराः... यथा च वासनास्तथा स्मृतिः.

(2) Cf. पा॰ सू॰ 5.4.154.

तुकी। परस्पराकूतं प्रतिपत्तेः कारणमिति कृत्वा ताच्छब्द्यं लभते "तद्यथा दधित्रपुसं[1] (प्रत्यक्षो) ज्वरः"(1)। एतदुक्तं भवति—यदा चक्षुषाऽऽम्रदाडिमादि[2]रूपमुलब्धं भवति, तदा रसनेन्द्रियमुपात्तविषयस्य चक्षुषो वृत्तिं संवेद्य स्वविषयजिघृक्षयौत्सुक्यवद्[3] विकारमापद्यते। रसनस्य वृत्तिं संवेद्य पादौ विहरणमारभेते[4] हस्तावादानं तावद्यावदसौ विषयो रसनेन्द्रिययोग्यतां (आ)नीतः[5]। ततो रसनं स्वविषये प्रवर्तते। एवमितरेष्वपि वक्तव्यम्।

आह—यद्येवम्, तेन[6] तर्हीन्द्रियान्तरवृत्तिसंवेदनेऽक्षप्रत्ययवत्त्वप्रसङ्गः। यदि तर्हीन्द्रियान्तरेणेन्द्रियान्तरस्य[7] वृत्तिः संवेद्यते, प्राप्तमस्य प्रत्ययवत्त्वम्। अथाप्रत्ययमिन्द्रियं परस्पराकूतसंवेदनम्, तर्हि न वाच्यम् {इति}[8]। किञ्च परस्परद्वारिद्वारभावप्रसङ्गश्च। इन्द्रियान्तरं चेदिन्द्रियान्तरस्य वृत्तिं संवेद्य स्वार्थ[9]माकांक्षेत्, प्राप्तमस्य द्वारित्वमितरस्य च द्वारत्वम्। तस्माद[10]युक्तमिन्द्रियाणां परस्पराकूतसंवेदनमिति।

उच्यते—न, उपचारात्। प्रागेवोपदिष्टमस्माभिरप्रत्ययमिन्द्रियमिति (232.5)। किं तर्हि? स्वविषयस्य पटोः सहचारिणमर्थमिन्द्रियान्तरविषयतामापन्नं संस्पृश्य स्वभावत इन्द्रियान्तरं स्वविषयं प्रति साकांक्षं[11] भवति। तत्सन्निधौ विक्रियादर्शनात्[12] तत्र संवेदनमुपचर्यैवमुच्यत[13] इत्यदोषः। किञ्चान्यत्। भौतिकावयवप्रत्ययविवृत्तिवत्तद्विवृत्तेः। यथा बुद्धेः प्रसादसमनन्तरं भौतिकानामवयवानां मुखनयनादीनां प्रसादो भवति, न चैषां प्रत्ययवत्त्वम्, एवमिहापि स्यात्। न च प्रत्ययवत्त्वम्। एतेन द्वारिद्वारभावः (च) प्रत्युक्तः। मनोऽधिष्ठानसामर्थ्याद्वा। अथवा परस्परविषयमाकूतं परस्पराकूतम्, यथा

---

[1] All Mss, including P, read दधित्रपुसं ज्वरः. But Chakravarti, who is normally supposed to follow P, reads (131.19) दधि ... पु संज्वरः. Tripathi (432) reads दधित्रपुषे.

[2] Chakravarti (131.19) reads चक्षुषा मुदा हिमादिरूपं.

[3] D संवेद्यस्वविषय°

[4] Chakravarti (131.21) reads आरभते.

[5] All the Mss read °योग्यतां नीतः. I follow Wezler (214.4).

[6] Chakravarti (131.24) omits इन्द्रियान्तरवृत्तिसंवेदनेऽक्षप्रत्ययवत्त्वप्रसङ्गः। यदि तर्हि.

[7] D इन्द्रियान्तरेण, sec.m. इन्द्रियान्तरस्य

[8] I follow Wezler (214.9) in deleting इति.

[9] D संवेद्यस्वार्थम्

[10] I follow Wezler (214.12) in substituting तस्माद् for तद्, which latter is the reading in all Mss.

[11] D प्रतिसाकांक्षं

[12] D विक्रिया°, sec.m. विषक्रिया°

[13] D उपचर्यैव मुच्यते, sec.m. उपचर्यैवमुच्यते

---

(1) Cf. म॰ भा॰ 1.1.59 : दधित्रपुसं प्रत्यक्षो ज्वरः।

जलविषयः पुरुषः जलपुरुषः[1]। आकूतमिच्छा सङ्कल्पो मन इत्यर्थः। स हेतुरस्याः सेयं **परस्पराकूतहेतुकी**, ताम्[2]। एतदुक्तं भवति, यदा किञ्चिदिन्द्रियं विषये प्रवृत्तं भवति तदा तद्द्वारेण समस्तमर्थमुपलभ्य (मनस्)[3]तत्सहचारिण[4]मर्थान्तरमाकांक्षदिन्द्रियान्तरं वृत्त्याऽधितिष्ठते[5]। तेनाकांक्षवता मनसाऽधिष्ठितमिन्द्रियं विक्रियामापद्यते। तथा च तन्त्रान्तरेऽप्युक्तम्—"यस्य यस्येन्द्रियस्य विषयं मनो ध्यायत्यभिसम्पत्त्यर्थेन तस्य तस्यौत्सुक्यं प्रवृत्तिश्च भवति" इति। एतदुक्तम्—

स्वां स्वां प्रतिपद्यन्ते परस्पराकूतहेतुकीं[6] वृत्तिम् (का॰31) इति।

किमिन्द्रियं मनोवृत्त्याऽधिष्ठाय स्वविषये प्रवर्तयति यथा परश्वादींश्चैत्र[7] इति?

नेत्युच्यते। किं तर्हि? स्वविषयसङ्कल्पानुगृहीतस्य मनसः संस्पर्शात्स्वयमेवेन्द्रियं स्वविषयं प्रतिपद्यते। कस्मात्? प्रयोगशक्त्यसिद्धेः। न हि यथा चैत्रस्य परश्वादिप्रयोगशक्तिः सिद्धा, एवं मनस इन्द्रियप्रयोगशक्तिः। तस्मादयुक्तमिन्द्रियस्य मनः प्रेरकमिति। रज इति चेत्, स्यान्मतम्। रजसो हीन्द्रियान्तरप्रयोगसामर्थ्यं विद्यते। तस्मादयुक्तमुक्तं (249.10) प्रयोगशक्त्यसिद्धेर्नेन्द्रियाणां मनः प्रयोजकमिति। एतच्चायुक्तम्। कस्मात्? अविशेषात्। इन्द्रियान्तरेऽपि हि तर्हि रजोऽस्तीत्यत आत्मभूतेनैवास्य निमित्तेन प्रवृत्तिरप्रतिषिद्धा, किं मनसा[8] परिकल्पितेनेति? किञ्चान्यत्, करणान्तरानुपपत्तेः[9]। चैत्रो हि परश्वादीनां प्रयोगं करणान्तरेण करोति, न तु मनसः करणान्तर[10]मस्तीत्यसमानम्। पाणिवदिति चेन्न, चैत्रव्यापारापेक्षत्वात्। तदपि हि चैत्रव्यापारापेक्षं प्रवर्तते, न स्वतः। किञ्च तद्व्यतिरेकेण प्रवृत्त्युपलब्धेः। यस्य हि प्रयोजकान्तरापेक्षा प्रवृत्तिः, न तस्य कदाचिदपि स्वतन्त्रस्य भवति। अस्ति तु सङ्कल्पव्यतिरेकेण मेघस्तनितादिष्विन्द्रियस्य प्रवृत्तिः। तस्मान्नेन्द्रियान्तरस्य मनः कारकम्[11]। न चेत्कारकं यथा मौलानां गुणानामेवमिहापि पुरुषार्थ एव हेतुर्न केनचित्कार्यते करणमिति सिद्धम्॥ 31॥

---

[1] D adds जलपुरुषः in the left margin.

[2] D °हेतुकीतां, sec.m. °हेतुकी ताम् Chakravarti (132.8) reads °हेतुका.

[3] Following Wezler (214.25), मनस् is added here.

[4] K तत्सहचारिणाम्

[5] All the Mss read वृत्त्या प्रतितिष्ठते. I follow Wezler's emendation (214.26).

[6] Chakravarti (132.13) reads °हेतुकां.

[7] Chakravarti (132.14) reads परश्वादि चैत्र.

[8] Chakravarti (132.20) reads किं पुनः सा परि°.

[9] D कारणान्तरानुपपत्तेः

[10] D कारणान्तरम्

[11] D कारणम्, sec.m. कारकम्

आह, करणं प्रत्याचार्यविप्रतिपत्तेस्तदवधारणं[1] कर्तव्यम्[2]। इहाचार्याणां करणं प्रति विप्रतिपत्तिः। एकादशविधमिति वार्षगणाः। दशविधमिति तान्त्रिकाः पञ्चाधिकरणप्रभृतयः। द्वादशविधमिति पतञ्जलिः। तस्माद् भवतः कतिविधं करणमभिप्रेतमिति वक्तव्यमेतत्।

उच्यते—

करणं त्रयोदशविधं तदाहरणधारणप्रकाशकरम्। (का॰ 32/1-2)

पञ्च कर्मेन्द्रियाणि पञ्च बुद्धीन्द्रियाणि मनोऽहङ्कारो बुद्धिश्चे[3]त्येतत्सर्वं पुरुषार्थोपयोगि करणम्। कस्मात्? अपुरुषार्थोपयोगित्वे तत्त्वान्तरानुपपत्तिप्रसङ्गात्। यदि यथा वार्षगणा आहुः "लिङ्गमात्रो[4] महानसंवेद्यः कार्यकरणरूपेणाविशिष्टो विशिष्टलक्षणेन[5]", तथा स्यात्तत्त्वान्तरम्[6]। तन्न स्यात्, अनर्थकत्वात्। आह, सत्यम्[7], प्रधानलक्षणानां गुणानां वैषम्यमात्ररूपत्वेऽपि तत्त्वान्तरमसौ भविष्यतीति। कस्मात्? साम्याद्वैषम्यमुपाख्यान्तरमिति। एतच्चायुक्तम्। कस्मात्? तत्त्वानवस्थाप्रसङ्गात्। एवं हि परिकल्प्यमाने प्रधानमहतोर्यदन्तरालं तत्त्वान्तराणाम्[8], तदपि च क्रियारूपत्वादक्रियावत उपाख्यान्तरमिति तत्त्वान्तरानवस्थाप्रसङ्गः। अभ्युपगमे[9] वा महतस्तत्त्वान्तराणां च क्रियाकालविरोधः। तस्मात्तत्त्वान्तराऽनुपपत्तिरनवस्था वा {त्रयोदशविध[10] करण[11]मित्य्}अन्यत[12]रदवश्यमभ्युपगन्तव्यम्। तत्र चास्मत्प्रतिज्ञातमेव निर्दोषं लक्ष्यते। तस्मादुपपन्नमेतत्, त्रयोदशविधं करणमिति।

आह, करणमिति क्रियाकारकसम्बन्धगर्भोऽयं निर्देशः। कथम्? येन (क्रियते)[13]

---

1. Chakravarti (132.28) omits तदवधारणं... प्रति विप्रतिपत्तिः.
2. I follow Wezler (215.15-16) in deleting कर्त्तव्यम्.
3. Chakravarti (133.4) reads मनोऽहङ्कारबुद्धिश्चे॰.
4. All the Mss read लिङ्गमात्रे. I follow Chakravarti (133.6), who anticipates Tripathi (437) and Wezler (215.25).
5. All the Mss read कार्यकारणरूपेणाविशिष्टाविशिष्टलक्षणेन. I follow Chakravarti (133.6).
6. D स्या तत्त्वान्तरम्, sec.m. स्यात्तत्त्वान्तरम्
7. P K आह, सत्यम् D आह सतयं, sec.m. आह मतं In place of आह, सत्यम्, Wezler (215.27) suggests the reading .... । अथ मतम्।
8. Tripathi (438) reads तत्त्वान्तराणां च, thus adding च.
9. All the Mss read अभ्युपगमो. I follow Pandeya (112).
10. Wezler (215.34) deletes त्रयोदशविधं करणमित्य्. I follow him.
11. D करणानाम्, sec.m. करणाम्
12. All the Mss read अन्यतरवद् I follow Tripathi (438), who anticipates Wezler (215.34).
13. I follow Tripathi (439) and Wezler (216.4) in inserting क्रियते.

तत्करणमिति (1)। तत्र वक्तव्यं का क्रिया किञ्च तत्क्रियते यदपेक्ष्य बुद्ध्यादीनां करणत्वमिति?

उच्यते—यदुक्तं (251.1) का क्रियेत्यत्र ब्रूमः—तन्निर्वर्तक[1]मिहाभिप्रेतं न[2], दण्डादिवत्। किं तर्हि? तदाहरणधारणप्रकाशकरम्। तत्राहरणं कर्मेन्द्रियाणि कुर्वन्ति, विषयार्जनसमर्थत्वात्। धारणं बुद्धीन्द्रियाणि[3] कुर्वन्ति, विषयसन्निधाने सति श्रोत्रादिवृत्तेस्तद्रूपापत्तेः। प्रकाशमन्तःकरणं करोति, निश्चयसामर्थ्यात्। अपर आह—"आहरणं कर्मेन्द्रियाणि कुर्वन्ति। धारणं मनोऽहङ्कारश्च। प्रकाशनं बुद्धीन्द्रियाणि बुद्धिश्च" इति। एतदभिसन्धाय बुद्ध्यादीनां करणत्वमुच्यत इति[4]। यत्तूक्तं (251.1) किं कार्यमिति, उच्यते—

कार्यं च तस्य दशधा (का॰ 32/3)

दशधेति पञ्च विशेषाः पञ्चाविशेषा (द्र॰ का॰ 38)। तदप्यत एव कार्यशब्दं लभते।

आहार्यं धार्यं प्रकाश्यं च ॥ का॰ 32/4 ॥

तद्ध्याहर्तव्यं धारणीयं प्रकाशयितव्यं च। अतः कार्यमित्युच्यते, न निर्वर्त्यत्वात् ॥ 32 ॥

एतस्मिंस्त्रयोदशविधे तु करणे त्र(यं)[5] कतरदिति?

उच्यते—बुद्धिरहङ्कारो मनश्च। तस्मात्—

अन्तःकरणं त्रिविधम् (का॰ 33/1)

कस्मात्? विषयानभिसन्धानात् श्रोत्रादिप्रणालिकया च विषयसम्प्रतिपत्तेः। अविशेषाभिधानाद् बुद्ध्यादिप्रतिपत्तिरयुक्तेति चेत्, स्यान्मतम्—अविशेषेणेदमुक्तमाचार्येण **अन्तःकरणं त्रिविधमिति**। तत्र कथमिदमवगम्यते बुद्ध्यहङ्कारमनसां ग्रहणमिहाभिप्रेतम्, न पुनरन्येषामिति? उच्यते—न, प्रथमसंख्याव्यतिक्रमहेत्वनुपपत्तेः। बुद्ध्यादिसंख्यां हि व्यतिक्रममाणस्य प्रतिपत्तौ नास्ति हेतुः। तस्मात्तेषामेव ग्रहणं यथा "वसन्ताय कपिञ्जलानालभते" (2) इति। श्रोत्रस्यान्तःकरणत्वप्रसङ्गादयुक्तमिति चेत्, स्यादेतत्। बुद्धिमहङ्कारं चोक्त्वा तत आह—

---

[1] D तन्निवर्तकम्, sec.m. तन्निर्वर्तकम्. Chakravarti (133.17) reads न तन्निर्वर्त्यमिहा॰.

[2] Chakravarti (133.17) omits न, which comes after ॰भिप्रेतं.

[3] D धारणबुद्धीन्द्रियानि, sec.m. धारणं बुद्धीन्द्रियाणि

[4] D उच्यते इति, sec.m. उच्यते निवृत्तिरिति

[5] All the Mss read त्रयोदशं.

---

(1) Cf. पा॰ सू॰ 3.3.117

(2) Cf., for instance, वाज॰ सं॰ 24. 20

बुद्धीन्द्रियाणि कर्णत्वक्चक्षूरसननासिकाख्यानिति। (का॰ 26)

इति तस्माच्छ्रोत्रमन्तःकरणं प्रसज्यत इति। एतदनुपपन्नम्। कस्मात्? मनसः पृथगभिधानात्। अत एवेदमाचार्येणापेक्ष्य मनसोऽन्तःकरणत्वं पृथगुक्तम्—"तच्चेन्द्रियमुभयथा समाख्यातम्, अन्तस्त्रिकालविषयम्" (का॰ 27) इति। तस्मादुपपन्नमन्तःकरणं त्रिविधं बुद्ध्यादीति।

दशधा बाह्यम् (का॰ 33/2')

पञ्च बुद्धीन्द्रियाणि पञ्च कर्मेन्द्रियाणीत्येतद् बाह्यं दशप्रकार[1]माचार्यैराख्यायते।

आह, **दशधा बाह्य**मित्यस्यानर्थक्यम्, परिशेषबुद्धेः। अन्तःकरणं त्रिविधमित्युक्ते गम्यत एतत्परिशेषादेव **दशधा बाह्य**मिति। तस्मात्तद्ग्रहणमनर्थकमिति।

उच्यते—न, विषयार्थत्वात्। "त्रयस्य विषयाख्यम्" (का॰ 33) इत्येवं वक्ष्यामीत्याचार्य आरभते। अक्रियमाणे त्वस्मिन् किं तत् त्रयस्य विषयाख्यमिति न ज्ञायते।

आह, एवमपि विषयग्रहणात्सिद्धेर्बाह्यग्रहणमपार्थकमिति।

उच्यते—वक्तव्यं तावदिदमवश्यं विषयभावप्रतिपत्त्यर्थम्। तत्र शेषे वा यथान्यासं[2] वोच्यमाने न[3] कश्चिद्विशेषः। अथवा नेदं बाह्यसंज्ञाप्रतिपत्त्यर्थमारभ्यते[4]। किं तर्हि? नियमार्थम्। कथम्? **दशधा बाह्यं** शब्दादिविषयग्रहणभूतमेव त्रयस्यापि विषयाख्यं यथा स्यात्, मा भूदन्तःप्राणादिभूतम्। अथवा दशधैव बाह्यं भेदविषयं बाह्यमित्यर्थः। प्राणादिभूतस्य तु भेदो नास्तीत्यदोषः। तदेतत्—

त्रयस्य[5] विषयाख्यम्। (का॰ 33/2')

बुद्ध्यहङ्कारमनोलक्षणस्य हि त्रयस्योपात्तविषया बुद्धीन्द्रियकर्मेन्द्रियवृत्तयः सम्पर्काद्विषयरूपप्रत्यवभासनिमित्ततामुपगच्छन्त्यो **विषयाख्य**तां लभन्ते। तथा मनोऽहङ्कारावपि बुद्धेः। बुद्धिस्तु निश्चयरूपत्वात्करणान्तरनिरपेक्षा सर्वमर्थं[6] प्रवृत्तिं प्रति[7] निश्चयरूपेणाध्यवसितं[8] पुरुषायोपसंहरति। तत्र शब्दादिसन्निधाने वृत्तीनां ताद्रूप्यापत्तेस्तदपगमे च ताद्रूप्यापगमात् प्राप्यकारि—

---

[1] Pandeya (113) reads दशप्रकरम्.

[2] D यथा न्यासं (appearing as separate words)

[3] D वोच्यमानेन, sec.m. वोच्यमाने न

[4] Chakravarti (134.20) reads बाह्यं संज्ञा॰.

[5] D त्रियस्य

[6] D करणान्तरनिरपेक्षासर्वम्, sec.m. करणान्तरनिरपेक्षा सर्वम्

[7] All the Mss read प्रवृत्तौ (प्रति).

[8] All the Mss read रूपेणाध्यस्तं. I follow Wezler's (217.23) emendation.

साम्प्रतकालं बाह्यम् (का॰ 33/3)

उपात्तविषयेन्द्रियवृत्तिसन्निधानात्तु तदाकारसंस्काराधाननिमित्तस्मृतिप्रत्ययवशात्—

त्रिकालमाभ्यन्तरं करणम् ॥ का॰ 33/4 ॥

॥ 33 ॥

आह, प्राक् "शब्दादिषु श्रोत्रादीनामालोचनमात्रं वृत्तिः" (का॰ 28) इत्यविशेषेणोक्तम्। तत्र किं तथैव प्रतिपत्तव्यमथेन्द्रियाणां विषयविशेषोऽस्तीति? अथ चोक्तं "कार्यं च तस्य दशधा" (का॰ 32) विशेषलक्षणमविशेषलक्षणं च (इति)। तत्र केन करणेन कस्य विषयस्य ग्रहणमिति?

उच्यते—

बुद्धीन्द्रियाणि तेषां पञ्च विशेषाऽविशेषविषयाणि। (का॰ 34/1-2)

तेषां पूर्वोक्तानामिन्द्रियाणां यानि **बुद्धीन्द्रियाणि पञ्च** श्रोत्रादीनि तानि **विशेषाऽविशेषविषयाणि** प्रतिपत्तृभेदेन[1]। तत्र देवानां यानि इन्द्रियाणि तानि धर्मोत्कर्षाद्विशुद्धान्यविशेषानपि गृह्णन्ति {प्रागेव विशेषात्}। योगिनां च सम्प्राप्तविशेषाणाम्। अस्मदादीनां तु विशेषानेव, तमसा परिवृतत्वात्।

आह, किं कर्मेन्द्रियाणामपि प्रतिपत्तृभेदाद्[2] ग्रहणभेदो भवति?

नेत्युच्यते। किं तर्हि? सर्वेषामेव—

वाग्भवति शब्दविषया (का॰ 34/3)

वागिन्द्रियस्य वाय्वभिहतेषु वदनप्रदेशेषु ताल्वादिषु ध्वनेर्वर्णपदवाक्यश्लोकग्रन्थभावेन विकारापादनं सर्वप्राणिनामविशिष्टम्।

आह, अथेतराणि कर्मेन्द्रियाणि कथमिति?

उच्यते—

शेषाण्यपि[3] पञ्चविषयाणि[4] ॥ का॰ 34/4 ॥

पाणिपादपायूपस्थास्तु आदानविहरणोत्सर्गानन्दलक्षणैः कर्मभिः शब्दस्पर्शरसरूपगन्धसमुदायरूपा मूर्तीर्विकुर्वन्तीति[5]।

---

1. D प्रतिपत्त्यभेदेन, sec.m. प्रतिपत्तृभेदेन
2. D प्रतिपत्त्यभेदाद्, sec.m. प्रतिपत्तृभेदाद्
3. Chakravarti (135.5) reads शेषाणि तु.
4. D पञ्च विषयाणि (appearing as separate words)
5. Raghavan (15(2).6) proposes विषयीकुर्वन्ति.

आह, यदि पञ्चविषया[1]ण्येवापि शेषाणीति[2] नियमोऽभ्युपगम्यते, तेनैकैककरणेष्वादानादिक्रिया[3]ऽनुपपत्तिप्रसङ्ग इति।

उच्यते—न, नियमप्रतिषेधार्थत्वात्। स्वविषयनियमो बुद्धीन्द्रियवत्कर्मेन्द्रियाणामपि मा[4] विज्ञायीत्यतो नियमप्रतिषेधार्थमिदमारभ्यते। तदर्थमेव चापिशब्दमाचार्योऽधिजगे, सम्भावनाऽर्थमपि च, पञ्चविषया[5]ण्येतानि प्रागेव तु चतुस्त्रिविषयाणीति।

आह, कथमेतदवगम्यते विशेषाविशेषविषयाणीन्द्रियाणि, न पुनरसद्विषयाणिति?

उच्यते—विशेषाणामसत्त्वाऽसिद्धेः। प्रत्यक्षतस्तावद्विशेषा उपलभ्यन्ते। तस्मादेषामसत्त्वमशक्यं प्रतिज्ञातुम्। (साध्यमिति चेत्,) अथापि स्यात्। साध्यमेतत्प्रत्यक्षमेवैतदनवद्यम्, बाह्यवस्तुविष(यं) मृगतृष्णिकादिविज्ञानवत्प्रत्यक्षाभासं[6] (वेति)। एतच्चायुक्तम्। कस्मात्? विकल्पानुपपत्तेः। सर्वमभूतमभ्युपगन्तव्यम्, यतो नास्ति किञ्चिद् भूतार्थेन प्रत्यक्षं यदपेक्ष्येतरत् प्रत्यक्षाभासं[7] स्यात्। उक्तस्त्वयं विकल्पः। तस्मादयुक्तं ज्ञानमात्रमिदमिति।

किञ्चान्यत्। विपरीतदर्शनप्रसङ्गात्। मृगतृष्णिकास्वप्नविषयैरसद्भिः सतामसत्त्वमिच्छतस्तद्वदेव विपरीतदर्शनप्रसङ्गः। तथा हि गन्धर्वनगरादिषु कदाचित्तमेवार्थं गां पश्यति, कदाचिद्[8] गजं पश्यति, कदाचित्पताकाम्। स्वप्ने चैकमूर्तिपतितानां गोपुरुषाश्वरासभनदीवृक्षप्रभृतीनां दर्शनं जागरणे[9] विपर्ययेण दृष्टम्। तथा वातायनेन हस्तियूथप्रवेशने....[10] विच्छिन्नानां[11] चावयवानां पुनः सन्धानमाकाशगमनमनीश्वरस्यानिमित्तं राज्यलाभ इति, तदितरत्रापि स्यात्। न त्वस्ति। तस्मादयुक्तं मृगतृष्णिकास्वप्नादिवदसत्त्वं भावानाम्।

---

[1] D पञ्च विषयाण्

[2] All the Mss read एवाविशेषाणीति. I follow Wezler's emended reading (218.16), which in part agrees with Tripathi's (446) पञ्चविषयाण्येव शेषाणीति.

[3] All the Mss read तेनैकैकावरणेष्वनादिक्रिया°. I follow Chakravarti (135.18–19).

[4] P reads सा for मा.

[5] D पञ्च विषयाण्

[6] All the Mss read बाह्यवस्तुविषयमयमृगतृष्णिका°. I follow Wezler's emendation (218.27).

[7] D प्रत्यक्षावभासं

[8] P K कश्चिद् D कश्चिद्, sec.m. कदाचिद्

[9] All the Mss read स्मरणे. Chakravarti (136.4) reads स्मरणे (जागरणे?). I follow Chakravarti's tentative suggestion without any reservation, though स्मरणे is not wrong.

[10] Tripathi (448) proposes °यूथप्रवेशनं ... दृष्टम्.

[11] D ... विच्छिनानां, sec.m. ... सम्भवविच्छिनानां

अर्थक्रिया(1) च न स्यात्। यथा स्वप्ने[1] स्नातानुलिप्ताशितपीतवस्त्राच्छादितानामफलत्वं दृष्टम्, एवमिहापि स्यात्। शुक्रविसर्गवदिति चेत्। स्यादेतत्। यथा द्वयसमापत्तिपूर्वकः शुक्रविसर्गः, स च तदभावेऽपि स्वप्ने भवति, एवमितरत्स्यादिति। तदयुक्तम्, रागादिनिमित्तत्वात्। तथाहि जाग्रतोऽपि तद् द्वयसमापत्तिमन्तरेण भवति। तस्मान्मनोरञ्जननिमित्तं[2] तत्। प्रेतवदिति चेत्, स्याद् (एतत्।) इयं मम सद्बुद्धिः[3]। यथा प्रेतानामसद्भिः पूयनद्यादिभि[4]रर्थक्रिया, नरकपालैश्च बाधनम्, एवमत्रापि स्यादिति। तदयुक्तम्, असिद्धत्वात्। न ह्येतदसदिति सिद्धम्। किञ्च प्रत्यक्षेण चाप्रत्यक्षबाधनात्[5]। इह प्रत्यक्षं बलीय इत्यप्रत्यक्षस्य तेन प्रत्याख्यानमुपपद्यते। भवन्त[6]स्त्वप्रत्यक्षेण प्रत्यक्षं प्रत्याचक्षते। तस्मादयुक्तं नरकपालादिवदसतामर्थक्रियेति। स्वभावभेदात्तदसत्त्वमिति चेत्, स्यादेतत्। यदि परमार्थतो नरकपालाः स्युस्तेषामपि दुःखसम्बन्धः स्यात्, मूर्तिमत्त्वाविशेषात्। न तु तेषां बाधाऽस्ति[7]। तस्माद् भ्रान्तिरसाविति। एतदयुक्तम्। कस्मात्? कर्मशक्तिवैचित्र्यात्। प्रत्यक्षमेव तावत्कर्मनिमित्तो वाग्बुद्धिस्वभावाहारविहारशक्तिभेदभिन्नो विचित्रः संसार उपलभ्यते। स निपुणमवेक्षितुमशक्यः, गम्भीरत्वात्। किं पुनरप्रत्यक्षकर्मणां विपाकवैश्वरूप्यमतर्कगोचरमस्मदादिबुद्धयः परिच्छेत्स्यन्ति? तस्मान्मनोरथमात्रमेतत्। धर्माधर्मानुपपत्तिश्च स्यात्। यथा स्वप्ने ब्रह्महत्यासुरापानागम्यगमनादीनामफलत्वम्, एवमितरत्रापि स्यात्, असदविशेषात्। मिद्धोपघातात्तद्विशेष[8](2) इति चेन्न, अविशेषात्। असत्त्वे तुल्ये क्वचिदुपघातः क्वचिन्नेतीच्छामात्रमेतत्। एवं चेन्नासन्तः पृथिव्यादयः। न चेदसन्तो युक्तमुपदिष्टं बुद्धीन्द्रियाणि तेषां पञ्चविशेषाविशेषविषयाणीति ॥ 34 ॥

॥ इति युक्तिदीपिकायां[9] सप्तममाह्निकम्[10] ॥

---

1. D यथा स्वप्ने, sec.m. तथा हि
2. All the Mss read °मनोरञ्जनानिमित्तं.
3. Raghavan (15(2).6) suggests स्योदियमसद्बुद्धिः.
4. All the Mss read प्रयाणाद्यादिभिर्. I follow Chakravarti (136.13).
5. D चाप्रत्यक्षं बाधनाद्
6. All the Mss read भवतः. I follow Chakravarti (136.15).
7. Chakravarti (136.18) reads बाधोऽस्ति.
8. P सिद्धौपघातात् D सिद्धोपघातात्
9. P श्रीयुक्तिदीपिकायां
10. D deletes युक्तिदीपिकायां सप्तममाह्निकम्.

---

(1) Cf. देशादिनियमः सिद्धः स्वप्नवत्प्रेतवत्पुनः।
सन्तानानियमः सर्वैः पूयनद्यादिदर्शने ॥
स्वप्नोपघातवत् कृत्यक्रिया नरकवत्पुनः।
सर्वं नरकपालादिदर्शने तैश्च बाधने ॥ विंशतिका 3-4

(2) Cf. विंशतिका 18: मिद्धेनोपहतं चित्तं स्वप्ने तेनासमं फलम्।

अष्टममाह्निकम्

द्वारिद्वारभावमेषामिदानीं वक्ष्यामः। तत्र बाह्यं करणं द्वारम्, अन्तःकरणं द्वारीति।

आह, करणाऽविशेषादयुक्तम्। अन्तःकरणस्य हीन्द्रियाणां च करणत्वमविशिष्टम्। तत्र को हेतुरन्तःकरणं द्वारि, द्वाराणीन्द्रियाणीति[1]?

उच्यते—

सान्तःकरणा बुद्धिः सर्वं विषयमवगाहते यस्मात्।
तस्मात् त्रिविधं करणं द्वारि द्वाराणि शेषाणि ॥ का॰ 35 ॥

सहान्तःकरणेन वर्तते(1) या (सा) **साऽन्तःकरणा बुद्धिः**। अहङ्कारमनोभ्यां सहिता बुद्धिरित्यर्थः। अत्र चान्तःकरणग्रहणेनैव बुद्धेर्ग्रहणे सिद्धे भूयो बुद्धिग्रहणं प्राधान्यख्यापनार्थम्। भवति हि प्रधानस्य सामान्येऽन्तर्भूतस्यापि पृथगुपदेशः। तद्यथा—

जगाम तं वनोद्देशं व्यासः सह महर्षिभिः।

इति महर्षिग्रहणे व्यासोऽप्यन्तर्भूतः प्राधान्यात्पृथगुच्यते, एवं साऽन्तःकरणा बुद्धिः सर्वं विषयमवगाहते, विशिष्टानविशिष्टांश्च शब्दादीन्सन्निकृष्टविप्रकृष्टव्यवहितान्प्रमाणबलेन स्ववृत्ते विषयीकरोतीत्यर्थः। एतदुक्तं भवति—अनियतविषयो द्वारी, नियतविषयाणि द्वाराणि। तद्यथा प्रासादस्य पूर्वोत्तरदक्षिणपश्चिमानां (द्वाराणां) स्वदिङ्नियमो न पूर्वमुत्तरं दक्षिणं पश्चिमं वा कदाचिद् भवति, तथेतराण्यपि **द्वाराणि**[2]। (द्वारी त्वनियतः)[3] सर्वदिगवस्थितैर्द्वारैः प्रवर्तते[4]। एवमिहापि श्रोत्रादीनि स्वविषयनियतानि। साऽन्तःकरणा तु बुद्धिः **सर्वं विषयमवगाहते यस्मात् तस्मा**दनियतविषयत्वादुपपन्नमेतत्त्रिविधं **करणं द्वारि, द्वाराणि शेषाणीति**।

आह[5]—द्वारिद्वारभावानभिधानं सूत्रान्तरेण तत्सिद्धेः। "त्रयस्य विषयाख्यम्" (का॰ 33)

---

[1] D द्वारिद्वाराणीति, sec.m. द्वारिद्वाराणि इन्द्रियाणीति

[2] All the Mss read द्वारीणि.

[3] Wezler (221.20) supplies the reading द्वारी त्वनियतः in place of तत्रानियताः, which latter is the reading in all Mss. I follow Wezler.

[4] In conformity with his suggested reading (see fn. 3 above) Wezler (221.20–21) substitutes प्रवर्तते for प्रवर्तन्ते, which latter is the reading in all Mss. I follow Wezler.

[5] The portion आह ... किं तर्हि ते (257.19–258.12-13) is not included either in P or in K. It comes here from D where it seems to bear the stamp of a different hand, and is inserted between the pages numbered 256 and 257 (of that Ms). Among previous editors, only Wezler includes this portion in his edition (221.24–222.16).

(1) Cf. पा॰ सू॰ 2.2.28.

इत्युक्ते गमयत {इति} एतदन्तःकरणं द्वारि, द्वाराणीन्द्रियाणि (इति)। तस्मात्तद्वचनमनर्थकमिति।

उच्यते—न, हेत्वभिधानात्[1]। प्रतिज्ञामात्रं तत्र दर्शितम्, न तूक्तं को हेतुः (इति)। इह तु हेत्वभिधानम्। अतो न पुनरुक्तमेतत्।

आह—द्वाराणामनेकत्वाच्छास्त्रविरोधप्रसङ्गः। यद्धि बुद्ध्यहङ्कारमनसां सर्वेषां द्वारित्वमभ्युपगम्यते, तेन यच्छास्त्रं "एकमेव दर्शनं ख्यातिरेव दर्शनम्"(1) इत्यस्य विरोधः। किञ्च स्वातन्त्र्ये च सम्बन्धानुपपत्तिः। त्रयाणां हि द्वाराणां स्वातन्त्र्यमभ्युपगम्यते, स्वातन्त्र्ये च परस्परानपेक्षाणां सम्बन्धानुपपत्तिः। किञ्च समुच्चयाभावः। एकैकश्च स्वतन्त्रः स्वार्थमात्रं पुरुषायोपहरतीत्यभ्युपगच्छतो नास्ति सर्वग्रहणवृत्तिग्राहकमेकं करणम्। ततश्च दशानां दशष्वर्थेषु वृत्तयस्त्रयोदशानां त्रयोदश इति समुच्चयाभावः। पुरुषस्य तत्सामर्थ्या[2]ददोष इति चेन्न, अकर्तृत्वात्। न हि पुरुषः प्रत्ययं करोति दर्शितविषयत्वात्। यतः समुच्चयं कुर्यात् साक्षात्कारिणि वा तस्मिन् (क)रणानर्थक्यम्[3]। तस्मादयुक्तं त्रिविधं करणं द्वारीति ॥ 35 ॥

उच्यते—स्यादेतदेवं यदि सर्वेषां द्वारिणां स्वातन्त्र्येण पुरुषार्थोपहारसामर्थ्यं स्यात्। किं तर्हि। {ते[4]}

एते प्रदीपकल्पाः परस्परविलक्षणा गुणविशेषाः।
कृत्स्नं पुरुषस्यार्थं प्रकाश्य बुद्धौ[5] प्रयच्छन्ति ॥ का॰ 36 ॥

एत इत्यनेन त्रयमभिसम्बध्नाति श्रोत्रादीनामन्यतमं मनोऽहङ्कारश्च। **प्रदीपकल्पा** इत्यनेन प्रकाशसाम्यं करणपर्वण आचष्टे। यथा प्रदीपः प्रकाशकः, एवं करणमपि, तद्व्यापारेऽसति[6] विषयाविर्भावानुपपत्तेः। **परस्परविलक्षणा** इत्यनेन व्यस्तवृत्तिं पूर्वोक्तम् (का॰ 28) आकर्षति। तया ह्येषां वैलक्षण्यमनुमीयते, आलोचनसङ्कल्पाभिमानभेदात्। **गुणविशेषा** इत्यनेन सत्त्वादीनां पुरुषविज्ञान[7]मुद्दिश्य तद्भावेन परिणामं ख्यापयति। **कृत्स्नं पुरुषस्यार्थ**मिति विशेषाऽविशेषलक्षणं कार्यं आहार्यधार्यप्रकाश्यतया यथासम्भवं प्रकाश्य स्ववृत्त्यनुगुणं कृत्वा विषयत्वमापाद्येत्यर्थः। **बुद्धौ प्रयच्छन्ति** बुद्धावादधति। एतदुक्तं भवति—यदा श्रोत्रादीनामन्यतमं करणं शब्दादौ

---

1. D हेत्वनभिधानात्, sec. m. हेत्वभिधानात्
2. D not clear, sec.m. पुरुषस्य तत्सामर्थ्याद्
3. D कारणानर्थक्यं
4. After ते D writes and deletes प्रदीपकल्पः.
5. D प्रकाश बुद्धा
6. Pandeya (116) reads सति.
7. D reads पुरुषो विज्ञानं.

---

(1) Cf. यो॰ भा॰ 1.4

विषये प्रवर्तते, तदा तद्द्वारेणाहङ्कारो मनो वा तं विषयं स्वव्यापारेणानुभूय बुद्धावाधत्ते, तद्विषयतामापादयतीत्यर्थः। कदाचित्तु बुद्धिरेव बाह्यकरणसङ्कल्पाभिमानान्निश्चिनोति विषयम्, कदाचि[1]त्सङ्कल्पाभिमानान्निश्चिनोति विषयं तावत्, कदाचित्सङ्कल्पाभिमानगृहीतम्। सर्वथा त्वयं शास्त्रार्थः। येन वा (...(?) तेन करणेन[2] विषयमुपात्तं बुद्धिरध्यवस्यति। तया[3] चाध्यवसायरूपापन्नया चेतनाशक्तिरनुगृह्यते। न करणान्तरस्य पुरुषेण सम्बन्धोऽस्ति। ततश्च द्वारिणां बहुत्वाद्दर्शनविशेषस्वातन्त्र्यसमुच्चयान्तःकरणपुरुषकर्तृत्वदोषाणामप्रसङ्गः ॥ 36 ॥

आह, कः पुनरत्र हेतु[4]र्येन द्वारित्वाविशेषे[5] सत्यहङ्कारमनसी बुद्धौ विषयाधानं कुरुतो, न पुनरनयोः साक्षात्पुरुषेण सम्बन्ध इति?

उच्यते—

सर्वं प्रत्युपभोगं यस्मात् पुरुषस्य साधयति बुद्धिः। (का० 37/1-2)

अहङ्कारमनसोर्हि नास्ति निश्चयरूपता, सङ्कल्पाभिमानमात्ररूपत्वात्। अनिश्चितविषयया च करणवृत्त्या पुरुषस्य सम्बन्धोऽनर्थकः स्यात्, स्वयं वा निश्चेतुरस्य कर्तृत्वं स्यात्। ततश्चाऽऽमिश्रनिश्चयकरणत्वा[6]दयमप्यामिश्ररूपः स्यात्। सर्वं चैतदुक्तोत्तरं (का० 20) निश्चयरूपा हि बुद्धिः। अतस्तद्वृत्त्युपनिपाती विषयः सन्निधानमात्रात्पुरुषेण संचेतितो नास्यौदासीन्यं[7] बाधितुमुत्सहते, नो खल्वप्यानर्थक्यमनुषज्यते। एतदुक्तं **सर्वं प्रत्युपभोगं यस्मात्पुरुषस्य साधयति बुद्धिरिति**।

आह, एवमपि शब्दादिलक्षणो विषयः प्रकृतः, स च बुद्ध्या सर्वः प्रतिपाद्यते। तत्र विषयान्तरमप्यस्ति प्रधानपुरुषान्तरलक्षणम्। तथा चाहुः—"उपभोगस्य शब्दाद्युपलब्धिरादिः गुणपुरुषोपलब्धिरन्तः"(इति)। तस्मात्तत्प्रतिपत्त्यर्थं करणान्तरं वक्तव्यमिति।

उच्यते—न वक्तव्यम्। किं कारणम्? यस्मात्—

सैव च विशिनष्टि यतः[8] प्रधानपुरुषान्तरं सूक्ष्मम् ॥ का० 37/3-4 ॥

यतो यस्मात्कारणात् सा बुद्धिरेव हि काष्ठापन्नेन तमसाऽभिभूतत्वाद्धर्मादीनां सत्त्वधर्माणां

---

[1] D repeats the line कदाचित् संकल्पाभिमानान्निश्चिनोति विषयं, and parenthesizes कदाचित् संकल्पाभिमानान्निश्चिनोति .... विषयं तावत्, deleting the repeated line.

[2] In surmising that something seems to be missing before तेन करणेन, I agree with Wezler (222.34).

[3] D तथा, sec. m. तया Chakravarti (139.10) reads तथा as against P.

[4] P पुनरहेतुर् for पुनरत्र हेतुर्

[5] D द्वारित्वाविषेशे

[6] P K °निश्चयकारणत्वाद्

[7] P नास्यौदौसीन्यं

[8] All the Mss read पुनः. We follow the commentary for putting यतः instead.

प्रकृतिभूतान्विकारभूतान्परतन्त्रानुपकार्यानुपकारका[1]नचेतनान्संसर्गधर्मिण[2]श्च गुणानात्मत्वेनाध्यवस्य पुरुषायोपहरति। स च मिथ्याज्ञानाभ्यासवासनाऽनुरञ्जितं बुद्धिप्रत्ययमनुरुध्यमानो दर्शितविषयत्वात्तथैव प्रतिपद्यते। यदा तु धर्माद्यभ्यासात्तमोरूपापगमे सत्युत्तरोत्तराणां सत्त्वधर्माणामुत्कर्षस्तदा विनिवृत्तमिथ्याप्रत्यया वृत्तिः। न प्रकृतिविकारभूतः स्वतन्त्रोऽनुपकार्योऽनुपकारकश्चेतनोऽसंसर्गधर्मा च। ततो विपरीताश्च गुणा इति शुद्धाध्यवसायं करोति। पुरुषश्च परोपहृतवृत्तित्वात्तथैव प्रतिपद्यते। तदेतद्[3] गुणानां पुरुषस्य चान्तरं द्वयोरपि निश्चयस्वभावत्वादस्मात्पूर्वोक्तधर्मभेदेऽपि सति **सूक्ष्मं** गम्भीरं दुर्ज्ञेयम्। अतश्च सूक्ष्मं यद् बुद्धिमात्रमवलम्ब्य तदविशिष्टायाश्चेतनाशक्तेर्ग्राह्यग्राहकभावव्यवस्थाभेदेऽपि[4] सति चेतनाशक्तेरभावोऽभ्युपगतः। तथोपलक्षितशास्त्रैरप्यनेककालाभ्यस्ते गुणात्मभावग्राहपरिवेष्टितविखरैः प्रत्यक्षनिश्चितभेदाभ्य(स्त)मातृपितृदारभोजनादिभ्यो[5]ऽभिलाषो न निवर्तते। तस्मात्**प्रधानपुरुषान्तरं सूक्ष्मम**तर्कगम्यम्। अत्यन्तविशुद्धेर्भगवतः परमर्षेर्वि(ज्ञेयम्)[6] अन्येषां च सत्त्वाभ्यासोपजनितविमलज्ञाननिरस्तविद्यानां नानात्वधर्मभाजामिति। एवं बुद्धेः स(र्व)प्रत्युपभोग[7]साधनभावात् सर्वकरणेभ्यः प्र(ा)धान्यं[8] सिद्धम्॥ 37॥

{इति युक्तिदीपिकायां सप्ततिपद्धतौ सप्तममाह्निकं समाप्तमिति॥}

{श्रीगणेशाय नमः[9]॥}

व्याख्यातं करणपर्व। कार्यपर्वेदानीं वक्तव्यम्। तस्य च पुरस्तादुद्देशः कृतः—"कार्यं च तस्य दशधा" (का॰ 32) "पञ्च विशेषाः" (का॰ 25) इति। साम्प्रतं तु निर्देशं करिष्यामः।

आह, यद्येवं तस्मादिदमेव ताव[10]दुच्यतां के विशेषाः, केऽविशेषा इति।

---

1. Raghavan (15 (2).6) suggests the emendation (उप)कार्योपकारकान्.
2. P K संसर्गिधर्मि D संसर्गिधर्मि, sec. m. संसर्गधर्मि Raghavan's suggestion (15 (2).6) agrees with the reading (of the Mss) we have adopted.
3. D तदेद्, sec.m. तदेतद्
4. In both P and K there is, after ग्राह्यग्राहक, a blank space and a blank folio. The portion भावव्यवस्थाभेदेऽपि ... आह्निकं समाप्तमिति (260.7-12) comes here as written by a different hand in the bottom margin of D.
5. D °भेदाभ्यः ... मातृपितृ°
6. ज्ञेयम् is here inserted following Wezler (224.6), in whose edition alone is the present portion included. D reads, instead, विनायो (न्येषं).
7. D सर्गप्रत्युपभोग-
8. D प्रधान्यं
9. It comes after the portion भावव्यवस्था ... समाप्तमिति in D. This salutation marks the beginning of Āhnika 8 in D. P reads ओं श्री गणेशाय नमः ओम्. Here starts V. With ओं नमो नारायणाय in the centre of the top line, it (V) commences with °स्वस्ति प्रजाभ्यः श्री गणेशाय ओम्. See Introduction under description of V.
10. D एवं तावद्, sec.m. एतावद्

उच्यते—

तन्मात्राण्यविशेषाः (का॰ 38/1)

यानि **तन्मात्राणि** पञ्चाहङ्कारा[1]दुत्पद्यन्त इति प्रागपदिष्टम्[2] (का॰ 25), ते **खल्वविशेषाः** ।

कानि पुनस्तन्मात्राणीति?

उच्यते—शब्दतन्मात्रम्, स्पर्शतन्मात्रम्, रूपतन्मात्रम्, रसतन्मात्रम्, गन्धतन्मात्र[3]मिति ।

कथं पुनस्तन्मात्राणीति?

उच्यते—तुल्यजातीयविशेषानुपपत्तेः । अन्ये शब्दजात्यभेदेऽपि सति विशेषा उदात्तानुदात्तस्वरितानुनासिकादय(1)स्तत्र[4] न सन्ति । तस्माच्छब्दतन्मात्रम् । एवं स्पर्शतन्मात्रे मृदुकठिनादयः । एवं रूपतन्मात्रे शुक्लकृष्णादयः । एवं रसतन्मात्रे मधुराम्लादयः । एवं गन्धतन्मात्रे सुरभ्यादयः । तस्मात्तस्य तस्य[5] गुणस्य सामान्य[6]मेवात्र, न विशेष इति तन्मात्राण्येतेऽविशेषाः[7] ।

आह, अथ के पुनर्विशेषा इति?

उच्यते—यानि खलु—

तेभ्यो भूतानि पञ्च पञ्चभ्यः । (का॰ 38/2)

उत्पद्यन्ते ।

एते स्मृता विशेषाः (का॰ 38/3)

तत्र शब्दतन्मात्रादाकाशम्, स्पर्शतन्मात्राद्वायुः, रूपतन्मात्रात्तेजः, रसतन्मात्रादापः, गन्धतन्मात्रात् पृथिवी । **तेभ्यो** भूतानीत्येतावति वक्तव्ये **पञ्च पञ्चभ्य** इति ग्रहणं समसंख्याकत[8]स्तदुत्पत्तिज्ञापनार्थम् । तेनैकैकस्मात्तन्मात्रादेकैकस्य विशेषस्योत्पत्तिः सिद्धा । ततश्च यदन्येषामाचार्याणामभिप्रेतम्[9], एकलक्षणेभ्यस्तन्मात्रेभ्यः परस्परानुप्रवेशादेकोत्तरा विशेषाः[10] सृज्यन्त (इति) तत्प्रतिषिद्धं भवति । किन्तर्हि, अन्तरेणापि तन्मात्रानुप्रवेशमेकोत्तरेभ्यो भूतेभ्य एकोत्तराणां भूतविशेषाणामुत्पत्तिः[11] । तत्र शब्दगुणाच्छब्दतन्मात्रादाकाशमेकगुणम्, शब्दस्पर्शगुणा[12]त्स्पर्शतन्मात्राद्

---

[1] V पंचतन्यमात्राण्यहंकाराद् D adds पंच before तन्मात्राणि and deletes it.

[2] D अपदिष्टम्, sec.m. उपदिष्टम्

[3] V गन्धमात्रम्

[4] D तत्र, sec.m. तेऽत्र

[5] D encircles तस्य.

[6] D गुणस्य सामान्यम्, sec. m. गुणसामान्यम्

[7] Pandeya (118) and Tripathi (459) read तन्मात्रास्वेतेऽविशेषाः

[8] D सम संख्याकतस्, sec. m. समसंख्यातस्

[9] This is Vārṣagaṇya's view.

[10] D एकोत्तराविशेषाः

[11] D उत्पत्तेः, sec. m. उत्पत्तिः

[12] D शब्दस्पर्शगुणाच्छब्दतन्मात्रात्, sec. m. शब्दस्पर्शगुणात्

---

(1) Cf. पा॰ सू॰ 1. 2. 29-31, 1. 1. 8

द्विगुणो वायुः, शब्दस्पर्शरूपगुणाद्रूपतन्मात्रात्त्रिगुणं तेजः, शब्दस्पर्शरूपरसगुणाद्रसतन्मात्राच्चतुर्गुणा आपः, शब्दस्पर्शरूपरसगन्धगुणाद्[1] गन्धतन्मात्रात्पञ्चगुणा पृथिवी। अत्र च वायोः शीतः स्पर्शः, अपां च। तेजस उष्णः। अनुष्णाशीतः पृथिव्याः। रूपं च शुक्लं भास्वरं च तेजसो[2]ऽपां च। कृष्णं पृथिव्याः। रसो मधुरोऽपाम्, साधारणः पृथिव्याः। गन्धस्तु पार्थिव एव। तदवयवानुप्रवेशाद्[3] भूतान्तरेषूपलभ्यत इत्येते पृथिव्यादीनां धर्माः। अन्ये च परस्परानुग्राहकाः। के पुनस्त इत्याह—

आकारो गौरवं रौक्ष्यं वरणं स्थैर्यमेव च ।
स्थितिभेदः[4] क्षमा[5] कृष्णच्छाया[6] सर्वोपभोग्यता[7](1)॥
इति ते[8] पार्थिवा धर्मास्तद्विशिष्टास्तथा परे ।
जलाग्निपवनाकाशव्यापका[9]स्तान्निबोधत(2) ॥
स्नेहः सौक्ष्म्यं प्रभा[10] शौक्ल्यं मार्दवं गौरवं च यत् ।
शैत्यं रक्षा पवित्रत्वं सन्तान[11]श्चौदका गुणाः(3) ॥
ऊर्ध्वगं[12] पावकं दग्धृ पाचकं लघु भास्वरम् ।
प्रध्वंस्योजस्विता[13] ज्योतिः पूर्वाभ्यां सविलक्षणम्[14] ॥
तिर्यक्पातः[15] पवित्रत्वमाक्षेपो नोदनं बलम् ।
रौक्ष्यमच्छायता शैत्यं वायोर्धर्माः पृथग्विधाः(4) ॥

---

[1] V °रसरुप°
[2] V ज्योतिषः D तेजसः, sec. m. ज्योतिषः
[3] D तदवयवानुप्रवेशाद्, sec. m. तदवयवान्तरानुप्रवेशाद्
[4] V स्थितिर्भेदाः
[5] V क्षपा
[6] D क्षमाकृष्णच्छाया, sec.m. क्षमारौक्ष्यं च्छाया
[7] P K सर्वोपभोग्यते
[8] P ति इति ते D इत्येते
[9] D व्यापकांस्
[10] V प्रभाः
[11] V स सन्तानश्
[12] All the Mss read ऊर्ध्वभाक्. I follow Pandeya (118).
[13] Chakravarti (141.22) reads °स्योजस्वि च for °स्योजस्विता.
[14] KVD read सुविलक्षणम्. I follow Chakravarti (141.22).
[15] Pandeya (118) reads तिर्यग्गतिः.

---

(1) See त॰ वैशा॰ and यो॰ वा॰ under यो॰ सू॰ 3.44
(2) See त॰ वैशा॰ and यो॰ वा॰ under यो॰ सू॰ 3.44
(3) See त॰ वैशा॰ and यो॰ वा॰ under यो॰ सू॰ 3.44
(4) See त॰ वैशा॰ and यो॰ वा॰ under यो॰ सू॰ 3.44

सर्वतोगतिरव्यूहोऽविष्कम्भ[1]श्चेति ते त्रयः ।
आकाशधर्मा[2] विज्ञेयाः पूर्वधर्मविरोधिनः(1) ॥
संहतानां तु यत्कार्यं सामान्यं ते गवादयः ।
इतरेतरधर्मेभ्यो विशेषान्नात्र संशयः(2) ॥

तत्राकारादिभिर्धर्मैः पृथिव्या लोकस्य चोप(कारः)क्रियते[3] भूतान्तराणां च । तत्राकारात्तावत् गवादीनां घटादीनां चाकारनिर्वृत्तिः[4], गौरवादेषामवस्थानम् । रौक्ष्यादपां संग्रहो वैशद्यं[5] च भूतानाम् । वरणादनभिप्रेतानां छादनम् । स्थैर्याद् वृत्तिः प्रजानां भूतान्तराणां[6] च । स्थितेर्मात्रादिसन्निधानाद्यनुग्रहः । भेदाद् घटादिनिष्पत्तिर्व्यूहश्चावयवानाम् । क्षान्तेरुपभोगयोग्यता[7] । कृष्णच्छायत्वाद्रात्रिसम्पच्छायाकार्यप्रसिद्धिश्च । सर्वोपभोग्यत्वात्सर्वभूतानुग्रहः ।

एवं स्नेहादिभि[8]र्लोकस्योपकारः क्रियते भूतान्तराणां च । स्नेहाद्रूपसम्पद्वायुप्रतीकारोऽग्निशमनं[9] संग्रहश्च पृथिव्याः । सौक्ष्म्यादनुप्रवेशः । शौक्ल्याच्चन्द्रादिनिर्वृत्तिः । मार्दवात्स्नानावगाहनमेकक्रिया[10] कठिनानां चावनामनम्[11]। गौरवात्सन्तानाच्च भूतानुग्रहार्थं स्रोतस्त्वम् । शैत्यादुष्ण[12]प्रतीकारः । रक्षातः प्रजासु घोरशमनम् । पवित्रत्वाद्धर्मोपचयः शौचविधिरलक्ष्योपघातश्च[13]। सन्तानाद् द्रव्यसंघातः ।

तथोर्ध्वगत्यादिभिर्धर्ममात्रैस्तेजसा[14] लोकस्य[15] चोप(कारः) क्रियते[16] भूतान्तराणां च। ऊर्ध्वगतेः पाकप्रकाशसिद्धिः[17]। पावकत्वाद् द्रव्यशौचं च । दाहकत्वात्क्षारोत्पत्तिः, शीतप्रतीकारो नभसश्चोष्णत्वं शब्दनिष्पत्त्यर्थम् । पाचकत्वात्स्वेद्यस्वेदन[18]मन्नपक्तिः[19] पृथिव्यवयवानां च[20] क्रियायोग्यता,

---

1. All the Mss read °रव्यूहो विष्कम्भश्. I follow Raghavan (15(2).6).
2. V आकारधर्म
3. All the Mss read चोपक्रियते. Our emendation is meant to ensure consistency of usage. Cf. the use of उपकारः below.
4. P K D °निवृत्तिः
5. V वैषद्यं
6. V भूतान्तराणी
7. D उपभोगयोग्यता, sec.m. उपभोग्यता
8. D स्नेहादिभिर्, sec.m. स्नेहादिरखिः Tripathi (463) omits the sentence स्नेहादिभिः ... भूतान्तराणां च.
9. All the Mss read ऽग्निगमनं. I follow Chakravarti (142.6).
10. D स्नानावगाहनसेकक्रिया, sec.m. पानावगाहनसेकक्रिया
11. Chakravarti (142.8) reads चावनमनम्.
12. Chakravarti (142.8) reads उष्म°.
13. P K V अलक्ष्योपघातश् D अलक्ष्योपघातश्, sec.m. अलक्ष्म्युपघातश् Chakravarti (142.9) reads अलक्ष्येऽपि घातश्च. Raghavan (15 (2).6) suggests अलक्ष्येऽभिधातश्च.
14. P K तेजसां D तेजसां, sec.m. तेजसः
15. V लोकेस्य
16. All the Mss read चोपक्रियते.
17. V पाकप्रतीकारसिद्धिः D पाकप्रकाशसिद्धिः, sec.m. पाकप्रतीकारसिद्धिः
18. P K V पाचकत्वाद्वेद्यस्वेदनम् D पाचकत्वाद्वेद्यस्वेदनम्, sec.m. पाचकत्वात् स्वेद्यस्वेदनम्
19. D अन्नपङ्क्तिः, sec.m. अन्नपक्तिः
20. P K omit च. D V add च.

---

(1) See त॰ वैशा॰ and यो॰ वा॰ under यो॰ सू॰ 3.44, and न्या॰ सू॰ 4.2.22

(2) See त॰ वैशा॰ and यो॰ वा॰ under यो॰ सू॰ 3.44

तथा बाह्यान्तरपरिणामो रसलोहितमांसस्नाय्वस्थिमज्जाशुक्राणाम्। लाघवाद् दाह्यातिक्रमः। भास्वरत्वाद् द्रव्यान्तरप्रकाशनम्। प्रध्वंसित्वाद् दग्धपक्वानामुपभोगः। तैजसः[1] प्रजापालनम्।

तथा तिर्यक्पातादिभिर्धर्मैर्वायुना लोकस्य चोपकारः क्रियते भूतान्तराणां च। तिर्यक्पाताद् दृष्टिविक्षेपो गन्धसंवहनं[2] च। पवित्रत्वात्पूतिद्रव्यपवनम्[3]। आक्षेपनोदनाभ्या[4]मुत्कर्षः प्रथनं घर्माम्भसः[5]। व्यूहश्च शरीरे रसादीनां धातूनां च। अग्नेश्चोपध्मानमभिघातश्चाकाशस्य। बलात्समीकरणं सर्वेषाम्। रौक्ष्याद्विशोषणम्[6]। अच्छायत्वा[7]दहोरात्रप्रसिद्धिः। शैत्यादुष्णप्रतीकारः। तथा सर्वतोगत्यादिभिर्धर्मैर्नभसा लोकस्योपकारः क्रियते भूतान्तराणां च। सर्वतोगतेः[8] समन्तात्तुल्यदेशश्रवणानामेकश्रुतित्वम्(1)। अव्यूह(ा)विष्कम्भाभ्यां[9] सर्वेषामवकाशतादानमित्युक्ताः पृथिव्यादयः। एते विशेषा इत्युच्यन्त इति।

आह, कथं पुनरेते विशेषा इति।

उच्यते[10]—यस्मात्

शान्ता घोराश्च मूढाश्च ॥ का॰ 38/4 ॥

तत्र **शान्तास्तावत्** स्वसंस्कारविशेषयोगात्तत्सन्निधौ प्रसादादिधर्मोत्पत्तेः[11]। **घोरास्तु** रोषादि[12]धर्मनिमित्तत्वात्। **मूढाश्च** वरणादिधर्महेतुत्वात्। तन्मात्राणि पुनरशान्तघोरमूढानि अतोऽविशेषा इत्युच्यन्ते[13]। तदेते यथा व्याख्याता अविशेषा विशेषाः पुरुषार्थसिद्ध्यर्थं बहुधा व्यवतिष्ठन्ते। कस्मात्? न ह्येतेषामेकधाऽवस्थाने पुरुषार्थः सिद्ध्यतीति ॥ 38 ॥

---

1. P K तेजसः V तेजसः D तेजसः, sec.m. ओजसः ओजसः is an equally plausible reading.
2. D गन्धसंवहनं, sec.m गन्धसंवाहनं
3. Chakravarti (142.17) reads °पावनम्.
4. P पवनसाक्षेपनोदोनाभ्याम्
5. P K V धर्माम्भसः D धर्मा°, sec. m. वर्षा° I follow Chakravarti (142.17).
6. P K विशेषणम् D विशेषणम्, sec.m. विशोषणम्
7. D अच्छायत्वाद्, sec.m. उच्छायत्वाद्
8. D सर्वतो गतेः Chakravarti (142.20) reads सर्वत्र गतेः.
9. P K अव्यूहविष्कम्भाभ्यां D अव्यूहविष्कम्भाभ्यां, sec.m. व्यूहविष्क° Consistency requires the emendation made. Cf. 263.1, śloka 6 (of this Āhnika).
10. All the Mss read इत्युच्यन्ते.
11. All the Mss read प्रासादादि°. I follow Chakravarti (142.24).
12. All the Mss read शेषादिधर्म. Wezler (227.21) reads भीषादि°. I follow Tripathi's emendation (465).
13. V इत्यभिधीयन्ते

---

(1) Cf. यो॰ भा॰ 3.41

आह, अतिसामान्योक्तमिदमित्यतो न प्रतिपद्यामहे । तस्माद्वक्तव्यं कथं[1] विशेषाणामवस्थानमिति? उच्यते—

सूक्ष्मा मातापितृजाः सह प्रभूतैस्त्रिधा विशेषाः स्युः । (का॰ 39/1-2)

तत्र **सूक्ष्मा** नाम चेष्टाश्रितं[2] प्राणाष्टकं[3] संसरति[4]। **मातापितृजा**[5]स्तु द्विविधाः। जरायुजा अण्डजाश्च । तेषां कोशोपहृताः। कोशाः लोमरुधिरमांसास्थिस्नायुशुक्रलक्षणाः[6]। तत्र लोमरुधिरमांसानां मातृतः सम्भवः । अस्थिस्नायुशुक्राणां पितृतः । तत्रैवाशितपीताध्यासादष्टौ[7] कोशानपरे व्याचक्षते । कथं पुनरेषां कोशत्वम्? आवेष्टनसामर्थ्यात् । यथा कोशकारः कोशेनावेष्टितोऽस्वतन्त्रः, एवं सूक्ष्मशरीरं सप्राणमेतैरावेष्टितमस्वतन्त्रं तत्त[8]त्कर्मोपचिनोति । **प्रभूता**[9]स्तूद्भिज्जाः स्वेदजाश्च । तदेतै**स्त्रिविधैर्विशेषै**र्दैवमानवतैर्यग्योनलक्षणस्त्रिविधो भूतसर्ग आरभ्यते । तत्र देवानां चतुर्विधशरीरं प्रधानानुग्रहात्, यथा परमर्षेर्विरिञ्चस्य च[10]। तत्सिद्धिभ्यो यथा ब्रह्मणः पुत्राणां तत्पुत्रपुत्राणां[11] च । मातापितृतो यथाऽदितेः[12] कश्यपस्य च पुत्राणाम् । केवलाद्वा यथा पितृतो मित्रावरुणाभ्यां वसिष्ठस्य । मनुष्याणां[13] तु जरायुजम् । धर्मशक्तिविशेषात्तु कस्यचिदन्यथाऽपि भवति, यथा द्रोणकृपकृपीधृष्टद्युम्नादीनाम् । तिर्यग्योनीना[14]मपि चतुर्विधम् ।

जरायुजं गवादीनामण्डजं चैव पक्षिणाम् ।
तृणादेश्चोद्भिज्जं[15] क्षुद्रजन्तूनां स्वेदजं स्मृतम् ॥

एवं त्रिविधा विशेषा व्याख्याताः । तत्र केचिन्नियताः केचिदनियता इति ।

---

1. D कथं, sec.m. कतिधा
2. V येष्वाश्रितं D चेष्टाष्टकं, sec.m. चेष्टाश्रिकं (on the left margin) This latter is again corrected into चेष्टाथे(र्थे?)षु आश्रितं (on the right margin).
3. D sec. m. प्राणाष्टकं
4. D sec. m. संहरति
5. P K मातृपितृजा V D मातापितृजास्
6. Pandeya (120) reads °लक्षणः.
7. V अत्रैवा° D तत्रैवाशितपीता°, sec. m. तत्रैवासितपीता° Chakravarti (143.8) reads °पीताभ्यां सहाष्टौ.
8. P तत्तूत् for तत्तत्
9. V दैवसामानुषतैर्यग्योनिलक्षणस् D प्रवमानवतैर्यग्येनो लक्षणस्, sec.m. प्रभूतास्तूद्भिज्जाः स्वेदाश्च तदेतैस्त्रिविधैर्विशेषैर्दैवमानवतैर्यग्योनलक्षणस् Chakravarti (143.11-12) reads °तैर्यग्योनि°.
10. D विरञ्चस्य, sec.m. विरञ्चस्य च
11. Chakravarti (143.13) reads तत् पुत्राणां.
12. P repeats यथा ब्राह्मणः पुत्राणां तत्पुत्राणां in place of यथाऽदितेः.
13. K मानुष्याणां, sec.m.मनुष्याणां V मानुष्याणां
14. V तैर्यग्योनीनाम्
15. V चोद्भिजं

आह—के पुनरत्र नियताः, के वाऽनियता इति?

उच्यते—

सूक्ष्मास्तेषां नियता मातापितृजा निवर्तन्ते ॥ का॰ 39/3-4॥

सूक्ष्मा आसर्गप्रलयान्नित्याः। **मातापितृजा निवर्तन्ते**। **सह प्रभूतैरिति** वर्तते[1]। केचित्तु प्रभूतग्रहणेन बाह्यानामेव विशेषाणां ग्रहणमिच्छन्ति। तेषामुद्भिज्जस्वेदजयो[2]रग्रहणम्। तस्मादुभयथा प्रभूता इत्येतदनवद्यम्।

आह, सूक्ष्मानभिधानम[3]प्रसिद्धत्वात्। मातापितृजाश्च प्रभूताश्च[4] प्रसिद्धा इत्यतो युक्त एषां परिग्रहः। सूक्ष्मास्त्वप्रसिद्धाः[5]। तस्माद्वक्तव्यं कथमेषामुत्पत्तिरस्तित्वं वेति?

उच्यते—(... (?)) पूर्वसर्गे प्रकृतेरुत्पन्नानां प्राणिनां सत्त्वधर्मोत्कर्षादन्तरेण द्वयसमापत्तिं मनसैवापत्यमन्यद्वा यथेप्सितं प्रादुर्बभूव। तदेतदद्यापि चानुवर्तते[6]—यत्कच्छपिका[7] निरूपितेनाण्डधारणं[8] करोति। प्रियं खल्वपि चक्षुषा निरीक्ष्य कृतार्थमात्मानं मन्यते[9]। तस्यामपि क्षीणायां वाक्सिद्धि[10]र्बभूव। अभिभाष्य[11] प्राणिनो यदिच्छन्ति तदापादयन्ति। तदद्याप्यनुवर्तते—यच्छङ्खी विरुतेनापत्यं[12] बिभर्ति। प्रियं खल्वपि सम्भाष्य महतीं प्रीतिमनुभवति[13]। तस्या[14]मुपक्षीणायां हस्तसिद्धिर्बभूव। संस्पृश्य पाणिमीप्सितमर्थमुपपादयन्ति। तदेतदद्याप्यनुवर्तते—यत्प्रियं चिरादालोक्य पाणौ संस्पृश्य प्रीतिर्भवति[15]। तस्या[16]मुपक्षीणायामाश्लेषसिद्धि[17]र्बभूव। आलिङ्गनेन[18] प्राणिन ईप्सितं लभन्ते। तदेतदद्याप्यनुवर्तते यत्प्रियमालिङ्ग्य निर्वृति[19]र्भवति। तस्यामुपक्षीणायां द्वन्द्वसिद्धिरारब्धा। स्त्रीपुंसौ संघृष्यापत्यमुत्पादयेतां[20] ममेदं ममेदमिति च परिग्रहाः प्रवृत्ताः। एतस्मिन्नेवावसरे[21] संसारो वर्ण्यते।

---

[1] D वर्तन्ते

[2] V उद्भिजस्वेदजयोर्

[3] P K V सूक्ष्माभिधानम् D सूक्ष्माभिधानम्, sec.m. सूक्ष्मानभिधानम्

[4] D adds प्रभूताश्च in the right margin.

[5] D अप्रतिसिद्धाः for अप्रसिद्धाः

[6] D अप्यनुवर्तते

[7] Chakravarti (143.28) reads यत्तु (क)-च्छपिका.

[8] V कच्छपिकानिरीक्षितेना॰ D कच्छपिका निरूपितेना॰, sec. m. कच्छपिकानिरीक्षितेना॰ Chakravarti (144.1) reads ॰निरीक्षितेना॰.

[9] V मान्यन्ते

[10] D वावक्सिद्धिर् (?), sec. m. वाक्सिद्धिर्

[11] D अभिभाष्य, sec.m. अभिलुष्य

[12] K V विकृतेना॰ D विकृतेना॰, sec.m. विततेना॰

[13] D महती प्रीतिमनुभवति, sec.m. महती प्रीतिर्भवति

[14] P K V अस्यां D अस्यां, sec.m. तस्यां

[15] D भवति, sec. m. भवतीति After भवति D repeates and deletes अस्यामुपक्षीणायां हस्तसिद्धिर्बभूव ... पाणौ संस्पृश्य प्रीतिर्भवति.

[16] P K V अस्यां D अस्यां, sec.m. तस्यां

[17] D आश्लेषसिद्धिर्, sec. m. एवेशबुद्धिर्

[18] D अलिङ्गनेन

[19] D निर्वृतिर्, sec.m. निर्वृतो

[20] D उत्पायेता, sec.m. उत्पादयेत

[21] D अवसरे for एतस्मिन्नेवावसरे

तत्र चाचार्याणां विप्रतिपत्तिः। पञ्चाधिकरणस्य तावद्वैवर्तं शरीरं मातापितृसंसर्गकाले करणाविष्टं[1] शुक्रशोणितमनुप्रविशति। तदनुप्रवेशाच्च[2] कललादिभावेन विवर्धते। व्यूढावयवं[3] तूपलब्धप्रत्ययं मातुरुदरान्निस्सृत्य यौ धर्माधर्मौ षट्सिद्ध्युपभोगकाले कृतौ तद्वशादवतिष्ठते यावत्तत्क्षयाच्छरीरपातः। तत्र[4] यदि धर्मसंस्कृतं करणं ततो द्युदेशं[5] सूक्ष्मशरीरेण प्राप्यते, तद्विपर्ययात्तु यातनास्थानं तिर्यग्योनिं वा, मिश्रीभावेन मानुष्यम्। एवमातिवाहिकं सूक्ष्मशरीरमिन्द्रियाणां धारणप्रापणसमर्थं नित्यं बाह्येनाऽपायिना परिवेष्ट्यते परित्यज्यते च।

पतञ्जलेस्तु[6] सूक्ष्मशरीरं (षट्सिद्धिक्षये)[7] पूर्वमिन्द्रियाणि बीजदेशं नयति, तत्र तत्कृताशयवशात् द्युदेशं यातनास्थानं वा करणानि {वा}[8] प्रापय्य निवर्तते। तत्र चैव[9]युक्ताशयस्य कर्मवशादन्यदुत्पद्यते, यदिन्द्रियाणि बीजदेशं नयति तदपि निवर्तते। शरीरपाते चान्यदुत्पद्यते। एवमनेकानि शरीराणि।

विन्ध्यवासिनस्तु विभुत्वादिन्द्रियाणां बीजदेशे वृत्त्या जन्म, तत्त्यागो मरणम्। तस्मान्नास्ति सूक्ष्मशरीरम्(1)। तस्मान्निर्विशेषः संसार इति पक्षः। एषा सूक्ष्मशरीरोत्पत्तिः[10] ॥ 39 ॥

आह, एवमनेकनिश्चयेष्वाचार्येषु भवतः का प्रतिपत्तिरिति?

उच्यते—यत्तावत्पतञ्जलि[11]राह "सूक्ष्मशरीरं विनिवर्तते पुनश्चान्यदुत्पद्यते", तत् "सूक्ष्मास्तेषां नियताः" (का॰ 39) इति वचनादस्माभिर्नाभ्युपगम्यते। तस्मात्—

पूर्वोत्पन्न[12]मसक्तं नियतं महदादिसूक्ष्मपर्यन्तम्।
संसरति निरुपभोगं भावैरधिवासितं लिङ्गम् ॥ का॰ 40 ॥

तत्र **पूर्वोत्पन्न**मित्यनेन महदादेः सूक्ष्मपर्यन्तस्य लिङ्गस्या[13]सर्गप्रलयान्नित्यत्वमाह। **असक्त**मित्यनेन गूढस्थिरबीजानुप्रवेशमाचष्टे। न हि लिङ्गं क्वचिद्व्याहन्यते, किं तर्हि लिक्षादिबीजमप्याविशति, बदरगोलमपि[14] भित्त्वा प्रविशति। **नियत**मित्यनेन प्रतिपुरुषव्यवस्थां[15] प्रतिजानाति। साधारणो

---

1. D करणाविष्टं, sec.m. करणानुप्रविष्टं
2. D तदनुप्रवेशाच्च, sec. m. तदावेशश्च
3. D व्यूढावयवं, sec. m. व्यूढावयवा
4. V तव D तव, sec. m. तत्र
5. D ततो द्युदेशं, sec. m. ततोऽन्यद्देशं
6. All the Mss read पातञ्जलेस्तु. Chakravarti (144.16) reads पातञ्जले तु.
7. All the Mss read यत्सिद्धिकाले. I follow Wezler (230.1). Cf. above.
8. In deleting वा, I follow Wezler (230.2).
9. P चैवं (?)
10. PKV सूक्ष्यशरीरस्योत्पत्तिः
11. V पाञ्जलिर्
12. Tripathi (472) reads पूर्वोक्तम् instead of पूर्वोत्पन्नम्.
13. D लिङ्गस्या, sec. m. लिङ्गस्य
14. D बदरगलोलम्, sec.m. बदरगोलकम्
15. D प्रतिपुरुषस्य व्यवस्थां

---

(1) Cf. श्लो॰ वा॰, 'आत्मवाद' 62, where Vindhyavāsin's view on सूक्ष्मशरीर is explicitly referred to : अन्तराभवदेहस्तु निषिद्धो विन्ध्यवासिना.

हि महान्प्रकृतित्वादिति वार्षगणानां पक्षः। **महदादी**त्यनेन प्राणाष्टकं परिगृह्णाति पूर्वात्मानः[1] प्राणाद्याश्च पञ्च वायव इति। **सूक्ष्मपर्यन्त**मिति तत्त्वान्तरप्रतिषेध[2]माह, एतावदेव नातोऽन्यदिति। **संसरती**ति गतिमाचष्टे, ततश्चाविभुत्वाद् बीजावेशत्यागौ प्र(त्या)ख्यातौ[3] भवतः। **निरुपभोग**मिति शरीरान्तरस्यावकाशं करोति। सूक्ष्मशरीरस्य ह्युपभोगसामर्थ्ये[4]ऽभ्युपगम्यमाने शरीरान्तरस्य निरवकाशत्वादनुत्पत्तिप्रसङ्गः स्यात्। **भावैरधिवासित**मित्यनेन भावाष्टकपरिग्रहं द्योतयति। बुद्धिरूपैरिह धर्मादिभिरधिवासितम्। तत्सामर्थ्यात्सर्वत्राप्रतिहतं प्राणाष्टकं सूक्ष्मशरीरेऽवस्थानगमनमात्रफले व्यवस्थितम्। द्युतिर्यक्प्रेतेषु **संसरती**[5]ति तेनैव चार्थसिद्धौ[6] शरीरान्तरपरिकल्पनानर्थक्यम्। अतो न बहूनि शरीराणि ॥ 40 ॥

यत्पुनरेतदुक्तं (213.9-10, 267.11) विभुत्वादिन्द्रियाणां स्वात्मन्यवस्थाने[7] वृत्तिलाभो वृत्तिनिरोधश्च संसार इति, अयुक्तमेतत्। कस्मात्? विभुत्वासिद्धेः। न हि विभुत्वमिन्द्रियाणां कश्चिदभ्युपगच्छति। किं कारणम्? सततोपलब्धिप्रसङ्गाद् युगपदुपलब्धिप्रसङ्गाच्च। करणानां[8] हि विभुत्वे सततोपलब्धिप्रसङ्गो विषयाणां प्रतिबन्धाभावात्। {प्रसज्येत।}[9] प्राप्त्यविशेषाच्च सर्वविशेषाणां युगपदुपलब्धिप्रसङ्गः, व्यवहितविषयग्रहणं च। सर्वत्र सन्निधानात्सन्निकृष्टविप्रकृष्टयोः प्रत्यक्षानुमानागमानां चाविशेषः प्रसज्येत[10]। वृत्तिविशेषात्तद्विशेष इति चेन्न, हेत्वभावात्। विभूनामिहास्ति वृत्तिविशेष इत्यत्र हेतुरनुक्तः। तस्मान्न करणानां[11] विभुत्वमुपपद्यते। तस्मात्—

चित्रं यथाऽऽश्रयमृते स्थाण्वादिभ्यो विना यथा च्छाया[12] ।
तद्वद्विना विशेषैर्न तिष्ठति निराश्रयं लिङ्गम् ॥ का० 41 ॥

यथा हि **चित्रस्य**[13] कुड्यमृतेऽवस्थानं नास्ति **स्थाणुपुरुषादिभ्यो** वा **विना च्छायायाः**, **तद्वद्विना**[14] **विशेषैर्न तिष्ठति निराश्रयं लिङ्गम्**। तस्मादुपपन्नमेतत् सविशेषः संसारः (इति)।

---

1. Chakravarti (145.10) reads पूर्वात्मना:. Wezler (230. 20) suggests the emendation पूर्वाङ्मनः in place of पूर्वात्मानः.
2. D तत्त्वान्तरं प्रतिषेधं
3. All the Mss read प्रख्यातौ. I follow Wezler (230.23).
4. Chakravarti (145.17) reads °सामर्थे.
5. V om. इति
6. Chakravarti (145.17) reads °सिद्धो. Raghavan's correction (15 (2).6) agrees with the reading (of the Mss) adopted by us.
7. All the Mss read स्वात्मन्यवस्थानं.
8. P K V कार्यकरणपुरुषाणां D sec. m. कार्यकारणपुरुषाणां I follow Wezler (231.3).
9. In deleting प्रसज्येत I agree with Wezler (231.4).
10. P V प्रसज्यते
11. D तस्मिन्नकरणानां, sec. m. तस्मान्न करणानां
12. D यथाच्छाया, sec. m. यथा च्छाया Chakravarti (145.27) and Wezler (231.9) read (यथा)छाया.
13. V om. यथा हि चित्रस्य
14. V तद्विना for तद्वद्विना

आह, यदि सविशेषः संसारः, बीजदेशगमने[1] शरीरमुपलभेत। न त्वेवम्। तस्मादयुक्तमेतदिति[2]।

उच्यते—न, विशेषितत्वात्। सूक्ष्मं तत्छरीरमिति[3] विशेषितम्। ततो नास्याहेतुकमग्रहणमिति।

आह, सूक्ष्मशरीरयोगात्पूर्वेश्वरत्वप्रसङ्गः[4]। तस्मादयुक्तं तन्निमित्तमस्याग्रहणमिति।

उच्यते—न, अनेकान्तात्। तद्यथा क्षुद्रजन्तूनां सूक्ष्मशरीरं लघिमा {च}[5], न चैषामीश्वरत्वम्, एवं सर्वप्राणिनां स्यात्। (...) अथ मतम्। अगृह्यमाणेन सम्बन्धात् स्थूलस्यापि शरीरस्याग्रहणं प्रेताञ्जनसिद्धमाल्यादिवत्[6](इति)। तदप्यनुपपन्नम्, अनेकान्तात्। तद्यथा करणैरगृह्यमाणैः शरीरस्य सम्बन्धः, न चाग्रहणम्, पिशाचादिभिर्वा, तथैतदपि[7] स्यात्। किञ्च, अन्तःकरणानुविधाने चैश्वर्याभिमानात्। यस्य चाध्यवसायमनुविदधत्यणिमादीनि तस्यैश्वर्यमभिप्रेतम्। न तु यस्य स्वभावसिद्धानि। अन्यथा तु पिपीलिकादीना[8]मप्याकाशगमनादैश्वर्यं स्यात्।

आह—न, शरीरानुपपत्तिप्रसङ्गात्। सूक्ष्मशरीरोत्पत्तौ तर्हि चरितार्थयोः (धर्माधर्मयोः)[9] शरीरान्तरसामर्थ्यं विरुध्यते। तस्मादयुक्तं सविशेषः संसारः (इति)।

उच्यते—न, अनभ्युपगमात्। न धर्माधर्मनिमित्तं वैवर्तं शरीरम्। किं तर्हि। आधिकारिकमित्यदोषः। न चानेकशरीरत्वमभ्युपगम्यते। तस्मात्पक्षान्तरोपालम्भोऽयम्। किञ्च कृत्स्नाशयपरिणामाऽप्रतिज्ञानात्। कृत्स्नस्याशयस्य परिणामं (प्रति)[10]जानन्नेवमुपालभ्यः स्यात्। एकदेशस्तु नो विपरिणामी। तस्मान्न किञ्चिदेतत्। निमित्ताविशेषादाशयैकदेशा[11]भिव्यक्तिरयुक्तेति चेत्, स्यान्मतम्—इह निमित्तानामल्पबहुत्वविशेषादाशयाभिव्यक्तिविशेषो दृष्टः। तद्यथा वाय्वादि[12] क्रोधादिषु। प्रायणकालश्चायं फलाभिव्यक्तौ निमित्तम्। अविशिष्टश्चासौ। तस्मादाशयैकदेशपरिणामोऽनुपपन्न इति। एतच्चायुक्तम्। कस्मात्? नैमित्तिकत्वात्। पूर्वकृतस्य कर्मणः फलभोगपरिसमाप्तिः साम्प्रतस्य च फलोपभोगार्थं विपरिणामः प्रायणस्य निमित्तम्, न तु प्रायणो[13] विपरिणामस्येति[14]। किञ्च शरीरान्तराभावश्च। कृत्स्नस्याशयस्याभिव्यक्तिमिच्छतः

---

[1] Raghavan (15(2).6) tentatively suggests बीजदेशागमने.

[2] P K D omit इति.

[3] After इति, D repeats विशेषितत्वात् सूक्ष्मं तच्छरीरमिति.

[4] Wezler (231.18) reads सर्वेश्वर॰ in place of पूर्वेश्वर॰, which latter is the reading in all Mss.

[5] I follow Wezler (231.21) in deleting च.

[6] Raghvan (15(2).6) reads ॰गन्ध॰ in place of ॰सिद्ध॰.

[7] V तदैतदपि

[8] V पिपीलकादीनाम्

[9] I follow Tripathi (476) and Wezler (231.30) in adding धर्माधर्मयोः.

[10] I follow Wezler (231.35) in adding प्रति.

[11] All the Mss read निमित्तावशेषाद्॰. I follow Raghavan (15(2).6), who anticipates Tripathi (477) and Wezler (232.1).

[12] Chakravarti (146.21) reads वाय्वादेः.

[13] V प्रायेणो Chakravarti (146.25) and Tripathi (478) read प्रायणं.

[14] P विपरिणामस्येयण ... not clear

शरीरान्तराभावो निमित्तान्तराभावा[1]त्प्राप्नोति । तत्र (पुनः) कृतेनेति चेन्न, कललाद्यवस्थानाशे[2] तदसम्भवात् । तत्र कृताभ्यां (धर्माधर्माभ्यां)[3] हि बीजावेशः करणस्य निष्पादितो यावत्कललाद्यवस्थायामेव । तच्छरीरं विनष्टमिति तत्र कृताशयासम्भवाच्छरीरान्तरानुपपत्तिप्रसङ्गः । किञ्च स्थावराणां च शरीरान्तरासम्भवः । आशयस्य स्थावरशरीरारम्भे चरितार्थत्वात् स्थावरशरीरेण चाशयोपादानासम्भवात्तस्य संसाराभावः प्राप्तः । तस्मादुपपन्नमेतत् पुरुषार्थमादिसर्गोत्पन्नं सूक्ष्मशरीरं संसरति, यावच्च स पुरुषार्थो न परिसमाप्यते तावत्तिष्ठत इति ॥ 41 ॥

आह, यदि पुरुषार्था लिङ्गस्यो[4]त्पत्तिरभ्युपगम्यते, तत्समनन्तरमेवानेन पुरुषार्थोऽवसाययितव्यः[5], न पुनर्देवमानुषतिर्यग्भावेन पुनः पुनराजवञ्जवीभावोऽनुष्ठातव्य इति ।

उच्यते—

पुरुषार्थहेतुकमिदं[6] निमित्तनैमित्तिकप्रसङ्गेन ।
प्रकृतेर्विभुत्वयोगान्नटवद् व्यवतिष्ठते लिङ्गम् ॥ का॰ 42 ॥

यद्यपि **पुरुषार्थ**सिद्ध्यर्थं लिङ्गमुत्पद्यते, तथापि सत्त्वरजस्तमसां त्रयाणामपि (साम्या)[7]द्रजस्तमोभ्यामभिभूते सत्त्वे तत्प्रेरितं निमित्तनैमित्तिक[8]शरीरेन्द्रियविषयोपभोगनिर्वर्तकं[9] शृणोति[10] । तद्यथा "अग्निहोत्रं जुहुयात्स्वर्गकामः", "यमराज्यमग्निष्टोमेनाभिजयति" इति । तत्र फलेच्छया[11] योनीः प्राणादींश्च सम्मुखीकृत्य क्रियामारभते । गुणवृत्तिवैचित्र्याच्च[12] प्रयत्नवानपि मनोवाग्देहै[13]र्मलिनमपि कर्म करोति । ततश्च **प्रकृतेर्विभुत्वयोगा**त्तेन तेन निमित्तेनोपस्थापितं देवमनुष्यतिर्य[14]क्प्रेतादिशरीरमेकस्वभावमपि **सन्नटवद्व्यवतिष्ठते लिङ्ग**माकृतिविशेषोपादानत्यागसाम्यतः । विभुत्वं गुणानां त्रयाणामपि साम्यादितरेतराभिभवो दृष्टः[15] । तस्माद् भावनिमित्तः संसारः । तन्निमित्तानुपादानान्मोक्षः ॥ 42 ॥

आह, भावा इति तत्रभवताऽभिधीयते, न चास्य शब्दस्यार्थं प्रतिपद्यामहे । तस्माद्वक्तव्यमिदं के पुनरमी[16] भावा इति?

---

[1] V निमित्ताभावात्
[2] V ॰द्यवस्थाविनाशे
[3] I follow Wezler (232.10) in adding धर्माधर्माभ्यां.
[4] Raghavan (15(2).6) proposes पुरुषार्थाल्लिङ्गस्य.
[5] V अवसायितव्यो
[6] D पुरुषार्थेहेतुकम् V पुरुषार्थकेहेतुकम्
[7] All the Mss read प्राधान्याद्. I follow Wezler (232.24) in reading साम्याद्.
[8] K V तत्प्रेरितनिमित्त॰
[9] P D ॰निवर्तकं
[10] Tripathi (480), besides reading शृणोति, suggests (p. 480, fn.1) an alternative reading श्रीणाति.
[11] D फलेप्सया Chakravarti (147.13) reads फलेच्छाया.
[12] All the Mss read गुणवृत्तवै॰. We emend it for the sake of consistency. (Cf. 275.16)
[13] V वागृहैर्म॰
[14] V देवमानुषतिर्यक्
[15] V ऽभिप्रेतः
[16] V पुनरिमे

उच्यते—धर्माद्या भावाः। धर्मो ज्ञानं वैराग्यमैश्वर्यमधर्मोऽज्ञानमवैराग्यमनैश्वर्यमित्येते भावाः। तत्राचार्याणां विप्रतिपत्तिः। पञ्चाधिकरणस्य तावद् द्विविधं ज्ञानम्—प्राकृतिकं वैकृतिकं च। प्राकृतिकं त्रिविधम्—तत्त्वसमकालम्, सांसिद्धिकमाभिष्यन्दिकं च। तत्र तत्त्वसमकालं संहतश्च महांस्तत्त्वात्मना महति च[1] प्रत्ययो भवति। उत्पन्नकार्यकरणस्य[2] तु सांसिद्धिकमाभिष्यन्दिकं च भवति। सांसिद्धिकं यत्संहतव्यूहसमकालं निष्पद्यते, यथा परमर्षेर्ज्ञानम्। आभिष्यन्दिकं च[3] संसिद्धकार्यकरणस्य कारणान्तरेणोत्पद्यते। वैकृतं तु द्विविधम्—स्ववैकृतं परवैकृतं च। स्ववैकृतं तारकम्। परवैकृतं सिद्ध्यन्तराणि। आह च—

तत्त्वसमं वैवर्तं तत्राभिष्यन्दिकं द्वितीयं स्यात्।
वैकृतमतस्तृतीयं षाट्कौशिक[4]मेतदाख्यातम्॥

अत्र तु सत्त्वैः सहोत्पत्त्यविशेषात्सांसिद्धिकमभेदेनाह—

वैकृतमपि च द्विविधं स्ववैकृतं तत्र तारकं भवति।
स्यात्सप्तविधं परवैकृतं (सु)तारादि[5] निर्दिष्टम्॥

इति यथा ज्ञानमेव[6] धर्मादयोऽपीति।

विन्ध्यवासिनस्तु नास्ति तत्त्वसमं सांसिद्धिकं च। किं तर्हि? सिद्धरूपमेव[7]। तत्र परमर्षेरपि सर्गसंघातव्यूहोत्तरकालमेव ज्ञानं निष्पद्यते यस्माद् गुरुमुखाभिप्रतिपत्तेः प्रतिपत्स्यत इत्येतदप्याह[8]—"सिद्धं निमित्तं नैमित्तिकस्यानुग्रहं कुरुते, नापूर्वमुत्पादयति"(1) इति। निमित्तनैमित्तिकभावाच्चैवमुपपद्यते। तत्र परमर्षेः पटुरूहो[9]ऽन्येषां क्लिष्ट इत्ययं विशेषः। सर्वेषामेव तु तारकाद्यविशिष्टम्[10]।

आचार्य आह "त्रिविधा भावाः सांसिद्धिकाः प्राकृतिका वैकृतिका[11]श्च" (द्र॰ का॰ 43) इति। तत्र सांसिद्धिकग्रहणात्तत्त्वसमकालं प्रत्याचष्टे, नैव तदस्तीति। कथम्? यदि हि तथा

---

[1] P D omit च. K adds it above the line. Tripathi (481), however, adds इति before महति, and omits च after महति.

[2] P K D उत्पन्नकार्यकारणस्य

[3] V om. च

[4] P K D षाट्कोशिकम् V षट्कोशिकम् I follow Chakravarti (148.6).

[5] All the Mss read स्वतारादि. Chakravarti (148.9) reads सत्वरामादि for स्वतारादि.

[6] Pandeya (123) reads ज्ञानेमेवं. Possibly it is a misprint.

[7] All the Mss read सिद्धिरूपमेव.

[8] All the Mss read इत्यपीत्याह. I follow Wezler (233.22-23).

[9] Chakravarti (148.14) reads पटुः तूक्तः for पटुरूहः.

[10] V °द्यवशिष्टम्

[11] V om. वैकृतिकाश्

---

(1) Cf. यो॰ भा॰ 4.12

स्यात्तत्त्वान्तरानुत्पत्तिः, संघातो[1] व्यूहश्चानर्थकः स्यात् । महत्युत्पन्नं ज्ञानं तत्रैवोपलब्धमिति कः संघातार्थः? तथा चर्षे[2]रूहो नोपपद्यते । प्रतिबन्धाभावात् । न ह्यस्य कार्यकरण[3]व्यूहसमकालज्ञानोत्पत्तौ कश्चित्प्रतिबन्धोऽस्ति । अपरिवृतखलत्वाद्य[4]तः कालान्तरं प्रतीक्षेत[5] । तस्मादस्य सहैव[6] कार्यकरणाभ्यां[7] ज्ञानमभिनिष्पद्यते प्रदीपप्रकाशवदित्यतः सांसिद्धिकम् । अन्येषां तु सत्त्वस्यापटुत्वात्कालान्तरेण प्रकृत्यभिष्यन्दाद् (यद्) द्रागिति भवति कृष्णसर्पदर्शनवत्, तत्प्राकृतम् । वैकृतं[8] तु द्विविधं पूर्ववत् । यथा च परमर्षेर्ज्ञानं सांसिद्धिकम्, एवं माहात्म्यशरीरस्यैश्वर्यम्, भृग्वादीनां धर्मः, सनकादीनां वैराग्यम्, अधर्मो यक्षरक्षःप्रभृतीनाम्, अनैश्वर्यं षट्सिद्धिक्षयकालोत्पन्नानां मानुषाणां तिरश्चाञ्च । रागोऽज्ञानं (च) परमर्षिवर्ज्यानाम्[9] । प्राकृतास्तु तद्यथा वैराग्यं भगवदासुरेः । तस्य हि परमर्षिसम्भावना[10]दुत्पन्नो धर्मोऽशुद्धिं[11] प्रतिद्वन्द्विभावादपज(घान)[12] । तस्यामपहतायां प्रकृतेः[13] शुद्धिस्रोतः प्रवृत्तं येनानुगृहीतो दुःखत्रयाभिघातादुत्पन्नजिज्ञासः प्रव्रजितः । तथा महेश्वरसम्पर्कान्नन्दिन ऐश्वर्यम्, नहुषस्यागस्त्यसम्पर्काद्धर्म इत्यादि। वैकृतास्तु भावा अस्मदादीनाम् । एवं त्रिविधभावपरिग्रहात्त्वाचार्यस्य न सर्वं स्वतः पतञ्जलिवत्[14], न सर्वं परतः पञ्चाधिकरणवत् । किं तर्हि? महती स्वभावातिवृत्तिः प्रकृतितोऽल्पा स्वतो विकृतितः । एवम्—

सांसिद्धिकाश्च भावाः प्राकृतिका वैकृताश्च धर्माद्याः[15] ।
दृष्टाः करणाश्रयिणः (का॰ 43/1-3)

यथा चैते तथा—

कार्याश्रयिणश्च कललाद्याः ॥ का॰ 43/4 ॥

त्रिविधा एवेति । कललादिग्रहणेन शरीराण्याह । तेषामाकृतिवैश्वरूप्यं[16] चतुर्दशविधे संसारे

---

[1] All the Mss read °आनुत्पत्तिसंघातो. I follow Raghavan (15(2).6).

[2] P चेर्षे D चेर्ष, sec. m. चर्षेर्

[3] P K D read °कारण

[4] D °खलुत्वाद् Tripathi (483) suggests an alternative reading °फलत्वात्.

[5] P K प्रतीक्षते

[6] D तस्मात्सहैवास्य, sec.m. तस्मादस्य

[7] All the Mss read कार्यकारणाभ्यां.

[8] D perhaps वैकृति, sec. m. वैकृतं

[9] D not clear, sec. m. °वर्ज्यानाम्

[10] V सम्भाषणाद्

[11] Chakravarti (148.26) reads अशुद्धिः.

[12] All the Mss read अपजगाम. I follow Wezler (234.11).

[13] D प्रकृते

[14] V पातञ्जलिवत्

[15] V reads सांसिद्धिकाः प्राकृतिका वैकृताश्च भावा, thus omitting धर्माद्याः.

[16] V विश्वं

त्रिविधम् । तत्र सांसिद्धिकस्तावत् वैवर्तानां ग्रहनक्षत्रतारादीनाम्[1] । जातिकृतश्च विशेषः[2] हंसानां शौक्ल्यम्, तित्तिरिमयूरादीनां[3] चित्रच्छदत्वमिति । प्राकृतं यथा माहात्म्यशरीराभिमानात्[4] । तस्य ह्यभिध्यानो[5] भवति—"हन्ताहं पुत्रान्स्रक्ष्ये[6] ये मे कर्म करिष्यन्ति । ये मां परं (चापरं) च ज्ञास्यन्ति । स यादृक्सर्गमभिध्यायति तादृक्प्रधानादुत्पद्यते । तद्यथा महेश्वरस्य रुद्र[7]कोटिसृष्टौ" इति । वैकृतास्तु कललाद्याः । यथा भिषग्वेदेऽभिहितम्— "क्षीरं पीत्वा गर्भिणी गौरं पुत्रं जनयति''(1) इति । एते भावा व्याख्याताः । एषां वैश्वरूप्याल्लिङ्गस्य गतिविशेषः संसारो भवतीति[8] ॥ 43 ॥

आह, कस्य पुनर्भावस्यानुष्ठानात्को गमनविशेषो लिङ्गस्य निष्पद्यत इति? उच्यते—

धर्मेण गमनमूर्ध्वम् (का॰ 44/1)

उक्तो धर्मः । तदनुष्ठानादष्टविकल्पायां देवभूमावुत्पत्तिर्भवति ।

गमनमधस्ताद् भवत्यधर्मेण । (का॰ 44/2)

अधर्मोऽप्युक्तः । तदनुष्ठानात्पञ्चविकल्पायां[9] तिर्यग्भूमावुत्पत्तिर्भवति ।

आह, एकभूमिविशेषानुपपत्तिः, गतिविशेषात् । यदि भावानां भूमिविशेषनिमित्तत्वं नियम्यते, तेनैकस्यां भूमौ हीनमध्यमोत्कृष्टत्वं जात्याकृतिस्वभावानुग्रहोपघातानां न प्राप्नोति ।

उच्यते—न तर्ह्यनेन भूमिविशेषो नियम्यते । किं तर्हि? ऊर्ध्वशब्द उत्कृष्टवचनः । धर्मेण देवेषु मानवेषु[10] तिर्यक्षु चोर्ध्वगमन[11]मुत्कृष्टं जन्म भवति । तथाऽधर्मादधोगमनमपकृष्टं जन्म भवतीति[12] ।

ज्ञानेन चापवर्गः (का॰ 44/3)

चशब्दो[13]ऽवधारणार्थः । ज्ञानेनैवापवर्गः, न भावान्तरेणेति । यदुक्तमन्यैराचार्यैः "वैराग्यात्पुरुषकैवल्यं ज्ञानवैराग्याभ्यां च" इति तत्प्रतिषिद्धं भवति ।

---

[1] V ताराप्रभृतीनाम्

[2] Wezler (234. 24) tentatively adds यथा after विशेषः.

[3] D तितिरिमयूरादीनां

[4] All the Mss read माहात्म्यं शरीराभिमानात्. I follow Chakravarti (149.9). Tripathi (486) and Wezler (234.26) too follow Chakravarti, though Wezler proposes °अभिध्यानात् in place of °अभिमानात्.

[5] All the Mss read अभिमानो. Consistency warrants अभिध्यानो.

[6] KDV द्रक्ष्ये

[7] P रुद्राकोटि°

[8] D om. इति

[9] D पंचविकलायां, sec.m. पंचविकल्पायां

[10] KV मानुषेषु D मानुष्येषु

[11] V चोत्कृष्टगमनं D च ऊर्ध्वगमनं, sec. m. उत्कृष्टगमनं

[12] P om. इति

[13] D च शब्दो (appearing as separate words)

---

(1) Cf. बृहदा॰ उप॰ 6.4.14.

आह, यदि पुनर्वैराग्यात्पुरुषकैवल्यमभ्युपगम्यते[1], क एवं सति दोषः स्यादिति[2]।

उच्यते—न शक्यमेवं प्रतिपत्तुम्। कस्मात्? संसारनिमित्ताऽप्रतिपक्षत्वात्। यदि रागादिनिमित्तः प्रधानपुरुषसंयोगः[3] स्यात्, प्राप्तमिदं तत्प्रतिपक्षेण वैराग्येण वियोगो भविष्यतीति। न त्वेवम्। कुतः? संयोगकृते कार्यकरणसर्गे सति निष्पत्तेः[4]। कार्यकरणव्यूहोत्तरकालं हि रागो[5] भवति। तस्मान्नासौ कार्यकरणनिष्पत्तेर्निमित्तमिति शक्यमाश्रयितुम्। यस्य तु ज्ञानान्मोक्ष इति पक्षः, तस्य प्रतिपक्षादज्ञानाद्बन्ध[6] इति प्राप्तमस्ति, (स)[7] चासौ प्रागपि कार्यकरणनिष्पत्तेः। तस्मान्न वैराग्यान्मोक्षः। अतएव न[8] ज्ञानवैराग्याभ्यां मोक्षोऽस्ति। उभयनिमित्तासम्भवात्। तस्मात्सूक्तं ज्ञानेनैवापवर्गः (इति (?))।

विपर्ययादिष्यते बन्धः ॥ का० 44/4 ॥

ज्ञान**विपर्ययो**ऽज्ञानम्। तस्माद् **बन्ध**स्त्रिविधो[9] भवति प्रकृतिबन्धो, दक्षिणाबन्धो, वैकारिकबन्धश्चेति ॥ 44 ॥

आह, कस्माद् भावात्प्रकृतिबन्धो भवति (इति) ?

उच्यते—

वैराग्यात् प्रकृतिलयः (का० 45/1)

वैराग्यादष्टसु[10] **प्रकृतिषु** लयं गच्छति, असावुच्यते प्रकृतिबन्ध इति।

आह, यदि वैराग्यात्प्रकृतिलयः (स्यात्), प्राप्त(मिदं)[11] प्रकृतौ वैराग्यमाञ्जसमन्या प्रकृतिस्त्रिगुणा, कारणभूता, कार्यभूता, कार्यकारणभूता, अकार्यकारणभूता, अचेतना, परतन्त्रा

---

[1] D अभ्युपगम्यते, sec. m. अभ्युपगम्येते

[2] P K D omit इति.

[3] P °पुरुषं संयोगः

[4] D puts निष्पत्तेः within parentheses.

[5] D आगमो, sec. m. रागो

[6] D बन्ध, sec. m. धार्मः

[7] All the Mss read न. I follow Wezler (236.1).

[8] D encircles न.

[9] D तस्मात् त्रिबन्धस्(?), sec. m. तस्माद्बन्धस्

[10] V अष्टासु

[11] All the Mss read प्राप्तो यदेतत्. Chakravarti (150.18) reads ... प्राप्तः, स्यादेतत्. I follow Wezler (236.11).

चेति। अन्यः पुरुषो निर्गुणो न कार्यम्, न कारणम्; न कार्यकारणम्, तद्विपरीत[1]श्चेतनः[2] स्वतन्त्रश्चेति ततोऽपि प्रकृतिलयः[3], ततश्चाऽनिर्मोक्षप्रसङ्ग इति[4]।

उच्यते—विपर्ययादिति वर्तते। तदिहाभिसम्भन्त्स्यामः। ततश्च विपरीतं यदेव वैराग्यं तुष्टिकाण्डानुपतितं प्रकृत्यादिषु परत्वाभिमानः, तत एव प्रकृतिलयो भवति, नान्यस्मात्। अथवाऽत्रापि यत्तत्प्रकृतावन्यत्वज्ञानम्, तत एव मोक्षो, न वैराग्यात्। कुतः? भवबीजाप्रतिपक्षत्वादिति ह्युक्तम्[5], आम्भसिकस्य च मोक्षप्रसङ्गात्। तुल्या ह्यस्य नानात्वसंविद्[6], आसङ्गदोषनिवृत्तेः[7]। न चैतदिष्टम्। तस्माद्युक्तमेतद्, वैराग्यात्प्रकृतिलय इति।

आह[8], अथ दक्षिणाबन्धः कुतः?

उच्यते—

संसारो भवति राजसाद् रागात्। (का॰ 45/2)

योऽयं दृष्टानुश्रविकविषयाभिलाषः स रागः। तत्र दृष्टविषयरागात्त[9]त्प्राप्तिनिर्वर्तक[10] कर्म करोति, ततश्च तत्रोपपद्यते। आनुश्रविकविषयाभिलाषाद[11]ग्निहोत्रादिषु प्रवर्तते, ततश्च स्वर्गादिषूपपत्तिर्भवति। असौ दक्षिणाबन्धः। दृष्टानुश्रविकविषयाभिलाषद्वारेण तन्निर्वर्तके कर्मणि प्रवर्तमानो गुणवृत्तिवैचित्र्यादनिष्टफलनिर्वर्तक[12]मपि कर्म करोति। एवं मानुष्ये गत्यन्तरे योपपत्तिः, सर्वाऽसौ[13] रागात्।

आह, राजसग्रहणानर्थक्यम्, तत्पूर्वकत्वा[14]द्रागस्य। रजोनिमित्त एव हि रागः। तत्र संसारो रागादित्येव[15] वक्तव्यम्, राजसग्रहणमनर्थकमिति।

---

1. P̣ K न तद्विपरीतः	D न च तद्विपरीतः
2. D चेतना
3. P K प्रकृतौलयः	D प्रकृतौलयः, sec. m. प्रकृतिलयः
4. V वेति	D इति, sec. m. एव इति
5. V om. हि
6. V नानात्वं संविद्	D नानात्वसंविदः
7. V संगद्वेष॰	D संगदोष॰, sec.m. संगद्वेष॰
8. D writes आह after इति in the preceding line, but then changes its place to the beginning of the new line.
9. D दृष्टविषये रागात्
10. P K D निवर्तकं
11. D writes ॰विष॰ (unclear) into ॰विषया॰ in the right margin.
12. P निवर्तकम्
13. D सर्वासौ, sec. m. सा सर्वासौ
14. D तत्पूर्वगत्वाद्
15. V ॰दित्येवं

उच्यते—न, विषयविशेषणत्वात्। विषये[1] यो रागः स[2] संसारहेतु[3]रित्यस्यार्थस्य ज्ञापनार्थमिदमुच्यते। अन्यथा यो यतेः सात्त्विको यमनियमध्यानाद्यनुष्ठानरागः[4] प्रवचनरागो वा, सोऽपि संसाराय स्यात्।

ऐश्वर्यादविघातः[5] (का॰ 45/3)

यदष्टगुणमैश्वर्यमणिमादि प्रागुपदिष्टम् (220.10f.) तस्मात्स्वे स्वे[6] विषयेऽविघात[7] उत्पद्यते। तदभिरतिर्वैकारिको बन्धः।

आह, यदि[8] {त्रिभिः}[9]त्रिभिर्निमित्तैर्वैराग्यादिभिस्त्रिविधो बन्धो निर्वर्त्यते, यदुक्तम् (274.10) अज्ञानाद् बन्ध इति, तदयुक्तम्। भावान्तरं ह्यज्ञानम्। अतः फलान्तरेण भवितव्यमिति।

उच्यते—न, मूलकारणत्वात्। ज्ञानवर्जितानां हि भावानां यत्फलं तत्राज्ञानं मूलम्, तन्निमित्तत्वात्सर्वेषाम्। न हि ज्ञानिवैराग्यमलं[10] प्रकृतिलयाय तथेतराणि परमर्ष्यादावदृष्टत्वात्। विचित्रं कार्यमेकस्मात्कारणादयुक्तमिति वैराग्यादीन्यसाधारणानि पृथक् कल्प्यन्ते। साधारणं त्वज्ञानम्। अतो न कश्चिद्दोषः[11]।

विपर्ययात्त[12]द्विपर्यासः ॥ का॰ 45/4 ॥

अनैश्वर्यात्तु अणिमादेरष्टविधादविघातविपर्ययो विघातो भवति। तदेवमेतदष्टविधं धर्मादिविधान[13]मुपादायाष्टविधं नैमित्तिकमुपपद्यते। एवमेष तत्त्वसर्गो भावसर्गश्च व्याख्यातः। एतच्च व्यक्तस्य रूपं प्रवृत्तिश्च परिकल्प्यते। फलमिदानीं वक्ष्यामः ॥ 45 ॥

॥ इति[14] युक्तिदीपिकायामष्टममाह्निकं तृतीयं च[15] प्रकरणम् ॥

---

1. D sec. m. विषयेषु
2. V om. स
3. D संसारे हेतुर्
4. P °अनुष्ठानानुरागः K °द्यनुष्ठानानुरागः V °द्यानुष्ठानुरागः
5. D sec. m. ऐश्वर्यादिविघातः Chakravarti (151.11) reads ऐश्यर्वादभिघातः. Raghavan's correction (15(2).7) here agrees with the reading (of the Mss) adopted by us.
6. D स्वे स्वे, sec.m. स्वप्ने
7. D विघात
8. D यत्
9. All the Mss repeat त्रिभिः. But it is redundant.
10. V °मूलं
11. V reads न दोषः instead of न कश्चिद्दोषः in the right margin.
12. V विपर्या for विपर्यया°
13. D धर्मादिविधानम्, sec. m. धर्मादिविचारम्
14. V om. इति
15. V आह्निकं च तृतीयं

नवममाह्निकम्

आह, किं पुनस्तत्फलमिति?

उच्यते—यः खलु—

एष प्रत्ययसर्गो विपर्यया[1]शक्तितुष्टिसिद्ध्याख्यः । (का॰ 46/1-2)

तत्फलमिति वाक्यशेषः। **एष** इति वक्ष्यमाणस्य सम्मुखीकरणार्थमुच्यते। **प्रत्ययसर्ग** इति प्रत्ययः पदार्थो लक्षणमिति पर्यायाः। प्रत्ययानां सर्गः प्रत्ययसर्गः पदार्थसर्गो लक्षणसर्ग इत्यर्थः। अथवा प्रत्ययो बुद्धिर्निश्चयोऽध्यवसाय इति पर्यायाः। तस्य सर्गोऽयमतः **प्रत्ययसर्गः** प्रत्ययकार्यं प्रत्ययव्यापार इत्यर्थः। अथवा प्रत्ययपूर्वकः सर्गः **प्रत्ययसर्गः**। बुद्धिपूर्वक इत्युक्तः। कथम्? एवं हि शास्त्रम्—"महदादिविशेषान्तःसर्गो बुद्धिपूर्वकत्वात्। उत्पन्नकार्यकरणस्तु[2] माहात्म्यशरीर एकाकिनमात्मानमवेक्ष्याभिदध्यौ 'हन्ताऽहं पुत्रान्स्त्रक्ष्ये[3] ये मे कर्म करिष्यन्ति। ये मां परं चापरं च ज्ञास्यन्ति' (273.3f.)। तस्याभिध्यायतः पञ्चमुख्यस्त्रोतसो देवाः प्रादुर्बभूवुः। तेषूत्पन्नेषु[4] न तुष्टिं लेभे[5]। ततोऽन्ये तिर्यक्स्त्रोतसोऽष्टाविंशतिः[6] प्रजज्ञे[7]। तेष्वप्यस्य मतिर्नैव[8] तस्थे। अथाऽपरे नवोर्ध्वस्त्रोतसो देवाः प्रादुर्बभूवुः। तेष्वप्युत्पन्नेषु नैव कृतार्थमात्मानं मेने। ततोऽन्येऽष्टाव[9]र्वाक्स्त्रोतस उत्पेदुः।" एवं तस्माद् ब्रह्मणोऽभिध्यानादुत्पन्नः, तस्मात्प्रत्ययसर्गः। **स विपर्ययाख्यो[10]ऽशक्त्याख्यस्तुष्ट्याख्यः सिद्ध्याख्यश्चेति**। तत्राऽश्रेयसः श्रेयस्त्वेनाभिधानं विपर्ययः[11]। वैकल्या[12]दसामर्थ्यमशक्तिः। चिकीर्षितादूनेन निर्वृति[13]स्तुष्टिः।

---

1. D प्रत्ययसर्गो विपर्यया°, sec. m. प्रत्ययसर्गविपर्यया°
2. V °कार्यकारणस् D °कार्यकरणस्, sec. m. °कार्यकारणस्
3. V D द्रक्ष्ये
4. D sec. m. तेष्वप्युत्पन्नेषु
5. D corrects न तुष्टिं लेभे into नैव कृतार्थमात्मानं मेने, and deletes the corrected phrase.
6. Before ऽष्टाविंशतिः D writes and deletes देवाः प्रादुर्बभूवुः तेषूत्पन्नेषु न तुष्टिं ल.
7. Chakravarti (151.13), followed by Tripathi (496), reads प्रजज्ञिरे.
8. V मतिः न वेतस्थे
9. D omits ऽष्टाव in its main text, but adds अष्टौ in the left margin.
10. V D स विपर्याख्यः
11. P °नाभिधानविपर्ययः
12. V कैवल्याद्
13. P निर्वृत्तिस् K D निवृतिस् V not clear

यथेष्टस्य साधनं सिद्धिः। तद्यथा धर्मार्थप्रवृत्तोऽग्निष्टोमादीन्परित्यज्य सङ्करं कुर्वीत, सोऽस्य[1] विपर्ययः। साधनवैकल्या[2]दसामर्थ्यमशक्तिः। आधानमात्रसन्तोषस्तुष्टिः। कृत्स्नस्य क्रियातिविशेषस्या[3]नुष्ठानं सिद्धिः। एवम् (अन्या)र्थादिषु[4] योज्यम्। यश्चायं चतुर्विधः फलविशेषो[5] विपर्ययादिराख्यातः —

गुणवैषम्यविमर्दात्[6] तस्य च[7] भेदास्तु पञ्चाशत् ॥ का॰ 46/3-4 ॥

गुणानां वैषम्यं **गुणवैषम्यम्**। गुणवैषम्यं प्राधान्यगुणभावयोग इत्यर्थः। गुणवैषम्याद्विमर्दो **गुणवैषम्यविमर्दः**, प्रत्ययपर्यायेण सत्त्वरजस्तमसामितरेतराभिभवः[8]। तन्निमित्ता एषां प्रत्ययानां **पञ्चाशद्भेदा** भवन्ति ॥ 46 ॥

कथमिति?

उच्यते—

पञ्च विपर्ययभेदा भवन्ति (का॰ 47/1-2')

तमो मोहो[9] महामोहस्तामिस्रोऽन्धतामिस्र[10] इति। तत्र श्रेयसि[11] प्रवृत्तस्य प्रत्ययावरे[12] श्रेयोऽभिमाने आद्यो[13] विपर्ययस्तम इत्यभिधीयते। भौतिकेष्वाकारेषु शिरःपाण्यादिष्वात्मग्रहो योऽयं व्यूढोरस्कः सितदशनस्ताम्राक्षः प्रलम्बबाहुः सोऽहमिति। तथा श्रवणस्पर्शनदर्शन[14]रसनघ्राणवचनादानविहरणोत्सर्गानन्दसङ्कल्पाभिमानाध्यवसायलक्षणासु करणवृत्तिष्वहं श्रोता द्रष्टा

---

[1] Tripathi (497) reads सोऽयं.

[2] V °कैवल्याद्

[3] Pandeya (127) prefers क्रियातिशेषस्य.

[4] All the Mss read अर्थादिषु. I follow Wezler (240.1).

[5] D फलविशेषो, sec. m. फले विशेषो

[6] V विमर्देन

[7] Pandeya (127) and Tripathi (497) omit च.

[8] P K इतरेतरभावः D इतरेतरभाव, see.m. इतरेतराभिभवः But इतरेतरभावः seems equally plausible. Chakravarti (152.23) reads इतरेतराभावः. Correcting this, Raghavan suggests इतरेतराभिभवः, which agrees with the reading (of the Ms) which we have adopted.

[9] Chakravarti (153.3) reads तमोमोह–.

[10] Chakravarti (153.3) reads °तमिस्रा.

[11] Pandeya (127) reads तत्राऽश्रेयसि.

[12] All the Mss read प्रत्ययवरे. I follow Chakarvarti (153.4).

[13] D आर्षो

[14] P om. –दर्शन– V °स्पर्शनादर्शनरसन°

चेत्येवमादिरा[1]द्यकालप्रवृत्तो ग्रहः पूर्वस्मादवरो[2] मोह इत्युच्यते।

कथं पुनरयमवर इति ?

उच्यते—पूर्वः[3] शरीरेन्द्रियव्यतिरिक्तमुपलब्धुमिच्छन् सौक्ष्म्यात्तदनधिगमे भूताकारमभूतं प्रधानं[4] परपरिकल्पितं वाऽनुमन्येत, स्वयं वा परिकल्पयेदिति न मार्गाद् दूरापगतमेतत्। अयं तु प्रत्यक्षादिगतोत्पत्तिस्थितिविनाशेष्वनेकरूपकेषु[5] कार्यकरणेष्वह[6]मिति अभिमन्यते। तस्मात्पूर्वस्मादवरः। बाह्ये तु विषये ममेदमित्यभिनिवेशः[7] पूर्वस्मादवरो[8] महामोहः।

कथं पूर्वस्मादवर इति?

उच्यते—पूर्वः[9] शरीरिणोऽप्रत्यक्षत्वात्करणवृत्त्यविशेषाद्[10] वात्मवृत्तेः कार्यकरणे[11] कुर्यादात्मबुद्धिमिति शक्यमेतत्। भिन्ननिमित्ताकारदेशस्वभावप्रयोजनानुग्रहोपघातोत्पत्तिस्थितिविनाशांश्च मातृपितृ{पुत्र}[12]भ्रातृपुत्रदारगोहिरण्यवसनाच्छादनादीनयमकस्मादात्मत्वेन पश्यति। तस्मात्पूर्वस्मादवरः। क्रोधश्चतुर्थो विपर्ययः पूर्वस्मादवरः तामिस्र इत्यभिधीयते[13]।

कथं पुनरयं पूर्वस्मादवर इति?

---

[1] D sec. m. एवमादिना

[2] All the Mss read अधरो (with P misspelling it as ओधरो). Pandeya (128), and following him, Tripathi (498) read सर्वस्मादवरो, though Tripathi corrects it into पूर्वस्माद°. I follow Chakravarti (153.8).

[3] All the Mss reads पूर्वं. Raghavan (15(2).7) thinks that something is missing before पूर्वः.

[4] P K V प्रमाणं D प्रमाणं, sec. m. प्राणं Raghavan (15(2).7) suggests अभूतप्रमाणं. I follow Wezler (240.20).

[5] D अनेकरूपकेषु, sec. m. अनेकरूपेषु

[6] D sec. m. कार्यकारणेषु

[7] Tripathi (499) adds महामोहः after °त्यभिनिवेशः.

[8] P K V omit अवरो महामोह ... पूर्वस्माद्. D adds the line in the right margin.

[9] Tripathi (499) adds मोहः after पूर्वः.

[10] D °वृत्तिविशेषाद्, sec. m. °वृत्यविशेषाद्

[11] D कार्यकरणेषु, sec. m. कार्यकारणेषु

[12] पुत्र is here redundant. The entire reading मातृपितृपुत्रभ्रातृपुत्रदार ... च्छादनादीन् is found in P K D. D, however, parenthesizes पुत्र. Wezler (240.29) tentatively suggests the addition of स्वसृ after भ्रातृ.

[13] D तस्मात्पूर्वस्मादवरः क्रोधश्चतुर्थो विपर्ययः पूर्वस्मादवरः तामिस्र इत्यभिधीयते, sec.m. तन्मोक्षमस्मादवरः तामिस्र इत्यभिधीयते

उच्यते—पूर्वोऽभिनिवेशप्रतिषेध[1]मभ्यनुजानाति[2] । यदाऽस्य बाह्यद्रव्यवियोगे कश्चित्कुशलसंसृष्ट एवं ब्रवीति संसारस्य ... बुद्धाववस्थाप्य विमृशतां[3] यावदयं कालो यदि[4] कश्चित्प्रियेणावियुक्तपूर्वः । तस्मादागमापायिषु[5] बाह्येषु द्रव्येषु विदुषा नाभिनिवेशः कार्य इति, तदा प्रत्याह सत्यमेवमेतदिति । सन्निकृष्टस्तु वियोगकाल इति (... (?)) न बुद्धिरवस्थापयितुं शक्यते । क्रोधाविष्टस्तु स्वविकल्पितग्राहविपरीतबुद्धिरशक्यो दण्डेनापि निवर्तयितुम् । तस्मात्पूर्वस्मादवरः । मरणविषादः पञ्चमो विपर्ययः । पूर्वस्मादवरोऽन्धतामिस्र इत्यभिधीयते ।

कथं पुनरयं पूर्वस्मादवर इति?

उच्यते—पूर्वोऽभिनिवेशात्प्रतिषिध्यमानः प्रतीकारमन्ततो जिह्वाक्षिनिरीक्षितेनापि[6] ताव[7]दारभते । न तु ब्रह्मादौ स्तम्ब[8]पर्यन्ते संसारे स्वनिमित्तनियततमपातस्य[9] विनाशस्य केनचित्प्रतीकारः कृतः । तस्मादपरिहार्यं मरणमनुशोचन् पूर्वस्मादवरः । इत्येते **पञ्च विपर्ययभेदा** भवन्ति ।

अशक्तिश्च करणवैकल्यात् ।

अष्टाविंशतिभेदा (का॰ 47/2'3)

भवतीत्यनुवर्तते । तत्र बाह्यकरणवैकल्यं सह मनसैकादशप्रकारम् । सप्तदशविधं बुद्धिवैकल्यम् । एतेऽशक्तिभेदाः[10] ।

तुष्टिर्नवधाऽष्टधा सिद्धिः ॥ का॰ 47/4 ॥

एवं चतुर्विधस्य प्रत्ययसर्गस्य गुणवैषम्यविमर्दनेन पञ्चाशद् भेदा भवन्ति ॥ 47 ॥ विस्तरेण तु पदार्थशतसाहस्रमानन्त्यं वा लक्षणानाम् ।

कथमिति?

---

[1] Tripathi (499) suggests पूर्वाऽभिनिवेश॰.

[2] V अत्यनुजानाति

[3] P विमृश्यतां (?)

[4] D कालो यदि, sec. m. कालोपचिति

[5] V तस्मागामा॰

[6] P जिह्वाक्षिनिरीक्षितो नापि Raghavan's correction (15(2).7) agrees with the reading (of the Mss) adopted by us.

[7] D not clear, sec.m. तावद्

[8] V स्तम्भ॰

[9] D स्वनिमित्तनियततमपातस्य, sec.m. स्वनिमित्तनियततपातस्य Wezler (241.15) tentatively suggests the reading ॰नियतशरीरपातस्य.

[10] D शक्तिभेदाः

उच्यते—यस्मात्[1]

भेदस्तमसोऽष्टविधः (का॰ 48/1)

य एते पञ्च विपर्ययभेदा व्याख्यातास्तेषु **तमसोऽष्टविधो भेदः** । कथम्? परविज्ञानमाश्रित्य प्रवृत्तस्याष्टासु प्रकृतिष्वपरासु पराभिमानग्रहात्[2] ।

मोहस्य च (का॰ 48/2')

किम्? अष्टविधो भेद इति । चशब्दात्कार्यकरणसामर्थ्ये[3]ऽष्टविधेऽणिमादावहमितिप्रत्ययः ।

दशविधो महामोहः । (का॰ 48/2')

मातृपितृभ्रातृस्वसृपत्नीपुत्रदुहितृगुरुमित्रोपकारिलक्षणे[4] दशविधे कुटुम्बे योऽयं ममेत्यभिनिवेशः । {दृष्टानुश्रविकेषु वा शब्दादिष्वित्यपरे ।}[5] स दशविधो महामोहः परिसंख्यायते ।

तामिस्रोऽष्टादशधा (का॰ 48/3)

अष्टविधे कार्यकरणसामर्थ्ये[6] दशविधे च कुटुम्बे विषयेषु वा यः प्रतिहन्यमानस्यावेशः[7] ।

तथा भवत्यन्धतामिस्रः ॥ का॰ 48/4 ॥

तथेति सामान्यातिदेशार्थः[8] । **अन्धतामिस्रोऽष्टादशधैवेति** । कथम्? असावप्यष्टविधात्कार्यकरणसामर्थ्या[9]द्दशविधाच्च कुटुम्बात्प्रत्यवसानस्य[10] विषादः । एवमेते पञ्च विपर्ययभेदाः[11] स्वलक्षणतो विषयविशेषा लक्षिताः[12] । तत्रापि चाष्टासु प्रकृतिषु सत्त्वरजस्तमसां

---

[1] D यस्मात् मोहस्य च

[2] D °मानग्रहात्, sec. m. °मानग्रहणात्

[3] V °कायकारण°

[4] P K omit -पुत्र-. D adds पुत्र above the line. V reads उपकार° for उपकारि°.

[5] Wezler (242.6) deletes दृष्टानु ... त्यपरे. I agree with him.

[6] D V कार्यकारण°

[7] V प्रकृतिहन्यमान°

[8] V समान्याति°

[9] P D कार्यकारण°

[10] D प्रत्यवमानस्य, sec. m. प्रत्यवसानस्य च Wezler (242.13-14) tentatively suggests प्रत्यवसितस्य, while Tripathi (503) suggests (कुटुम्बात्) वियोगस्य instead of कुटुम्बात्प्रत्यवसानस्य.

[11] D °भेदाः भवन्ति, sec. m. °भेदाः

[12] V shows a lacuna in place of लक्षिताः. Tripathi (503) offers the emendation विषयविशेषाच्च लक्षिताः.

संहतविविक्तपरिणतव्यस्तसमस्तानां[1] परत्वाभिमानभेदादेकैका प्रकृतिः पञ्चदशभेदा । अत[2] एव तेऽष्टौ पञ्चदश विंशं[3] शतं च भवन्ति । यथा मोक्षे प्रवृत्तस्य, एवं धर्मकामेष्वपि । एकः[4] पदार्थो विस्तरेण परिसंख्यायमानोऽनन्तभेदः सम्पद्यते । निदर्शनमात्रमेतदाचार्येण कृतम् । एवमशक्त्यादिष्वपि लक्षणान्तरेषु योज्यम् । सेयमविद्या पञ्चपर्वा सप्रपञ्चा व्याख्याता । तदनन्तरोद्दिष्टानशक्तिभेदान्वक्ष्यामः ॥ 48 ॥

आह, अतिव्यासाभिहितमिदमिति[5] नास्माकं बुद्धाववतिष्ठते । तस्माद्विपर्ययोक्तं भेदाभिधानं परित्यज्य वक्तव्यम्, कथमशक्तिरष्टाविंशतिभेदेति[6]?

उच्यते—

एकादशेन्द्रियवधाः सह बुद्धिवधैरशक्तिरुद्दिष्टा[7] । (का॰ 49/1-2)

इन्द्रियाणां वधा इन्द्रियवधाः[8] स्वसंस्कारविशेष[9]योगात्प्रकर्षापन्नेन तमसा ग्रहणरूपस्य सत्त्वस्याभिभवात्स्वविषयेष्वप्रवृत्तयः[10] । तद्यथा—

बाधिर्यमान्ध्यमघ्रत्वं[11] मूकता जडता च या ।
उन्मादकौष्ठ्यकौण्यानि क्लैव्योदावर्तपङ्गुताः(1) ॥

तत्र बाधिर्यं श्रोत्रस्य, आन्ध्यं चक्षुषः, अघ्रत्वं नासिकायाः, मूकता वाचः, जडता रसनस्य, उन्मादो मनसः, कौष्ठ्यं त्वचः, कौण्यं पाणेः, क्लैव्यमुपस्थस्य, उदावर्तः पायोः, पङ्गुता पादयोरित्येवमिन्द्रियवधा एकादश । अन्ये तु—

---

1. D संहतविविक्त॰, sec. m. संहतविभक्त॰
2. V reads भेदात for भेदा । अत.
3. D पंचदशविंशं
4. K D इत्येकः V इत्येवमेकः Chakravarti (154.18) reads धर्मकामेष्वपीत्येकः. Raghavan (15(2).7) suggests धर्मार्थकामेषु.
5. V अनिन्यासाभि॰ for अतिव्यासाभि॰
6. V कथमशक्तिम् in place of कथमशक्तिर्
7. D ॰रुद्दिष्टः V ॰रुशक्ति for ॰रशिक्तर्
8. D वध इन्द्रियवधः
9. P K D स्वसंस्कारविषयोगात् I follow Raghavan (15(2).7).
10. D अप्रवृत्तया
11. D अघ्रत्वं, sec. m. आघ्रत्वं

---

(1) See सा॰ त॰ कौ॰, का॰ 49

सप्तदशवधा[1] बुद्धिर्विपर्यया[2]त्तुष्टिसिद्धीनाम् ॥ का॰ 49/3-4 ॥

तत्र तुष्टयः प्रकृत्याद्या वक्ष्यमाणाः, तासां द्विविधो विपर्ययः। अव्युत्पन्नस्य योगधर्मेण तस्यां भूमावप्रवृत्तिः, व्युत्पन्नस्य[3] चोत्तरभूम्यपरिज्ञानात्पूर्वस्यां[4] भूमावक्षेमरूपेण[5] ग्रहणम्। आत्मविदो वा सर्वासु भूमिषु। तेषु यत्पूर्वं तदशक्तिभावाभिप्रेतम्, यन्मध्यमं तदापेक्षिकम्। कथम्? तन्मात्रभूम्यवस्थो हि योग्यस्मितादि[6]भूम्यनवजयात्तुष्टो महाभूतातिक्रमात्सिद्धः। तथा विजिताऽस्मितारूपो महदाद्यवस्थापेक्षया तुष्टः, पूर्वभूम्यपेक्षया[7] सिद्धः। एवं महदवस्थः[8] प्रधानापेक्षया[9] पूर्वापेक्षया च। प्रधानावस्थः[10] पुरुषापेक्षया पूर्वापेक्षया च। गुणपुरुषान्तरज्ञस्तु सिद्ध एव। तस्मादव्युत्पन्नस्याम्भःप्रभृतिषु नवानम्भःप्रभृतयो बुद्धिवधाः[11]। तारकादिविपर्ययेणाष्टावतारकादयः। एषा खल्वशक्तिरष्टाविंशतिभेदा। तुष्टिस्तु सन्निहितविषयसन्तोषाच्चिकीर्षितादर्थादूनेन निर्वृतिः[12] सामान्यत एकैव, प्रत्यर्थमनन्ता, शतेन तुष्टः सहस्रेणेति[13]। शास्त्रे तु बाह्याध्यात्मिकानां सुखदुःखमोहानां प्राप्तिष्वपगमेषु (वा) वाचाऽव्यवस्थ्यलक्षणा[14] उपायनवत्वान्नव तुष्टयो भवन्ति ॥ 49 ॥

तासाम्—

आध्यात्मिक्य[15]श्चतस्रः प्रकृत्युपादानकालभाग्याख्याः[16]। (का॰ 50/1-2)

आध्यात्मिक्य[17] इति शरीरशरीरिणोर्विशेषमुपलिप्समानेन योगिना यदाऽनात्मन्यात्मबुद्धिरवस्थाप्यते[18],

---

[1] V सत्पदशविधा च	Chakravarti (154.24) reads सप्तदश वधा.

[2] Chakravari (154.24) reads बुद्धेर्विपर्ययात्, and he is followed by Tripathi (505).

[3] D व्युत्पन्नस्या

[4] Raghavan (15(2).7) suggests ॰भूमिपरिज्ञानात्.

[5] Wezler (243.15) reads भूमौ क्षेमरूपेण in place of भूमावक्षेमरूपेण, which latter is the reading in all Mss.

[6] This is to be construed as योगी अस्मितादि॰.

[7] P पूर्वं भूम्यपे॰

[8] D महदवस्था

[9] D sec. m. प्रधानाद्यपेक्षया

[10] D प्रधानावस्था

[11] V बुद्धिबाधाः	D बुद्धिवधाः, sec. m. बुद्धिबाधाः

[12] All the Mss read निवृत्तिः.

[13] D सहस्रेणेति, sec. m. सहस्रेण तुष्टेति

[14] P K V वाचाऽव्यवस्थ्य॰	D वाचा व्यवस्थ्यलक्षणा	Chakravarti (155.16-17) reads वाचा व्यवस्थालक्षणा.

[15] All the Mss read आध्यात्मिका. (P gives this part of the kārikā in the right margin.)

[16] V ॰कालभागाख्याः

[17] All the Mss read आध्यात्मिका.

[18] P D यदनात्मन्यात्म॰	K यदर्थात्मन्यात्म॰

सा खल्वाध्यात्मिकी {सिद्धिः}[1] तुष्टिः, सन्तोषः क्षेम इत्यर्थः। तासां प्रकृत्याख्या। यदा वीतावीतैः प्रधानमधिगम्य तत्पूर्वकत्वं च महदादीनां विकाराणामानन्त्याच्च प्रधानात्मनः कृत्स्नस्य महदादिभावेन विपरिणामासम्भवादेकदेशस्याप्रकृतिविकारभूतस्य भोक्तृत्व[2]मकर्तृत्वं[3] चाऽध्यवस्य सङ्गद्वेषनिवृत्तिं[4] लभते, साऽऽद्या तुष्टिरम्भ इत्यभिधीयते[5]। कस्मात्? अमितं हि प्रधानतत्त्वं भाति जगद्बीजभूतत्वान्महदादिभावपरिणामेन[6] न्यूनस्यैकदेशस्यात्मन एवाऽऽपूरात् तद्व्यतिरेकेण चान्यस्यैकदेशस्योभयधर्मिणो[7] भोक्तृभूतस्य सद्भावात्सम्प्रक्षालनेऽपि चोपसंहृतं[8] वैश्वरूप्यस्याऽनुच्छेदात्। तथा च शास्त्रमाह—"अम्भ इति गुणलिङ्गसन्निचयमेवाधिकुरुते[9]" (इति)। गुणाश्च सत्त्वरजस्तमांसि। लिङ्गं च महदादि, अत्र सन्निहितं भवति। तदिदं प्रधानममितं भा[10]त्यमित[11]मुपलभ्यत इत्यम्भः। स[12] खल्वयं योगी प्रधानलक्षणां भूमिमवजित्य तन्महिम्ना च जग[13]दशून्यं दृष्ट्वा व्यतिरिक्तस्य पदार्थान्तरस्याभावं मन्यमानस्तामेव भूमिं कैवल्यमिति गृह्णाति। भिन्ने च देहे प्रकृतौ लयं गच्छति, ततश्च पुनरावर्तते। तस्यां च[14] तुष्टावन्ये सप्त महदादिकारणिनोऽवरुद्धा[15] द्रष्टव्याः। तत्र यथा प्राधानिकस्य पुरुषे नास्ति विज्ञानम्, एवमितरेषामुत्तरेषु तत्त्वेषु। महत्कारणिनः प्रधाने, अस्मिताकारणिनो महति, तन्मात्रकारणिनो[16]ऽहङ्कारे। तदेकदेशाश्चैषां भोक्तारः पूर्ववत्। अत्रापि च सत्त्वादीनां संहतविविक्तपरिणतव्यस्तसमस्तानां भेदादविद्याऽवच्छेदानन्त्यमवसेयम्[17]।

---

1. P, K and D read सिद्धि after आध्यात्मिकी. We think it (सिद्धिः) is redundant. Wezler (244.4) does not include सिद्धिः in the text at all, while Tripathi (507) deletes it.
2. Raghavan (15(2).7) suggests अभोक्तृत्वम्.
3. D adds अकर्तृत्वं in the left margin.
4. D सङ्गदेशनिवृत्तिं Wezler (244.8) proposes सङ्गदोष°, which too is plausible.
5. D writes अभिमन्यते, then deletes मन्यते and writes (अभि)धीयते.
6. V °भावविपरिणामेन
7. D °धर्मिणोर्
8. P चायसंहृतम् Tripathi adds (508, fn. 1) that a different reading नोपसंहृतम् is also possible.
9. V एव कुरुते
10. D adds अमितं भाति in the margin on the right.
11. D adds अमित उपलभ्यत.
12. P shows a horizontal line instead of स.
13. All the Mss read तद् rather than जगद्. But cf. 286.5
14. D adds च in the left margin.
15. D sec. m. महदादिकारणविरुद्धा
16. D adds महति; तन्मात्रकारणिनो in the right margin.
17. D भेदादविद्याऽवच्छेदान°, sec. m. भेदादविद्यावद् भेदान°

आह, तुष्ट्यविद्ययोरभेदः लक्षणैकत्वात्। अष्टासु प्रकृतिष्वात्मबुद्धिस्तुष्टिः। तदेव च तम इत्यविद्याकाण्डे निर्दिष्टम्। तस्मात्पदार्थसङ्कर इति।

उच्यते—न, प्रत्ययविशेषात्। तमःप्रधानपुरुषोपदेशे[1] सत्यप्रायनिर्दिधारयिषया[2] तयोः प्रधानमेव ज्यायो न पुरुष इत्यभिनिविशते[3]। तुष्टिस्तु किं परमित्याश्रित्य प्रवृत्तः[4] प्रधानज्ञानमात्रे सन्तोषात्पदार्थान्तरं विज्ञातुमेव नाद्रियते। किञ्च प्रहाणविशेषात्। निरूढमूलो[5] ह्यनात्मन्यात्मग्रहोऽज्ञानोत्तरकालभावनया प्रहातव्यः। तमोबहुलत्वात्तम इत्यभिधीयते। पेलवस्तु[6] सत्त्वबहुलो दर्शनप्रणयस्तुष्टिः। किञ्च तत्त्वाभिजयात्। विजितभूमिकस्य हि योगिनस्तन्माहात्म्य[7] वशीकृतत्वाद् भूम्यन्तरेऽप्रवृत्तिस्तुष्टिः[8]। इतरस्य त्वभिनिवेशमात्रमेवेत्यनयोर्विशेषः[9]। तस्मान्न पदार्थसङ्कर इति व्याख्याता प्रकृत्याख्या तुष्टिः।

यदा तु सत्यपि प्रकृतिसामर्थ्ये नानपेक्ष्य यथास्वमुपादानं[10] भावानामुत्पत्तिः सम्भवति, प्रकृत्यविशेषे सर्वकालमुत्पत्तिप्रसङ्गात्, प्रकृतिकृतमेवेदं[11] विश्वमित्यभ्युपगच्छतस्तदविशेषाद् गोः[12] पुरुषादुत्पत्तिप्रसङ्गः[13], पुरुषस्य वा महिषात्[14]। किञ्च जात्यभेदप्रसङ्गात्[15]। प्रकृतिकृतमिदं[16] विश्वमित्यभ्युपगच्छतो जातिभेदो न स्यात्, तदविशेषात्। दृष्टं तूपादानाज्जात्यनुविधानं[17]

---

[1] Tripathi (509) suggests तत्र in the place of तमः°.

[2] P K सत्यप्रायानिर्दिधा° V सत्यप्रयानि° D सत्यप्रायानिर्दिधा° Pandeya (130) reads सति प्रत्ययनिर्दिधारयिषया. Chakravarti (156.13) reads सत्यप्रायाणि दिधारयिषया.

[3] P K अभिनिविशेत D अभिनिविशेत, sec. m. अभिनिविशते

[4] D प्रवृत्ता

[5] Chakravarti (156.15) reads निगूढ़°.

[6] D पीलवस्तु, sec. m. पेवलस्तु

[7] Wezler (245.6) suggests °तन्महिमा° in place of °तन्माहात्म्य°, which latter is the reading in all Mss.

[8] Both Wezler (245.6) and Tripathi (510), anticipated by Raghavan (15(2).6), read भूम्यन्तरेऽप्रवृत्ति° in place of भूम्यन्तरे प्रवृत्ति°, which latter is the reading in all Mss. I follow them.

[9] D अभिनिवेशमात्रसेवा इत्य्, sec. m. अभिनिवेशमात्रमेव इत्य्

[10] D यथा स्वम् (appearing as separate words)

[11] P प्रकृतिकृत्यमेवेदं

[12] D तदविशात् द्गोः, sec. m. तदविशाद् गोः

[13] V उत्पत्तिः प्रसंगः

[14] D महिष्यात्

[15] D जातिभेद°

[16] P प्रकृतिकृत्यमेवेदं Pandeya (130) reads प्रकृतिकृत्यमिदं.

[17] V जात्यनभिधानं Chakravarti (157.23-24)) reads जात्यनभिधानं.

भावानाम्। तस्मात्तदेव कारणत्वेन परिकल्पयितुं न्याय्यम्[1]। उपादानैकदेश[2] एव च कार्यकारणविधर्मा[3] भोक्तेत्येतस्माद् दर्शनात्सङ्गद्वेषनिवृत्तिं[4] लभते, सा द्वितीया तुष्टिः सलिलमित्यभिधीयते। कथं पुनरेतत्सलिलम्? सत्युपादाने विकारो लीयत इति। तथा च कृत्वा शास्त्रमाह— "सलिलं सलिलमिति वैकारिकोपनिपातमेवाधिकुरुते, सति तस्मिंल्लीयते जगत्" इति। स खल्वयं योगी पार्थिवा[5]नवजित्य तन्महिम्ना जगदशून्यं दृष्ट्वा पदार्थान्तरस्याभावं मन्यमानस्तामेव भूमिं कैवल्यमिति[6] गृह्णाति। भिन्ने च देहे पृथिव्यादिषु लीयते। ततश्च पुनरावर्तते।

यदा च सत्युपादानसामर्थ्ये न[7] तावतैव भावानां प्रादुर्भावः। किं तर्हि? सन्निहितसाधनानामपि कालं प्रत्यपेक्षा[8] भवति। कालविशेषाद्बीजादङ्कुरो[9] जायते, अङ्कुरान्नालम्, नालात्काण्डम्, काण्डात्प्रसव इत्यादि। अन्यथा तूपादानानां सन्निधानमात्रात्क्षणेनैवामीषामवस्थाविशेषाणामभिव्यक्तिः स्यात्। किञ्च कालविपर्ययेणोत्पत्तिप्रसङ्गात्[10]। उपादानपूर्वकं विश्व[11]मित्यभ्युपगच्छतः शरदि यवानां, वसन्ते व्रीहीणामुत्पत्तिः प्राप्नोति। न चैतदिष्टम्। किञ्च तदनुविधानात्[12]। दृश्यन्ते च प्राणिनां कालानुरूपाः स्वभावाहारविहारव्यवस्थाः। तस्मादसावेव कारणम्। तदेकदेशश्चाप्रकृतिविकारभूतो भोक्तेत्येतस्माद्दर्शनात्सङ्गद्वेषनिवृत्तिं[13] लभते, सा तृतीया तुष्टिरोघ इत्यभिधीयते।

कथं पुनरयं काल ओघ इति?

उच्यते—सलिलौघवत्सर्वाभ्यावहनात्[14]। तद्यथा सलिलौघस्तृणं[15] काष्ठमश्मानं प्राणिनं

---

1. All the Mss read न्यायम्. I agree with Chakravarti (156.24).
2. P उपादानेकदेश Chakravarti (156.25) reads उपादाने एकदेश.
3. P K V read कार्यकारणविधात्मा D विधात्मा, sec. m. विधर्मा Tripathi (511, fn.1) proposes अकार्यकरणविधात्मा.
4. Wezler (245.16) proposes सङ्गदोष° in place of सङ्गद्वेष°, which latter is the reading in all Mss.
5. V पृथिव्यान् D पार्थिवान्, sec. m. पृथिव्यादीन्
6. D adds इति in the left margin.
7. D उपादानसामर्थ्येन
8. All the Mss read प्रत्यवेक्षा. I follow Chakravarti (157.4).
9. V बीजांकुरो
10. V कार्यविपर्ययेणो°
11. D writes and deletes बन्ध before विश्वम्.
12. K तदनविधानात् Pandeya (131) reads तदनभिधानात्.
13. Here again Wezler (246.5) reads सङ्गदोषनिवृत्तिं.
14. V reads सर्वाभ्यावरणात् above सर्वाभ्यावहणात्. D °आवहनात्, sec. m. °आवरणात्
15. D सलिलौघसुत्रणं, sec. m. सलिलौघस्तृणं

वा स्वमूर्तिसंसृष्टं सर्वमेवाभ्यावहति[1], एवमयं कालो गर्भाद्बाल्यम्, बाल्यात्कौमारम्, कौमाराद्यौवनम्, यौवनात्स्थाविर्यम्, स्थाविर्यान्मरणम्, तथा बीजान्मूलं मूलादङ्कुरमिति वहति[2]। तथा चाह—

यामेव प्रथमां रात्रिं गर्भे भवति पूरुषः[3] ।
सम्प्रस्थितस्तां भवति स गच्छन्न निवर्तते ॥

तस्मादोघसामान्यादोघः[4] कालः। स खल्वयं योगी कालमवजित्य पदार्थान्तराभावं मन्यमानस्तामेव भूमिं कैवल्यमिति मन्यते[5]। देहभेदे च कालमनुप्रविशति, ततश्च पुनरावर्तते।

यदा तु सत्यपि कालसामर्थ्ये भावानामुत्पत्तिः भाग्यान्यपेक्षते। कस्मात्? तत्सन्निधानेऽप्य[6]प्रादुर्भावात्। सत्यपि साधनसामर्थ्ये कालविशेषे च कस्यचिदुत्पत्तिर्भवति कस्यचिन्नेति। तस्मादस्तिकारणान्तरं यदपेक्ष्य भावानामुत्पत्तिरनुत्पत्तिश्च। किञ्च अभ्युत्थानानुपपत्तिप्रसङ्गात्। कालमात्रात्फलं भवतीत्येतदिच्छतः शास्त्रोक्तेषु क्रियाविशेषेष्वभिषेचनव्रतोपवासाग्निहोत्रादिष्वभ्युत्थानं न स्यात्। कस्मात्? आनर्थक्यात्[7]। अस्ति च। तस्मान्न कालनिमित्ता भावानामुत्पत्तिः[8]। किञ्च तदनुविधानात्। दृश्यन्ते खल्वपि प्रकृत्युपादानकालाविशेषेऽपि[9] भाग्यविशेषात् फलविशेषाः। तस्मात्तत्संस्कार[10] एव कारणम्[11]। तदेकदेशश्चाप्रकृतिविकारभूतो भोक्तेत्येतस्माद्दर्शनात्सङ्गद्वेषनिवृत्तिं[12] लभते। सा चतुर्थी तुष्टिर्वृष्टिरित्यभिधीयते।

कथं पुनर्वृष्टिरिति?

उच्यते—सर्वसत्त्वाप्यायनात्। यथा हि जीर्णानामपि[13] तृणलतादीनां वृष्टिं प्राप्य पुनराप्यायनं भवति, एवमेव[14] सर्वेषां प्राणिनां भाग्यविपरिणामात्पुनराप्यायनं भवति। तस्माद् वृष्टिसाम्याद्[15]

---

[1] D एवाभ्यावहति, sec. m. एवाभ्यवहरति

[2] D वहति, sec. m. वदन्ति

[3] Both Chakravarti (157.15) and Wezler (246.12) read पुरुषः, but that makes the 6th letter पु short against the requirements of a श्लोक metre. (All the Mss read पूरुषः.)

[4] P K ओषसामान्याद् D दोषसामान्याद्

[5] V गृह्णाति D मन्यते, sec. m. गृह्णाति

[6] V सन्निधाप्ये° instead of सन्निधानेऽप्य°

[7] P अनर्थक्यात् Chakravarti (157.24) reads अनर्थकत्वात्.

[8] D कालनिमित्ताभावानाम्

[9] Chakravarti (157.26) reads कालविशेषेऽपि.

[10] Chakravarti (157.26) adds न before तत्संस्कारः.

[11] P करणम्

[12] As previously, here too Wezler (246.26) reads सङ्गदोषनिवृत्तिं.

[13] P not clear Chakravarti (158.1) and Pandeya (131) read शीर्णानामपि.

[14] D एवमेव, sec. m. एवमेषां

[15] D वृष्टिसाम्याद्, sec. m. वृष्टिसामान्याद्

भाग्याख्या तुष्टिर्वृष्टिरित्यभिधीयते। शास्त्रमप्याह—"वृष्टिर्वृष्टिरिति श्रिय एवोपनिपातमधिकुरुते। सा हि वृष्टिव[1]त्सर्वमाप्यायति" इति[2]। स खल्वयं योगी भाग्या[3]न्यवजित्य तन्महिम्ना जगदशून्यं दृष्ट्वा पदार्थान्तरस्याभावं मन्यमानस्तामेव भूमिं कैवल्यमिति गृह्णाति। स तस्यामेव देहभेदे लीयते। ततश्च पुनरावर्तत इति।

आह—कालभाग्ययोरप्रतिपत्तिः, समाख्यापरिज्ञानात्। प्रकृत्यात्मकस्य तावद्योगिनोऽष्टौ प्रकृतयो विषय इत्युक्तं पुरस्तात्। उपादानात्मकस्य च पृथिव्यादीनि महाभूतानि। कालभाग्ययोस्तु न तथोक्तम्। तस्माद्वक्तव्यं कस्य तत्त्वस्यैषा समाख्येति?

उच्यते—न, उक्तत्वात्। प्रागेवैतदपदिष्टं[4](181.5f.) न कालो नाम कश्चित्पदार्थोऽस्ति। किं तर्हि? क्रियासु कालसंज्ञा[5]। ताश्च[6] करणवृत्तिरिति प्रतिपादितम्। न चान्या वृत्तिर्वृत्तिमतः। तस्मात्करणचैतन्यप्रतिज्ञाः[7] कालात्मका[8] इति। भाग्यसंज्ञा तु धर्माधर्मयोः। तौ च बुद्धिधर्माविति प्रागपदिष्टम् (का॰ 23)। तस्माद् भाग्यवादी बुद्धिचैतनिक इति।

आह—न, तुष्ट्यन्तरत्वात्[9]। प्रकृतित्वान्महान्पूर्वं प्रकृत्याख्यायां तुष्टाववरुद्धः। तस्येदानीं तुष्ट्यन्तरत्वेन परिकल्पनं नातिसमञ्जसमिति।

उच्यते—महांस्तर्हि पूर्वतुष्टिविषयभावादपकृष्यत इति। अथवा कार्यकरणवृत्तिं[10] क्रियारूपां वृत्तिमद्द्योत्यां[11] परिकल्प्य तस्यां[12] कालत्वमयमाह। महतश्च रूपं धर्मादिकं[13] महतोऽर्थान्तरं भाग्यमिति {भाग्यवान्}[14]। अथवा बाह्य एवायं कालः कर्मकारणं निर्दिश्यते। तत्र चान्येऽपि

---

1. D वृष्टिवत्, sec. m. वृष्टिः स
2. K V °माप्याययतीति
3. D भाग्यन्य्, sec. m. भाग्यान्य्
4. D उपदिष्टं (not very clear), sec. m. अपदिष्टं
5. D कालसंख्या, sec. m. कालसंज्ञा
6. D ताश्च, sec. m. सा च
7. All the Mss read कारणचैतन्य°. Pandeya (132), followed by Tripathi (517), reads °चैतन्यप्रतिज्ञः (कालात्मकः).
8. P V कालात्मक
9. D तुष्ट्यन्तरत्वात्, sec. m. तुष्ट्यन्तरं
10. I follow Tripathi (517) and Wezler (247:20), both of whom read कार्यकरणवृत्तिं in place of कार्यकरणवृत्तिक्रियारुपां, which latter is the reading in all Mss.
11. D वृत्तिमद्द्योत्यां, sec. m. वृत्तिमद्भ्योऽत्यां(?) Wezler (247.20) suggests the emendation वृत्तिमद्भ्यो भिन्नां.
12. D sec. m. अस्यां
13. D रुपं धर्मादिकं, sec. m. रूपमधर्मादिकं
14. Wezler (247.22) deletes भाग्यवान्. I agree with him.

स्वमतिपरिकल्पितपदार्थान्तरात्मभावग्राहा[1] एवातिसांख्याः[2] प्रवादिनः[3] प्रतिक्षिप्ता बोद्धव्या इति ।

अपर आह, प्रकृतिचैतनिकः[4] प्रधानभाववादी । उपादानकालभाग्यवादिनो[5] महदहङ्कारतन्मात्रवादिन इति । तदेतदप्रसिद्धत्वादयुक्तम्[6] । न हि महदहङ्कारतन्मात्रलक्षणाः प्रकृतय उपादानकालभाग्यभावेन प्रसिद्धाः । तस्मादिदमप्ययुक्तम् । एवमेता आध्यात्मिका[7] श्चतस्रस्तुष्टयः ।

बाह्या विषयोपरमात् पञ्च च[8] नव तुष्टयोऽभिहिताः ॥ का॰ 50/3-4 ॥

चशब्दोऽवधारणार्थः[9] । अव्युत्पन्नात्मविचारस्य[10] योगिनो विषयदोषदर्शनमात्रात्सङ्गद्वेषनिवृत्ति[11]र्बाह्या तुष्टिः । तत्र यदाऽर्जनदोषमवगच्छति, न तावत्सर्वस्याभिजातिरस्तीति अर्थिनाऽवश्यं विषयार्जने वर्तितव्यम् । तेषामस्वाभाविकत्वात्क्वचिदेवावस्थितिरित्युक्तं प्राक् (24.3f., 33.7)। किञ्च सप्रत्यनीकत्वात्[12] । स्वाभाविकमवस्थानं विषयाणाम[13]परिकल्प्यापि यदा प्रतिग्रहादिभिरर्जनं प्रत्याद्रियते, तदप्ययुक्तम् । कुतः? सप्रत्यनीकत्वात्[14] । एवमपि नास्ति कश्चिदप्रत्यनीको विषयार्जनोपाय इति[15] तद्विघातेऽवश्यं प्रयतितव्यम् । स च यदि प्रयतमानः[16] प्रत्यनीकिविघातं कुर्यात्, परोपघातेनात्माऽनुग्रहानुष्ठानाच्छास्त्रविरोधः । यस्मादाह—

---

[1] There is a small gap after °भावग्राहा in P and V. Chakravarti (158.20) leaves a blank here as if some words are missing. But in our view no omission is evident.

[2] Chakravarti (158.20) reads एवैते for एवाति°.

[3] D एवातिसांख्याः प्रवादिनः, sec. m. एवाभिसंख्याप्रवादिनः

[4] D sec. m. प्राकृतिकः

[5] P K प्रधानभावाशाद्युपादान°   V प्राधानभावाशाद्युपदान°   D प्रधानभावाशाद्युपादान°, sec.m. प्रधानात्मभववाद्युपादान°   Raghavan (15(2).8) reads प्रधानभाववादी, and so separates it from उपादानकाल°. I follow him.

[6] All the Mss read तदेतदपसिद्ध°. I follow Raghavan (15(2).8), who is followed by Wezler (247.26) and Tripathi (518) too.

[7] P आध्यात्मिक्यस्

[8] V °रमाच्च पञ्च for °रमात् पञ्च(च)   Chakravarti (158.25) omits च.

[9] D धारणार्थः, sec. m. ऽवधारणार्थः

[10] D अव्युत्पन्नात्मविचारस्य, sec. m. अव्युत्पन्नात्मनात्मविचारस्य

[11] V सङ्गद्वेषनिवृत्तिर्   D सङ्गदोषनिवृत्तिर्, sec. m. सङ्गद्वेषनिवृत्तिर्

[12] D संप्रति अनेकत्वात्, sec. m. सप्रत्यनेकत्वात्

[13] V विषयानाम°

[14] D संप्रत्यनेकत्वात्, sec. m. सप्रत्यनेकत्वात्

[15] V इत्यतस् for इति

[16] P K D प्रतियतमानः

न तत्परस्य सन्दध्या[1]त्प्रतिकूलं यदात्मनः ।
एष संक्षेपतो धर्मः कामादन्यः प्रवर्तते ॥

पुनरप्याह—

प्राणिनामुपघातेन योऽर्थः समुपजायते ।
सोऽनपेक्षैः[2] प्रहातव्यो लोकान्तरविघातकृत् ॥
तस्मात्संघातमात्रत्वात्सत्त्वादीनां घटादिवत् ।
आब्रह्मणः परिज्ञाय देहानामनवस्थितिम् ॥
इतस्त्यं सद्भिरादीप्तं तृणोल्काचपलं[3] सुखम् ।
सुदृढैर्न[4] निपातव्यं[5] दुःखैर्देहान्तरोद्भवैः ॥

अथ पुनरयं प्रत्यनीकैर्विहन्यते, ततोऽस्य विषयाभावः । सुखार्थं च प्रवृत्तस्य भूयिष्ठं दुःखमेवेत्येतस्माद्दर्शनान्माध्यस्थ्यं लभते, सा[6] पञ्चमी तुष्टिः सुतारमित्यभिधीयते ।

कथं पुनः सुतारमिति?

उच्यते—सुखमनेनोपायेन[7] तरन्ति विषयसंकटमिति सुतारम् । यदा तु योगी[8] पूर्वदोषाधिगमेऽभिजात्या वा यत्नार्जितविषयत्वे[9] सति रक्षादोषमुपन्यस्यति । कथम्? भोक्तृभोग्यभावाऽव्यतिरेकात्[10] सर्वप्राणिसाधारणा विषयाः, तस्मात्तेषां रक्षा विधेया । तस्यां च प्रवर्तमानो यदि परमुपहन्यात्[11] तदा पूर्वोक्तदोषः, अथात्मानम्, विषयाभावः[12]। रात्रिन्दिवं च तदेकाग्रमनसः सुखार्थं प्रवृत्तस्य भूयिष्ठं दुःखमेवेत्येतस्माद्दर्शनान्माध्यस्थ्यं लभते । सा षष्ठी तुष्टिः सुपारमित्यभिधीयते ।

कथं पुनः सुपारमिति?

---

1. D सन्दद्यात् Wezler (284.12) reads सन्दध्या, but the Mss (K and V), which he thinks give this reading, do not, in our view.
2. D सोऽप्यपेक्षैः, sec. m. सोऽनपेक्षैः
3. D तृणोल्का च पलं, sec. m. तृणोल्का चपलं
4. Chakravarti (159.17) reads सदृढैः.
5. D sec.m. निमातव्यं
6. D adds सा पञ्चमी ... °माध्यस्थ्यं लभते (291.11–292.12) in the margin below the text.
7. D writes a letter after सुख and then deletes it to make it सुखमनेनो°.
8. D sec. m. योगी सति
9. V विषयत्वे च
10. D °भावाविव्यतिरेकात्, sec. m. °भावाव्यतिरेकात्
11. P उपरुन्यात् Pandeya (133) reads उपरुन्ध्यात्.
12. Tripathi (521) omits विषयाभावः ... भूयिष्ठं.

उच्यते—सुखमनेन पारं विषयार्णवस्य प्रयान्तीति। यदा तु सति पूर्वदोषेऽसति[1] वा ग्रामनगरनिगमसन्निवेशाद्वप्रप्राकारपरिखानुष्ठानात्प्रहरणावरणसान्निध्यात्सामाद्युपायानुष्ठानाद्वा[2] कृतविषयरक्षो योगी क्षयदोषमुपन्यस्यति। कथम्?

येन द्रव्येण मोहान्धा[3] रन्तुमिच्छन्ति[4] देहिनः।
तदेवैषां विनाशित्वाद् भवत्यरतिकारणम् ॥
यत्नोपात्ताः सुगुप्ताश्च विषया विषयैषिणाम्।
पश्यतामेव नश्यन्ति बुद्बुदाः[5] सलिले यथा ॥
न तदस्ति जगत्यस्मिन्भूतं स्थावरजङ्गमम्।
प्रत्यक्षतोऽनुमानाद् वा विनाशो यस्य नेक्ष्यते ॥
तस्माद्विनाशिष्वासक्तां[6] पुत्रदारगृहादिषु।
ममेति बुद्धिं यत्नेन बुद्धिमान्विनिवर्तयेत् ॥

इति[7]। एतस्माद्दर्शनान्माध्यस्थ्यं लभते। सा सप्तमी तुष्टिः सुनेत्रमित्युच्यते[8]।

कथं पुनः सुनेत्रमिति?

उच्यते—सुखमनेनात्मानं कैवल्याऽवस्थां नयन्तीति सुनेत्रम्। यदा तु सत्सु पूर्वदोषेषु प्रसङ्गदोषमुपन्यस्यति। कथम्? या[9] प्राप्तविषयाणामिन्द्रियाणां तदभिलाषान्निवृत्तिस्तत्सुखम्। विषयजिघृक्षया च दुःखम्। प्राप्तिरप्येषामनुपशान्तये तदुपभोगकौशलाय च। यस्मादाह—

यदा प्रबन्धाद्विषयी विषयानुपसेवते।
तदास्य (तेष्व)भिप्रायः[10] सुतरां सम्प्रवर्तते ॥
अतोऽपि येन[11] पुरुषः शमयेद् वडवानलम्[12]।

---

1. All the Mss read सति. I follow Raghavan (15(2).8).
2. All the Mss read ग्रामनगरनिगमसन्निवेषाद्युपायानुष्ठानाद्वा. D adds in the right margin: (°सन्निवेशाद्) वप्रप्राकारपरिखानुष्ठानात्प्रहरणावरणसान्निध्यात्सामा(द्युपायानुष्ठनाद्वा).
3. D writes and deletes येन द्रव्येण मो after कथं, and writes a new line beginning with येन द्रव्येन मोहान्धा as a śloka.
4. P मोहात्पारन्तुमिच्छति ... ।
5. All the Mss read बुद्बुधाः. D बुद्बुधाः इव देहिना, sec. m. बुद्बुधाः
6. P K आसक्तानां D आसक्तानां, sec. m. आसक्तां
7. D adds इति in the left margin.
8. V उपदिश्यते
9. P om. या D या प्राप्त°, sec. m. चाप्राप्त°
10. P तदास्येत त्त्वभिप्रायः K V D तदास्येते त्व् I follow Wezler's emendation (249.27). I may, however, add that I would equally like to emend the reading as तदास्यैतेष्वभिप्रायः.
11. V अतोऽपितो
12. V बडवानलम्

नेन्द्रियाण्युपभोगेन विषयेभ्यो निवर्तयेत् ॥
तस्माद्विषयसम्पर्कमसमर्थं निवर्तने ।
इन्द्रियाणां परिज्ञाय निरासङ्गमतिश्चरेत् ॥

इति । एतस्माद् दर्शनान्माध्यस्थ्यं लभते । साऽष्टमी तुष्टिः सुमारीचमित्युच्यते[1] ।

कथं सुमारीचमिति?

उच्यते—अर्चतेः पूजार्थस्य शोभनमर्चितं विषयसङ्गनिवृत्तस्य योगिनोऽवस्थानं भवति । यदा तु (सत्सु (?))[2] पूर्वदोषेषु हिंसादोषमुपन्यस्यति । कथम्? अनुपहत्यान्यभूतानि[3] विषयभोगानुपपत्तेः । उपभोगो हि नाम मनोज्ञाभ्यवहारः, स्त्रीसेवा, हयगजनरादिभिर्यानमित्येवमादि । तत्र मनोज्ञाभ्यवहारचिकीर्षुणा तदङ्गानां गोऽजाऽविबलीवर्दस्त्रीपुरुषादीनामवश्यमुपघातः कार्यः । अनुपघाते वा विषयानुपपत्तिप्रसङ्गः । स्त्रियमासेवमानेनान्यासां[4] स्त्रीणां मातृपितृभ्रातृप्रभृतीनां च (...)[5], अन्यथा तदभावः । (एवं) हयादीनाम् । तस्मादुपभोगार्थिनाऽवश्यमन्योपघातः कार्यो निहितदण्डेन[6] वा विषयोपभोगस्त्याज्य इति । आह च—

यथा[7] यथा हि विषयो वृद्धिं गृह्णाति[8] देहिनाम् ।
अपघातस्तदङ्गानां तथैवास्य विवर्धते ॥
तस्मादनिच्छन्नन्येषां प्राणिनां देहपीडनम् ।
सन्तोषेणैव वर्तेत त्यक्तसर्वपरिच्छदः ॥
सत्यवाचः प्रशान्तस्य सर्वभूतान्यनिच्छतः[9]।
भावान्धकारान्तज्ञानम[10]चिरेण प्रवर्तते ॥

---

[1] V अपदिश्यते for उच्यते

[2] Tripathi (524), who anticipates Wezler (250.8), adds सत्सु to make the meaning clear. I follow him.

[3] D अनपहत्या°

[4] V स्त्रियामा°

[5] Here the phrase that should fill in the blank, should be: अवश्यमुपघातः कार्यः.

[6] V निहत° Raghavan (15(2).8) construes it thus: कार्यः; निहित°.

[7] D writes and deletes च after आह च, and writes a new line beginning with यथा, as a śloka.

[8] D गृह्णाति, sec. m. गच्छन्ति Wezler (250.16) prefers गच्छति in place of गृह्णाति, which latter is the reading in P, K and V.

[9] Tripathi (525) suggests (अ)निघ्नतः in place of (अ)निच्छतः.

[10] V भावान्धकारान्तरज्ञान D भावान्धकारा°, sec. m. भवान्धकारा° Chakravarti (161.8) reads भावान्धकारान्न.

इति। एतस्माद्दर्शनान्माध्यस्थ्यं लभते। सा नवमी तुष्टिरुत्तमाऽभयमित्यपदिश्यते। कथम्? उत्तमं हि प्राणिनां सर्वेभ्यो भयेभ्यो हिंसाभयमिति[1] तदपगमादुत्तमाऽभयमिति[2]।

आह, अर्जनरक्षणलक्षणयोरपि तुष्ट्योः परोपघातदोषः, अपदिष्टोऽस्यामपि[3] च। तत्र कथमनयोर्विशेषः प्रतिपत्तव्य इति?

उच्यते— न, विषयभेदात्। तत्र येषामर्जनरक्षणे प्रत्याद्रियते विषयी, तदर्थिनां[4] प्रत्यनीकाना[5]मवश्यमभिघातोऽनुष्ठातव्य इत्यादावुक्तम्। इह तु येषामेवार्जनरक्षणे तदनुपघातेनाशक्यो विषयोपभोग इत्येतद्विवक्षितम्। तस्मादसंकीर्णमेतदित्येवमम्भःप्रभृतयो नव विषयेभ्यः सङ्गद्वेषनिवृत्तिहेतवो[6] व्याख्याताः। ते ज्ञानविरहितानां योगिनां तुष्टिशब्दवाच्यतां लभन्ते। ज्ञानिनां तु वैराग्यपर्वसंज्ञिताः[7] स्वासु स्वासु तत्त्वभूमिषु सिद्धा[8] एवेति ॥ 50 ॥

आह—प्रागपदिष्टम्[9] (का॰ 47) अष्टधा सिद्धिरिति तदिदानीमभिधीयतामिति। उच्यते—

ऊहः शब्दोऽध्ययनं दुःखविघातास्त्रयः[10] सुहृत्प्राप्तिः।
दानं च सिद्धयोऽष्टौ (का॰ 51/1-3)

तत्रोहो नाम यदा प्रत्यक्षानुमानागमव्यतिरेकेणाभिप्रेतमर्थं विचारणाबलेनैव प्रतिपद्यते, साऽऽद्या सिद्धिः तारकमित्यपदिश्यते। तारयति संसारार्णवादिति तारकम्।

---

1. V om. इति
2. D उत्तमा भयम्　　Chakravarti, by mistake it seems, reads उत्तमाभयमिति। परोपघातदोषः अपदिष्टोऽस्यामपि च। तत्र कथमनयोर्विशेषः प्रतिपत्तव्य इति। उच्यते—न, विषयभेदात्। आह—अर्जनलक्षणयोरपि तुष्टयोः. This order of the sentence is obviously incorrect.
3. P K V परोपघातदोषाः अपदिष्टोऽस्याम्　D पुरोपघातदोषाः अपदिष्टोऽस्याम्, sec. m. पुरोपघातदोषोऽस्यां
4. P writes and deletes the following passage from folio 112a, which follows तद् of तदर्थिनां : (तद्) अस्य संज्ञायां रस्यमेव रम्यकम्। दानं यदा तु दौर्भाग्यं दानेनातीत्य पूर्वेषां त्रयाणामन्यतमेन साधयति साष्टमी सिद्धिः सदाप्रमुदितमित्यभिधीयते। सुभगो हि सदाप्रमुदितो भवति तस्माद्दौर्भाग्यनिवृत्तिः सदाप्रमुदितम्। इत्येवमेताः सिद्धयोऽष्टौ. व्याख्याताः। एतासां संश्रयेणाभिप्रेतमर्थं यतः संसाधयन्तीत्यतः पूर्वांचार्यगतं मार्गमारुरुक्षुर्तत्प्रवणः स्यादिति (cf. 297.5.8ff.).
5. D प्रत्यनेकानाम्, sec. m. प्रत्यनेकाशानां
6. Here too Wezler (251.4) proposes सङ्गदोष॰.
7. P K V read ॰संज्ञितां.　D ॰सज्ञतां.　I follow Raghavan (15(2).8).
8. V सिद्ध
9. D अपदिष्टम्, sec. m. अपरिशिष्टम्
10. V ॰विघातत्रयं　D ॰विघातास्त्रयः, sec. m. ॰विघातत्रयं

यदा तु स्वयं प्रतिपत्तौ प्रतिहन्यमानो गुरूपदेशात्प्रतिपद्यते, सा द्वितीया सिद्धिः सुतारमित्यपदिश्यते[1]। कथम्? सुखमनेनाद्यत्वेऽपि भवसंकटात्तरन्तीति[2]। यदा त्वन्योपदेशादप्यसमर्थः प्रतिपत्तु**मध्ययनेन** साधयति सा तृतीया सिद्धिः तारयन्तमि[3]त्यपदिष्यते। तदेतत्तारणक्रियाया अद्यत्वेऽपि[4] अव्यावृत्तत्वा[5]न्महाविषयत्वा[6]त्तारयन्तमित्यपदिष्टम्[7]। त एते त्रयः साधनोपा(या) यैराब्रह्मणः[8] प्राणिनो ऽभिप्रेतमर्थं प्राप्नुवन्ति। आह च—"साक्षात्कृतधर्माण ऋषयो बभूवुः। तेऽवरेभ्यो[9]ऽसाक्षात्कृतधर्मेभ्य[10] उपदेशेन[11] मन्त्रान्सम्प्रादुरुपदेशाय ग्लायन्तोऽवरे बिल्मग्रहणायेमं[12] ग्रन्थं समाम्नासिषुर्वेदं च[13] वेदाङ्गानि च"(1) इति। बिल्मं भासनं[14] सम्यक्प्रतिभासाय विशिष्टः संकेत उक्तः। एषां तु साधनोपायानां प्रत्यनीकप्रतिषेधाय[15] **दुःखविघातत्रयम्**। दुःखानि त्रीण्याध्यात्मिकादीनि। तत्र[16] चाध्यात्मिकानां वातादीनां सिद्धिप्रत्यनीकानामायुर्वेदक्रियानुष्ठानेन[17] विघातं कृत्वा पूर्वेषां त्रयाणामन्यतमेन साधयति, सा चतुर्थी सिद्धिः प्रमोदमित्यभिधीयते। कथम्? निवृत्तरोगा हि प्राणिनः प्रमोदयन्त[18] इति कृत्वा।

---

1. D सुतरां, sec. m. सुतारम्
2. D तरन्तीति, sec. m. तारयतीति
3. D अपि in place of इति
4. Chakravarti (162.2) reads आश्रयत्वेऽपि.
5. D अव्यावृतत्वान् Chakravarti (162.2) reads अव्यावृतत्वात्. Raghavan's correction (15(2). 8) agrees with the reading (of the Mss) adopted by us.
6. D °विषयत्वात्, sec. m. °विषये (तारयन्तम्)
7. Chakravarti (162.3) reads अपदिश्यते for अपदिष्टम्.
8. All the Mss read साधनोपायैर्. I follow Wezler (251.21).
9. D परेभ्यो
10. D साक्षात्कृत° V क्षात्कृत°
11. D encircles न of उपदेशेन.
12. D बिल्मग्रहण येमं, sec. m. विकल्पप्रहाणाय इमं
13. V om. च D adds च in the right margin.
14. Chakravarti (162.6) reads शासनं for भासनं.
15. D प्रत्यनेकप्रति°
16. P तत्रा
17. V आयुर्वेदविहितक्रिया° D आयुर्वेदक्रिया°, sec. m. आयुर्वेदविहितक्रिया°
18. V प्रमोदन्त D encircles य of प्रमोदयन्त.

---

(1) Cf. निरुक्त 1.20

यदा त्वाधिभौतिकानां मानुषादिनिमित्तानां सिद्धिप्रत्यनीकानां सामादिना यतिधर्मानुगुणेन[1] वोपायेन पूर्वेषां[2] त्रयाणामन्यतमेन साधयति, सा पञ्चमी सिद्धिः प्रमुदितमित्यभिधीयते[3]। कथम्? अनुद्विग्नो हि प्रमुदित इति कृत्वा।

यदा तु शीतादीन्याधिदैविकानि द्वन्द्वानि सिद्धिप्रत्यनीकानि स्वधर्मानुरोधेन प्रतिहत्य पूर्वेषां त्रयाणामन्यतमेन साधयति, सा षष्ठी सिद्धिर्मोदमानमित्यभिधीयते। कथम्? द्वन्द्वानुपहता[4] हि प्राणिनो मोदन्त इति कृत्वा।

सुहृत्प्राप्तिः। यदा तु कुशलसंस्पृष्टं सन्मित्रमाश्रित्य सन्देहनिवृत्तिं लभते, सा रम्यकमिति सप्तमी सिद्धिरपदिश्यते। रम्यो हि लोके सन्मित्रसम्पर्कः। तस्य संज्ञायां(1) रम्यमेव रम्यकम्।

दानम्। यदा तु दौर्भाग्यं दानेनातीत्य पूर्वेषां त्रयाणामन्यतमेन साधयति साऽष्टमी सिद्धिः सदाप्रमुदितमित्यभिधीयते[5]। सुभगो हि सदाप्रमुदितो भवति। तस्माद्दौर्भाग्यनिवृत्तिः सदाप्रमुदितम्। इत्येवमेताः सिद्धयोऽष्टौ व्याख्याताः। एतासां संश्रयेणाभिप्रेतमर्थं यतः संसाधयन्ती[6]त्यतः पूर्वाचार्यगतं[7] मार्गमारुरुक्षुस्तत्प्रवणः स्यादिति।

आह—कः पुनरत्र हेतु[8]र्येन पुरुषार्थत्वाविशेषे सति गुणानां सर्वसिद्धिनिमित्तत्वं न भवतीति[9]?

उच्यते—यस्मात्

सिद्धेः पूर्वोऽङ्कुशस्त्रिविधः ॥ का॰ 51/4 ॥

साध्यप्रतिपत्तिसामर्थ्यसामान्यमङ्गीकृत्याह **सिद्धेरिति**। **पूर्वो** विपर्ययाशक्तितुष्टिलक्षणो[10]ऽङ्कुश इवाङ्कुशः, निवर्तनसामान्यात्। नित्यप्रवृत्तस्यापि प्रधानात्सिद्धिस्त्रोतसो विपर्ययाशक्तितुष्टिप्रति-

---

1. V °आनुगुणे
2. Tripathi (528) inserts विघातं कृत्वा before पूर्वेषां.
3. D प्रमुदितम् sec. m. प्रमोदम्
4. V द्वानुपहता
5. V अपदिश्यते for अभिधीयते D अभिधीयते, sec. m. अपदिश्यते
6. D संसादयन्तीति, sec. m. संसाधयन्तीति
7. P पूर्वाचार्यागतं
8. P पुनरहेतुर्
9. P सर्वसिद्धिनिमितं त्वनुभवति V सर्वत्र सिद्धिनिमित्तत्वं न भवति
10. D विपर्ययःशक्ति°

---

(1) Cf. पा. सू. 4.3.147

बन्धात्सर्वप्राणिष्वप्रवृत्तिर्भवति । विपर्यया[1]त्तावत्स्थावरेषु । ते हि मुख्यस्रोतसो[2] विपर्ययात्मानः । अशक्तेस्तिर्यक्षु । ते हि तिर्यक्स्रोतसोऽशक्त्यात्मानः[3] । तुष्टि[4]र्देवेषु । ते ह्यूर्ध्वस्रोतसस्तुष्ट्यात्मानः । मानुषास्त्वर्वाक्स्रोतसः संसिद्ध्यात्मानः । तस्मात्त एव तारकादिषु प्रवर्तन्ते सत्त्वरजस्तमसां चाङ्गाङ्गिभावनियमाद्विपर्ययाशक्तितुष्टिभिः प्रतिहन्यन्त इति[5] न सर्वेषां सर्वदा सिद्धिर्भवति । अत एतदुक्तं **सिद्धेः पूर्वोऽङ्कुशस्त्रिविध** इति । यथा च सिद्धेः विपर्ययाशक्तितुष्टयः प्रतिपक्षाः, एवं सिद्धिरपि विपर्ययादीनाम् । सा ह्युत्पन्ना सर्वानेतान्निवर्तयति । कथम्? अविपरीतज्ञानं विपर्ययमतीतानागतवर्तमानेषु सन्निकृष्टेषु विप्रकृष्टेषु[6] इन्द्रियग्राह्येष्वतीन्द्रियेषु[7] चाप्रतिघातादशक्तिम्, पुरुषस्य प्रकृतिविकारव्यतिरिक्तस्य दर्शनात्सर्वासु भूमिषु तुष्टिम् । एवमेतानि स्रोतांसि प्राणादयः[8] कर्मयोनयश्च व्याख्याताः । एतेषां मार्गेऽवस्थापनात्परां सिद्धिं कैवल्यलक्षणामचिरेण[9] प्राप्नोति ।

आह च—

योनीनां सप्रमाणानां सम्यङ्मार्गे नियोजनात् ।
स्रोतसां च विशुद्धत्वान्निरासङ्गमतिश्चरेत् ॥

इति ॥ 51 ॥

॥ इति[10] युक्तिदीपिकायां नवममाह्निकम् ॥

---

1. P deletes the first two lines of its folio 113b (of the English language) preceding विपर्ययात्, and they read as follows : महदहंकारतन्मात्रेन्द्रियभूतत्वेनावस्थाय परमर्षिहिरण्यगर्भादीनां शरीरमुत्पादयन्ति । षट्सिद्धिक्षयकालोत्तरं तु गुणविमर्दवैचित्र्याद् रजस्तमोवृत्त्यनुयाति संसारचक्रं प्रवृत्तम्।। न विना भावैर्लिङ्गम्।। देवमनुष्यतिर्यग्भावेन व्यवतिष्ठत इति वाक्यशेषः।। (cf. 297.7-11)
2. All the Mss read मुख्याः स्रोतसो. I follow Tripathi (530) and Wezler (253.1).
3. D अशक्यात्मानः, sec. m. अशक्त्यात्मानः
4. PKV तुष्टिर् D तुष्टिर्, sec.m. तुष्टेः
5. V इत्यतो
6. D writes and deletes व्य before विप्रकृष्टेषु.
7. D इन्द्रियग्राह्येष्व्, sec. m. इन्द्रिय ग्राह्येष्व्
8. Tripathi (531) suggests the alternative reading प्रमाणादयः.
9. D adds अचिरेण in the right margin.
10. D om. इति

दशमम्-एकादशमाह्निकम्

एवं यत्पूर्वमपदिष्टं "संयोगकृतः सर्गः" (का॰ 21) इति तद्व्याख्यातम् । अत्रेदानीमाचार्याणां विप्रतिपत्तिः । (...) धर्मादीनां शरीरमन्तरेणानुत्पत्तेः शरीरस्य च धर्माद्यभावे निमित्तान्तरासम्भवादुभयमिदमनादि । तस्मादेकरूप एवायं यथैवाद्यत्वे[1] तथैवातिक्रान्तास्वनागतासु कालकोटिषु सर्ग इति । आचार्य आह—नैतदेवम् । किं तर्हि? प्राक्प्रधानप्रवृत्तेर्धर्माधर्मयोरसम्भवो बुद्धिधर्मत्वात्[2]स्याश्च प्रधानविकारत्वात्[3] । ततस्तद्व्यतिरिक्तं शब्दाद्युपलब्धिलक्षणं[4] गुणपुरुषान्तरोपलब्धिलक्षणं चार्थमुद्दिश्य सत्त्वादयो महदहङ्कारतन्मात्रेन्द्रियभूतत्वेनावस्थाय[5] परमर्षिहिरण्यगर्भादीनां शरीरमुत्पादयन्ति । षट्सिद्धिक्षयकालोत्तरं[6] तु गुणविमर्दवैचित्र्याद्रजस्तमोवृत्त्यनुपाति संसारचक्रं प्रवृत्तम्[7] (इति) ।

न विना भावैर्लिङ्गम्[8] (का॰ 52/1)

देवमनुष्यतिर्यग्भावेन व्यवतिष्ठत इति वाक्यशेषः[9] ।

न विना लिङ्गेन भावसंसिद्धिः[10] । (का॰ 52/2)

संसिद्धिरत्र निष्पत्तिरभिप्रेता ।

लिङ्गाख्यो भावाख्यस्तस्माद् द्विविधः प्रवर्तते सर्गः[11] ॥ का॰ 52/3-4 ॥

सोऽयं लिङ्गाख्यो भावाख्यश्च षट्सिद्धिक्षयकालादूर्ध्वं[12] भवति । गुणसमनन्तरं त्वधिकारलक्षणः । तस्माद् द्विधा सर्गोऽधिकारलक्षणो भावाख्यश्च । येषां तु धर्माधर्मशरीरयोः

---

1. D यथैवादित्ये
2. V बुद्धिरूपत्वात् D बुद्धिधर्मत्वात्, sec.m. बुद्धिरूपात्वात्
3. All the Mss read °विकारित्वात्. I follow Chakravarti (164.6).
4. P K V शब्दाद्युपलब्धिगुणलक्षणं D शब्दाद्युपलब्धिलक्षणं, sec. m. शब्दाद्युपलब्धिगुणलक्षणं Wezler (255.9-10) proposes शब्दाद्युपभोगलक्षणं.
5. V महदङ्कार°
6. Tripathi (534) proposes °क्षण° for °क्षय°.
7. V संसारप्रवृत्तम्
8. On the right of लिङ्गम् D adds लिङ्गेन विना किं.
9. V वाक्यविशेषः
10. Tripathi (534) suggests निर्वृत्तिः for संसिद्धिः.
11. V omits kārikā 52/3-4 (लिङ्गाख्यो ... सर्गः).
12. Tripathi (534) again reads °क्षण° for °क्षय°.

पर्यायेण हेतुहेतुमद्भावस्तेषां "कारणमस्त्यव्यक्तम्" (का० 16) इत्यत्र प्रतिविहितम्। येऽपि च सांख्या एवमाहुः[1] "धर्माधर्माधिकारवशात्प्रधानस्य प्रवृत्तिः" इति, तेषामन्यतरपरिकल्पनाऽऽनर्थक्यमिति[2]। कथम्? यदि तावदधिकार एवायं प्रधानप्रवृत्तयेऽलम्, किं[3] धर्माधर्माभ्याम्? अथ तावन्तरेणाधिकारस्य[4] प्रधानप्रवृत्तावसामर्थ्यम्, एवमपि किमधिकारेण? तयोरेव प्रवृत्तिसामर्थ्यात्। तस्मादधिकारभावनिमित्तो द्विधा सर्गः। तत्र यथेदं शरीरमविभक्तं धर्मार्थकाममोक्षलक्षणासु क्रियासु विभक्तं भवेदित्यतः पाण्यादिविकल्पोऽस्य[5] भवति, एवं सत्त्वसर्गोऽप्यविभक्तो धर्मार्थकाममोक्षलक्षणासु क्रियासु समर्थो[6] भवेदिति ॥ 52 ॥

अष्टविकल्पो दैवस्तैर्यग्योनश्च[7] पञ्चधा भवति।
मानुष्यश्चैकविधः (का० 53/1-3)

अष्टौ विकल्पा अस्य सोऽयम**अष्टविकल्पः**। अष्टप्रकारोऽष्टभेद इत्यर्थः। तद्यथा ब्रह्मप्रजापतीन्द्रपितृगन्धर्वनागरक्षःपिशाचाः। **तैर्यग्योनश्च[8] पञ्चधा भवति**—पशुमृगपक्षिसरीसृपस्थावराः। **मानुष्यश्चैकविधः**, जात्यन्तराऽनुपपत्तेः।

आह, किमेतावानेव भूतसर्गविकल्पः, आहोस्विदन्योऽस्तीति[9]?

उच्यते—विकल्पान्तरमस्त्येतेषामेव[10] स्थानानामन्तर्गणभेदात्। अयं तु[11]—

समासतो भौतिकः सर्गः ॥ का० 53/4 ॥

किम्? उपदिष्ट इति वाक्यशेषः। तत्र देवानां साध्यमरुद्रुद्रादिभेदात्[12]। तिरश्चां ग्राम्यारण्यादिभेदात्[13]। मानुषाणां च ब्राह्मणक्षत्रियविट्शूद्रभेदात्। उद्भिद्भेदश्च[14] विस्तरेणापदिश्यमान आनन्त्यमापादयेत्[15]। तस्मात्**समासतो** भूतसर्गोऽपदिश्यते ॥ 53 ॥

---

1. V एव in place of एवम्
2. V om. इति of °नर्थक्यमिति
3. P K किं च D encircles च of किं च.
4. All the Mss read तावदन्तरेणा. I follow Chakravarti (164.20).
5. V पाण्यादिविकल्पस्य
6. All the Mss read क्रियास्वसमर्थो, with P misspelling it as क्रियास्वसर्थो. I follow Pandeya (137).
7. V °योनिश्च
8. V तैर्यग्योनिश्
9. Tripathi (536) reads °ऽन्योप्यस्तीति.
10. D अस्त्य्°, sec. m. अप्यस्त्य्° in place of अस्त्य्° V (अस्त्ये)षामेव
11. D adds तु in the right margin.
12. P साध्यरुद्रुद्रादि° Chakravarti (165.9) reads साध्यरुद्रादि°.
13. D ग्रामारण्यभेदात्
14. P K V उद्भेदभेदाश्च D उद्भेदभेदाच्च I follow Pandeya (137).
15. All the Mss read °दिश्यमानमानन्त्यम्. I follow Chakravarti (165.11), who anticipates Pandeya (137). V reads अपादयेत् for आपादयेत्.

आह, विकल्पान्तरवचनम्, स्रोतोभेदात्। दैवमानुषतैर्यग्योना[1] इति त्रिविधो भूतानां[2] विकल्पोऽपदिश्यते[3]। स्रोतांसि तु चत्वार्युक्तानि। तस्माद्विकल्पान्तरं वक्तव्यमिति।

उच्यते—न, गुणधर्मसंग्रहसामर्थ्यात्। सत्त्वबहुला ऊर्ध्वस्रोतसः, रजोबहुला अर्वाक्स्रोतसः[4], तमोबहुलास्तिर्यक्स्रोतसो मुख्यस्रोतसश्च। तस्मादनयोरभेदेनोपदेशः।

आह—असुराद्युपसंख्यानं अभेदोपदेशो वा। असुरयक्षकिन्नरप्रेतानामुपसंख्यानं[5] कर्तव्यम्, इतरेष्वनन्तर्भावा[6]दभेदेन वोपदेशः[7] कार्यः, न तु दैवमानुषतिरश्चा[8]मिति।

उच्यते—न, उक्तेष्वेव तत्संग्रहात्[9]। असुराणां तावदैन्द्र एव स्थानेऽन्तर्भावः, पूर्वदेवत्वात्। पूर्वदेवा ह्यसुराः। किञ्च पर्यायेणेन्द्रत्वात्। बलिप्रभृतीनां[10] पर्यायेणेन्द्रत्वं श्रूयते। तथा यक्षाणां रक्षस्स्वेकरूपत्वात्[11]। किन्नरविद्याधराणां[12] गन्धर्वेषु, समानशीलत्वात्। प्रेतानां पितृष्वधिपतिसामान्यात्। तस्मात्त्रिविकल्प एव भूतसर्गः। स चायम्—

ऊर्ध्वं सत्त्वविशालः (का॰ 54/1)

ऊर्ध्वमित्यनेनाष्टौ देवस्थानान्याह। तत्रायं सर्गः **सत्त्वविशालः**। अत्र[13] च विशालग्रहणाद् वीप्सालोपो द्रष्टव्यः। ऊर्ध्वमूर्ध्वं[14] **सत्त्वविशालः**। पिशाचेभ्यो रक्षसाम्, रक्षोभ्यो[15] नागानाम्, नागेभ्यो गन्धर्वाणाम्, गन्धर्वेभ्यः पितॄणाम्, पितृभ्यस्त्रिदशानाम्, तेभ्यः प्रजापतीनाम्, तेभ्योऽपि ब्रह्मणः। एवं विशालग्रहणं समर्थितं भवति।

---

1. V दैवामानुष्य° D दैवमानुषतैर्यग्योना, sec. m. दैवमानुषतैर्यग्योनानि
2. Before भूतानां D writes and deletes रूपाणा.
3. Pandeya (138) reads विकल्प उपदिश्यते.
4. Before अर्वाक्स्रोतसो D writes and deletes a letter—perhaps च—which is not clear.
5. D adds, after असुराद्युपसंख्यानं, the phrase अभेदोपदेशो वासुरयक्षकिन्नरप्रेतानामुपसंख्यानं in the right margin, which phrase is absent in P, K and V. Chakravarti, Pandeya and Tripathi naturally omit this phrase, since they do not consult D.
6. All the Mss read अन्तर्भवाद्. I follow Chakravarti (165.16).
7. D अभेनोपदेशः for अभेदेनोप°
8. P K D दैवमानुषतिरश्च V दैवमानुष्यतिरश्च I follow Wezler (257.3), who reads °तिरश्चाम् instead of °तिरश्च.
9. All the Mss read तदसंग्रहात्. I follow Chakravarti (165.17).
10. P K V धन्विप्रभृतीनां D धन्विप्रभृतीनां, sec. m. बलिप्रभृतीनां
11. V ऐकरूपत्वात् for एकरूप°
12. D किंन्नर°, sec. m. किन्नर°
13. After सत्त्वविशालः। D adds अत्र च विशालग्रहणाद्वीप्सालोपो द्रष्टव्यः ऊर्ध्वमुर्ध्वं सत्वविशालः in the right margin. The line is absent in P K V.
14. D उर्ध्वं for ऊर्ध्वमूर्ध्वं
15. V रक्षेभ्यो

तमोविशालस्तु मूलतः सर्गः । (का॰ 54/2)

मूलतस्तु सर्गस्तमोविशालः[1]। पशुभ्यो हि मृगाणां प्रकृष्टतरं तमः। मृगेभ्यः पक्षिणाम्, पक्षिभ्यः सरीसृपाणाम्, सरीसृपेभ्यः स्थावराणाम्।

मध्ये[2] रजोविशालः (का॰ 54/3)

देवेभ्यस्तिर्यग्भ्यश्चावकृष्टासु भूमिषु यथा यथा सत्त्वतमसो[3]र्निर्ह्रास[4]स्तथा तथा रजसो[5] वृद्धिः। मनुष्या[6]स्तूभयोर्मध्यमिति तत्र परमः प्रकर्षो रजसः[7], अर्वाक्स्रोतसः सिद्धिरूपत्वादत्यन्तं क्रियाप्रवृत्तत्वात्। यथा च मानुषेषु रजःप्रकर्षः, एवं ब्रह्मणः स्थाने सत्त्वस्य, स्थावरेषु तमसः। स खल्वयम्—

ब्रह्मादिस्तम्बपर्यन्तः[8] ॥ का॰ 54/4 ॥

चतुर्दशभेदस्त्रिविकल्पः सत्त्वाद्यतिशयनिर्ह्रासविषयभावेन यः सर्गो व्याख्यातः ॥ 54 ॥

अत्र जरामरणकृतं दुःखं प्राप्नोति चेतनः पुरुषः । (का॰ 55/1-2)

जराकृतं मरणकृतं जरामरणकृतम्। तत्र जराकृतं तावद्यथा वलीतरङ्गितगात्रत्वम्[9], दण्ड[10]मन्तरेण चङ्क्रमणादिष्वप्रवृत्तिः, सर्वेन्द्रियाणां विषयोपभोगेष्वसामर्थ्यम्[11], प्रबलकासश्वासता, सास्राविलेक्षणता, दशनानामस्थिरत्वम्, वर्णविकृतिः, शैथिल्यमभिव्याहारसङ्गः[12], मन्दा स्मृतिरित्येवमादि। मरणकृतमपि पृथिव्यादीनां शरीरभावेनावस्थितौ सहभावं तित्यक्षतां[13] स्वभावभेदाद् धृतिसंग्रहपक्तिव्यूहावकाशदानादे[14]रुपकारस्य प्रच्युतिः। इन्द्रियाधिष्ठानविकाराच्छब्दस्पर्शरूपरसगन्धानां[15] सतामग्रहण-

---

1. Before सर्गस् D writes and deletes विशाल.
2. After मध्ये D adds पुनरयं सर्गो.
3. D सत्त्वतमसो
4. P निह्रासः
5. D रजसो, sec. m. रजसस्तु
6. V मानुष्यारन्
7. D रससः, sec. m. रजसः
8. V °स्तम्भ°
9. Chakravarti (166.11) reads बलि°. Pandeya (138) and Tripathi (539) read बली°.
10. D वलीतरङ्गितगात्रं त्वदण्डम्, sec. m. वलीतरिङ्गतमात्रत्वे दण्डम्
11. D विश्वोपभोगेष्व्°, sec. m. विषयोपभोगेष्व्°
12. D अभिहारसङ्गे, sec. m. अभिव्याहारसङ्गो Raghavan (15(2).8) suggests °भङ्गः instead of °सङ्गः.
13. D तितिक्षतां Pandeya (138), like Chakravarti (166.14-15) before him, reads सहभाव-प्रतिपक्षता.
14. P वृत्तिसंग्रहापन्थिव्यूहावकाशदानादे° K वृत्तिसंग्रहपन्थिव्यूहा° V वृत्तिसंग्रहपन्थिव्यूहावकाश्पदाना° D धृत्तिसंग्रहापक्तिव्यूहा° Chakravarti (166.15) reads स्थितिसंग्रहपक्ति°, while Pandeya (138) reads वृत्तिसंग्रहपन्थि°.
15. V च्छब्दस्पर्शरसरूपगन्धानां

मसतां च ग्रहणमभूताकारं सम्भवविपरीतं वा सर्वार्थानां ग्रहणम् । तद्यथा पौर्णमास्यां दक्षिणतः खण्डस्येन्दुमण्डलस्य, पिशाचादीनां पाण्डुरस्य[1] च नभस इत्यादि । तथा वातादिवैषम्यात्समुपजनितानेकप्रकारव्याधिः[2] प्रभ्रश्यमानसकलेन्द्रियवृत्तिः[3] स्रस्ताङ्गस्ताम्रपीतास्राविलेक्षणो भ्रमदाहश्वासादिपरिगतान्तर्मर्मसन्धि[4]र्जलार्थं दिशोऽवलोकयन् सब्रह्मलोकेष्वपि लोकेषु त्रातारमविन्दन् रागाद्यनेककालात्यक्ते[5]नात्मग्रहेणात्मकार्यकरणोपह्रियमाणबुद्धिर्मन्दमन्देष्वपि स्मृतिप्रलम्भेषु दयितजनस्यात्मन[6]श्चानुस्मरन्दशविधात्कुटुम्बाद्यः प्रभ्रश्यते[7] (... (?)) । सोऽयमवश्यम्भावी[8] सर्वसत्त्वानां प्रकृष्टोद्वेगकारी चाव्युत्पन्नश्चापरिहार्यश्चानियतकालश्च महात्मभिः परमर्ष्यादिभिरन्धतामिस्रशब्देनापदिष्टो[9] मरणकृतं[10] दुःखम् । तच्चेदं दुःखं प्रधानमहदहङ्कारतन्मात्रेन्द्रियभूतविशेषलक्षणस्य तत्त्वपर्वणश्चैतन्यासम्भवात्पुरुष एव चैतन्यशक्तियोगादुपलभते[11] । तदपि समीक्ष्योक्तमाचार्येण—

अत्र जरामरणकृतं[12] दुःखं प्राप्नोति चेतनः पुरुषः (का॰ 55) ।

इति ।

आह, जन्मकृतस्योपसंख्यानम् । यथैव हि जरामरणं चात्मनः प्रकृष्टोद्वेगकारकम्[13], एवं जन्मापि । तथा ह्ययं मातुरुदरे जरायुपरिवेष्टितशरीरोऽमेध्यपरिप्लुतो[14] व्रणमात्रायां[15] गर्भधान्यां यथासुखमसम्भवा[16]त्परिपीडितगात्रो[17] मातुरशनादिभिः पीड्यमानो गर्भवासे[18] दुःखमनुभूय

---

[1] Both Pandeya (138) and Tripathi (540) read पाण्डरस्य.

[2] D समुपजनितानेकप्रकार°, sec. m. समुपजनिताप्रतीकार°

[3] V प्रभ्रंश्य°

[4] P K V सादिपरिगमान्तमर्मसन्धिर् D ब्रह्मदाहश्वासादिपरिगमान्तमरणसंन्धिजलार्थं, sec. m. भ्रमदाहश्वासादिपरिगमात्तमरणसन्धिर्° I follow Chakravarti (166.20).

[5] Both Chakravarti (166.21) and Pandeya (139) wrongly understand P as reading °कालात्मपक्वेना°.

[6] D sec. m. दयिताजनस्य आत्मनश्

[7] V D प्रभृश्यते

[8] V अवश्यभावी

[9] D परमर्षादिभिर्°

[10] All the Mss read परणकृतो. I follow Chakravarti (166.24).

[11] Both Pandeya (139) and Tripathi (541) read उपलभ्यते.

[12] D जरामरणदुःखम्

[13] D not clear, sec. m. प्रकृष्टोद्वेगकारकम्

[14] P ऽमेध्यपरिस्नुतो

[15] Wezler (259.3) regards व्रणमात्रायां गर्भधान्यां as uncertain.

[16] D not clear, sec. m. यथासुखसम्भवात्

[17] P K परिपीतितगात्रो D परिपीतितगात्रो, sec. m. परिपीडितगात्रो

[18] V गर्भवास- Pandeya (139) and Tripathi (542) read गर्भावासे.

पश्चात्संवृतेनास्थिद्वयविवरेण निस्सृतो मूत्ररुधिरकलिलैः परिषिक्तगात्रो बाह्येन वायुना करैश्च संस्पर्शादसिभिरिव तुद्यमानः स्वसंवेद्यं दुःखमात्मनि वर्तमानमाख्यातुमसमर्थः स्वसुखदुःखसामान्या[1]त्परत्र परिकल्पितसुखदुःखबुद्धिभि[2]र्दृढगात्रैरुच्चितक्लेशै[3]श्च यात्यमानो जन्मदुःख[4]मनुभवति। तस्मात्तदपि वक्तव्यमिति।

उच्यते—न, अव्यापित्वात्[5]। मानुषतिरश्चामेव जन्मकृतं दुःखं भवति, न देवानाम्। कथम्? तडिद्विलसितवत्क्षणमात्रेण शरीरप्रादुर्भावात्। जरामरणकृतं तु तेष्वपि न निवर्तते। तस्मात्प्राधान्यादेतदेवोपदिष्टं नेतरदिति।

आह—इतरग्रहणाप्रसङ्गः, तुल्यत्वात्[6]। न[7] हि देवस्थानेषु जरामरणं वा श्रूयते। तस्मादव्यापित्वा[8]त्तयोरप्यग्रहणप्रसङ्गः।

उच्यते—न, (श्रुति)स्मृतिवचनात्[9]। जीर्यतेऽनयेति जरा(1) क्षय इत्युक्तं भवति। स च देवभूमावपि भवति। कस्मात्? एवं ह्याह—

रजोविषक्तिरङ्गेषु वैवर्ण्यं म्लानपुष्पता।
पतिष्यतां देवलोकात्प्राणिनामुपजायते॥

शक्रादीनां व्याधिश्रवणाच्छरीरक्षयः। एवं ह्याह—"त्वाष्ट्रीयं साम भवति इन्द्रं क्षाममपि न[10] सर्वभूतानि प्रस्वापयितुं नाशक्नुवं[11]स्तमेतेन साम्ना त्वाष्ट्रीयेणास्वापयत्[12]"(2) इति। तथा प्रजापतेर्वायुरक्षयीत्[13]। दक्षाभिशापाच्च सोमस्य क्षयः। तथा[14] "प्रजापतिर्वै सोमाय राज्ञे

---

1. D सुखदुःखसा (not clear), sec. m. सुखदुःखसामान्यात् In D's reading स्व of स्वसुख° is omitted.
2. D परिकल्पितसुखदुःखिभि, sec. m. परिकल्पितसुखदुःखबुद्धिर्
3. All the Mss read उचित°. Pandeya (139) and Tripathi (542) suggest उपचित. I follow Wezler (259.9).
4. D जन्मदुःखम्, sec. m. जन्मदृढदुःखम् (?)
5. D अव्याप्यत्वात्, sec. m. अव्यापितत्वात्
6. D adds तुल्यत्वात् न हि ... तयोरप्यग्रहणप्रसंगः in the right margin.
7. D adds कथं before न.
8. D अव्याप्यत्वात्, sec. m. अव्यापितत्वात्
9. I follow Wezler (259.17) in adding श्रुति before स्मृति°.
10. P K भवति इन्द्रक्ष्यामयि न V भवति इन्द्रक्ष्यामयिणण (?), sec. m. °क्ष्यामयिण न D भवति इन्द्रक्ष्याममयिन, sec. m. भगवतीन्द्रक्ष्यमायिनं Wezler (259.23) proposes भवतीन्द्रं वा क्ष्यामयिणं न.
11. V °नुवस्
12. D त्वाष्ट्रियन्स्वापयद्, sec. m. त्वाष्ट्रियं स्वापयेद्
13. V अक्षश्वीयत D अक्षयीत्, sec. m. अक्ष्यश्वयीत्
14. V omits तथा ... यक्ष्मादमुञ्चदित्यादि (302.16–303.6).

---

(1) पा॰ सू॰ 3.3.104
(2) ता॰ ब्रा॰ 12.5.18, 19

दुहितृरदान्नक्षत्राणि, स रोहिण्यामेवावसत्। तान्यनुपेयमानानि[1] पुनरगच्छंस्तस्मात् स्त्र्यनुपेयमाना[2] पुनर्गच्छति[3]। तान्यन्वागच्छत्तानि पुनरयाचत। तान्यस्मै न पुनरददात्। सोऽब्रवीत्सर्वेष्वेव समावद्[4] वसाथ ते पुनर्दास्यामीति स रोहिण्यामेवावसत्तं[5] तस्मिन्ननृते यक्ष्मोऽगृह्णात्। चन्द्रमा वै सोमो राजा यद्राजानं यक्ष्मोऽगृह्णात्तद्राजयक्ष्मस्य जन्म। स तृण[6]मिवाशुष्यत्। स प्रजापता अनाथत। सोऽब्रवी[7]त्सर्वेष्वेव समावद्वसाथ त्वाऽतो मोक्ष्यामीति। तस्माच्चन्द्रमाः सर्वेषु नक्षत्रेषु समावद्वसति। तं वैश्वदेवेन चरुणाऽमावस्यां रात्रीमयायजत्, तैनेनं[8] यक्ष्मा[9]दमुञ्चत्"(1) इत्यादि। तस्माद्देवभूमावपि जराकृतं दुःखमस्ति। तथा मरणकृतं भूम्यन्तरगमनात्तत्रोत्पन्नानां ययातिरुदाहरणम्। तथा गोपथब्राह्मणम्—"देवानां ह वा पञ्चदशशतान्यासंस्तानि ब्रह्मकिल्बिषादक्षीयन्त[10]। ततस्त्रयस्त्रिंशदेवास्त। तदेतदृचाप्युक्तम्[11] 'सोदर्याणां पञ्चदशानां शतानां त्रयस्त्रिंशदुदशिष्यन्त देवाः। शेषाः प्रासीयन्त[12]'"(2) इति। श्वेतारण्ये चान्तकस्य रुद्रेण कृतं दुःखमस्ती(3)ति।

(आह—आदिशब्दलोप)[13] उदाहरणमात्राद्वा[14]। अथवोदाहरणमात्रमेव दुःखानाम्। आदिशब्दलोपो वा वक्तव्यः[15]। जरामरणादिकृतं जरामरणकृतम्। (जरामरणमे)वोदाहरणत्वेनाभिप्रेतम्[16], न पुनर्दुःखान्तरम्। कस्मात्? तत्रापि ह्यादिशब्दलोप उदाहरणमात्रत्वात्[17] शक्यं[18] परिकल्पयितुमिदमिति।

---

1. P अनपेक्षमानानि K अनुपेयमानानि D अनुपीयमानानि, sec. m. अनुपेयमानानि
2. P not clear, though apparently it corrects into स्त्र्यनुपेयमाना.
3. Before पुनर्गच्छति D writes and deletes पुनरगच्छं.
4. D समासवद्, sec.m. समावद्
5. All the Mss read तत्.
6. D स तृणम्
7. D स प्रजापतानाथतमोऽब्रवीत्
8. P यजन्ते नैनं
9. All the Mss read यक्ष्मोद्.
10. D अक्षीयन्त, sec. m. अक्षयन्त
11. D एवास्त तदेतद् ऋचापि उक्तम्, sec. m. अवशिष्यन्त एते त्रयस्त्रिंशद्देवास्तदप्युक्तम्
12. D प्रामीयन्त
13. The phrase within ( ) is added by Wezler (260.15). I follow him.
14. K तदाहरण° Chakravarti (168.4) reads तूदाहरण°.
15. V द्रष्टव्यो D वक्तव्यः, sec. m. द्रष्टव्यः
16. Wezler (260.17) adds जरामरणम् before एवोदाहरण°. I follow him.
17. P K D आदिशब्दलोपयुदाहरण° V आदिशब्दलोपे उदाहरणमात्रात् I follow Chakravarti (168.6).
18. All the Mss read शक्त्या. I follow Wezler (260.18).

---

(1) काठक॰ सं॰ 11.3 (p. 100).

(2) Not found in the Bib. Ind. edition of गोपथब्राह्मण.

(3) Cf. वाल्मीकि-रामायण 3.29.27

उच्यते—न, सर्वदुःखास्पदत्वात्। सर्वेषां हि दुःखानामास्पदं[1] जरामरणकृतं साधारणम्। कथम्? तद्बन्धुमित्राणामप्युद्वेगहेतुत्वात्। न तु जन्मकृतम्, सम्बन्धिनां प्रहर्षनिमित्तत्वात्[2]। यतश्च ब्रह्मादौ स्तम्बपर्यन्ते[3] जगति जरामरणकृतं दुःखं न कश्चिदतिवर्तते[4]।

लिङ्गस्याऽऽविनिवृत्तेस्तस्माद् दुःखं समासेन ॥ का॰ 55/3-4 ॥

सुखलेशस्य तेन[5] व्याप्तत्वात् यावदिदं लिङ्गं न निवर्तते तावदवश्यं दुःखेन भवितव्यम्। पर्यायेण संस्कारस्य[6] सामर्थ्याल्लोकान्तरोपपत्तेः। तथा चाह—

सुखं च दुःखं च हि संशयं[7] च वारेणायं सेवते तत्र तत्र।

कथं पुनर्दुःखेन व्याप्तं सुखमिति चेत्, आब्रह्मणोऽशुद्धिक्षयातिशयोपपत्तेस्तस्याश्च[8] दुःखमूलत्वात्। प्रजापतेरक्षिरोगश्रवणात्, इन्द्रस्य कामोपतापात्[9], गौतमपरिभावाद्[10] रम्भायाश्चाभिशापात्पाषाणभावोपपत्तेः, नागानां सर्पसत्रायासात्, वैश्रवणस्य यक्षाभिशापा[11]द्धस्तिभावोपपत्तेः[12], जरत्कारोः पितॄणां च गर्तेऽवलम्बनात्, पिशाचानां मन्त्रौषधिमङ्गलप्रयोगै[13]रुद्वासनात्, मानुषतिरश्चां प्रत्यक्षत एव प्रायेण दुःखास्पदत्वात्। तस्मान्नास्ति संसारे कश्चित्प्रदेशो यत्र सह लिङ्गेनात्मानं[14] दुःखं नाऽवाप्नुयादित्यत एवं प्रयतितव्यं येन लिङ्गस्यैवात्यन्तोच्छेदः। ततो हि सर्वदुःखानामत्यन्तोपशमः[15]। समासग्रहणं तु सुखमोहयोरवकाशदानार्थम्। अन्यथा संसारे तयोरभाव एवाभ्युपगतः स्यात् ॥ 55 ॥

एवं यथावत्सर्गमुपाख्यायोपसंहरन्नाह—

---

[1] After आस्पदं D adds जरामरणकृतं च तथा साधा(र)णत्वात्.

[2] D प्रहर्षहेतुत्वात्, sec. m. प्रहर्षनिमित्तत्वात्

[3] V स्ताम्बान्ते

[4] D sec. m. अनुवर्तते

[5] P and K read ते for तेन.

[6] D sec. m. संस्कारा

[7] Wezler (161.1) suggests चानुशयं for च हि संशयं.

[8] Before तस्याश्च D writes and deletes तथा चाह.

[9] V इन्द्रकामो॰ for इन्द्रस्य कामो॰

[10] Chakravarti (168.15) reads ॰परिभवात्. Tripathi (546) also proposes परिभवात्.

[11] All the Mss read यस्काभि॰.

[12] P वास्तिभावो॰ K V D धस्तिभावोपपत्तिः I follow Raghavan (15(2).8).

[13] D औषधिमंगप्रयोगैर्, sec. m. औषधिमंगलप्रयोगैर्

[14] D सह लिङ्गेनात्मानं, sec. m. महालिङ्गेनात्मानं

[15] D sec. m. अत्यन्तोपयोगः

इत्येष प्रकृतिकृतः[1] प्रवर्तते[2] तत्त्वभूतभावाख्यः[3]।
प्रतिपुरुषविमोक्षार्थं स्वार्थ इव परार्थ आरम्भः ॥ का॰ 56 ॥

इतिकरणेन सर्गसमाप्तिं[4] द्योतयति। **एष** इत्युक्तमपि प्रत्याम्नायार्थं पुनरपेक्षते। प्रकृत्या कृतः **प्रकृतिकृतः**। अनेन वाक्यपरिसमाप्त्यर्थं वीतावीताभ्यां सिद्धं प्रधानास्तित्वमण्वादि[5]प्रतिषेधं चापेक्षते। प्रकृतिकृत एव, नाण्वादिकृतः। **प्रवर्तत** इति क्रियाप्रबन्धमाह[6]। (न)[7] प्रवृत्तो न प्रवर्त्स्यति। किं तर्हि प्रवर्तत एवानन्तानां[8] शरीरादिभावेन परस्परानुग्रहेण च। नेयं क्रिया कदाचिदपि भूतभविष्यद्रूपा भवति। किं तर्हि वर्तमानरूपा। यथा "वहन्ति नद्यस्तिष्ठन्ति पर्वताः"(1) इति। **तत्त्वभूतभावाख्य** इत्युक्तानां निगमार्थं प्रत्याम्नायं करोति। तत्त्वाख्यो महदादिर्भावाख्यो धर्मादिर्भूताख्यो व्योमादिः[9]। पुरुषं पुरुषं प्रति विमोक्षः प्रतिपुरुषविमोक्षः। तदर्थं **प्रतिपुरुषविमोक्षार्थम्**। सर्वपुरुषाधिकारनिबद्धायाः सर्वशक्तेर्निराकांक्षीकरणार्थमित्यर्थः। **स्वार्थ इव परार्थ आरम्भः**[10]। कार्यकरणभावेन[11]। तत्र कार्यस्य तावच्छब्दादेः स्वार्थ इवेन्द्रियाणां विषयभावः। इन्द्रियाणामप्राप्तविषयाणां लौल्यमधिष्ठानविकारानुमेयं स्वार्थमिव। करणानां च सङ्कल्पाभिमानाध्यवसायानां विषयद्वारिभावोपगमनम्, मनःप्रभृतीनां च स्वप्रवृत्तिविषयत्वम्, मनोऽहङ्कारयोश्च बुद्धौ स्वप्रवृत्त्युपसंहारः[12], बुद्धेश्च शान्तघोरमूढत्वं व्यवसायकर्तृत्वं च, सत्त्वरजस्तमसां च प्रकाशप्रवृत्तिनियमलक्षणैर्धर्मैः परस्परोपकारित्वम्[13]। न चैष स्वार्थः, सर्वस्यास्याचैतन्यात्। किं तर्हि? परार्थ एवायमारम्भः संघातत्वादिति।

---

1. D not clear, sec. m. प्रकृतिकृतः
2. V प्रवर्तेते
3. Gauḍapāda and Vācaspati read महादादिविशेषभूतपर्यन्तः for तत्त्वभूतभावाख्यः.
4. V सर्गपरिसमाप्तिं
5. Chakravarti (169.3) reads अवादि॰ for अण्वादि॰.
6. D क्रियाप्रधानं, sec. m. क्रियाप्रबन्धं
7. In adding न, I follow Raghavan (15(2).8), who anticipates both Wezler (261.21) and Tripathi (548).
8. Wezler (261.22) proposes एवानन्तरायं in place of एवानन्तानां, which latter is the reading in all Mss.
9. V धर्मादिः Wezler (261.27) proposes ब्रह्मादिः.
10. D परार्थारम्भः, sec. m. परार्थ आरम्भः Chakravarti (169.9) reads परार्थारम्भः.
11. PKV कार्यकारणभावेन D कार्यकारण भावेन, sec. m. कार्यकारणभावेन We read कार्यकरण॰ in consistency with what follows a few lines later.
12. V स्ववृत्त्युपसंहारो D encircles प्र of स्वप्रवृत्त्.
13. V परस्परोपिकारित्वम् Chakravarti (169.14) reads परस्परोकारित्वम्.

---

(1) म॰ भा॰ 3.2.123

आह—यदुक्तं (का॰ 56) प्रतिपुरुषविमोक्षार्थमयमारम्भ इति, तदयुक्तम्, आचार्यविप्रतिपत्तेः। प्रतिपुरुषमन्यत्प्रधानं शरीराद्यर्थं करोति। तेषां च माहात्म्यशरीरप्रधानं[1] यदा प्रवर्तते तदेतराण्यपि। तन्निवृत्तौ च तेषामपि निवृत्तिरिति पौरिकः सांख्याचार्यो मन्यते। तत्कथमप्रतिषिध्यैका प्रकृतिरभ्युपगम्यत इति?

उच्यते—न, प्रमाणाभावात्। न तावत्प्रत्यक्षत एव तच्छक्यं निश्चेतुम्, प्रधानानामतीन्द्रियत्वात्। लिङ्गं चासन्दिग्धं नास्ति। आप्ताश्च नो नाऽभिदधुः[2]। अतो मन्यामहे नैतदेवमिति। किञ्च एकेनार्थपरिसमाप्तेः। अपरिमितत्वादेतदेकं प्रधानमलं सर्वपुरुषशरीरोत्पादनाय। तस्मादन्यपरिकल्पनाऽऽनर्थक्यम्। परिमितमिति चेत्। अथ मतं[3] परिमितं प्रधानमिति। न, उच्छेदप्रसङ्गात्। एवमपि तस्योच्छेदः प्राप्तः क्षीरवत्। तथा च संसारोच्छेदप्रसङ्गः। किञ्च, अनवस्थाप्रसङ्गात्। एकस्येश्वरस्य योगिनो वेच्छायोगादनेकशरीरत्वम्। तत्परिमितत्वादयुक्तम्[4]। प्रतिशरीरं वा प्रधानपरिकल्पने प्रधानाऽनवस्था भवति। परिमितशरीरकारणत्वाभ्युपगमा[5]दन्यपरिकल्पनानर्थक्यम्। ततश्च प्रधानैकत्वमेव। तस्मादयुक्तं प्रतिपुरुषं प्रधानानीति[6]।

यत्तूक्तं (302.13) माहात्म्यशरीरप्रधानप्रवृत्तावितरेषां[7] प्रवृत्तिस्तन्निवृत्तौ निवृत्तिरित्यत्र ब्रूमः—न, अतिशयाभावात्। यथा क्षेत्रज्ञानां निरतिशयत्वादितरेतराऽप्रवर्तकत्वमेवमेषामपि, सातिशयत्वे वा प्रधानानुपपत्तिप्रसङ्गो वैषम्यात्। तस्माद्युक्तं प्रतिपुरुषविमोक्षार्थमेका प्रकृतिः प्रवर्तत इति ॥ 56 ॥

आह, तदनुपपत्तिराचैतन्यात्[8]। इहाचेतनानां घटादीनामुद्दिश्य (अर्थं (?)) प्रवृत्तिरदृष्टा। सा चेदियमचेतना[9] प्रकृतिरस्या अप्युद्दिश्य पुरुषार्थं प्रवृत्तिर्नोपपद्यते। भवति चेच्चैतन्यं तर्हि प्राप्तमस्याः। तत्र यदुक्तं (का॰ 56) प्रतिपुरुषविमोक्षार्थं प्रकृतेः प्रवृत्तिरिति, एतदयुक्तमिति।

उच्यते—न, दृष्टान्तोपपत्तेः।

---

1. P महात्म्य॰
2. D च नो नाभिदधुर्, sec. m. (आप्ता) श्चेदनेनाभिदधुर्
3. V मितं
4. P K D तत्परिमितादयुक्तम् V तत्परिमितात्मयुक्तम्
5. D परिमित॰, sec. m. अपरिमित॰
6. D प्रधानान्येति, sec. m. प्रधानानीति
7. V D महात्म्य॰
8. Pandeya (141) reads आचेतन्यात्.
9. D अचेना, sec. m. अचेतना

वत्सविवृद्धिनिमित्तं क्षीरस्य यथा प्रवृत्तिरज्ञस्य ।
पुरुषविमोक्षनिमित्तं तथा प्रवृत्तिः[1] प्रधानस्य ॥ का॰ 57 ॥

यथा क्षीरमचेतनं वत्सविवृद्धिमुद्दिश्य प्रवर्तते, एवं प्रधानमपि पुरुषविमोक्षमुद्दिश्य प्रवर्तते । न चास्य चैतन्यं स्यात् । साध्यत्वादयुक्तमिति चेत्, स्यान्मतम् । साध्यमेतत् किं क्षीरस्योद्दिश्य वत्सविवृद्धिं प्रवृत्तिः, अथ नेति? तस्मादुदाहरणं साध्यत्वादयुक्तमिति[2] । एतच्चायुक्तम् । कस्मात्? तदभावेऽभावात् तद्भावे च भावात् । यत्र नास्ति वत्सविवृद्धिस्तत्र न क्षीरस्य प्रवृत्तिरुपलब्धा । यत्रास्ति तत्रोपलब्धा[3] । यद्यस्मिन् सति भवति, तस्य तदर्था प्रवृत्तिर्दृष्टा । तद्यथा घटे कुम्भकारस्य । स चायमीदृशोऽस्माकमुद्देशोऽभिप्रेतः[4] यदुत तादर्थ्यम् । तस्मान्नास्त्युदाहरणसाध्यत्वमिति । असद्भावाभिधानात्सत्कार्यविरोध इति चेन्न, व्यक्तिपर्यायत्वात् । व्यक्तिपर्यायो हि स[5]दिति शास्त्रलोकप्रामाण्यात् । शास्त्रं तावत् "सत्तामात्रो महान् ।"(1) व्यक्तिमात्र इत्यर्थः । लोकेऽपि नास्त्यस्मिन्कूपे सलिलमित्युच्यते । न क्वचिदपि कूपे सलिलं नास्ति, अभिव्यक्तं तु तद् भवति । तस्मान्न सत्कार्यविरोधः । अदृष्टप्रेरणत्वादसिद्धिरिति चेत्, अथ मतम् । धर्माधर्मपेरितं क्षीरं प्रवर्तते न वत्सविवृद्ध्यर्थमिति । तदप्ययुक्तम् । कस्मात्? दोषसाम्यात् । धर्माधर्मावचेतनौ विवृद्धिकाले क्षीरं प्रवर्तयतस्तदवसाने च निवर्तयतः[6] । तस्मादित्थ[7]मपि परिकल्प्यमाने समानो दोषः । ईश्वरप्रेरणादिति चेत्, स्यान्मतम् । ईश्वरस्तत्र क्षीरं प्रवर्तयते वत्सार्थम्, न स्वयमिति । तदयुक्तम् । कस्मात्? प्रतिषेधात् । प्राक्प्रतिषिद्धम् (175.12ff.) ईश्वरकर्म । तस्मादिदमप्ययुक्तम् । एवं चेदवस्थितो दृष्टान्तः । वार्षगणानां तु यथा स्त्रीपुंशरीराणामचेतनाना[8]मुद्दिश्येतरेतरं प्रवृत्तिस्तथा प्रधानस्येत्ययं दृष्टान्तः ।

आह—कथमवगम्यते तादर्थ्यादुत्पन्नेन व्यक्तेन पुरुषस्य सम्बन्धो न पुनः सान्निध्यमात्रात्, (कृषि)[9]भिक्षुवदिति?

---

1. V प्रवृत्ति
2. D साध्यत्वादिति, sec. m. साध्यत्वादयुक्तमिति
3. V तत्र चोपलब्धा
4. V ऽभिप्रेत
5. PKD तद् V simply reads दिति, and thus omits तद्.
6. D प्रवर्तयतस्, sec. m. निवर्तयतस्
7. P not clear
8. V अचेतनाम् for अचेतनानाम्
9. All the Mss read भिक्षुवद्. Consistency requires insertion of कृषि (cf. 308.3).

---

(1) Cf. यो॰ भा॰ 2.19

उच्यते—न, अनपवर्गप्रसङ्गात्[1]। सान्निध्यमात्रात्पुरुषोपभोगमभ्युपगच्छतोऽनपवर्गप्रसङ्गः[2] स्यान्नित्यसान्निध्यात्। तस्मादयुक्तमेतत्। अप्रवर्तयितारं[3] प्रति कार्यकरणानां[4] प्रवृत्तिरयुक्तेति चेत्, स्यान्मतम्। अप्रवर्तयिता कृष्यादीनां भिक्षुः। अतो न तेषामपि तं प्रति प्रवृत्तिः। एवमप्रवर्तयिता कार्यकरणानां पुरुषः। तस्मात्तेषामपि तं प्रति प्रवृत्तिरयुक्तेति। एत[5]दपि (...) अत एवानैकान्तिकम्। वत्सो हि क्षीरस्याप्रवर्तयिताऽथ च तं प्रति तस्य प्रवृत्तिः। तस्माद्युक्तमेतत्पुरुषविमोक्षार्था[6] प्रकृतेः प्रवृत्तिर्न[7] चैतन्यप्रसङ्ग इति ॥ 57 ॥

आह[8]—न, अप्रवृत्तिप्रसङ्गात्। यदि प्रधानस्य पुरुषकैवल्यार्था प्रवृत्तिस्तेन तदभावे कैवल्यं सिद्धमेवेत्यप्रवृत्तिप्रसङ्गः। अथ केवले पुरुषे प्रधानं[9] प्रवर्तते न तर्ह्यस्य तदर्था प्रवृत्तिरिति।

उच्यते—

औत्सुक्यनिवृत्त्यर्थं यथा क्रियासु प्रवर्तते लोकः।
पुरुषस्य विमोक्षार्थं प्रवर्तते तद्वदव्यक्तम्॥ का॰ 58 ॥

प्रागेवैतदपदिष्टम् (का॰ 21)—यथा दृश्यदर्शनशक्तियुक्तत्वा[10]दन्यतराभावे च तयोरानर्थक्या[11]त्प्रधानपुरुषयोरितरेतरसम्बन्धं प्रत्यौत्सुक्यम्। दृष्टा चोपरमार्थाऽपि लोकस्यौत्सुक्यनिवृत्त्यर्था प्रवृत्तिः। तथा प्रधानस्याप्युपरमार्था प्रवृत्तिः। अथ दृश्यदर्शनशक्त्योरौत्सुक्यनिवृत्त्यर्थं प्रवर्तत इत्येकत्र कृतार्थत्वादितरेष्वप्रवृत्तिप्रसङ्ग इति चेत्, स्यादेतत्। प्रधानमेकस्य पुरुषस्यात्मानं प्रकाश्योपरमेदेवं[12] दृश्यदर्शनशक्त्योरौत्सुक्यनिवृत्तिर्भविष्यत्यप्रवृत्तिश्चेति।

एत[13]दपि नोपपन्नम्[14]। कस्मात्? दृष्टान्तान्तरसामर्थ्यात्[15]। तद्यथा किम्?

---

[1] P, K and D read अनवर्ग°.
[2] All the Mss read °गच्छतो नापवर्गप्रसगः. We emend it as we do in order to be consistent with what precedes.
[3] Chakravarti (171.3-4) reads अयुक्तमेतत् प्रर्वतयितारं.
[4] All the Mss read कार्यकारणानां. I follow Chakravarti (171.4).
[5] V त्येद for एतद्
[6] P विमोक्षार्थं
[7] D प्रकृतिर्न, sec. m. प्रकृतेः प्रवृत्तिर्न
[8] D writes and deletes आह after इति and then starts a new line beginning with आह.
[9] V प्रधानं प्रधानं
[10] V om. -शक्ति-
[11] D अनर्थक्यात्
[12] D प्रकाशो परमे देवं Pandeya (142) writes प्रकाश्योपरमेदे°.
[13] D चेति, sec. m. चेत्येतद्
[14] V अप्यनुपपन्नम्
[15] V दृष्यन्तरसा°

उच्यते—

रङ्गस्य दर्शयित्वा निवर्तते नर्तकी यथा नृत्यात्[1] ।
पुरुषस्य तथाऽऽत्मानं प्रकाश्य विनिवर्तते प्रकृतिः ॥ का॰ 59 ॥

तत्र[2] नानावर्णस्वभावविज्ञानानां प्रेक्षार्थिनां पुरुषाणां संघातो रङ्ग इत्युच्यते । नर्तक्याश्च[3] तदाराधना[4] नृत्तक्रिया[5]ऽनेकपुरुषार्था । यदि वाऽत्र कश्चिद् ब्रूयान्नृत्ताचार्येण[6] कुशीलवैर्वा दृष्टैवेयं[7] कस्मान्न निवर्तत[8] इति तच्चाप्यसौ कृत्स्नस्य रङ्गस्यौत्सुक्यानुपरमान्न निवर्तते । कथम्? अकृतार्थत्वात् । एवं सर्वपुरुषाणां कार्यकरणसम्बन्धेनौत्सुक्यवतां[9] निराकांक्षीकरणार्थं प्रवृत्ता प्रकृतिः कथमेकस्य[10] पुरुषस्यौत्सुक्यनिवृत्तौ कृतार्था स्यात्? तस्मान्नैकस्य पुरुषस्यात्मानं प्रकाश्य प्रकृतेर्निवृत्तिर्युक्तेति। अत्र च[11]...... ।

......कार्यकरणक्रियासाक्षी पुरुषः । तस्माद्ये भौतिकाः शिरःपाण्यादयो ये चाहङ्कारिकाः श्रवणादयो वचनादयः सङ्कल्पाभिमानाध्यवसायाश्च, ते लक्षणविपर्ययान्नाहं (...(?)) नाष्टौ प्रकृतयः (...(?)) । तदेतदेवं तत्त्वानामभ्यासैकाग्रमनसो यतेः पुनः पुनरभ्यासादेकस्याप्यस्मितारूपस्य परिकल्पितविषय(स्य) भेदप्रतिषेधमुखेन[12]—

नास्मि न मे नाहमित्यपरिशेषम् । (का॰ 64/2)

आप्रकृतेः प्रतिपक्षग्रहणात्—

---

1. P न्यत्यात् V नृत्तात्
2. V तत्र तत्र
3. Chakravarti (171.24) reads नर्तकी च.
4. D तदाराथना, sec. m. तदाराधना
5. P नृतुक्रिया॰
6. D नृतचरेण
7. K D दृष्ट्यैवेयं
8. P K D omit निवर्तत...रङ्गस्यौत्सुक्यानुपरमान्.
9. P K D कार्यकारण॰
10. V om. कथम्.... अत्र च... । ...कार्यकर-(309.8-10)
11. After अत्र च the rest of the folio 119a and the next one in P are left blank. In D the folio 55 after अत्र च, and the next one (i.e. 56) are left blank. The एकादशमाह्निकम् possibly began somewhere in this lost part.
12. All the Mss read परिकल्पितविषयभेद॰. I follow Wezler (265.7) in reading –विषयस्य॰.

अविपर्ययात् (का॰ 64/3')

प ञ्चस्रोतसोऽस्याऽविद्यापर्वणो[1] निवृत्तेः शान्तं ध्रुवं सकलभावा(भावा)नुबन्धप्रतिपक्षभूतं[2] धर्माद्याप्यायितस्य बुद्धितत्त्वस्यासन्दिग्धमविपरीतम्—

विशुद्धं केवलमुत्पद्यते ज्ञानम् ॥ का॰ 64/3'-4 ॥

आह, विशुद्धं[3] केवलम् (इति) । अन्यतराऽनभिधान[4]मर्थाभेदात् । यदेव विशुद्धं तदेव केवलमित्यर्थाभेदादन्यतरच्छक्य[5]मवक्तुमिति ।

उच्यते—गुणान्तररूपनिवृत्तिहेतुत्वात् । रजस्तमोधर्माणां तावद् प्रहणाच्छुद्धं[6] संशय-विपर्ययव्यतिरिक्तं[7] च केवलं[8] क्षेत्रज्ञपरिज्ञानेऽपूर्वभव[9] इति ॥ 64 ॥

आह, तत्समकालमेव शरीरस्य पातः प्राप्नोति । सति ध[10]... वस्थाने नाज्ञानहेतुकं[11] शरीरमिति ।

उच्यते—अज्ञानहेतुकं शरीरम्[12] । अथ चायं नानात्वदर्शी—

---

1. V पञ्चपर्वणोऽस्याविद्यास्रोतसो
2. P K D सकलभावानुबन्ध॰ V सकलभावावबन्धप्रति॰ I follow Wezler (265.11-12) in inserting भावा after सकलभावा and before -अनुबन्ध॰.
3. Chakravarti (172.10) reads प्राक् विशुद्धं after ज्ञानम् of the kārikā. Raghavan (15(2).9) suggests deletion of प्राक् after insertion of आह before विशुद्धं, which latter is in agreement with the reading (of the Mss) adopted here.
4. V भिदानम्
5. D अन्यतरशच्छक्यम्, sec. m. अन्यतरच्छक्यम् Raghavan (15(2).9) suggests ... शक्यं वक्तुमिति.
6. P ग्रहणाच्छुद्धं Raghavan (15(2).9) suggests अग्रहणात् शुद्धं.
7. D संशर्य॰, sec. m. संशय॰
8. Raghavan (15(2).9) puts a daṇḍa after केवलं, reading it, therefore, as केवलम्.
9. V परिज्ञानेऽपूर्वभाव D परिज्ञाने पूर्वभाव Raghavan (15(2).9) suggests अपुनर्भव in place of अपूर्वभव.
10. Commentary on kārikās 65, 66 and a part of 67 appears lost. P, K and D show lacuna after ध. V does not indicate any lacuna after ध.
11. D वस्थानेन अज्ञानहेतुकं V वावस्थानेनाज्ञान॰.
12. V चास्य शरीरम्

धर्मादीनामकारणप्राप्तौ[1] ।

तिष्ठति संस्कारवशाच्चक्रभ्रमवद् धृतशरीरः ॥ का॰ 67/2-4 ॥

यदा[2] शरीरान्तरोपार्जिता धर्मादयो न तावत्कारणम्, बुद्धिलक्षणमुपसम्प्राप्ता[3] (कृ)तार्थत्वाद्[4] बुद्धिश्च प्रधानं तदा **तिष्ठत्ययं** नानात्वदर्शी तस्य संस्कारस्य सामर्थ्यात्। को दृष्टान्तः? **चक्रभ्रमवद् धृतशरीरः**। तद्यथा कुम्भकारप्रयत्नविशिष्टेन दण्डेन घटादिनिष्पत्तियोग्यक्रिया चक्रस्य[5] भ्रमः, तेन तुल्यं **चक्रभ्रमवत्**। यथा चक्रभ्रमणं घटार्थं निष्पन्ने घटे पूर्वसंस्कारानुरोधान्न[6] निवर्तते, न च तदा निवृत्तमिति कृत्वा संस्कारक्षयेऽप्यवतिष्ठते, एवं सम्यग्दर्शनार्थं शरीरं सम्यग्ज्ञानाऽधिगमेऽपि न निवर्तते पूर्वसंस्कारवशात्। न च तदा निवृत्तमिति कृत्वा संस्कारक्षयेऽप्यवस्थाप्यत इति ॥ 67 ॥

यदा तु संस्कारक्षयस्तदा तन्निमित्तस्य[7] शरीरस्य भेदः। अतः—

प्राप्ते शरीरभेदे (का॰ 68/1)

धर्माधर्मौ कृतार्थौ कारणे[8] बुद्धिलक्षणे[9] लयं गच्छतः। यश्चास्य भूतावयवः शरीरारम्भकः, स[10] सर्वभूतेषु[11], भूतानि तन्मात्रेषु, इन्द्रियाणि तन्मात्राणि चाहङ्कारे, अहङ्कारो बुद्धौ, बुद्धिरव्यक्ते। सेयं तत्त्वानुपूर्वी[12] तदर्थं प्रधानादुत्पन्ना, परिसमाप्तेऽस्यार्थे[13] पुनः प्रधाने प्रलयं गच्छति। प्रधानमप्यर्थवशादेवास्य शरीराणि तेषु तेषु जात्यन्तरपरिवर्तेषु करोति। स चार्थश्चरितार्थः। अतः—

---

[1] Tripathi (559), perhaps to provide first पाद of the kārikā 67 (which is absent in YD), adds सम्यग्ज्ञानाधिगमात् before धर्मादीनामकारणप्राप्तौ. It is a plausible addition.

[2] Instead of यदा, P, K and D show a lacuna after य.

[3] P, K and D read बुद्धि ...... मुपसंप्राप्ता, thus showing a lacuna after बुद्धि.

[4] I follow Wezler's emended reading कृतार्थत्वाद् (266.2) instead of अकृतार्थत्वाद्, which latter is the reading in all Mss.

[5] D निष्पत्तियोग्यः क्रियाचक्रस्य

[6] Chakravarti (173.2) reads पूर्व संस्कारानु°. Raghavan (15(2).9) corrects it into पूर्वसंस्कारानु°, which agrees with the reading (of the Mss) adopted by us.

[7] V °क्षपस्तदा   P K D omit तदा.

[8] D तारणे

[9] V कारणबुद्धिलक्षणे

[10] V om. स

[11] Tripathi (561) reads सर्वेषु भूतेषु.

[12] P तत्त्वानपूर्वी

[13] P om. ऽस्यार्थे

चरितार्थत्वात् प्रधानविनिवृत्तौ[1] । (का॰ 68/2)

अतीन्द्रियमसंवेद्यं लघु सर्वत्र सन्निहितं प्रशस्तमनिर्मितं विशुद्धमक्षयं निरतिशयम्—

ऐकान्तिक[2]मात्यन्तिकमभयं[3] कैवल्यमाप्नोति ॥ का॰ 68/3-4 ॥

एतच्चावस्थानं बौद्धैर्निरुपधिशेषनिर्वाणलक्षण[4]मपवर्गो व्याख्यातः । एतत्परं ब्रह्म ध्रुवममलमभयम् । अत्र सर्वेषां गुणधर्माणां प्रतिप्रलयः । एतत्प्राप्य सर्वायासैः सर्वबन्धनैरनादिकालप्रवृत्तरागद्वेषैर्वियुक्तो[5] मुक्तो भवति । एतदर्थं ब्राह्मणा दयितपुत्रदारधन[6]सम्बन्धमपहाय[7] गुरुशुश्रूषापराः शरीरमरण्येषु[8] यातयन्ति कथं नामैकान्तिकमात्यन्तिकं च कैवल्यं स्यादिति । यत्रैवोत्थानं शास्त्रस्य तत्रैवोपसंहार आचार्येण कृतः ॥ 68 ॥

आह, किमर्थं पुनरिदं शास्त्रं केन वा पूर्वं प्रकाशितमिति?

उच्यते—यदुक्तं किमर्थमिति—

पुरुषार्थार्थम्[9] (का॰ 69/1')

कथं नामाज्ञानवशात्तत्संस्कारोपनिपतितानां[10] प्राणिनामपवर्गः स्यादित्येवमर्थम्—

इदं शास्त्रम्[11] (का॰ 69/1')

व्याख्यातम् । यत्तूक्तं केनेति ।

उच्यते—

---

1. V प्रधाननिवृत्तौ D not clear, sec. m. प्रधानविनिवृत्तौ
2. All the Mss read ऐकान्तम्. I follow Chakravarti's emended reading (173.15).
3. Tripathi (562) emends अभयं into उभयं.
4. P, K and D read निरुपाधिविशेषनिर्वाणलक्षणम्. V निरुपाधिविशेषनिवार्णमित्ययं Wezler's emended reading निरुपधिशेषनिर्वाणमित्ययं (266.24) also seems plausible.
5. All the Mss read °प्रवृत्तरागद्वेषवियुक्तो.
6. V °पुत्रदाराधन°
7. V °मवहाय
8. P not very clear, though perhaps it inclines towards अरण्येषु.
9. V पुरुषार्थम् Chakravarti (173.24) reads पुरुषार्थं.
10. All the Mss read °ओपनिपातितानां. I follow Pandeya (144).
11. Chakravarti (173.24) reads ज्ञानमिदं. Pandeya (144) and Tripathi (562) treat इदं शास्त्रम् not as a part of the karika 69, but as a part of the commentary.

गुह्यं परमर्षिणा समाख्यातम् । (का॰ 69/2) ।

गुह्यमिति गूहनीयं रहस्यमकृतात्मनां यमनियमेष्वनवस्थितानामादरा[1]दप्यनध्येयम् । **परमर्षि**र्भगवान्सांसिद्धिकैर्धर्मज्ञानवैराग्यैश्वर्यैराविष्टपिण्डो विश्वाग्रजः कपिलमुनिः । तेन कपिलमुनिना **समाख्यातं** सम्यगाख्यातं[2] चिराभ्यस्तस्य विद्यास्रोतसो[3] निर्वचनसामर्थ्यात् ।

स्यादेतत्, कथमिदं[4] गुह्यमिति?

उच्यते—कथं वेदं गुह्यं न स्यात्? भवाग्रोत्पन्नैरपि सनकसनातनसनन्दनसनत्कुमारप्रभृतिभिरनित्यानां—

स्थित्युत्पत्तिप्रलयाश्चिन्त्यन्ते यत्र[5] भूतानाम् ॥ का॰ 69/3-4 ॥

तत्र **स्थिति**स्तावद्रूपप्रवृत्तिफलनिर्देशेनो**त्पत्ति**रपि[6] "प्रकृतेर्महान्" (का॰ 22) इत्यादिः । **प्रलयो**ऽपि "अविभागाद्वैश्वरूप्यस्य[7]"(का॰ 15) इति वचनात् । औत्सुक्यानुपरमात्प्रकृतिपुरुषयोः स्थितिः । उत्पत्तिर्दृश्यदर्शनशक्त्योः[8] सापेक्षत्वात् । तथा चोक्तम्—

पुरुषस्य दर्शनार्थः[9] कैवल्यार्थस्तथा प्रधानस्य ।
पङ्ग्वन्धवदुभयोरपि संयोगस्तत्कृतः सर्गः ॥ (का॰ 21)

इति। प्रलयः—

प्राप्ते शरीरभेदे चरितार्थत्वात्प्रधानविनिवृत्तौ । (का॰ 68)

इति । अथवा **स्थितिः** क्षणभङ्गप्रतिषेधात्कालान्तरेष्वस्यानाशाद्[10], **उत्पत्ति**र्विपरिणामान्नाभूतप्रादुर्भावादकस्मादसम्भवात्, **प्रलयो**ऽपि निमित्तान्तरान्न तत्स्वाभाव्यादेव । भूतानामपि व्यक्तानां निष्पत्तिमतामिति यावत् । एवं च महदादयोऽपि परिगृहीता इति ।

आह, पुरुषादयस्तर्हि परित्यक्ताः । कथं वा भूतशब्द[11] इति?

---

1. V आराद् in place of आदराद्
2. D adds सम्यगाख्यातं in the right margin.
3. D चिराभ्यस्तविद्यास्रोतसो
4. After कथं D writes and deletes तद्गुह्यम्.
5. P adds च before यत्र.
6. All the Mss read रुपप्रवृत्तिः फलनिर्देशे°. I follow Chakravarti (174.6).
7. V वैश्वरूपस्य
8. D स्थित्युत्पत्तिदृश्यदर्शन°
9. Chakravarti (174.10) reads दर्शनार्थं.
10. D अस्या नाशात्
11. D भूतशब्दा

उच्यते—वितथप्रतिषेधार्थत्वात्। यावत् किञ्चिदवितथं भूतं तस्य[1] सर्वस्येह स्थित्यादय उच्यन्त इति।

(आह—) उत्पत्तिविनाशौ प्रतिषेधाविशेषात्[2]। एवमपि पुरुषादीनामुत्पत्तिप्रलयावपि[3] प्राप्नुतः। किं कारणम्? अविशेषादिति।

उच्यते—सम्भवतो विशेषणं भवति। तत्र स्थितिरेव पुरुषादीनाम्। इतरेषां तु स्थित्युत्पत्तिप्रलया इति विज्ञास्यामः॥ 69॥

आह, कस्मै पुनरिदं शास्त्रं परमर्षिणा[4] प्रकाशितमिति?

उच्यते—

एतत्पवित्रमग्र्यं मुनिरासुरये[5]ऽनुकम्पया प्रददौ[6]। (का॰ 70/1-2)

तत्र **पवित्रं** पावनात्(1)। **अग्र्यं** सर्वदुःखक्षपणसमर्थत्वात्। पवित्रान्तराणि पुनरेकदेशं[7] क्षालयन्त्यघमर्षणगङ्गादीनि। तस्मादिदमेवाग्र्य **मुनिरासुरयेऽनुकम्पया प्रददौ।**

आह, सम्प्रदानस्याकस्मिकत्वम्, धर्मादिनिमित्तानुपपत्तेः। न तावत्परमर्षेर्धर्मार्थं शास्त्रप्रदानमुपपद्यते[8], फलेनानभिष्वङ्गात्[9]। नार्थकामार्थम्, शिष्याणामनायासप्रसङ्गात्[10]। न मोक्षार्थम्, सांसिद्धिकेनैव ज्ञानेन तत्प्राप्तेः। न तद्विपरीतार्थम्[11], असम्भवात्। परिशेषादकस्मादाचार्यः शास्त्रनिधानं[12] प्रददाविति।

---

1. V भूतस्य for भूतं तस्य
2. All the Mss read उत्पत्तिविनाशप्रतिषेधा॰. Tripathi (565) reads उत्पत्तिविनाशाप्रतिषेधोऽविशेषात्.
3. D पुरुषादीनावुत्पत्ति॰
4. D महर्षिणा, sec. m. परमर्षिणा
5. D मुनिरासुनिरासुरये
6. V प्रददाविति
7. All the Mss read ॰रेकादशं. Raghavan (15(2).10) suggests पुनरेकदेशे. I follow Pandeya (145).
8. All the Mss read उत्पद्यते. Tripathi (566) reads उपपद्येत. I follow Raghavan (15(2).10), who anticipates Pandeya (145) and Wezler (268.21).
9. V तत्फलेनाभि॰
10. P K D अन्ना ... स॰ V अनाश्वास॰ The lacuna of P is filled with यास written by another hand. Raghavan (15(2).10) suggests ॰आयासप्रसङ्गात् instead of अनायास॰.
12. P K D तस्माद्विपरीतार्थं
12. V शास्त्रमासुरये

---

(1) Cf. निरुक्त 5.6

उच्यते—नाऽकस्मात्, किं तर्हि अनुकम्पया प्रददौ । आध्यात्मिकाधिदैविकाधिभौतिकैर्दुःखैः[1] पीड्यमानमासुरिमुपलभ्य, स्वात्मनि च ज्ञानसामर्थ्यात्सति कार्यकरणसम्प्रयोगे[2] दुःखानामप्रवृत्तिं[3] परिज्ञाय शिष्यगुणांश्च[4], कथं नाम यथा मम सुखदुःखेषु ज्ञानोपनिपातात्साम्यमेवमासुरेरपि स्यात्, तद्द्वारेणाऽन्येषामपि पुरुषाणां (इत्ये)वमनुकम्पया भगवान्परमर्षिः[5] शास्त्रमाख्यातवान् । यथा च परमर्षिरासुरये तथा—

आसुरिरपि (का॰ 70/3')

दशमाय कुमाराय भगवत्–

पञ्चशिखाय तेन च[6] बहुधा कृतं तन्त्रम् ॥ का॰ 70/3'-4 ॥

बहुभ्यो जनकवसिष्ठादिभ्यः समाख्यातम् । अस्य तु शास्त्रस्य भगवतोऽग्रे प्रवृत्तत्वान्न[7] शास्त्रान्तरवद्[8] वंशः शक्यो वर्षशतसहस्रैरप्याख्यातुम् ॥ 70 ॥

संक्षेपेण तु द्वाव(त्र निर्दिष्टौ । ततो)... हारीत(बाद्धलि)कैरातपौरिकर्षभेश्वरपञ्चाधिकरणपतञ्जलिवार्षगण्यकौण्डिन्यमूकादिक[9]–

शिष्यपरम्परयाऽऽगतम् (का॰ 71/1)

{भगवानीश्वरकृष्णश्च}[10] साहायकं शास्त्रम् । पूर्वाचार्यसूत्रप्रबन्धो[11] गुरुलाघवमनाद्रियमाणः[12] (पौरस्त्यान्वाख्यानव्याख्यान)[13]गर्भमतिप्रमादं ददातीति[14] ग्रन्थभूयस्त्वमुपजायते[15] । तच्चेदानीन्तनैः

---

[1] V °आधिभौतिकाधिदैविकैर् ...

[2] P K D कार्यकारण°

[3] Raghavan says (15(2).10) that if it is सति, then it should be प्रवृत्तिं; but if अप्रवृत्तिं is allowed to stand, then it should be असति in place of सति.

[4] K शिष्यगुणाश्च

[5] V भवान् rather than भगवान्

[6] V om. च

[7] K V and D read ऽग्रप्रवृत्तत्वान्न.

[8] All the Mss read शास्त्रान्तरव ... I follow Chakravarti (175.11).

[9] P K V हारीतवाड्वलिकैरातपौरिकौर्ष° and पातञ्जलि° V वार्षगण for वार्षगण्य D पौर्यक, sec. m. पौरिकौर्ष I follow Chakravarti (175.15-16).

[10] I agree with Wezler (269.13) in deleting भगवानीश्वरकृष्णश्च.

[11] P, K and D read °सूत्रप्रबंधे. V reads शास्त्रसम्बन्धे.

[12] V °माण

[13] This reading is suggested by Tripathi (568, fn.2). I follow him.

[14] P K D : अनाद्रियमाणपौरस्त्यान् व्याख्यानव्या ... न गर्भमति प्रमादं ददातीति V अनाद्रियमाणपौरस्त्यान्व्याख्यानव्याख्यानगर्भमतिप्रमादधतीति Wezler (269.14-15) renders the whole phrase thus: पुरातनाख्यानव्याख्यानवाक्यानुव्याख्यागर्भं अतिप्रमादं ददातीति.

[15] V ग्रन्थभूयस्त्वपजायते

प्राणिभिरल्पत्वादायुषो ग्रन्थत एव न सूपपादम्, किं पुनः श्रवणप्रयोगाभ्याम्। आह च—"चतुर्भिः प्रकारैर्विद्या सूपयुक्ता[1] भवति—आगमकालेन स्वाध्यायकालेन (प्रवचनकालेन) प्रयोगकालेन च। तत्र चास्यागमकालेनैवायुः पर्युपयुक्तं स्यात्"(1) (इति)। ततश्च शास्त्रानर्थक्यमित्यस्य मन्दधियामप्याशुग्रहणधारणप्रयोगसम्पत्स्यादिति[2] षष्टितन्त्रादुपाख्यानगाथाव्यवहितानि वाक्यान्येकत उपमृद्य[3] शिष्यानुकम्पार्थं यावत्—

ईश्वरकृष्णेन चैतदार्याभिः। (का॰ 71/2)

सप्तत्या—

संक्षिप्तमार्यमतिना (का॰ 71/3)

सर्वसत्त्वहितप्रवृत्तेन—

सम्यग् विज्ञाय सिद्धान्तम्॥ का॰ 71/4॥

कथं चास्य सम्यक्सिद्धान्त[4]विज्ञानस्याप्यनेकग्रन्थशतसहस्राख्येयं सांख्यपदार्थसतत्त्व[5]मखण्डमार्याणां सप्तत्या संक्षिप्तम्[6]॥ 71॥

आह च—

सप्तत्यां[7] किल येऽर्थास्तेऽर्थाः[8] कृत्स्नस्य षष्टितन्त्रस्य।
आख्यायिकाविरहिताः[9] परवादविवर्जिताश्चापि[10]॥ का॰ 72॥

---

1. V विद्योपयुक्ता Wezler (269.18) reads विद्योपयुक्ता in place of विद्या सूपयुक्ता.
2. V ग्रहधारणं प्रयोगसम्पत् ...
3. V D उपपाद्य
4. V चास्यासम्यक्सिद्धान्त॰.
5. V पदार्थसत्त्वं
6. All the Mss read संक्षिप्तवान्.
7. V सप्तत्याः
8. D तीर्थ for तेऽर्थाः
9. D आख्यायिका विरहिताः
10. V चेति for चापि

---

(1) Cf. म॰ भा॰ 1.1.1: चतुर्भिश्च प्रकारैर्विद्योपयुक्ता भवति आगमकालेन, स्वध्यायकालेन, प्रवचनकालेन, व्यवहारकालेनेति.

यतश्च नारायणमनुजनकवसिष्ठद्वैपायनप्रभृतिभिराचार्यैः[1] प्रधानपुरुषादयः पदार्थाः परिगृहीताश्चोपदिष्टाश्च प्रशस्ताश्चातः स्वभावतः प्रसिद्धमैश्वर्यस्य फलत ऋज्वार्यमार्ग[2]मलङ्कर्तुमिति भगवदीश्वरकृष्णेन पदार्थस्वरूपनिरूपणनिपुणसारमतिना परमर्ष्यादियथोक्तागमेन प्रमाणत्रयं पुरस्कृत्य तर्कदृशा विचारः कृतः। न चास्य मूलकनकपिण्डस्येव स्वल्पमपि दोषजातमस्तीति ॥ 72 ॥

आह च—

अज्ञानध्वान्तशान्त्यर्थमृषिचन्द्रमसश्च्युता[3] ।
मलिनैस्तीर्थजलदैश्छाद्यते ज्ञानचन्द्रिका ॥
इति सद्भिरसम्भ्रान्तैः कुदृष्टितिमिरापहा ।
प्रकाशिकेयं सर्वस्य[4] धार्यतां[5] युक्तिदीपिका ॥

स्फुटाभिधेया मधुरापि[6] भारती मनीषिणो नोपखलं विराजते ।
कृशानुगर्भाऽप्यभितो हिमागमे कदुष्णतां याति दिवाकरद्युतिः ॥
नयन्ति सन्तश्च यतः स्वशक्तितो गुणं परेषां तनुमप्युदारताम् ।
इति प्रयात्वेष मम श्रमः सतां विचारणाऽनुग्रहमात्रपात्रताम्[7] ॥

॥ इति युक्तिदीपिकायां सांख्यसप्ततिपद्धतौ चतुर्थं प्रकरणमेकादशं चाह्निकम् ॥
समाप्ता चेयं युक्तिदीपिकेति शिवम्[8]।

---

[1] D नारायणननुजनकवसिष्ठ॰, sec. m. नारायणमनुजनकबसिष्ठ॰

[2] P not clear

[3] V सृष्टिचन्द्रमसश् instead of मृषिचन्द्रमसश्

[4] P K सर्गस्य V सर्वस्य, sec. m. सर्गस्य D tends towards सर्गस्य. Raghavan (15(2).10) too suggests सर्वस्य.

[5] V धर्यतां

[6] V मधुरादपि

[7] V मात्रपात्रम्

[8] P reads सांख्यसप्ततिपद्धतौ ... चाह्निकम्। सम्पूर्ण कृतिरियं श्रीवाचस्पतिमिश्राणाम् शिवम् ओं तत्सत्। ओं हरि instead of शिवम्. V reads शुभम् instead of शिवम्।

Appendix-I

Complete Text of the *Sāṃkhyakārikā*

[Below is a complete text of the Sāṃkhyakārikā. It includes, importantly, (1) the kārikās as they are affirmed (by us) in the *Yuktidīpikā* kārikā text and (2) those which have *not* been found commented upon in the YD. The latter indication has been given in the footnotes. Also given in the footnotes are variant readings from other commentaries of the Sāṃkhyakārikā—Ed.]

दुःखत्रयाभिघाता ज्जिज्ञासा तदपघातके[1] हेतौ ।
दृष्टे साऽपार्था चेन्नैकान्ताऽत्यन्ततोऽभावात् ॥ 1॥

दृष्टवदानुश्रविकः स ह्यविशुद्धिक्षयातिशययुक्तः ।
तद्विपरीतः श्रेयान् व्यक्ताव्यक्तज्ञविज्ञानात् ॥ 2॥

मूलप्रकृतिरविकृतिर्महदाद्याः प्रकृतिविकृतयः सप्त ।
षोडशकस्तु[2] विकारो न प्रकृतिर्न विकृतिः पुरुषः ॥ 3॥

दृष्टमनुमानमाप्तवचनं च सर्वप्रमाणसिद्धत्वात् ।
त्रिविधं प्रमाणमिष्टं प्रमेयसिद्धिः प्रमाणाद्धि ॥ 4॥

प्रतिविषयाध्यवसायो दृष्टं त्रिविधमनुमानमाख्यातम् ।
तल्लिङ्गलिङ्गिपूर्वक[3]माप्तश्रुतिराप्तवचनं तु[4] । 5॥

सामान्यतस्तु दृष्टादतीन्द्रियाणां प्रसिद्धिरनुमानात्[5] ।
तस्मादपि चासिद्धं परोक्षमाप्तागमात् साध्यम्[6] ॥ 6॥

---

1. गौडपाद and माठर read तदभिघातके, while जयमङ्गला reads तदवघातके.
2. जयमङ्गला—षोडशकश्च.
3. This third पाद of the kārikā तल्लिङ्ग...पूर्वकम् is not commented upon in युक्तिदीपिका.
4. जयमंङ्गला and गौडपाद read आप्तश्रुतिराप्तवचनञ्च.
5. वाचस्पति reads प्रतीतिरनुमानात्.
6. युक्तिदीपिका comments upon it as साध्यम्. P and K in the कारिका text: सिद्धम्; see p. 106. माठर also साध्यम्; others—सिद्धम्.

अतिदूरात् सामीप्यादिन्द्रियघातान्मनोऽनवस्थानात् ।
सौक्ष्म्याद् व्यवधानादभिभवात् समानाभिहाराच्च ॥ 7॥

सौक्ष्म्यात्तदनुपलब्धिर्नाभावात् कार्यतस्तदुपलब्धिः[1] ।
महदादि तच्च कार्यं प्रकृतिविरूपं सरूपं च[2] ॥ 8॥

असदकरणादुपादानग्रहणात् सर्वसम्भवाऽभावात् ।
शक्तस्य शक्यकरणात् कारणभावाच्च सत्कार्यम् ॥ 9॥

हेतुमदनित्यमव्यापि सक्रियमनेकमाश्रितं लिङ्गम् ।
सावयवं परतन्त्रं व्यक्तं विपरीतमव्यक्तम् ॥ 10॥

त्रिगुणमविवेकि विषयः सामान्यमचेतनं प्रसवधर्मि ।
व्यक्तं तथा प्रधानं तद्विपरीतस्तथा च पुमान् ॥ 11॥[3]

प्रीत्यप्रीतिविषादात्मकाः प्रकाशप्रवृत्तिनियमार्थाः ।
अन्योऽन्याभिभवाश्रयजननमिथुनवृत्तयश्च गुणाः ॥ 12॥[4]

सत्त्वं लघु प्रकाशकमिष्टमुपष्टम्भकं चलं च रजः ।
गुरु वरणकमेव तमः प्रदीपवच्चार्थतो वृत्तिः ॥ 13॥

अविवेक्यादिः सिद्ध[5]स्त्रैगुण्यात् तद्विपर्ययाऽभावात् ।
कारणगुणात्मकत्वात् कार्यस्याव्यक्तमपि सिद्धम् ॥ 14॥

भेदानां परिमाणात् समन्वयात् शक्तितः प्रवृत्तेश्च ।
कारणकार्यविभागादविभागाद् वैश्वरूप्यस्य ॥ 15॥

कारणमस्त्यव्यक्तं प्रवर्तते त्रिगुणतः समुदयाच्च ।
परिणामतः सलिलवत् प्रतिप्रतिगुणाश्रयविशेषात् ॥ 16॥

संघातपरार्थत्वात् त्रिगुणादिविपर्ययादधिष्ठानात् ।
पुरुषोऽस्ति भोक्तृभावात् कैवल्यार्थं प्रवृत्तेश्च ॥ 17॥

जन्ममरणकरणानां[6] प्रतिनियमादयुगपत् प्रवृत्तेश्च ।
पुरुषबहुत्वं सिद्धं त्रिगुणादिविपर्ययाच्चैव[7] ॥ 18॥

---

[1] वाचस्पति reads तदुपलब्धेः.

[2] While गौडपाद and माठर agree with युक्ति॰. वाचस्पति reads प्रकृतिसरूपं विरूपञ्च.

[3] Not commented upon in. युक्ति॰; see p. 147, fn 11.

[4] Not commented upon in युक्ति॰; see p. 147, fn 11.

[5] वाचस्पति reads अविवेक्यादेः सिद्धिस्त्रैगुण्यात्तद्विपर्ययाभावात्.

[6] युक्ति॰ explains it as जन्म॰. जयमङ्गला, माठर, वाचस्पति and गौडपाद— all read जनन॰.

[7] गौडपाद, वाचस्पति, माठर and जयमङ्गला read त्रैगुण्यविपर्ययाच्चैव.

तस्माच्च विपर्यासात् सिद्धं साक्षित्वमस्य पुरुषस्य ।
कैवल्यं माध्यस्थ्यं द्रष्टृत्वमकर्तृभावश्च ॥ 19॥
तस्मात् तत्संयोगादचेतनं चेतनावदिव लिङ्गम् ।
गुणकर्तृत्वे[1] च तथा कर्तेव भवत्युदासीनः ॥ 20॥
[2]पुरुषस्य दर्शनार्थः कैवल्यार्थस्तथा प्रधानस्य ।
पङ्ग्वन्धवदुभयोरपि सयोगस्तत्कृतः सर्गः ॥ 21॥
प्रकृतेर्महांस्ततोऽहङ्कारस्तस्माद् गणश्च षोडशकः ।
तस्मादपि षोडशकात् पञ्चभ्यः पञ्च भूतानि ॥ 22॥
अध्यवसायो बुद्धिर्धर्मो ज्ञानं विराग ऐश्वर्यम् ।
सात्त्विकमेतद् रूपं तामसमस्माद् विपर्यस्तम् ॥ 23॥
अभिमानोऽहङ्कारस्तस्माद् द्विविधः प्रवर्तते सर्गः ।
ऐन्द्रिय एकादशकस्तान्मात्रः पञ्चकश्चैव[3] ॥ 24॥
सात्त्विक एकादशकः प्रवर्तते वैकृतादहङ्कारात् ।
भूतादेस्तान्मात्रः[4] स तामसस्तैजसादुभयम् ॥ 25॥
बुद्धीन्द्रियाणि [5]कर्णत्वक्चक्षूरसननासिकाख्यानि ।
[6]वाक्पाणिपादपायूपस्थाः कर्मेन्द्रियाण्याहुः ॥ 26॥
[7]सङ्कल्पकमत्र मनस्तच्चेन्द्रियमुभयथा समाख्यातम् ।
अन्तस्त्रिकालविषयं तस्मादुभयप्रचारं तत् ॥ 27॥

---

1. जयमङ्गला and माठर read गुणकर्तृत्वेऽपि.
2. गौडपाद, वाचस्पति, माठर, जयमङ्गला — all read पुरुषस्य दर्शनार्थं कैवल्यार्थं तथा प्रधानस्य.
3. वाचस्पति and जयमङ्गला—एकादशकश्च गणस्तन्मात्रपञ्चकश्चैव. गौडपाद—एकादशकश्च गणस्तन्मात्रः पञ्चकश्चैव. माठर reads ऐन्द्रिय एकादशकस्तन्मात्रपञ्चकश्चैव.
4. गौडपाद and others— भूतादेस्तन्मात्रः.
5. माठर—श्रोत्रत्वक्चक्षूरसननासिकाऽऽख्यानि.
   गौडपाद—चक्षुःश्रोत्रघ्राणरसनस्पर्शनकानि.
   जयमङ्गला and वाचस्पति—चक्षुःश्रोत्रघ्राणरसनत्वगाख्यानि.
6. वाचस्पति—वाक्पाणिपादपायूपस्थानि; others— °यूपस्थान्.
7. भट्टोत्पल's commentary on बृहत्संहिता, Pt. 1, p. 7, adopts this reading of the kārikā (27). परमार्थ's Chinese version supports the reading of the first line, but his reading of the second line corresponds with the reading adopted by वाचस्पति, who along with गौडपाद and जयमङ्गला reads this कारिका as:
   उभयात्मकमत्र मनः सङ्कल्पकमिन्द्रियञ्च साधर्म्यात् ।
   गुणपरिणामविशेषान्नानात्वं बाह्यभेदाश्च ॥
   माठर reads ग्राह्यभेदाश्च in place of बाह्यभेदाश्च.

रूपादिषु[1] पञ्चानामालोचनमात्रमिष्यते वृत्तिः ।
वचनादानविहरणोत्सर्गानन्दाश्च पञ्चानाम् ॥ 28॥

[2]स्वालक्षण्यं वृत्तिस्त्रयस्य सैषा भवत्यसामान्या ।
सामान्यकरणवृत्तिः प्राणाद्या वायवः पञ्च ॥ 29॥

युगपच्चतुष्टयस्य तु वृत्तिः क्रमशश्च तस्य निर्दिष्टा ।
दृष्टे तथाप्यदृष्टे त्रयस्य तत्पूर्विका वृत्तिः ॥ 30॥

स्वां स्वां प्रतिपद्यन्ते [3]परस्पराकूतहेतुकीं वृत्तिम् ।
पुरुषार्थ एव हेतुर्न केनचित् कार्यते करणम् ॥ 31॥

करणं त्रयोदशविधं तदाहरणधारणप्रकाशकरम् ।
कार्यञ्च तस्य दशधाऽऽहार्यं धार्यं प्रकाश्यञ्च ॥ 32॥

अन्तःकरणं त्रिविधं दशधा बाह्यं त्रयस्य विषयाख्यम् ।
साम्प्रतकालं बाह्यं त्रिकालमाभ्यन्तरं करणम् ॥ 33॥

बुद्धीन्द्रियाणि तेषां पञ्च विशेषाऽविशेषविषयाणि ।
वाग्भवति शब्दविषया [4]शेषाण्यपि [5]पञ्चविषयाणि ॥ 34॥

सान्तःकरणा बुद्धिः सर्वं विषयमवगाहते यस्मात् ।
तस्मात् त्रिविधं करणं द्वारि द्वाराणि शेषाणि ॥ 35॥

एते प्रदीपकल्पाः परस्परविलक्षणा गुणविशेषाः ।
कृत्स्नं पुरुषस्यार्थं प्रकाश्य बुद्धौ प्रयच्छन्ति ॥ 36॥

सर्वं प्रत्युपभोगं यस्मात् पुरुषस्य साधयति बुद्धिः ।
सैव च विशिनष्टि [6]यतः प्रधानपुरुषान्तरं सूक्ष्मम् ॥ 37॥

तन्मात्राण्यविशेषास्तेभ्यो भूतानि पञ्च पञ्चभ्यः ।
एते स्मृता विशेषाः शान्ता घोराश्च मूढाश्च ॥ 38॥

सूक्ष्मा मातापितृजाः सह प्रभूतैस्त्रिधा विशेषाः स्युः ।
सूक्ष्मास्तेषां नियता मातापितृजा निवर्तन्ते ॥ 39॥

---

1. वाचस्पति and जयमङ्गला read शब्दादिषु.
2. माठर—स्वालक्षण्या.
3. जयमङ्गला—परस्पराकूतहैतुकीं.
4. गौडपाद, जयमङ्गला, वाचस्पति read °शेषाणि तु; माठर—शेषाण्यपि.
5. जयमङ्गला—°विषयीणि.
6. माठर—ततः in place of यतः.

पूर्वोत्पन्नमसक्तं नियतं महदादि सूक्ष्मपर्यन्तम् ।
संसरति निरुपभोगं भावैरधिवासितं लिङ्गम् ।। 40।।

चित्रं यथाऽऽश्रयमृते स्थाण्वादिभ्यो विना यथा च्छाया ।
तद्वद् विना[1] विशेषैर्न[2] तिष्ठति निराश्रयं लिङ्गम् ।। 41।।

पुरुषार्थहेतुकमिदं निमित्तनैमित्तिकप्रसङ्गेन ।
प्रकृतेर्विभुत्वयोगान्नटवद् व्यवतिष्ठते लिङ्गम् ।। 42।।

सांसिद्धिकाश्च भावाः प्राकृतिका [3]वैकृताश्च धर्माद्याः ।
दृष्टाः करणाश्रयिणः कार्याश्रयिणश्च कललाद्याः ।। 43।।

धर्मेण गमनमूर्ध्वं गमनमधस्ताद् भवत्यधर्मेण ।
ज्ञानेन चापवर्गो विपर्ययादिष्यते बन्धः ।। 44।।

वैराग्यात् प्रकृतिलयः [4]संसारो भवति राजसाद्रागात् ।
ऐश्वर्यादविघातो विपर्ययात् तद्विपर्यासः ।। 45।।

एष प्रत्ययसर्गो विपर्ययाशक्तितुष्टिसिद्ध्याख्यः ।
गुणवैषम्यविमर्दात्[5] तस्य च[6] भेदास्तु पञ्चाशत् ।। 46।।

पञ्च विपर्ययभेदा भवन्त्य[7]शक्तिश्च करणवैकल्यात् ।
अष्टाविंशतिभेदा तुष्टिर्नवधाऽष्टधा सिद्धिः ।। 47।।

भेदस्तमसोऽष्टविधो मोहस्य च दशविधो महामोहः ।
तामिस्रोऽष्टादशधा तथा भवत्यन्धतामिस्रः ।। 48।।

एकादशेन्द्रियवधाः सह बुद्धिवधैरशक्तिरुद्दिष्टा ।
सप्तदशवधा [8]बुद्धिर्विपर्ययात् तुष्टिसिद्धीनाम् ।। 49।।

---

1. गौडपाद, जयमङ्गला and माठर read विनाऽविशेषैः.
2. माठर—तिष्ठति न निराश्रयं लिङ्गम्.
3. गौडपाद and वाचस्पति read वैकृतिकाश्च, while जयमङ्गला and माठर agree with युक्ति॰.
4. माठर reads संसारो राजसाद् भवति रागात्.
5. जयमङ्गला reads गुणवैषम्यविमर्देन.
6. जयमङ्गला and माठर omit च.
7. माठर—भवन्त्यशक्तेश्च; गौडपाद agrees with युक्ति॰.
8. गौडपाद, वाचस्पति and माठर read बुद्धेर्विपर्ययात् तुष्टि॰, while जयमङ्गला reads बुद्धेर्विपर्ययास्तुष्टि॰.

[1]आध्यात्मिक्यश्चतस्रः प्रकृत्युपादानकालभाग्याख्याः ।
बाह्या विषयोपरमात् [2]पञ्च च नव तुष्टयोऽभिहिताः ॥ 50॥

ऊहः शब्दोऽध्ययनं दुःखविघाता[3]स्त्रयः सुहृत्प्राप्तिः ।
दानञ्च सिद्धयोऽष्टौ सिद्धेः पूर्वोऽङ्कुशस्त्रिविधः ॥ 51॥

न विना भावैर्लिङ्गं न विना लिङ्गेन [4]भावसंसिद्धिः ।
लिङ्गाख्यो भावाख्यस्तस्माद् [5]द्विविधः प्रवर्तते सर्गः ॥52॥

अष्टविकल्पो दैवस्तैर्यग्योनश्च पञ्चधा भवति ।
मानुष्यश्चैकविधः [6]समासतो भौतिकः सर्गः ॥ 53॥

ऊर्ध्वं सत्त्वविशालस्तमोविशालस्तु[7] मूलतः सर्गः ।
मध्ये रजोविशालो ब्रह्मादिस्तम्बपर्यन्तः ॥ 54॥

अत्र जरामरणकृतं दुःखं प्राप्नोति चेतनः पुरुषः।
लिङ्गस्याऽऽविनिवृत्तेस्तस्माद् दुःखं [8]समासेन ॥ 55॥

इत्येष प्रकृतिकृतः[9] [10]प्रवर्तते तत्त्वभूतभावाख्यः ।
प्रतिपुरुषविमोक्षार्थं स्वार्थ इव परार्थ आरम्भः ॥ 56॥

वत्सविवृद्धिनिमित्तं क्षीरस्य यथा प्रवृत्तिरज्ञस्य ।
पुरुषविमोक्षनिमित्तं तथा प्रवृत्तिः प्रधानस्य ॥ 57॥

औत्सुक्यनिवृत्त्यर्थं यथा क्रियासु प्रवर्तते लोकः ।
पुरुषस्य विमोक्षार्थं प्रवर्तते तद्वदव्यक्तम् ॥ 58॥

रङ्गस्य दर्शयित्वा निवर्तते नर्तकी यथा नृत्यात्[11] ।
पुरुषस्य तथाऽऽत्मानं प्रकाश्य विनिवर्तते प्रकृतिः ॥ 59॥

---

1. गौडपाद, जयमङ्गला and वाचस्पति read आध्यात्मिकाः.
2. वाचस्पति reads पञ्च नव तुष्टयोऽभिमताः; माठर reads पञ्च नव च तुष्टयोऽभिहिताः. गौडपाद reads पञ्च नव तुष्टयोऽभिहिताः, omitting च.
3. माठर reads दुःखविघातत्रयं.
4. जयमङ्गला—भावनिष्पत्तिः; गौडपाद, वाचस्पति, माठर read भावनिर्वृत्तिः.
5. माठर reads भवति द्विधा सर्गः.
6. गौडपाद reads समासतोऽयं त्रिधा सर्गः.
7. गौडपाद, जयमङ्गला, वाचस्पति and माठर read तमोविशालश्च.
8. Except माठर, others read स्वभावेन.
9. गौडपाद reads प्रकृतिकृतौ.
10. माठर reads महदादिविषयभूतपर्यन्तः; गौडपाद, जयमङ्गला, वाचस्पति read महदादिविशेषभूतपर्यन्तः.
11. जयमंगला—नृत्तात्.

[1]नानाविधैरुपायैरुपकारिण्यनुपकारिणः पुंसः ।
गुणवत्यगुणस्य सततस्तस्यार्थमपार्थकञ्चरति ॥ 60॥

प्रकृतेः सुकुमारतरं न किञ्चिदस्तीति मे मतिर्भवति ।
या दृष्टाऽस्मीति पुनर्न दर्शनमुपैति पुरुषस्य ॥ 61॥

[2]तस्मान्न बध्यतेऽसौ न मुच्यते नापि संसरति कश्चित् ।
संसरति बध्यते मुच्यते च नानाश्रया प्रकृतिः ॥ 62॥

रूपैः [3]सप्तभिरेव बध्नात्यात्मानमात्मना प्रकृतिः ।
सैव च पुरुषार्थं प्रति विमोचयत्येकरूपेण ॥ 63॥[4]

एवं तत्त्वाभ्यासा[5]न्नास्मि न मे नाहमित्यपरिशेषम् ।
अविपर्ययाद् विशुद्धं केवलमुत्पद्यते ज्ञानम् ॥ 64॥

[6]तेन निवृत्तप्रसवामर्थवशात् सप्तरूपविनिवृत्ताम् ।
प्रकृतिं पश्यति पुरुषः प्रेक्षकवदवस्थितः स्वस्थः[7] ॥ 65॥

दृष्टा मयेत्युपेक्षक[8] एको दृष्टाऽहमित्युपरतैका[9] ।
सति संयोगेऽपि तयोः प्रयोजनं नास्ति सर्गस्य ॥ 66॥

सम्यग्ज्ञानाधिगमाद्[10] धर्मादीनामकारणप्राप्तौ ।
तिष्ठति संस्कारवशाच्चक्रभ्रमवद्[11] धृतशरीरः ॥ 67॥

प्राप्ते शरीरभेदे चरितार्थत्वात् प्रधानविनिवृत्तौ ।
ऐकान्तिकमात्यन्तिकमभयं[12] कैवल्यमाप्नोति ॥ 68॥

---

1. युक्तिदीपिका lost on the कारिकाs—60, 61, 62, 63.
2. माठर and गौडपाद read तस्मान्न बध्यते नापि मुच्यते, while जयमङ्गला and वाचस्पति read °बध्यतेऽद्धा न मुच्यते.
3. गौडपाद, जयमङ्गला and वाचस्पति read सप्तभिरेव तु.
4. The Chinese version does not read this कारिका.
5. This first pāda of the कारिका is not commented upon in युक्ति°.
6. The कारिकाs (65 and 66) not commented upon in युक्ति°.
7. वाचस्पति—स्वच्छः.
8. गौडपाद reads रङ्गस्थ इत्युपेक्षक°.
9. गौडपाद reads दृष्टाऽहमित्युपरमत्येका; माठर—उपरताऽन्या; वाचस्पति—°रमत्यन्या.
10. This first पाद of the kārikā (67) is left uncommented upon in युक्ति°.
11. वाचस्पति—°भ्रमिवद्.
12. गौडपाद and वाचस्पति read उभयं in place of अभयं.

पुरुषार्थार्थमिदं शास्त्रं[1] गुह्यं परमर्षिणा समाख्यातम् ।
स्थित्युत्पत्तिप्रलयाश्चिन्त्यन्ते यत्र भूतानाम् ॥ 69॥

एतत्पवित्रमग्र्यं मुनिरासुरयेऽनुकम्पया प्रददौ ।
आसुरिरपि पञ्चशिखाय तेन च बहुधा[2] कृतं तन्त्रम् ॥ 70॥

शिष्यपरम्परयाऽऽगतमीश्वरकृष्णेन चैतदार्याभिः ।
संक्षिप्तमार्यमतिना सम्यग् विज्ञाय सिद्धान्तम् ॥ 71॥

[3]सप्तत्यां किल येऽर्थास्तेऽर्थाः कृत्स्नस्य षष्टितन्त्रस्य ।
आख्यायिकाविरहिताः परवादविवर्जिताश्चापि ॥ 72॥[4]

---

[1] गौडपाद, जयमङ्गला, वाचस्पति, माठर read पुरुषार्थज्ञानमिदं, omitting शास्त्रं before गुह्यं.

[2] माठर—बहुलीकृतम्.

[3] This कारिका is introduced in the युक्ति॰ with आह च, which is not the usual style of the author for the introduction of a कारिका. Moreover, he does not comment upon it as such. Is it then a part of the कारिका text? जयमङ्गला and वाचस्पति read सप्तत्यां ... श्चापि, while माठर reads सप्तत्यां ... श्चेति.

[4] गौडपाद and माठर read another कारिका after this—
तस्मात् समासदृष्टं शास्त्रमिदं नाऽर्थतश्च परिहीनम् ।
तन्त्रस्य च बृहन्मूर्तेर्दर्पणसंक्रान्तमिव बिम्बम् ॥ 73॥

Appendix-II

Tables of Classifications

[In this Appendix various classifications, as they are found in the Sāṃkhyakārikā, Yuktidīpikā and Śāṃkhyatattvakaumudī, are given. For explanation of technical terms, see Appendix–IV—सांख्यकोष]

Table 1

षष्टिः पदार्थानाम्

1. एकत्वम्
2. अर्थवत्त्वम्
3. पारार्थ्यम्

—प्रधानमधिकृत्य

4. अन्यता
5. अकर्तृत्वम्
6. बहुत्वम्
7. शेषवृत्तिः

—पुरुषमधिकृत्य

उभयमधिकृत्य—

8. अस्तित्वम्
9. वियोगः
10. योगः

चूलिकार्थाः दश

11–15 विपर्ययः (पञ्चविधः)
16–24 तुष्टिः (नवविधा)
25–52 अशक्तिः (करणानामसामर्थ्यम् अष्टाविंशतिधा)
53–60 सिद्धिः (अष्टविधा)

— प्रत्ययाः (पञ्चाशत्)

Table 2

चूलिकार्थाः (मौलिकार्थाः) दश

प्रधानमधिकृत्य	पुरुषमधिकृत्य	उभयमधिकृत्य
1. एकत्वम्	4. अन्यता	8. अस्तित्वम्
2. अर्थवत्त्वम्	5. अकर्तृत्वम्	9. वियोगः
3. पारार्थ्यम्	6. बहुत्वम्	10. योगः
	7. शेषवृत्तिः	

Table 3

तन्त्रसम्पत् or तन्त्रगुण or तन्त्रयुक्ति

1. सूत्रोपपत्तिः
2. प्रमाणोपपत्तिः
3. अवयवोपपत्तिः
4. अन्यूनता
5. संशयोक्तिः
6. निर्णयोक्तिः
7. उद्देशः
8. निर्देशः
9. अनुक्रमः
10. संज्ञा
11. उपदेशः
12. उत्सर्गः
13. अपवादः
14. अतिदेशः

Table 4

प्रत्ययाः (पञ्चाशत्)

1-5—विपर्ययः	(5)
6-14—तुष्टिः	(9)
15-42—अशक्तिः	(28)
43-5—सिद्धिः	(8)

Table 5

प्रमाणानि (3)


1. प्रत्यक्षम्
2. अनुमानम्
3. आप्तवचनम्
पूर्ववत्
शेषवत्
सामान्यतोदृष्टम्
वीतः
अवीतः

Table 6

अवयवाः (10)


व्याख्याङ्गभूताः (5)
परप्रत्यायनाङ्गभूताः (5)
जिज्ञासा
संशयः
प्रयोजनम्
शक्यप्राप्तिः
संशयव्युदासाः
प्रतिज्ञा
हेतुः
दृष्टान्तः
उपनयः
निगमनम्

Table 7

संज्ञा


अर्थनिबन्धना
स्वरूपनिबन्धना

Table 8


सर्गः
भौतिकः
लिङ्गाख्यः (तान्मात्रः)
भावाख्यः (पञ्चाशत् प्रत्ययाः)
दैवः (8)
तैर्यग्योनः (5)
मानुष्यः (1)
ब्राह्मः
प्राजापत्यः
ऐन्द्रः
पैत्रः
गान्धर्वः
याक्षः
राक्षसः
पैशाचः
पशुः
मृगः
पक्षी
सरीसृपः
स्थावरः

Table 9


दुःखम् and सुखम् (3)
आध्यात्मिकम्
आधिदैविकम्
आधिभौतिकम्
शारीरम्
मानसम्

Table 10


तत्त्वम् (25)
पुरुषः
प्रकृतिः
महान्
अहङ्कारः
ज्ञानेन्द्रियाणि (5)
कर्मेन्द्रियाणि (5)
मनः
तन्मात्राणि (5)
श्रोत्रम्
घ्राणम्
चक्षुः
जिह्वा
त्वक्
वाक्
पाणिः
पादः
पायुः
उपस्थः
शब्दः
स्पर्शः
रूपः
रसः
गन्धः
महाभूतानि (5)
आकाशम्
वायुः
तेजः
आपः
पृथिवी

Table 11

न प्रकृतिर्न विकृतिः (1) —पुरुषः
अविकृतिः (1) —मूलप्रकृतिः (प्रधानम्)
प्रकृतिविकृतयः (7) —महान्, अहङ्कारः, पञ्च तन्मात्राणि
विकृति (16) —पञ्च ज्ञानेन्द्रियाणि, पञ्च कर्मेन्द्रियाणि, पञ्च महाभूतानि, मनः

Table 12


गुणाः
सत्त्वम्
रजः
तमः

Table 13


अहङ्कारः
वैकृतः
भूतादिः

Table 14


इन्द्रियाणि (11)
बुद्धीन्द्रियाणि (5)
कर्मेन्द्रियाणि (5)
मनः
श्रोत्रम्
त्वक्
चक्षुः
जिह्वा
घ्राणम्
वाक्
पाणिः
पादः
पायुः
उपस्थः

Table 15


अन्तःकरणानि (3)
महान्
अहङ्कारः
मनः
वृत्तिः
सामान्या
असामान्या
प्राणाद्याः पञ्च वायवः
महतोऽध्यवसायः
अहङ्कारस्याभिमानः
मनसः सङ्कल्पः

Table 16

वायवः (5)


प्राणः
अपानः
व्यानः
समानः
उदानः

Table 17

करणानि (13)


इन्द्रियाणि (11)
महान्
अहङ्कारः
व्यापारः
कार्यम्
आहरणम्
धारणम्
प्रकाशः
आहार्यम्
धार्यम्
प्रकाश्यम्

Table 18

विषयः


विशेषः (स्थूलः)
अविशेषः (तन्मात्राणि पञ्च)
शान्तः
घोरः
मूढः
अशान्तः
अघोरः
अमूढः

Table 19

भावः (8)


वैकृतिकः
प्राकृतिकः
सांसिद्धिकः
सात्त्विकः
तामसः
धर्मः
ज्ञानम्
वैराग्यम्
ऐश्वर्यम्
अधर्मः
अज्ञानम्
अवैराग्यम्
अनैश्वर्यम्

Table 20

बन्धः (3)


प्रकृतिबन्धः
दक्षिणाबन्धः
वैकारिकबन्धः

Table 21
अकर्तृभावः (7)

1. विषयेषु अनध्यवसायः
2. सह गुणैः कार्यस्याकरणम्
3. स्थितप्रयोगस्याकरणम्
4. स्वात्मनोऽकरणम्
5. परतोऽकरणम्
6. आदेशादकरणम्
7. उभयतोऽकरणम्

Table 22
ज्ञानम्

- शब्दाद्युपलब्धिलक्षणम्
  - प्रत्यक्षम्
  - अनुमानम्
  - आगमः
- गुणपुरुषान्तरोपलब्धिलक्षणम्
  - अपूर्वम्
    - ऊहः
    - शब्दः
    - अध्ययनम्
  - अभ्यासजम्

Table 23
क्रिया

- परिणामलक्षणा
- प्रस्पन्दलक्षणा

Table 24
विरागः (4)

- यतमानसंज्ञा
- व्यतिरेकसंज्ञा
- एकेन्द्रियसंज्ञा
- वशीकारसंज्ञा

Table 25
ऐश्वर्यम् (8)

- अणिमा
- महिमा
- लघिमा
- गरिमा
- प्राप्तिः
- प्राकाम्यम्
- ईशित्वम्
- वशित्वम्

Table 26


रूपम् (23)
महान्
अहङ्कारः
तन्मात्राणि (5)
इन्द्रियाणि (11)
महाभूतानि (5)

Table 27


व्यक्तम्
रूपलक्षणम्
(रूपाणि (23))
प्रवृत्तिलक्षणम् (2)
हितकाम-प्रयोजना
अहितप्रतिषेध-प्रयोजना
फललक्षणम्
दृष्टम्
अदृष्टम्
सिद्धिः
तुष्टिः
अशक्तिः
विपर्ययः

Table 28


सांख्यस्याऽधिकरणानि (5)
प्रकृतिविकारवृत्तम्
कार्यकारणवृत्तम्
अतिशयानतिशयवृत्तम्
विषयविषयिवृत्तम्
निमित्तनैमित्तिकवृत्तम्
कारणमेव न कार्यम्
कारणं च कार्यं च
कार्यमेव न कारणम्
नैव कारणं नापि कार्यम्

Table 29


कर्मयोनिः (5)
धृतिः
श्रद्धा
सुखा
विविदिषा
अविविदिषा

Table 30

ज्ञानम्

- ईश्वरकृष्णमते
  - सांसिद्धिकम्
  - प्राकृतिकं
  - वैकृतम्
- पञ्चाधिकरणमते
  - प्राकृतम्
    - तत्त्वसमकालम्
    - सांसिद्धिकम्
    - आभिष्यन्दिकम्
  - वैकृतम्
    - स्ववैकृतम्
    - परवैकृतम्

Table 31

प्रत्ययसर्गः (50)

- विपर्ययः (5)
- अशक्तिः (28)
- तुष्टिः (9)
- सिद्धिः (8)

Table 32

विपर्ययः (5)

- तमः (8)
  - अव्यक्ते महति अहङ्कारे पञ्चसु तन्मात्रासु
- मोहः (8)
  - अष्टविधे ऐश्वर्ये
- महामोहः (10)
  - दशविधे कुटुम्बे
- तामिस्रः (18)
  - दशविधे कुटुम्बे, अष्टविधे ऐश्वर्ये च
- अन्धतामिस्रः (18)
  - दशविधे कुटुम्बे, अष्टविधे ऐश्वर्ये च

Table 33

कुटुम्ब

1. माता
2. पिता
3. पुत्रः
4. भ्राता
5. स्वसा
6. पत्नी
7. दुहिता
8. गुरुः
9. मित्रम्
10. उपकारी

Table 34

अशक्तिः (28)

इन्द्रियाणां वैकल्यम् (11)
(इन्द्रियवधाः)

बुद्धिवैकल्यम् (17)
(बुद्धिवधाः)

Table 35

इन्द्रियवैकल्यम् (11)

1. श्रोत्रस्य — बाधिर्यम्
2. चक्षुषः — आन्ध्यम्
3. नासिकायाः — अघ्रत्वम्
4. वाचः — मूकता
5. रसनस्य — जडता
6. मनसः — उन्मादः
7. त्वचः — कौष्ठ्यम्
8. पाणेः — कौण्यम्
9. उपस्थस्य — क्लैव्यम्
10. पायोः — उदावर्तः
11. पादयोः—पङ्गुता

Table 36

बुद्धिवैकल्यम् (17)

*तुष्टिविपर्ययात् (9)

1. अनम्भः
2. असलिलम्
3. अनौघः
4. अवृष्टिः
5. असुतारम्
6. असुपारम्
7. असुनेत्रम्
8. असुमारीचम्
9. अनुत्तमाभयम्

सिद्धिविपर्ययात् (8)

1. अतारम्
2. असुतारम्
3. अतारयन्तम्
4. अप्रमोदम्
5. अप्रमुदितम्
6. अमोदमानम्
7. अरम्यकम्
8. असदाप्रमुदितम्

---

* Other names for तुष्टिविपर्यय which are found elsewhere are:

1. सुवर्णा
2. अनिला
3. मनोज्ञा
4. अदृष्टिः
5. अपरा
6. सुपरा
7. सुनेत्रा
8. वसुनाडिका
9. अनुत्तमाम्भसिका respectively.

Table 37

तुष्टिः (9)

आध्यात्मिकी (4)		बाह्या (5)
1. प्रकृत्याख्या	— अम्भः	1. सुतारम्
2. उपादानाख्या	— सलिलम्	2. सुपारम्
3. कालाख्या	— ओघः	3. सुनेत्रम्
4. भाग्याख्या	— वृष्टिः	4. सुमारीचम्
		5. उत्तमाभयम्

Table 38

सिद्धिः (8)*

1. ऊहः	— तारम्	5. आधिभौतिकदुःखविघातः	— प्रमुदितम्
2. शब्दः	— सुतारम्	6. आधिदैविकदुःखविघातः	— मोदमानम्
3. अध्ययनम्	— तारयन्तम्	7. सुहृत्प्राप्तिः	— रम्यकम्
4. आध्यात्मिकदुःखविघातः	— प्रमोदम्	8. दानम्	— सदाप्रमुदितम्

Table 39

कोशः (8)

1. लोमः
2. रुधिरम्
3. मांसम्
4. अस्थिः
5. स्नायुः
6. शुक्रम्
7. अशितम्
8. पीतम्

Table 40

पञ्चपर्वाऽविद्या

तमः	मोहः	महामोहः	तामिस्रः	अन्धतामिस्रः

---

* वाचस्पति gives a different list of names for सिद्धि. They are thus:

1. अध्ययनसिद्धिः — तारम्
2. शब्दसिद्धिः — सुतारम्
3. ऊहसिद्धिः — तारतारम्
4. सुहृत्प्राप्तिः — रम्यकम्
5. दानसिद्धिः — सदामुदितम्
6–8. तिस्रश्च मुख्याः — प्रमोद–मुदित–मोदमानाः

Cf. सांख्यतत्त्वकौमुदी on कारिका 51.

A Glossary of Technical Terms of *Sāṃkhya*

अ

अकर्तृभावः —सप्तविधः। नात्मा विषयेषु स्वान्तःकरणसान्निध्येऽध्यवसायं कुरुते। न च सत्त्वादीनां प्रकाशप्रवृत्तिनियमलक्षणैर्धर्मैरितरेतरोपकारेण प्रवर्तमानानां स्वेन चैतन्यलक्षणेन, धर्मेणाङ्गभावं प्रतिपद्यते, नाप्यङ्गिभावम्। एवं सह गुणैः कार्यं न कुरुते। स्थितः प्रयोग न कुरुते। न स्वात्मनः, न परतः, नाऽप्यादेशात्, नोभयतः कार्यं कुरुते।

नाऽध्यवसायं कुरुते पुरुषो नैव स्थितिं प्रयोगं वा।
न स्वात्मनो न परतो न व्यपदेशान्न चोभयतः ॥

अतिदेशः —तन्त्रगुणेष्वेकः। सामान्यमचेतनं प्रसवधर्मि व्यक्तम्, तथा प्रधानम् (का० 11) इत्यतिदेशः।

अतिशयः —क्रियाऽभ्यासः। यत्र हि क्रिया सकृत् प्रवर्तते यत्र चासकृदावर्तते तत्रातिशयो दृष्टः।

अतीतम् —अतीतं द्विविधम्, दृष्टविषयमदृष्टविषयं च। दृष्टविषयं प्रत्यभिज्ञानम्। अदृष्टविषयं स्मृतिः। सा तु स्मृतिर्लिङ्गागमाभ्यामकस्माद् वा भवति।

अत्यन्तम् —भूतस्याऽविनाशः।

अधिकरणम् —सांख्यं पञ्च अधिकरणानि जानाति—प्रकृतिविकारवृत्तम्, कार्यकारणवृत्तम्, अतिशयानतिशयवृत्तम्, निमित्तनैमित्तिकवृत्तम्, विषयविषयिवृत्तमिति।

अध्यवसायः —गौरेवायम्, पुरुष एवायमिति यः प्रत्ययो निश्चयोऽर्थग्रहणम्।

अनुग्रहः —इष्टशरीराव्यापादनलक्षणः।

अनुमानम् —अनुमानं त्रिप्रकारमाचार्यैराख्यातम्— पूर्ववत्, शेषवत्, सामान्यतो दृष्टं च। तेषु त्रिषु सामान्योदृष्टस्य प्रयोगमात्रभेदात् द्वैविध्यम्—वीतोऽवीत इति।

अनुश्रवः —अनुश्रूयते इत्यनुश्रवः। मन्त्रब्राह्मणं यावद् वा पुरातनमनुश्रूयमाणम्। यथा श्रुतिनिबन्धनाः स्मृतयः, अङ्गानि वेदास्तर्का वा।

अनैकान्तिकः —साधनाभासेषु (हेत्वाभासेषु) एकः।

अन्तःकरणम् — बुद्धिः, अहङ्कारो मनश्चेति भेदेन त्रिकालविषयम्।

अन्तःकरणवृत्तिः—असामान्या सामान्या चेति द्विधा। बुद्धेरध्यवसायः, अहङ्कारस्याऽभिमानः, मनसः सङ्कल्प इत्यसामान्या वृत्तिः। प्राणाद्याः पञ्च वायव इति सामान्या करणवृत्तिः।

अन्धतामिस्रः —मरणविषादः पञ्चमो विपर्ययः अन्धतामिस्र इत्यभिधीयते। see also अभिनिवेशः।

अन्यूनता —पदार्थकात्स्न्र्यमशेषता(ऽन्यूनता)।

अपघातकः —अपहन्तीत्यपघातकः।

अपवर्गः —मोक्षः।

अपवादः —तन्त्रगुणेष्वेकः। यथा 'प्रकृतिविरूपं' व्यक्तमित्युत्सर्गः, 'प्रकृतिसरूपं' व्यक्तमित्यपवादः (का॰ 8)। पुनश्च, 'तद्विपरीतः' इत्युत्सर्गः, 'तथा च पुमान्' इत्यपवादः (का॰ 11)।

अपानः —अपक्रमणादपानः, योऽयं रसं धातून् शुक्रं मूत्रं पुरीषं वातार्तवगर्भांश्चाकर्षन्नधोगच्छन्नयमन्तर्वृत्तिर्वायुरपान इत्यभिधीयते।

अपूर्वज्ञानम् —ऊहः, शब्दः, अध्ययनं च।

अभावः —(अभावो नाम) तद्यथा धूमस्य भावादग्नेर्भावः प्रतीयते एवं धूमाभावादग्न्यभाव इत्ययं प्रतिद्वन्द्विसाहचर्यकल्पनयार्थापत्तिरभिहितः।

अभिघातः —अभिहन्यतेऽनेन इति। दुःखत्रयेणान्तःकरणेन चेतनाशक्तेरभिसम्बन्धः।

अभिनिवेशः —अन्धतामिस्र इत्यर्थः। सोऽयमष्टादशधा भवति। अणिमादिकमष्टविधमैश्वर्यमासाद्य दश शब्दादीन् भुञ्जानो भयमभिनिविशते।

अम्भः —तुष्टिभेदः। यदा वीतावीतैः प्रधानमधिगम्य तत्पूर्वकत्वं च महदादीनां विकाराणामानन्त्याच्च प्रधानात्मनः कृत्स्नस्य महदादिभावेन विपरिणामाऽसम्भवादेकदेशस्याऽप्रकृतिविकारभूतस्य भोक्तृत्वमकर्तृत्वं चाऽध्यवस्य सङ्गद्वेषनिवृत्तिं लभते, साऽऽद्या तुष्टिरम्भ इत्यभिधीयते।

अर्थनिबन्धना —see संज्ञा.

अर्थवादः —स्तुतिरर्थवादः। तस्य तु विहितस्य प्ररोचनार्थं या स्तुतिः सोऽर्थवादः।

अर्थापत्तिः —अर्थापत्तिर्नाम यत्रार्थयोः पूर्वमव्यभिचारमुपलभ्य पश्चादन्यतरस्य दर्शनाच्छ्रवणाद्वाऽन्यतरस्मिन्प्रतिपत्तिर्भवति। अपरा खल्वर्थापत्तिः, यत्र धर्मयोरव्यभिचारमुपलभ्य तत्प्रतिद्वन्द्विनोरपि साहचर्यकल्पना। सा तु द्विविधा, व्यभिचारिणी चाव्यभिचारिणी च।

अवयवाः —(वीतस्य) अवयवाः जिज्ञासादयः, प्रतिज्ञादयश्च। तत्र जिज्ञासादयो

व्याख्याङ्गम्, प्रतिज्ञादयः परप्रत्यायनाङ्गम्। जिज्ञासासंशयप्रयोजनशक्यप्राप्तिसंशयव्युदासलक्षणाश्च व्याख्याङ्गम्। प्रतिज्ञाहेतुदृष्टान्तोपसंहारनिगमनानि च परप्रतिपादनाङ्गम्।

अविकृतिः —अविकारा, अनुत्पाद्या।

अविद्या —तम इत्यर्थः। अविद्यया विपर्ययेण यदवधार्यते वस्तु अस्मितादयस्तत्स्वभावाः सन्तस्तदभिनिविशन्ते। तमसो भेदोऽष्टविधः—अव्यक्तमहदहङ्कारपञ्चतन्मात्रेष्वनात्मसु आत्मबुद्धिः, अष्टविधविषयत्वात्। सेयमविद्या पञ्चपर्वाऽप्युच्यते। see पञ्चपर्वाऽविद्या।

अविविदिषा —वेत्तुमिच्छाया निवृत्तिः।

अविशुद्धिः —हिंसा। प्राणिनामिष्टशरीरव्यापादनात्। योऽसौ हिंसानिमित्तकः कारुण्यान्मनसि नः परिताप उत्पद्यते सा खल्वविशुद्धिरभिप्रेता। संशयविपर्यावप्यविशुद्धिशब्देनोच्येते।

अविशेषाः —(पञ्च) तन्मात्राणि।

अवीतः —सामान्यतोदृष्टस्य अनुमानस्य एको भेदः। यदा स्वसाध्यादर्थान्तरभूतानां प्रसङ्गिनां क्षेपमपोहं कृत्वा परिशेषतः साध्यसिद्धावपदिश्यते तदाऽवीताख्यो भवति। see साधनम्।

अव्यक्तम् —अङ्गभावमगच्छतां निर्लिखितविशेषाणां गुणानामवस्थितिः।

अव्यापि —असर्वगतम्।

अशक्तिः —करणवैकल्यादसामर्थ्यम्। इयमेव वधशब्देनोच्यते। साऽशक्तिरष्टाविंशतिभेदा—बाह्यकरणवैकल्यं सह मनसा एकादशप्रकारम्, सप्तदशविधं च बुद्धिवैकल्यमिति।

असत्कार्यः —कारणे कार्याभावः।

असमवायि —नैय्यायिकानां मते कारणस्य एको भेदः।

असम्बन्धः —अविद्यमानसम्बन्धः, अयुक्तसम्बन्धो वा।

असाधुः —साधुभिरपाकृतः।

असिद्धः —साधनाभासेषु (हेत्वाभासेषु) एकः।

अस्मिता —मोह इत्यर्थः। सेयमष्टविधा—अष्टविधैश्वर्यविषयत्वात्।

अहङ्कारः —कर्तुः स्वात्मप्रत्यवमर्शात्मको योऽयमहमितिप्रत्यय उत्पद्यते स खल्वहङ्कारः। स चायं वैकारिकं-तैजस-भूतादिभेदेन त्रिविधः।

आ

आकाशः —पञ्चमहाभूतेष्वेकः। see पञ्चभूतानि।

आकूतम् —अभिप्रायः, इच्छा, सङ्कल्पः। आकूतमभिप्रायोऽभिसन्धिरित्यर्थः।

आधिदैविकम् —शीतोष्णवातवर्षाशन्यवश्यायावेशनिमित्तम्।

आधिभौतिकम् —मनुष्यपशुमृगपक्षिसरीसृपस्थावरनिमित्तम्।

आध्यात्मिकम् —आध्यात्मिकं द्विविधं शारीरं मानसं च।

आनुश्रविकः —अनुश्रवे भवः। see अनुश्रवः।

आप्तः —व्युपगतरागादिदोषः, असन्दिग्धमतिः, अतीन्द्रियार्थदृश्वा ईश्वरमहर्षिप्रभृतिर्जनः।

आत्मवचनम् —see आत्मश्रुतिः।

आप्तश्रुतिः —आप्तवचनम्। आप्तेभ्यः श्रुतिः—अपुरुषबुद्धिपूर्वक आम्नायः स पुरुषनिःश्रेयसार्थं प्रवर्तमानो निःसंशयं प्रमाणम्। मन्वादिनिबन्धनानां च स्मृतीनां वेदाङ्गतर्केतिहासपुराणानां शिष्टानां नानाशिल्पाऽभियुक्तानां चाऽदुष्टमनसां यद् वचस्तत् प्रमाणम्।

आम्नायः —अपुरुषबुद्धिपूर्वकोऽयं स्वतन्त्रः पुरुषनिःश्रेयसार्थं प्रवर्तते।

आर्षज्ञानम् —ऋषीणां ज्ञानम्।

आलोचनम् —ग्रहणम्।

आश्रितम् —आधेयम्।

इ

इन्द्रियम् —विषयं विषयं यत् प्रतिवर्तते तदिन्द्रियम्। इन्द्रियाणि एकादश। सत्त्वबहुलानि तानि वैकृतादहङ्कारात्प्रवर्तन्ते। बुद्धीन्द्रियाणि पञ्च, कर्मेन्द्रियाणि पञ्च, मन इत्येकादश। बुद्धीन्द्रियाणि कर्णत्वक्चक्षूरसननासिकाख्यानि। वाक्पाणिपादपायूपस्थाः कर्मेन्द्रियाणि।

इन्द्रियवधः —वधः अशक्तिः असामर्थ्यं वा। इन्द्रियाणां वधाः इन्द्रियवधाः। स्वसंस्कारविशेषयोगात् प्रकर्षापन्ने तमसा ग्रहणरूपस्य सत्त्वस्याभिभवात् स्वविषयेष्वप्रवृत्तयः। एकादशविधोऽयं वधः। तद्यथा—

बाधिर्यमान्ध्यमघ्रत्वं मूकता जडता च या।
उन्मादकौष्ठ्यकौण्यानि क्लैब्योदावर्तपङ्गुताः॥

इन्द्रियवृत्तिः —शब्दस्पर्शरूपरसगन्धेषु पञ्चानां श्रोत्रत्वक्चक्षूजिह्वाघ्राणानां श्रवणस्पर्शनदर्शनरसनघ्राणलक्षणो व्यापारो बुद्धीन्द्रियवृत्तिः। वचनादानविहरणोत्सर्गानन्दाश्च पञ्चानां—वाक्पाणिपादपायूपस्थानाम्—कर्मेन्द्रियाणां यथाक्रमं वृत्तयः।

उ

उत्सर्गः —एकः तन्त्रगुणः। 'प्रकृतिविरूपम्' व्यक्तमित्युसर्गः।

उत्तमाभयम्	—तुष्टिभेदः। उपभोगार्थिनाऽवश्यमन्योपघातः कार्यो निहितदण्डेन वा विषयोपभोगस्त्याज्य इत्येतस्माद् दर्शनान्माध्यस्थ्यं लभते। सा नवमी तुष्टिरुत्तमाऽभयमित्युच्यते।
उद्देशः	—एकः तन्त्रगुणः। संक्षेपवचनमुद्देशः। तद्यथा, एष प्रत्ययसर्गो विपर्ययाशक्तितुष्टिसिद्ध्याख्यः (का० 46)। see तन्त्रगुणाः।
उदानः	—वायुभेदः। मूर्धारोहणादात्मोत्कर्षणाच्चोदानः। यस्त्वयं प्राणापानसमानानां स्थानान्यतिक्रम्य रसं धातूंश्चादाय मूर्धानमारोहति ततश्च प्रतिहतो निवृत्तः स्थानकरणाऽनुप्रदानविशेषात् शब्दस्याऽभिव्यक्तिनिमित्तं भवति अयमन्तर्वृत्तिर्वायुरुदान इत्युच्यते।
उदाहरणम्	—निदर्शनम्, दृष्टान्तः। हेतोः प्रमेयसहभावित्वनिदर्शनम्।
उपघातः	—अभिप्रेतशरीरव्यापादनलक्षणः।
उपनयः	—साध्यदृष्टान्तयोरेकक्रियोपसंहार (उपनयः)।
उपमानम्	—सांख्य-अस्वीकृतं न्यायादिभिः स्वीकृतमेकं प्रमाणम्।
उपसर्जनत्वम्	—गौणत्वम्।
उपष्टम्भः	—प्रयत्नः।
उपादानम्	—कारणं तन्त्वादि।
ऊर्ध्वस्रोतस्	—सत्त्वबहुला ऊर्ध्वस्रोतसः, ते देवाः।

ए

एकान्तः	—नियमेन भावः।
एकेन्द्रियसंज्ञा	—विरागभेदः। विपरिपक्वसर्वेन्द्रियस्तु सङ्कल्पमात्राऽवस्थितकषायो यदा भवति तदा एकेन्द्रियसंज्ञा (विरागस्य भवति)। निवृत्तसर्वेन्द्रियविषयेच्छस्य यतेरेकमेव मनोलक्षणमिन्द्रियं तदा परिपक्वं भवति।

ऐ

ऐतिह्यम्	—कैश्चित् स्वीकृतं सांख्य-अस्वीकृतमेकं प्रमाणम्।
ऐन्द्रियः	—इन्द्रियाणामयमैन्द्रियः। Cf. ऐन्द्रिय एकादशकः (का० 24)।
ऐश्वर्यम्	—अप्रतीघातलक्षणम्। तदष्टविधम्—अणिमा, महिमा, लघिमा, गरिमा, प्राप्तिः, प्राकाम्यम्, ईशित्वम्, वशित्वं च।

ओ

ओघः	—तुष्टिभेदः। दृश्यन्ते च प्राणिनां कालानुरूपाः स्वभावाहारविहारव्यवस्थाः। तस्मादसावेव कारणम्। तदेकदेशश्चाप्रकृतिविकारभूतो भोक्तेत्येतस्माद् दर्शनात् सङ्गद्वेषनिवृत्तिं लभते, सा तृतीया तुष्टिरोघः।

क

करणम् —करणं त्रयोदशविधम्। पञ्च कर्मेन्द्रियाणि पञ्च बुद्धीन्द्रियाणि मनोऽहङ्कारो बुद्धिश्चेत्येतत्सर्व पुरुषार्थोपयोगि (करणम्)।

करणकार्यम् —कार्यं च तस्य (-करणस्य-) दशधा—आहार्यम्, धार्यम्, प्रकाश्यं च। दशधेति पञ्च विशेषाः पञ्चाऽविशेषाः कर्मेन्द्रियाणां वाक्पाणिपादपायूपस्थानां यथाक्रमं वचनादानविहरणोत्सर्गानन्दाः यथायथमाहार्यम्। ते च दिव्यादिव्यतया दशेति दशविधमाहार्यमप्यन्तःकरणस्य त्रयस्य प्राणादिलक्षणया वृत्त्या शरीरम्, तच्च पार्थिवादि पाञ्चभौतिकम्। तदेतत् शरीराणि पञ्चविधानि दिव्यादिव्यतया दशेति धार्यमपि दशधा। बुद्धीन्द्रियाणां शब्दस्पर्शरूपरसगन्धाः यथायथं व्याप्याः, ते च दिव्यादिव्यतया दशेति प्रकाश्यमपि दशधा।

करणक्रिया —आहरणम्, धारणम्, प्रकाशनं चेति त्रिधा। तत्राऽऽहरणं कर्मेन्द्रियाणि कुर्वन्ति, विषयार्जनसमर्थत्वात्। धारणं बुद्धीन्द्रियाणि कुर्वन्ति, विषयसन्निधाने सति श्रोत्रादिवृत्तेस्तद्रूपापत्तेः। प्रकाशमन्तः करणं करोति, निश्चयसामर्थ्यात्। अपर आह—आहरणं कर्मेन्द्रियणि कुर्वन्ति। धारणं मनोऽहङ्कारश्च। प्रकाशनं बुद्धीन्द्रियाणि बुद्धिश्च। see also करणकार्यम्।

कर्मयोनिः —धृतिः, श्रद्धा, सुखा, विविदिषा, अविविदिषा चेति पञ्च कर्मयोनयः।

कर्मेन्द्रियाणि —वाक्, पाणिः, पादः, पायुः, उपस्थश्चेति पञ्च कर्मेन्द्रियाणि। see इन्द्रियम् and इन्द्रियवृत्तिः।

कारणम् —विशेषोऽर्थः— निवृत्तविशेषाणामविभागात्मनाऽवस्थानं कारणम्।

कार्यम् —सूक्ष्माणां मूर्तिलाभः कार्यम्। कारणादनर्थान्तरभूतम्।

कार्यकारणवृत्तम्—पञ्चेष्वधिकरणेष्वेकम्। see अधिकरणम्।

कालः —क्रियमाणक्रियाणां विशिष्टाऽवधिसरूपप्रत्ययनिमित्तत्वम्। क्रियास्वेव कालसंज्ञा। see ओघः।

कुटुम्बः —कुटुम्बः दशविधः मातृ-पितृ-भ्रातृ-स्वसृ-पत्नी-पुत्र-दुहितृ-गुरु-मित्रोपकारिलक्षणः।

कैवल्यम् —मोक्षः। कैवल्यमिति विवेकपरिच्छिन्नं सत्त्वादिभिरसंसर्गधर्मित्वमात्मनः।

कोशः —लोम-रुधिर-मांसाऽस्थि-स्नायु-शुक्रलक्षणः षड्विधः। अशितपीताध्यासादष्टौ— इत्यपरे। सूक्ष्मशरीरमेतैः कोशैरावेष्टितम्।

क्रिया —क्रिया द्विविधा, परिणामलक्षणा प्रस्पन्दलक्षणा च। तत्र परिणामलक्षणया सहकारिभावान्तरानुगृहीतस्य धर्मिणः पूर्वधर्मात् प्रच्युतिः। प्रस्पन्दलक्षणाः प्राणादयः कमेन्द्रियवृत्तयश्च वचनाद्याः।

क्षयः —अत्यन्ताभावपर्यायः।

ग

गुणः —सत्त्वरजस्तमांसि।

गुरुत्वम् —कार्यस्याधोगमनहेतुर्धर्मः, करणस्य वृत्तिमन्दता।

ग्रहणम् —विषयसम्पर्कात् ताद्रूप्यापत्तिरिन्द्रियवृत्तिः।

घोराः —पञ्चमहाभूतानि यतः शान्ता घोराः मूढाश्च, अतो 'विशेषाः' इत्युच्यन्ते। घोरास्तु शेषादिधर्मनिमित्तत्वात्। see मूढाः।

च

चित्तम् —सांख्य (-योगे) बुद्धिपर्यायः।

चेतनाशक्तिः —पुरुषपर्यायः।

चेष्टा —कैश्चित्स्वीकृतं सांख्येनास्वीकृतं एकं पृथक् प्रमाणम्। चेष्टा नाम अभिप्रायसूचकः कश्चिदेवोदरताडनाञ्जलिकरणादिः शरीरव्यापारः।

चूलिकार्थाः —मूलिकार्था अप्येत उच्यन्ते। तेषां षष्टिपदार्थेषु गणना। ते च दश तद्यथा—प्रधानास्तित्वम्, एकत्वम्, अर्थवत्त्वम्, पारार्थ्यम्, अन्यता, अनैक्यम्, संयोगः, वियोगः, शेषवृत्तिः, अकर्तृत्वञ्चेति।

ज

जन्म —महदादेः सूक्ष्मशरीराश्रितस्य लिङ्गस्य यथासंस्कारं बाह्येन शरीरेण सम्बन्धः।

जरा —जीर्यतेऽनयेति जरा, क्षय इत्यर्थः।

जिज्ञासा —ज्ञातुमिच्छा।

ज्ञः —चेतनाशक्तिरूपत्वात् चित्रं गुणवृत्तं जानातीति ज्ञः।

ज्ञानम् —द्विविधम्—शब्दाद्युपलब्धिलक्षणम्, गुणपुरुषान्तरोपलब्धिलक्षणं च। शब्दाद्युपलब्धिलक्षणं प्रत्यक्षाऽनुमानागमरूपम्। गुणपुरुषान्तरोपलब्धिलक्षणं च द्विविधम्—अपूर्वम्, अभ्यासजं च। पुनरपि ज्ञानमीश्वरकृष्णमते सांसिद्धिकं प्राकृतिकं वैकृतिकं चेति त्रिविधम्। पञ्चाधिकरणमते तु द्विविधम्—प्राकृतिकं वैकृतिकं च। प्राकृतिकं त्रिविधम्—तत्त्वसमकालम्, सांसिद्धिकम्, आभिष्यन्दिकं च। वैकृतिकमपि द्विविधम्—स्ववैकृतम्, परवैकृतं च। स्ववैकृतं तारकम् (q.v.), परवैकृतं सिद्ध्यन्तराणि। विन्ध्यवासिनस्तु नास्ति तत्त्वसमं नास्ति च सांसिद्धिकम्।

त

तत्त्वम् —पञ्चविंशतिः। see Appendix–II.

तन्त्रम् —शास्त्रपर्यायः।

तन्त्रगुणाः —सूत्रप्रमाणावयवोपपत्तिरन्यूनता संशयनिर्णयोक्तिः।
उद्देशनिर्देशमनुक्रमश्च संज्ञोपदेशाविह तन्त्रसम्पत्।।
एतेभ्योऽतिरिक्तानां उत्सर्ग-अपवाद-अतिदेशादीनां तन्त्रगुणेषु समावेशः क्रियते।

तन्त्रयुक्तिः —तन्त्रगुणपर्यायः।

तन्मात्राणि —तान्मात्रस्तु (सर्गः) तमोबहुलो भूतादिसंज्ञकात्तमःप्रधानादहङ्कारात् प्रतर्तते। तन्मात्राणि खल्वविशेषाः। तानि तु पञ्च— शब्दतन्मात्रं, स्पर्शतन्मात्रं, रूपतन्मात्रं, रसतन्मात्रं, गन्धतन्मात्रमिति। कथं पुनस्तन्मात्रति। उच्यते— तुल्यजातीयविशेषाऽनुपपत्तेः। तस्य तस्य गुणस्य सामान्यमात्रमेव, न विशेष(:) इति तन्मात्रास्वेतेऽविशेषाः।

तमस् —(i) त्रिगुणेष्वेकः; (ii) पञ्चविपर्ययभेदेष्वेकः। अश्रेयसि प्रवृत्तस्य प्रत्ययावरे श्रेयोऽभिमाने आद्यो विपर्ययस्तम इत्यभिधीयते। अश्रेयसि श्रेयोऽभिमानः। see अविद्या।

तान्त्रिकाः —पञ्चाधिकरणप्रभृतयः।

तामिस्रः —अष्टविधे कार्यकरणसामर्थ्ये दशविधे च कुटुम्बे विषयेषु वा यः प्रतिहन्यमानस्यावेशः। एको विपर्ययभेदः। क्रोधश्चतुर्थो विपर्ययः तामिस्र इत्यभिधीयते। see द्वेषः।

तारम् —तारकमप्युच्यते। सिद्धिभेदः। यदा प्रत्यक्षानुमानागमव्यतिरेकेणाऽभिप्रेतमर्थं विचारणामात्रबलेनैव प्रतिपद्यते साऽऽद्या सिद्धिः तारम् तारकमिति वाऽपदिश्यते।

तारकम् —see तारम्।

तारयन्तम् —सिद्धिभेदः। यदा त्वन्योपदेशादप्यसमर्थो प्रतिपत्तुमध्ययनेन साधयति सा तृतीया सिद्धिः तारयन्तमित्यपदिश्यते।

तुष्टिः —तुष्टिस्तु सन्निहितविषयसन्तोषाच्चिकीर्षितादर्थादूनेन निर्वृतिः। बाह्याध्यात्मिकानां सुखदुःखमोहानां प्राप्तिष्वपगमेषु (वा) वाचाऽव्यवस्थ्यलक्षणा उपायनवत्वान्नव तुष्टयो भवन्ति। सेयं प्रथमतो द्विविधा—आध्यात्मिकी बाह्या च। आध्यात्मिक्य इति शरीरशरीरिणोर्विशेष-मुपलिप्समानेन योगिना यदानात्मन्यात्मबुद्धिरवस्थाप्यते सा खल्वाध्यात्मिकी तुष्टिरित्यभिधीयते। अव्युत्पन्नात्मविचारस्य योगिनो विषयदोषदर्शनमात्रात्

सङ्गद्वेषनिवृत्तिर्बाह्या तुष्टिः। आध्यात्मिकी च पुनः चतुर्भेदा—प्रकृत्युपादानकालभाग्याख्या। तत्र प्रकृतितुष्टिरम्भः, उपादानतुष्टिः सलिलम्, कालतुष्टिरोघः, भाग्यतुष्टिः वृष्टिरित्युच्यते। बाह्याऽपि पञ्चविषयोपरमात् पञ्चप्रभेदा। ते प्रभेदा च सन्ति—सुतारम्, सुपारम्, सुनेत्रम्, सुमारीचम्, उत्तमाभयमिति।

तुष्टिविपर्ययः —see बुद्धिवधाः।

तैजस —तैजसादुभयम्। अस्मात्तु तैजसादुभयमप्येतत्तन्मात्रेन्द्रियसंज्ञकं प्रवर्तते।

तैर्यग्योनसर्गः —पञ्चधा—पशुमृगपक्षिसरीसृपस्थावराः।

द

दर्शनम् —दृष्टिर्दर्शनम्।

दक्षिणाबन्धः —त्रिषु बन्धेष्वेकः। संसारः। अयं दृष्टाऽनुश्रविकविषयाभिलाषाद् भवति।

